कालिदासग्रन्थावली

प्रथमो भागः

प्रधानसम्पादको
डॉ. मिथिलाप्रसादस्त्रिपाठी

सम्पादकोऽनुवादकश्च
म.म.प्रो.रेवाप्रसादद्विवेदी

संयुक्तसम्पादकः
डॉ.सदाशिवकुमारो द्विवेदी

कालिदाससंस्कृतअकादमी, उज्जयिनी

प्रस्तुत **कालिदासग्रन्थावली** में संस्कृत, प्राकृत और अपभ्रंश तीनों भाषाओं का मूलपाठ व्यवस्थित कर लिया गया है। प्राकृत को भरतमुनि के नाट्यशास्त्र के १७वें अध्याय का आधार मिल गया और 'कालिदास की प्राकृत असाध्य है' यह घोषणा विफल हो गई। नाट्यसंवादों में प्राप्त असंगतियाँ दूर कर ली गई हैं और उन्हें संदर्भ संख्या दे दी गई है। उनकी दृश्य और सूच्य वस्तुओं का स्पष्ट विभाजन अंकित कर दिया गया है। नाटक का आरम्भ जिस पूर्वरङ्ग से होता था उस का भी निर्देश भरतमुनि के नाट्यशास्त्र के आधार पर कर दिया गया है। तदनुसार 'पुष्करवाद्यनान्दी' शीर्षक जोड़ दिया गया है। दूसरी मंगलाशंसात्मक नान्दी का भी निर्देश कर दिया गया है।

काव्यों का क्रम प्रथम दो संस्करणों (१९७६ व १९८६) से भिन्न रखा गया है और रघुवंश का आरम्भ अपनी स्वाभाविकता पा गया है। ऋतुसंहार को माना तो गया है किसी दूसरे कालिदास की रचना, किन्तु उसे भी यहाँ काव्यभाग के अन्त मे स्थान दे दिया गया है, किन्तु कुमारसंभव को केवल अष्टम सर्ग तक ही रखा गया है। अष्टम सर्ग से भोजराज ने ४१ पद्य उद्धृत किए हैं। ९–१७ सर्ग जो कुछ संस्करणों में दिए गए हैं, उन्हें वक्तव्य और शिल्प दोनों के आधार पर १–८ सर्ग के रचयिता की रचना नहीं ही कहा जा सकता। भोज ने भी उनका और ऋतुसंहार का भी उल्लेख नहीं किया है। इसी प्रकार विक्रमोर्वशीय के चतुर्थ अंक की अपभ्रंश–गाथाओं को माना तो गया है प्रक्षिप्त ही किन्तु उन्हें यथास्थान दे दिया गया है और उनकी संस्कृत छाया भी जोड़ दी गई है।

कालिदास के नाटकों के ६ हस्तलेख अमेरिका के हार्वर्डविश्वविद्यालय में सुलभ थे। उनमें से पाँच का पूर्ण उपयोग कर लिया गया है। काव्यभाग में भी वहाँ सुरक्षित अद्भुत हस्तलेखों का उपयोग कर लिया गया है। इस प्रकार प्रस्तुत संस्करण की प्रत्येक रचना पाण्डुग्रन्थों के आधार पर संपादित हो चुकी है। इसमें हिन्दी अनुवाद भी दे दिया गया है।

R
0८२
मिथि-क

127150

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

विषय संख्या R 0८२ मिथि-क आगत नं० 127150
लेखक मिथिलाप्रसाद त्रिपाठी
शीर्षक कालिदास ग्रन्थावली

क	सदस्य संख्या	दिनांक	सदस्य संख्या

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
२

वर्ग संख्या ०८२
मोवि-के

आगत संख्या 127150

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।

,f=i
127150

कालिदासग्रन्थावली

(तृतीयं संस्करणम्)

प्रथमो भागः

काव्यखण्डम्

प्रधानसंपादको

डॉ. मिथिलाप्रसादस्त्रिपाठी
निदेशकः, कालिदाससंस्कृतअकादमी,
उज्जयिनी

सम्पादकोऽनुवादकश्च

म.म. प्रो. रेवाप्रसादद्विवेदी
सम्मानितसंस्कृताचार्यः
काशीहिन्दूविश्वविद्यालयः
वाराणसी

127150

संयुक्तसम्पादकः

डॉ. सदाशिवकुमारो द्विवेदी
रीडरः, संस्कृतविभागः, कलासंकायः,
काशीहिन्दूविश्वविद्यालयः,
वाराणसी

127150

प्रकाशिका
कालिदाससंस्कृतअकादमी
उज्जयिनी

कालिदासग्रन्थावली

तृतीय संस्करण, समीक्षापूर्ण सम्पादन तथा हिन्दीभाषानुवाद ऋतुसंहार सहित।

प्रथमो भागः — काव्यखण्डम्

१. रघुवंशम्	१-१९ सर्गाः
२. कुमारसम्भवम्	१-८ सर्गाः
३. मेघदूतम्	१-१११ पद्यानि
४. ऋतुसंहारम्	१-६ ऋतुवर्णनाः

R
022.
कालि — 51

द्वितीयो भागः — नाट्यखण्डम्

१. मालविकाग्निमित्रम्	१-५ अङ्काः
२. विक्रमोर्वशीयम्	१-५ अङ्काः
३. अभिज्ञानशाकुन्तलम्	१-७ अङ्काः

राष्ट्रीयसंस्कृतसंस्थान द्वारा मानवसंसाधनविकासमन्त्रालय, नई दिल्ली से
कालिदाससंस्थान, वाराणसी को प्राप्त आर्थिक अनुदान से निर्मित।

पाण्डुग्रन्थों के उपयोग की अनुमति हाउटन लाइब्रेरी, हार्वर्ड यूनिवर्सिटी, अमेरिका (हामा.) से प्राप्त।

प्रधानसम्पादक — प्रो. मिथिलाप्रसाद त्रिपाठी

सम्पादकद्वय — म.म. प्रो. रेवाप्रसाद द्विवेदी
डॉ. सदाशिवकुमार द्विवेदी

© सम्पादकयोः

मूल्यम् —
पञ्चशतं रूप्यकाणि

प्रकाशनवर्षम् २००८
कालिदाससंस्कृतअकादम्या स्वर्णजयन्तीवर्षम्

प्रकाशिका—
कालिदाससंस्कृतअकादमी,
उज्जैन

मुद्रक—
पंचायतीराज मुद्रणालय सहकारी मर्यादित
उज्जैन

COMPLETE WORKS OF
KĀLIDĀSA
(THIRD EDITION)

FORWARDED FREE OF COST WITH THE COMPLIMENTS OF
RASHTRIYA SANSTHAN (DEEMED UNIVERSITY), NEW DELHI

Volume I
KĀVYAKHANḌA

Chief Editor

DR. MITHILAPRASADA TRIPATHI
Director,
Kalidasa Sanskrit Akademi
Ujjain

Editor and Translator

M.M. PROF. REWAPRASADA DWIVEDI
Professor Emeritus (Sanskrit),
Banaras Hindu University
VARANASI

Joint Editor

DR. SADASHIVAKUMAR DWIVEDI
Reader, Deptt. of Sanskrit, Faculty of Arts,
Banaras Hindu University
VARANASI

Publisher
KĀLIDĀSA SANSKRIT AKADEMI
UJJAIN

COMPLETE WORKS OF KĀLIDĀSA

Third Edition

Critically Edited text with Hindi Translation of all the works of Kālidāsa including *Ṛtusamhāra*.

Volume I - Kāvyakhaṇḍa (Poems)

1- Raghuvamśam	1-19 Cantos
2- Kumārasambhavam	1-8 Cantos
3- Meghadūtam	1-111 Verses
4- Ṛtusamhāram	1-6 *Ṛtus (Seasons)*

Volume II - Natyakhaṇḍa (Plays)

1- *Malavikagnimitram*	1-5 Acts
2- *Vikramorvaśīyam*	1-5 Acts
3- *Abhijñanaśakuntalam*	1-7 Acts

Prepared with the financial assistance from the Ministry of HRD through Rashtriya Sanskrit Sansthan, New Delhi to the Kalidasa Sansthan, Varanasi.

Harvard Mss. referred to by permission of Houghton Library, Harvard University, USA.

Chief Editor- **Prof. Mithilaprasad Tripathi**

Editors - **M.M.Prof. Rewaprasad Dwivedi**
Dr. Sadashivakumar Dwivedi

© Editors

Price -
Rupees Five Hundred Only

Year of publication 2008 AD
The Golden Jubilee Year of Kalidasa Sanskrit Akademi.

Published by -
Kalidasa Sanskrit Akademi
Ujjain

Printer -
Panchayati Raj Mudranalaya Sahakari Maryadit
Ujjain

।। समर्पणम् ।।

श्रीसूर्य्यनारायण इत्यभिख्या
व्यासा इदानीं स्मृतिमाजिहानाः ।
लब्ध्वा प्रकाशं ननु कालिदास—
साहित्यकोषस्य भवन्तु तुष्टाः ।। १ ।।

विश्वस्वस्तिवचः समर्प्यत इदं तेभ्यः पुराणी विराट्
प्रज्ञा येषु कुलाचलेषु मधुमद्दिव्यौषधीवत् स्थिता ।
येषां मौक्तिकवारिणैव पिहिता दृष्टिर्न, ये तद्गतं
सारोत्कर्षमपीक्षितुं दधति वै काञ्चित् परामीक्षिकाम् ।। २ ।।

****

।। प्रधानसम्पादकीयम् ।।

चित्तं प्रसीदति महाकविकालिदास–
ग्रन्थावलीं विमलसंहननां बुधेभ्यः ।
हिन्दीयुतां प्रददतो मम संप्रदाय–
शुद्धां सनातनकविप्रतिसंस्कृताञ्च ।। १ ।।

या वै पुरा प्रभवति स्म विदांवराणाम्
अस्मिन् महाकविमहाप्रतिभाविलासे ।
वर्णाद्यसङ्गतिशती प्रविरेचितं ताम्
अस्याः प्रकाशनमिदं विबुधा जुषेरन् ।। २ ।।

प्राचीनकाव्यमपि शास्त्रसमानमानम्
अस्मिन् पुरातनतमे भरतस्य राष्ट्रे ।
तत्राप्यभीद्धतपसैव भवेद् विकार–
मुक्तिः सनातन इह श्रितवांस्तपस्तत् ।। ३ ।।

अस्य श्रमं बहुतिथात्समयाद्विशाला
सम्यक् समाकलयति स्म कवीन्द्रवाचि ।
तामद्य हीरकमहोत्सवपर्व्वणीद्धां
सन्मुद्रयोपहरते मिथिलाप्रसादः ।। ४ ।।

रेवाप्रसादं मिथिलाप्रसादो रेवाप्रसादो मिथिलाप्रसादम् ।
प्रामाणिकं पश्यति कालिदाससाहित्यकोषे यदि सा कृपैशी ।। ५ ।।

कृतार्थतामद्य गताऽस्मदीया संस्था ययाऽकाशि सरस्वतीयम् ।
श्रीकालदासाऽपरनामभाजः श्रीकालिदासस्य महाकवेर्नः ।। ६ ।।

अत्रानुवादः खलु यः स चापि कृतः स्वयं हन्त सनातनेन ।
जानात्यसौ वाक्यविधानशास्त्रसीमानमेतस्य धरातलस्य ।। ७ ।।

समाश्रितं मूलमिहानुवादे निर्धारितं यत् तपसा स्वयं हि ।
मूलाविशुद्धावनुवादकार्यं पाणिग्रहो यक्ष्मनिपीडितस्य ।।८।।

यो नाट्यशास्त्रं समपादयच्च भोजप्रकाशं समपीपदच्च ।
स एष विद्वान् समपादयच्चेच् श्रीकालिदासं ननु भाग्यमेतत् ।।९।।

साहित्यशास्त्रस्य महान् प्रणेता रेवाप्रसादः ससदाशिवोऽत्र ।
पात्रायते भारतवासिनां नः साहित्यभाजामभिनन्दनानाम् ।।१०।।

पतञ्जलिरभूदिहाभवदिहैव भोजो ययो–
र्बभूव वशवर्त्तिनी भरतभूचितिर्भारती ।
इहैव यदि दुर्दिने मलिनतां श्रयन्त्यागते
शरत्समय उज्ज्वला अपि भवन्ति लोका न नो ।।११।।

यदि श्वसिति संस्कृतं बहुतिथेऽपि काले गते
किमस्ति ननु कारणं श्वसनतन्त्वविच्छेदने ।
विवेक इति केवलो भवति कारणं, तं प्रति
प्रमाणपरता विदामथ च तत्र यागे हविः ।।१२।।

अभीद्धतपसो वयं न खलु विप्रतीपामहे
लभामह उदारतामथ च काञ्चन प्रातिभीम् ।
तयैव खलु जन्यते कविरथो तदान्वीक्षिकी–
पटुः सितगरुत् सुधीरपि तयैव निर्मीयते ।। १३।।

स्वयं कविवचांस्यपि प्रमितये श्रयन्ते बुधाः
स एव निकषायते सदसतोर्विभागोत्तमे ।
सनातनकविः स्थितः सुदृढमत्र तस्मादियं
पुरातनसरस्वती प्रतिनवायते स्वस्तये ।।१४।।

हरिप्रबोधपर्व, वि.सं.२०६५ **मिथिलाप्रसादस्य त्रिपाठिनः**

कालिदाससंस्कृतअकादमी,
विश्वविद्यालयमार्ग, उज्जैन, मध्यप्रदेशः

उज्जयिनीस्थायाः कालिदाससंस्कृताकादम्या
निदेशकस्य

कालिदाससंस्तवः

संपादकीयम्

चातुर्वर्ण्य–चतुर्वर्ग–चतुराश्रम–नैगमी ।
कालिदासः कदा जात इति प्रश्नेऽभिधीयताम् ।।१।।
शकारेर्विक्रमादित्यात् पूर्व पश्चात् पतञ्जलेः ।
एकविंशे शताब्दीनामादिमे दक्षकत्रिके ।।२।।
प्रमाणं बाधकाऽभावसहिता साधकत्रयी ।
तत्रैकं भाष्यवाक्यस्य यथावत्समुदाहृतिः[१] ।।३।।
द्वितीयं पुष्यमित्रस्य साग्निमित्रस्य वृत्तयोः ।
नाटकेन स्वतन्त्रेण निबन्धोऽसदृशाक्षरः ।।४।।
विक्रमादित्यसंज्ञाया अनुल्लेखस्तृतीयकम् ।
का नाम वार्त्ता गुप्तानां कालिदासानुसारिणाम् ।।५।।
शाकुन्तलेऽस्य यौ तावदुल्लेखौ विक्रमस्य तौ ।
संज्ञिनो विक्रमादित्यस्यैव नाट्यप्रयोगजौ ।।६।।
चतुर्थे शतके यो वै चन्द्रो विक्रमनामभृत् ।
उपाधिर्विक्रमादित्य इत्येष खलु तस्य वै ।।७।।
उपाधौ क्व प्रदीयन्ते विशेषण–विशेषकाः ।
इति संस्कृतभाषायाः प्रवृत्तिरपि वीक्ष्यताम् ।।८।।
चित्रमूर्त्यादिसंवादे हेतुस्तदुभयागमः ।
नान्यथा मन्दिरे मूर्त्तिः प्रतिष्ठाप्येत केनचित् ।।९।।
राजधानीत्वयुक्ते ये विदिशोरगसंज्ञके ।
नगर्यौ निष्कमुद्रा च शुङ्गकालैकसाधकाः ।।१०।।

---

[१] कुमारसम्भवस्य २.१७ पद्ये।

हूणाः वंक्षुतटे तस्थुः पुरापि बहुशस्तथा ।
जामित्र–योगो नः शब्दः स च ग्रीकैरगृह्यत ॥११॥

हेत्वाभासाश्रिता सेयं विद्यते निखिला कथा ।
परन्तु हेत्वाभासाश्च ससाराः शुङ्गपक्षगाः ॥१२॥

या च प्रौढिः कवित्वस्य सा न भासे न लभ्यते ।
न च रामायणे तस्या अभावो, नापि भारते ॥१३॥

या वै काव्यकला तस्यां समयादिपरिच्छिदाम् ।
नैवानुमन्यते धीमान् कविः स्वस्यापि संस्तवम् ॥१४॥

ततो मानुषसंसारं यथा प्रस्तौति सत्कविः।
तत्रैव दीयतां दृष्टिः स हि सारः कलासु नः ॥१५॥

कालिदासमतिक्रान्तुं नाक्षमन्तानुवर्त्तिनः ।
प्रादर्शि शक्तिरत्यन्तमद्भुता तैः स्वसूक्तिषु ॥१६॥

गङ्गायमुनयोर्धारि यां प्रसूतो नवां पराम् ।
सैषा सरस्वती तस्यास्तीरे काशी विराजते ॥१७॥

युक्ताश्चाप्यभियुक्ताश्च गुणिनश्चाऽत्र ये जनाः ।
तेषां गङ्गाजलं ह्येकं परमात् परमं धनम् ॥१८॥

व्यसनं शास्त्रपाथोधिमन्थने मन्दरायितम् ।
द्रष्टा चैव परीष्टा च यत्र साक्षान्महेश्वरः ॥१९॥

अविषह्यो ह्यशुद्धेस्तु लेशोऽप्यत्र मनीषिणाम् ।
शून्यमेव प्रदीयेत रेखाया अप्यशुद्धये ॥२०॥

शतं प्रतिशतं यत्र दीयते लभ्यते च वाक् ।
प्रयुज्यते कवीन्द्रैश्चेत् पूर्णतामात्रवल्लभा ॥२१॥

---

१. परीक्षासु ये पूर्णाङ्कास्तेषु पूर्ण

न पूर्णतामात्रपरायणानां शास्त्राब्धिमन्थाचलभावभाजाम् ।
काव्ये विरामैकगवेषिणां धीरशुद्धिशुद्ध्योः प्रविवेचिका स्यात् ।। २२।।

न हि पण्डितमण्डली वधानं प्रददात्यत्र कविक्रियासु दार्ढ्यात् ।
निगमागमदुर्गभेदनायां सततं नक्तमथो दिवापि मग्ना ।। २३।।

सतृणाभ्यवहारमेव नित्यं विदधानाः सहसा न शुद्धिमुग्धे ।
प्रतियन्ति सुमेधसः,परन्तु क्वचिदत्रापि दृशं ददत्युदाराम् ।। २४।।

इति विश्वसिमः सनातनास्तद् वृणुमस्तापसयोगमात्मनीनम् ।
यदि नाम परेऽपि लाभमस्य वृणुयुस्तेष्वभिनन्दनां श्रयामः ।। २५।।

या च संपादनाकार्यधोरणी नः समापि सा ।
सप्तत्यां कालिदासस्य[1] भूमिकायां च दृश्यताम् ।। २६।।

अर्थसंगतिरेकैव प्रधानं सर्वथा यदा ।
हस्तलेखे न मूलस्य सुलभो भवति क्वचित् ।। २७।।

सैवास्ति कालिदासीयसाहित्यस्य स्थितिस्ततः ।
अर्थसंगतिसिध्यर्थं ब्राह्मीलेखोऽप्युपाश्रितः ।। २८।।

लिखाम्ययमहं स्वयं भवति च त्रुटिस्तत्र तत्
करोमि यदि शोधनं स्वयमहं तदा किं परः ।
निवारयितुमिष्यते परलिपौ स्फुटं भावय–
न्नशुद्धिमियमस्ति नो मतिजडत्वदीक्षारतिः ।। २९।।

कालिदास्य साहित्यं कालिदासायतेऽद्य नः ।
तच्च काव्यत्रयी नाट्यत्रयीति षडवग्रहम् ।। ३०।।

ऋतुसंहारकाव्यस्य यः कर्त्ता सोऽपि संज्ञया ।
कालिदास इति ख्यातः किन्तु काव्यमिदं स्तरे ।। ३१।।

---

[1] कालिदासस्य = कालिदासग्रन्थावल्या द्वितीयसंस्करणभूमिकायाम् नाट्यशास्त्रानुवादान्ते च।

कालदासीयमित्येतद् गौरवं नाप्तुमर्हति ।
ऋतूनां यः क्रमस्तत्राथर्वणत्वं तु लभ्यते ॥ ३२॥

एवमेव कुमारस्य नवमादन्तिमावधिः ।
यो भागस्तत्र नास्त्येव कालिदाससरस्वती ॥ ३३॥

अष्टमावधिकाद् भागाद् विसंवादोऽत्र वस्तुनि ।
शिष्टत्वरहितो वाचि हिन्दीशब्दप्रयोगतः ॥ ३४॥

पिताऽऽसीत् कालिदासस्य परमेश्वरसंज्ञकः ।
माता च पार्वतीनाम्नी रघुमङ्गलसूचितौ ॥ ३५॥

शृङ्गाररसमूर्धन्ये समाजे शुङ्गकालिके ।
जातो हिमाद्रौ कुत्रापि विशालायां व्यनीयत ॥ ३६॥

वैदिके कर्मकाण्डे च ज्यौतिषे वैद्यके तथा ।
गीतनृत्यादिशास्त्राणां प्रयोगे च विचक्षणः ॥ ३७॥

धर्मार्थकाममोक्षेषु प्रमाणपुरुषोत्तमः ।
क्वचित् स्वैरी परन्त्वन्ते सावधानति सत्कविः ॥ ३८॥

शृङ्गाररज्ज्वा सर्वेषां सन्दानितमना असौ ।
गुडजिह्विकया धर्म्या नीतिमेवाभ्यशिक्षत ॥ ३९॥

एक एव रथो यस्य भूमौ शैलेषु सिन्धुषु ।
आकाशे च समानेन मानेन गतिमश्नुते ॥ ४०॥

नन्दिनीविद्यया यस्य रघुस्तिष्ठति सङ्गरे ।
महेन्द्रेण समं वज्राघातेप्यचलतां गतः ॥ ४१॥
अहिंसां सत्यमस्तेयं ब्रह्मचर्याऽपरिग्रहौ ।
यमानेताञ्जनन्यास्तु पयो यद्वदपीपिबत् ॥ ४२॥

अत एव च योगेन समाधिमहितोऽव्ययः ।
पूरुषोऽभूदसौ त्यक्तस्थूलसंहननः शमी ।। ४३ ।।

रघोस्तु ये विशेषास्तान् क्रमशस्त्यजतः परान् ।
अमुष्य वंश्यान् ह्रासान्धौ पतिताँस्तु लभामहे ।। ४४ ।।

अन्वयव्यतिरेकाभ्यामेवमेष श्रुतेः पथे ।
मार्गदर्शी महान् कश्चिदजायत महाकविः ।। ४५ ।।

रामायणकथावस्तुपरिशेषे समाधिमान् ।
लौकिके साहितीमार्गे तृतीयः पथिकृत् त्वसौ ।। ४६ ।।

पृथिव्यां ब्रुवते तास्ता वाचस्ते ते तथा तथा ।
तासामसौ संस्कृतां हि वाचं ब्रूते महीयसीम् ।। ४७ ।।

प्रतिभाशक्तिसंपन्ना विशिष्टा प्रतिपद्वधूः ।
वृणीते यं महाकालं कालिदासः स एव नः ।। ४८ ।।

कालिदासस्य संज्ञानं 'कालदास' इतीर्यते ।
पुराविद्भिस्तदीयानां कृतीनां लेखकोत्तमैः ।। ४९ ।।

स वै कश्चिन्महाकालो विशालातीर्थगः प्रभुः ।
ओङ्कारविग्रहे धाम्नि त्रिपुरेऽस्ति प्रतिष्ठितः ।। ५० ।।

द्वितीये तु पुरे साक्षादोङ्कारेश्वर एव नः ।
ज्योतिर्मयो लसत्यस्य,महाकालो लसत्यधः ।। ५१ ।।

मधुपिङ्गललिङ्गोऽसौ महानात्मा तृतीयके ।
पुरे गुहामये राजत्योङ्कारगतकुण्डले ।। ५२ ।। ॐ

ब्राह्म्यामपि लिपौ तावदोङ्कारस्त्रिपुरात्मकः ।
रेखात्रयात्मके त्र्यस्रे चतुर्थेऽस्रे विराजितः ।। ५३ ।। $^{1}_{3}Z^{2}_{4}$

ब्राह्मीलिपौ श्चयोगश्च श्वयोगश्चाशुलेखने ।
परस्परस्य कुर्यातां भ्रान्तिं मतिमतामपि ।। ५४।।

पञ्चमे तु शिरश्चन्द्रे गुहागर्भे स्थितः प्रभुः ।
चिताभस्मार्त्तितो ब्राह्मे मुहूर्त्ते प्रतिबुध्यते ।। ५५।।

प्रतिवर्ष प्रबोधाख्ये पर्वण्येष प्रभुर्बुधैः ।
देशदेशान्तरायातैः समारोहेण राध्यते ।। ५६।।

पञ्चाशत्तमवर्षे तु समारोहस्य स प्रभुः ।
पूज्यते कालिदासेन बिल्वपत्रद्वयात्मना ।। ५७।।

बिल्वपत्रद्वयं ह्येतत् काव्यनाट्यद्वयाकृति ।
गङ्गारेवाम्भसा धौतं हे प्रभो प्रतिपद्यताम् ।। ५८।।

कालिदासस्य यत् तीर्थमुज्जयिन्यां कृतस्थिति ।
तस्य ग्रन्थावली ह्येषा परमात्परमायते ।। ५९।।

यश्चानुवादः काव्यानां नाट्यानां चात्र भाषया ।
स स्वयं विहितोऽस्माभिर्वाकोवाक्यविधानतः ।। ६०।।

उभयत्र बुधः स्वैरं तनुयात् परिवर्तनम् ।
आवश्यकं चेन्मूलेन संवादं परिपालयन् ।। ६१।।

आनुषङ्गिकतामात्रमाश्रितेयं परिष्कृतिः ।
सामग्र्येण समग्रा या सपर्या सा प्रतीक्ष्यते ।। ६२।।

हरिप्रबोधपर्व, वि.सं. २०६५
कालिदाससंस्थानम्
२८ महामनापुरी, पो. काहिविवि,
वाराणसी २२१००५

रेवाप्रसादस्य द्विवेदिनः
सनातनस्य

कालिदासग्रन्थावली

प्रथमो भागः

काव्यखण्डम्

		पृष्ठम्
प्रधानसम्पादकीयम्		६ – ७
कालिदाससंस्तवः (सम्पादकीयम्)		८ – १३
१. रघुवंशम्	१ – १९ सर्ग	१ – ३०१
२. कुमारसम्भवम्	१ – ८ सर्ग	३०३ – ४२३
३. मेघदूतम्	१ – १११पद्य	४२५ – ४६२
४. ऋतुसंहारम्	१ – ६ ऋतुएँ	४६३ – ५०२
परिशिष्टम् – १	रघुवंशे सूर्यवंशः	५०३
परिशिष्टम् – २	पाठभेदाः	५०४ – ५११
परिशिष्टम् – ३	रघुवंशपद्यक्रमभेदः	५१२ – ५२०
परिशिष्टम् – ४	श्लोकानुक्रमः	५२१ – ५४९

।। रघुवंशम् ।।

गभीरकाव्यम्

नामसंक्षेप: (Abbreviation) -

अ.	अरुणगिरिनाथस्य रघुवंशकुमारसम्भवयो: टीका प्रकाशिका।
ऋतु.	ऋतुसंहारम्।
काग्र./काग्र.-२	कालिदासग्रन्थावली, द्वितीयं संस्करणम्, १९८६, काहिविवि., वाराणसी।
का.सू.	वामनस्य काव्यालङ्कारसूत्रवृत्ति:।
कुसं.	कुमारसम्भवम्।
द.	दक्षिणावर्तनाथकृतप्रदीपसहितं मेघदूतसंस्करणम्।
न.	नन्दर्गीकरसम्पादितं मल्लिनाथटीकासहितं रघुवंशसंस्करणम्।
ना.	नारायणपण्डितस्य रघुवंशकुमारसम्भवयो: टीका विवरणम्।
ना(पा).	नारायणपण्डितपाठान्तरम्।
पाटि.	पादटिप्पणी।
पूस.	पूर्णसरस्वतीकृतया विद्युल्लतया सहितं मेघदूतसंस्करणम्।
म.	मल्लिनाथसंजीविन्या: नन्दर्गीकरसम्पादितं निर्णयसागरस्य च संस्करणम्।
माल.	मालविकाग्निमित्रम्।
मेघ.	मेघदूतम्।
रघु.	रघुवंशम्।
व.	वल्लभदेवस्य टीकासहितानि रघुवंश–कुमारसम्भव–मेघदूतसंस्करणानि।
व(पा).	वल्लभपाठान्तरम्।
विक्रमो.	विक्रमोर्वशीयम्।
शा./शापा.	शार्पे कालिदासलेक्सिकन/शार्पे पाठान्तरम्।
शाकु.	अभिज्ञानशाकुन्तलम्।
शृ.प्र.	शृङ्गारप्रकाशस्य अस्मत्सम्पादितं संस्करणम्, २००७।
सा.	साहित्यअकादमीत: प्रकाशितानि कालिदाससंस्करणानि।
सापा.	साहित्यअकादमीपाठान्तरम्।
स्थि.	स्थिरदेवटीकासहितं मेघदूतसंस्करणम्।
हामा.	हार्वर्डविश्वविद्यालये पञ्चरघुवंशमातृका: – २४१, ४१५, ७७२, ९१५, ९१६.
हे.	हेमाद्रे: रघुवंशदर्पणस्य अस्मत्सम्पादितं संस्करणम्।
हेपा.	हेमाद्रिपाठान्तरम्।

ब्राह्मी लिपौ

𑀰𑁆𑀭𑀻 𑀓𑀸𑀮𑀺𑀤𑀸𑀲!

कालिदासः

𑀬𑀲𑁆𑀬𑀸𑀁 𑀪𑀯𑀸𑀦𑁆𑀪𑀯𑀤𑀸𑀭𑁆𑀬𑀮𑀺𑀧𑁅 𑀦𑀢𑀻𑀭𑁆𑀡𑁄 𑀩𑁆𑀭𑀸𑀳𑁆𑀫𑀻𑀫𑀺𑀫𑀸𑀁 𑀮𑀺𑀧𑀺𑀯𑀺𑀤𑀂 𑀧𑁆𑀭𑀯𑀤𑀦𑁆𑀢𑀺 𑀲𑀦𑁆𑀢𑀂
𑀢𑀸𑀫𑁂𑀯 𑀢𑀤𑁆𑀪𑀯𑀢𑀺 𑀳𑀺𑀰𑁆𑀭𑀬𑀢𑁂𑀢𑁆𑀭 𑀓𑀸𑀰𑁆𑀬𑀸𑀁 𑀭𑁂𑀯𑀸𑀧𑁆𑀭𑀲𑀸𑀤 𑀇𑀢𑀺 𑀲𑀁𑀧𑁆𑀭𑀯𑀬𑀸𑀲𑁆𑀢𑀧𑀲𑁆𑀯𑀻.[1]

𑀢𑀢𑁆𑀭 𑀧𑁆𑀭𑀣𑀫𑁂 𑀭𑀖𑀼𑀯𑀁𑀰𑀫

𑀑𑀁 𑀯𑀸𑀕𑀭𑁆𑀣𑀸𑀯𑀺𑀯 𑀲𑀁𑀧𑀾𑀓𑁆𑀢𑁅	ॐ वागर्थाविव सँपृक्तौ
𑀯𑀸𑀕𑀭𑁆𑀣𑀧𑁆𑀭𑀢𑀺𑀧𑀢𑁆𑀢𑀬𑁂.	वागर्थ-प्रतिपत्तये .
𑀚𑀕𑀢𑀂 𑀧𑀺𑀢𑀭𑁅 𑀯𑀦𑁆𑀤𑁂	जगतः पितरौ वन्दे
𑀧𑀸𑀭𑁆𑀯𑀢𑀻 𑀧𑀭𑀫𑁂𑀰𑁆𑀯𑀭𑁅 𑁈𑁒𑁈	पार्वती परमेश्वरौ ॥१॥
𑀲𑁄𑀳𑀫𑀸𑀚𑀦𑁆𑀫𑀰𑀼𑀤𑁆𑀥𑀸𑀦𑀸-	सोऽहमाजन्मशुद्धाना-
𑀫𑀸𑀨𑀮𑁄𑀤𑀬𑀓𑀭𑁆𑀫𑀡𑀸𑀫𑁆 .	माफलोदय कर्मणाम्.
𑀆𑀲𑀫𑀼𑀤𑁆𑀭𑀓𑁆𑀱𑀺𑀢𑀻𑀰𑀸𑀦𑀸-	आसमुद्रक्षितीशाना-
𑀫𑀸𑀦𑀸𑀓𑀭𑀣𑀯𑀭𑁆𑀢𑁆𑀫𑀦𑀸𑀫𑁆 𑁈𑁓𑁈	मानाकरथ वर्त्मनाम् ॥२॥
𑀬𑀣𑀸𑀯𑀺𑀥𑀺𑀳𑀼𑀢𑀸𑀕𑁆𑀦𑀻𑀦𑀸𑀁	यथाविधि हुताग्नीनां
𑀬𑀣𑀸𑀓𑀸𑀫𑀸𑀭𑁆𑀘𑀺𑀢𑀸𑀭𑁆𑀣𑀺𑀦𑀸𑀫𑁆.	यथाकामार्चितार्थिनाम्
𑀬𑀣𑀸𑀧𑀭𑀸𑀥𑀤𑀡𑁆𑀟𑀸𑀦𑀸𑀁	यथापराधदण्डानां
𑀬𑀣𑀸𑀓𑀸𑀮𑀧𑁆𑀭𑀩𑁄𑀥𑀺𑀦𑀸𑀫𑁆. 𑁈𑁔𑁈	यथाकालप्रबोधिनाम् ॥३॥
𑀢𑁆𑀬𑀸𑀕𑀸𑀬 𑀲𑀁𑀪𑀾𑀢𑀸𑀭𑁆𑀣𑀸𑀦𑀸𑀁	त्यागाय सँभृतार्थानां
𑀲𑀢𑁆𑀬𑀸𑀬 𑀫𑀺𑀢𑀪𑀸𑀱𑀺𑀡𑀸𑀫𑁆.	सत्याय मितभाषिणाम् ।
𑀬𑀰𑀲𑁂 𑀯𑀺𑀚𑀺𑀕𑀻𑀱𑀽𑀡𑀸𑀁	यशसे विजिगीषूणां
𑀧𑁆𑀭𑀚𑀸𑀬𑁃 𑀕𑀾𑀳𑀫𑁂𑀥𑀺𑀦𑀸𑀫𑁆.	प्रजायै गृहमेधिनाम् ॥४॥

---

[1] यस्यां भवानभवदार्यलिपौ नतीर्णो ब्राह्मीमिमां लिपिविदः प्रवदन्ति सन्तः।
तामेव तद् भवति हिश्रयेतेऽत्र काश्यां रेवाप्रसाद इति सँप्रवयास्तपस्वी ॥

520
London

Wellcome Trust London Ms. No. 520
for अव्याहतः स्वैरगतैः

१० प्रीतिमान्स्पपरिग्रहः आदेशं देशकालज्ञः शिष्यः शासितुरानतः ९२ अथ प्रदोषे दोषज्ञः संवेशाय विशां
५ पतिं सूनुः सून्नतवाकस्रष्टुर्विससर्जोर्जितश्रियम् ९३ सत्यामपित सिद्धौ नियमापेक्षया मुनिः कल्प
वित्कल्पयामास वन्यामेवास्य संविदम् ९४ निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रह
द्वितीय तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने निशां निनाय ९५ इति श्रीरघुवंशे महाका
व्ये कालिदासकृते प्रथमः सर्गः १ ॐ अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां वनाय पी
तप्रतिवद्धवत्सां यशोधनो धेनुमृषेर्मुमोच २ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया टि ५
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् २ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभि ८ग्रा
र्यशोभिः पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ३ व्रताय तेनानुचरेण धेनोर्न्यषेधि शे
षोप्यनुयायिवर्गः न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४ आस्वादवद्भिः कवलैस्तृणानां क एम
ण्डूयनैर्दंशनिवारणैश्च अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोभूत् ५ स्थितः स्थितामुच्च ५

२४ श्री६



या॥मार्गंमनुष्येश्वरधर्मपत्नीश्रुतेरिवार्थंस्मृतिरन्वगच्छत्॥२॥निवर्त्यरा
जादयितांदयालुस्तांसौरभेयींसुरभिर्यशोभिः॥पयोधरीभूतचतुःसमु
द्रांजुगोपगोरूपधरामिवोर्वीम्॥३॥व्रतायतेनानुचरेणधेनोर्न्यषेधिशेषो
प्यनुयायिवर्गः॥नचान्यतस्तस्यशरीररक्षास्ववीर्यगुप्ताहिमनोःप्रसूतिः॥४॥आ
स्वादवद्भिःकवलैस्तृणानांकण्डूयनैर्दंशनिवारणैश्च॥अव्याहतैःस्वैरगतैःसतस्याः
सम्राट्समाराधनतत्परोभूत्॥५॥स्थितःस्थितामुच्चलितःप्रयातांनिषेदुषीमासनबन्ध
धीरः॥जलाभिलाषीजलमाददानांछायेवतांभूपतिरन्वगच्छत्॥६॥सन्यस्तचिन्हाम
पिराजलक्ष्मींतेजोविशेषानुमितांदधानः॥आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ

Line 5 अव्याहतस्वैरगतैः



लितः प्रयातां निषेदुषीमासनबंधधीरः जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ५
सन्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः आसीदनाविष्कृतदानराजिरंतर्मदावस्थ इव
द्विपेंद्रः ६ लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष
न्निव दुष्टसत्वान् ७ विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदा
नामालोकशब्दं वयसां विरावैः ८ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् अवाकिरन्बा
ललताः प्रसूनैराचारलाजैरिव पौरकन्याः ९ धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः वि
लोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः १० स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादित
वंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ११ पृक्तस्तुषारैर्गिरिनिर्झराणामनोक
√| हाकंपितपुष्पगंधी तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे १२ शशाम वृष्ट्यापि विना दवा
ग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १३ संचार

गि१

MS 2114 AL/HD 05A कुमारसम्भवम्



Ms. 833 HL/HW/USA कुमारसंभवम्

कुमार
९

दयालुनपक्षवाः॥ अभिज्ञश्छेदपातानां क्रियंते नंदनद्रुमाः॥४१॥ वीज्यते स हि संतप्तः श्वाससाधारणा
निलैः॥ चामरैः सुरबंदीनां बाष्पशीकरवर्षिभिः॥४२॥ उत्पाट्य मेरुशृंगाणि क्षुण्णानि हरितां खुरैः॥
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु॥४३॥ मंदाकिन्याः पयःशेषं दिग्वारणमदाविलं॥ हेमां
भोरुहसस्यानां तद्वाप्यो धाम सांप्रतं॥४४॥ भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते॥ खिलीभूते वि
मानानां तदापातभयात्पथि॥४५॥ यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः॥ जातवेदोमुखान्मायी
मिषतामाछिनत्ति नः॥४६॥ उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च॥ देहबद्धमिवेंद्रस्य चिरकालार्ज्जि
तं यशः॥४७॥ तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः॥ वीर्यवंत्यौषधानीव विकारे सांनि
पातिके॥४८॥ जयाशा यत्र चास्माकं प्रतिघातोत्थितार्च्चिषा॥ हरिचक्रेण तेनास्य कंठे निष्कमिवा
र्पितः॥४९॥ तदीयास्तोयदेष्वद्य पुष्करावर्त्तकादिषु॥ अभ्यस्यंति तटाघातं निर्ज्जितैरावता गजाः॥५
तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शांतये॥ कर्मबंधछिदं धर्म्मं भवस्येव मुमुक्षवः॥५१॥ गोप्तारं सु
रसैन्यानां यं पुरस्कृत्य गोत्रभित्॥ प्रत्यानेष्यति शत्रुभ्यो वंदीमिव जयश्रियं॥५२॥ वचस्यवसि
ते तस्य स ससर्ज्ज गिरमात्मभूः॥ गर्ज्जितानंतरां वृष्टिं सौभाग्येन जिगाय या॥५३॥ स हि देवः परं

क्रादानेष्यति=२

बलात्कारध्वतानारीवंदीसाउ च्यतेवुधैः=२



MS. 916
HL/HU
USA
रघुवंशम्

पणा॥ तमध्वरं विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं उपात्तविद्यो गुरुद
क्षिणार्थी कौत्सः प्रपेदे वरतंतुशिष्यः॥१॥ स मृन्मये वीतहिरण्मयत्वात्पात्रे निधाया
र्घ्यमनर्घ्यशीलः॥ श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः॥२॥
तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारा
त्कृतांजलिः कृत्यविदित्युवाच॥३॥ अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कुश
ली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः॥४॥ कायेन वा
चा मनसापि शश्वत् यत्संभृतं वासवधैर्यलोपि आपाद्यते न व्ययमंतरायैः कच्चि

MS. NO. 241, Houghton library, Harward University. U.S.A.
For चैत-यमुग्रादिव दीक्षितेन reading.



MS 241
HL/HU.USA
रघुवंशम्

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं। उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः
प्रपेदे वरतंतुशिष्यः॥१॥ समृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घ्यशीलः॥ श्रुतप्र
काशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः॥२॥ तमर्चयित्वा विधिवद्विधिज्ञः तपो
धनं मानधनाग्रयायी॥ विशांपतिर्विष्टरभाजमारात्॥ कृतांजलिः कृत्यविदित्युवाच॥३॥
अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते॥ यतस्त्वया ज्ञानमशेषमाप्तं चैतन्
मुग्यादिवंदीक्षितेन॥४॥ कायेनवाचामनसैर्डियैवायद्द्विजिणः धैर्यविलोपितस्यां॥ आपाद्यते
न व्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत्॥५॥ आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धिता
नां सुतनिर्विशेषं॥ कच्चिन्न वाय्वादिरुपप्लवो वः॥ श्रमच्छिदामाश्रमपादपानां॥६॥ क्रियानि
३

मनसा
च शश्वद्यद्
२ मर्क्षाद्विजी
लोकेन =

२०

Ms. 918, Houghton library, Harvard Univ. U.S.A.



MS. 918 HL/HU/USA रघुवंशसञ्जीविनी

वरतंतोः शिष्यः कौत्सः गुरुदक्षिणार्थी अप्रत्ययाख्येय इति भावः प्रपेदे प्राप १ स इति अनर्घ्यशीलः अमूल्यस्वभा
वइत्यर्थः मूल्ये पूजाविधावर्घः शीलंस्वभावेसद्वृत्ते इति चामरः शाश्वतोयशसाकीर्त्याप्रकाशतइतिप्रकाशः प्रख्यातश्च
अतिथिषुसाधुरातिथेयः पथ्यतिथिवसतिस्वपतेर्ढञिति ढञ्प्रत्ययः सरघः हिरण्यस्यविकारोहिरण्मयं दाण्डिना
यनादिसूत्रेणनिपातः वीतहिरण्मयत्वात् अपगतसुवर्णपात्रत्वात् यज्ञस्यसर्वस्वदक्षिणकत्वादितिभावः मृण्मये
मृद्विकारेणपात्रे अर्घ्यम् अर्घार्थं पूजार्थं द्रव्यं अर्घ्यं निधाय श्रुतेनशास्त्रेणप्रकाशंप्रसिद्धं श्रुतंशास्त्रावधृतयोरित्यमरः अति
थिम् महात्मागतंकौत्सं अतिथिर्नागृहागतइत्यमरः प्रत्युज्जगाम २ तमिति विधिज्ञः शास्त्रज्ञः अकरणेप्रत्यवायश्रु

२ स मृण्मये वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घ्यशीलः श्रुतप्रकाशं यशसाप्रकाशः प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयि
त्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात् कृतांजलिः कृत्यविदित्युवाच ३ अप्यग्रणीमं
त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वयाज्ञानमशेषमाप्तं चेतन्यमुग्रादिवदीधितेन ४ कायेनवाचामनसापि

रित्यर्थः मानधनानामग्रयायी अग्रेसरः विशांपतिः वैश्यमनुजौ विशावित्यमरः विष्टरभाजमासनगतं उपविष्टमित्यर्थः विष्ट
रो विटपी दर्भमुष्टिः पीठाद्यमासनमित्यमरः तं तपोधनं विधिवद्विधिज्ञं यथाशास्त्रमित्यर्थः तदर्हमिति वतिप्रत्ययः अ
र्चयित्वा आरात्समीपे आराद्दूरसमीपयोरित्यमरः कृतांजलिः सन् इति वक्ष्यमाणप्रकारेणोवाच ३ अपीति अयि
कोमलामंत्रणे हे कुशाग्रबुद्धे सूक्ष्मबुद्धे मंत्रकृतां मंत्रद्रष्टॄणां स्मर्कर्मपापेत्यादिना क्विप् ऋषीणाम् अग्रणीः श्रेष्ठः ते तव गु
रुः कुशल्यपि क्षेमवान् किं अपिप्रश्ने गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः यतो यस्माद्गुरोस्त्वया अशेषं ज्ञा
नं लोकेनोष्णरश्मेः सूर्याच्चैतन्यं प्रबोध इव आप्तं स्वीकृतं ४ कायेनेति कायेनवाचामनसापि करणैः नवासवरंड

Com. of Malli

Text

Com. of Malli

ऋतुसंहार MS. 313 HL/HU/USA for the starting verse - विशेषसूर्यः Line-1



विशेषसूर्यः स्पृहणीयचंद्रमा सदावगाहक्षितवारिसंचय॥ दिनांतरम्यो ह्यु
पशांतमन्मथो निदाघकाल समुपागत प्रिये॥१॥ निशाः शशांकक्षतनील
राजयः क्वचिद्विचित्रं जलजंत्रमंदिरं॥ मणिप्रकाराः सरसं च चंदनं शुचौ प्रिये यांति
जनस्य सेव्यतां॥२॥ सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकंपितं मधु॥ सुतंत्रि
गीतं मदनस्य दीपनं शुचौ निशीथेनुभवंति कामिनः॥३॥ नितंबबिंबैः सुदुकूलमेख
लैः स्तनैः सहाराभरणैः सचंदनैः। सिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं
शमयंति कामिनां॥४॥ नितांतलाक्षारसरागलोहितैर्नितंबिनीनां चरणैः सनू
पुरैः॥ पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथं॥५॥ पयोधराश्चंद
नपंकचर्चितास्तुषारहारार्पितहारसेखराः। नितंबदेशाश्च सहेममेखलाः प्रकुर्वते
कस्य मनो न सोत्सुकं॥६॥ समुद्गतस्वेदचितांगसंधयो विमुक्तवासांसि गुरूणि सां
प्रतं स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयंति प्रमदाः सयौवनाः॥७॥ सचंदनां
बुव्यजनोद्भवानिलैः सहारयष्टिस्त

।। श्रीः ।।

सनातनकविरेवाप्रसादद्विवेदिसंपादितं

महाकविकालिदासकृतं गभीरमहाकाव्यं

।। रघुवंशम् ।।

।। प्रथमः सर्गः ।।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।। १ ।।
सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ।। २ ।।
यथाविधिहुताग्नीनां यथाकामार्च्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ।। ३ ।।
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।। ४ ।।

(१) मुझे चाहिए वागर्थप्रतिपत्ति, मुझे वागर्थप्रतिपत्तिरूप काव्य जो पाना है। इस रूप में परिणति पा सकते हैं वागर्थ से संपृक्त जगज्जनक पार्वती–परमेश्वर ही। उन्हें मेरा प्रणाम। वे ही मेरे भी माता पिता हैं। (टिप्पणी : प्रतिपत्ति = प्रतिभा, ज्ञान, गौरव। वागर्थ मे हों ये विशेषताएँ तो बने काव्य उत्तम। पार्वतीपरमेश्वर द्रव्य भी हैं और संविधानक भी। सभी ग्रन्थों में श्लोकों का क्रम यहाँ ऐसा है १,७–९,२–६,१०।) **(२)** तो लीजिए मैं रघु (प्रगतिशील) वंश के उन राजाओं का वर्णन करने जा रहा हूँ जिनके लिए प्रसिद्ध है कि (१) ये जन्म से ही हुआ करते हैं शुद्ध, (२) ये कर्म में तब तक निरत रहे आते हैं जब तक फलनिष्पन्न न हो, (३) ये शासक बने रहते हैं समुद्रपर्यन्त पृथिवी के और (४) इनका रथमार्ग स्वर्ग तक पहुँचा रहता है। **(३)** (५) ये अग्नि में डालते ही रहते हैं आहुति विधिपूर्वक, (६) ये किया करते हैं अर्थियों की अर्चना उन्हें अभीष्ट मात्रा में दान दे दे कर, (७) ये दण्ड देते हैं अपराध के अनुरूप, (८) ये जाग जाते हैं समय से। **(४)** (९) ये जोड़ते हैं धन त्याग के लिए, (१०) ये मितभाषी बने रहते हैं सत्य के लिए (११) ये दिग्विजय चाहते तो हैं, किन्तु यश के लिए (१२) ये गृहस्थाश्रम में आते तो हैं, किन्तु प्रजा (सन्तति, उत्तराधिकारी) के लिए।

---

१. पार्वतीपर = पार्वतिपर।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥५॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥६॥

कुलकम्

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥७॥
मन्दः कवियशः–प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥८॥
अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥९॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥१०॥

(५) (१३) ये शैशव में (ही) कर चुकते हैं विद्याभ्यास (१४) ये चाहते तो विषय हैं, किन्तु यौवन में, (१५) ये वृद्धावस्था आते ही मुनिवृत्ति से जीते और (१६) शरीर छोड़ा करते हैं अन्त में योग से। **(६)** यद्यपि मेरे पास वाणी का वैभव उतना है नहीं जितना चाहिए, किन्तु करूँ क्या इन महामानवों के गुणों ने कान में पड़ते ही बना दिया है मुझे चपल। **(७)** सूर्य से चला वंश कहाँ और कहाँ मेरी अल्पविषया मति? मैं तो डोंगी से पार करना चाह रहा हूँ दुस्तर समुद्र। **(८)** मैं हूँ तो मन्दमति, पर चाह रहा हूँ पाना कुशाग्रबुद्धि कवि का यश। अवश्य ही बनूँगा मैं उपहासपात्र, ऊँचे कद के व्यक्ति द्वारा प्राप्य फल के लोभ में हाथ ऊँचा उठाए, बौने की नाईं। **(९)** अथवा इस वंश पर (वाल्मीकि आदि) पूर्वसूरि वाणी का द्वार बना चुके हैं। मुझे तो वज्र से छिद्रित मणियों में केवल धागा बनना है। **(१०)** मेरे इस वंश को वे ही विद्वान् सत्पुरुष सुनें, जिनमें होती है भले–बुरे की परख। सोने की शुद्धि और खोट अग्नि में ही न दिखाई पड़ती है ?

६. प्रचोदि = प्रणोदि, प्रमोहि, प्रतारि, प्रसारि। ८. प्रार्थी = प्रेप्सुः; लभ्ये = गम्ये, लङ्घ्ये; लोभादु= मोहादु। १०. मर्हन्ति = मिच्छन्तिः ; हेतवः = हेतवे ।

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।११।।
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।।१२।।
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्म्मक्षमं देहं क्षात्रो धर्म्म इव श्रितः ।।१३।।
सर्व्वातिरिक्तसारेण सर्व्वतेजोऽभिभाविना ।
स्थितः सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना ।।१४।। कालापकम्
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः प्रारम्भसदृशोदयः ।।१५।।
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ।।१६।।

काव्य का आरम्भ

(११) सर्वप्रथम राजा (विवस्वान् = सूर्य के पुत्र) (१) वैवस्वत हुए हैं सभी मनीषियों को मान्य मनु। वे थे आदि राजा जैसे छन्दों में प्रणव (ओङ्कार) । **(१२)** सभी पृथिवीपालकों में प्रथम उनसे चला वंश। वह था शुद्ध। उसमें हुए – (२) दिलीप (द्वितीय) नामक राजेन्दु/ राजेन्द्र। वे थे और अधिक शुद्ध, जैसे क्षीरसमुद्र में इन्दु। **(१३)** उन (दिलीप) का वक्षःस्थल था गँसा गँसाया (सुदृढ़), कन्धे थे वृषभ के जैसे, उँचाई (कद) थी सालवृक्ष सी, और भुजाएँ थी बड़ी बड़ी। इस प्रकार का था उनका देह (उत्तरोत्तर बढ़ने वाला शरीर)। उसमें अपने कर्म (रक्षा) की क्षमता थी। मानों क्षात्रधर्म ही बन गया था शरीरधारी उनके रूप में। **(१४)** उन (दिलीप) का व्यक्तित्व सार (दृढ़ता, बल) में सबसे अधिक था, उनका तेज सभी तेजों को दबा देता था। ऊँचाई उनमें ऐसी थी कि लगता था पृथिवी पर वे मेरु (सुवर्णपर्वत) थे। **(१५)** उन (दिलीप) का जैसा (भव्य) आकार था वैसी ही थी उनकी (भव्य) प्रज्ञा, प्रज्ञा जैसा ही था उनका आगम (ज्ञान), आगमों जैसे ही थे अनुष्ठान और इसीलिए, अनुष्ठानों जैसा ही था अभ्युदय। **(१६)** उन (दिलीप) में भीम (डरावने) गुण भी थे और कान्त (आकर्षक) गुण भी जैसे किसी भी राजा में होने चाहिए। फलतः वे अनुजीवियों के लिए अधृष्य भी थे और अभिगम्य भी, समुद्र की नाई जिसमें भयंकर जलजन्तु भी होते हैं और रत्न भी।

११. क्षितामा=भृतामा। १२. राजेन्दु=राजेन्द्र, व.। १३. इव श्रितः = इवाश्रितः। १४. तेजोभि=तेजोवि।
१५. प्रारम्भ= आरम्भ। १६. ०श्चाभि = ०श्चाधि।

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।।१७।।
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।१८।।
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रे च व्यापृता बुद्धिर्मौर्व्वी धनुषि चातता ।।१९।।
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ।। २०।।
जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ।। २१।।
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ।। २२।।

(१७) उस (दिलीप) की प्रजा मनु से चले मार्ग का उल्लंघन तनिक भी नहीं करती थी, जैसे रथनेमि रथ के मार्ग का। यह था उस (दिलीप) का नियन्त्रण। (१८) वह (दिलीप) प्रजावर्ग से कर लेता तो था, परन्तु उसकी ही उन्नति के लिए। सूर्य भी रस खींचता है, पर उसे हजार गुना करके बरसा देने के लिए। (१९) सेना तो उस (दिलीप) का केवल परिच्छद था। अर्थ के साधन उस (दिलीप) के लिए दो ही थे– (१) शास्त्रों में लगी बुद्धि और (२) धनुष पर चढ़ी प्रत्यञ्चा। (२०) उस (दिलीप) की मन्त्रणा गुप्त रहती थी यहाँ तक कि उसके इशारे भी गूढ रहते थे। अतः उसकी योजनाएँ सफलता से अनुमेय होती थीं, प्राक्तन संस्कारों की भाँति। (२१) वह (दिलीप) सुरक्षा व्यवस्था पहले से ही किए रहता था, भय उपस्थित होने पर नहीं; धर्म का पालन करता ही रहता था, संकट आ जाने पर नहीं; अर्थों का ग्रहण करता था, किन्तु लालची बने बिना; सुखों का भी अनुभव करता था, परन्तु अनासक्त (कर्मयोगी) रहते हुए। (२२) वह (दिलीप) जानता था, पर चुप रहता था; उसमें शक्ति थी, परन्तु वह क्षमा को लेकर चला करता था; त्याग करता था, किन्तु श्लाघा से विमुख रहकर। इस प्रकार उसके गुण अन्य गुणों से युक्त रहते और लगते जैसे उनमें फल लग गए हैं। (वृक्षसमाधि।)

१७. आमनो=आत्मनो व.। **१८. भूत्य=भृत्य; रसं=रसान्, रसां । १९. सेना परि=सेनापरि** व.; **द्वय=स्वय; शास्त्रे च व्यापृता=शास्त्रेषु व्यापृता, शास्त्रेष्वकुण्ठिता** म., **शास्त्रेष्वव्याहता** व.अ.ना.। **२०. संवृ=संभृ । २१. र्थान्=र्थम्** म.ना.।

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्म्मरतेरासीद् वृद्धत्वं जरसा विना ।। २३।।
प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।। २४।।
स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्याऽऽस्तां धर्म्म एव मनीषिणः ।। २५।।
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।। २६।।
न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता ।। २७।।
द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीद् दष्टोऽङ्गुष्ठ इवाहिना।। २८।।

(२३) विषयों से अनाकृष्ट वह (दिलीप) था विद्याओं का पारदृश्वा विद्वान् और धर्मरत। इस कारण वस्तुतः वह था वृद्ध ही, केवल उसमें जरावस्था नहीं थी। (२४) प्रजा का वास्तविक पिता वही था, क्योंकि वही उन्हें शिक्षित करता, उनकी रक्षा करता और करता था उनका भरण–पोषण। उनके पिता तो केवल जन्म देने वाले थे। (२५) मर्यादा की रक्षा के लिए वह देता था दण्ड दण्डनीय अपराधियों को, विवाह स्वीकार किया था उसने सन्तति के लिए। इस प्रकार उस मनीषी के अर्थ और काम भी धर्म ही थे। (२६) वह पृथिवीरूपी गौ को दुहता था, यज्ञ के लिए। फलतः इन्द्र भी दुहता था द्यौ को धान्य के लिए (वर्षा कर)। संपत्ति के विनिमय के द्वारा ये दोनों, दोनों लोकों को धारण किए हुए थे। (२७) रक्षाकार्य में कोई भी राजा उस (दिलीप) के यश का अनुगमन नहीं कर सका। उसके समय 'तस्करता' परस्व (दूसरे की संपत्ति) से हटकर केवल शब्द तक अस्तित्व में थी। (श्रुति = शब्द।) (२८) शिष्ट द्वेष्य भी उसे मान्य था रुग्ण को औषध की नाईं। इसके विरुद्ध दुष्ट प्रिय भी उसके लिए त्याज्य था सर्पदष्ट उँगली के समान/जैसे सर्पदंशयुक्त अँगूठा।

२३. दृश्व= दर्शि; जरसा=जरया अ.ना.। २५. दण्डयतो दण्ड्यान्=दमयतो दम्यान्, प्रणयतो दण्डम् ; धर्म्म एव=धर्म्मायैव। २६. सम्पद्=सम्यग्। २८. दष्टोऽङ्गुष्ठ इवाहिना = अङ्गुलीवोरगक्षता म.अ.ना.काग्र.।

तं वेधा विदधे नूनं महाभूत/तिसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ।। २९ ।।
स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ।। ३० ।।
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ।। ३१ ।।
कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ।। ३२ ।।
तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ।। ३३ ।।
सन्तानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ।। ३४ ।।

(२९) विधाता ने उस (दिलीप) का निर्माण निश्चित ही महाभूतों के संमिश्रण से किया था। इसीलिए तो उसके सभी गुण केवल परार्थ दुहते थे। (३०) वह अकेला समुद्रपर्यन्त पृथिवी का शासन करता, किसी एक पुरी के शासन के समान। (३१) उसकी धर्मपत्नी थी सुदक्षिणा, मगधवंश में उत्पन्न वह दाक्षिण्य के कारण वस्तुतः सुदक्षिणा थी। वह पूरक भी थी जैसे यज्ञ की दक्षिणा। (३२) उस (दिलीप) का रनिवास तो बहुत बड़ा था, किन्तु वह स्वयं को कलत्रवान् मानता था उस मनस्विनी सुदक्षिणा से, साथ ही राजा होने के कारण लक्ष्मी से। (३३) दिलीप चाहता था अपनी उसी अनुरूप पत्नी से पुत्रसंतति। उसके इस मनोरथ के सफल होने में लम्बी अवधि बीत गई। (३४) अब उसने सन्तानार्थ उपाय करना आरम्भ किया। तदर्थ पृथिवी का भारी बोझ अपनी भुजाओं से उतारा और सचिवों पर कुछ समय के लिए डाल दिया।

३१. रूढेन = युक्तेन। ३४. सन्तानार्थाय विधये=महते सुतलाभाय; निचिक्षिपे=निवेशिता।

अतः परं पद्यम्— गङ्गां भगीरथेनेव पूर्वेषां पावनक्षमाम् ।
ईप्सता सन्ततिं तेन न्यस्ता मन्त्रिषु कोसला ।।
ईप्सता, कोशला = इच्छता, कोसला।

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ।। ३५ ।।दशभिः कुलकम्
स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ।। ३६ ।।
मा भूदाश्रमपीडेति परिमेयपुरस्सरौ ।
अनुभावविशेषात्तु सेनापरिगताविव ।। ३७ ।।
सेव्यमानौ सुखस्पर्शैः सालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ।। ३८ ।।
मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ।। ३९ ।।
परस्पराक्षि–सादृश्यम–दूरोज्झित–वर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ।। ४० ।।

(३५) पहले सपत्नीक उसने पूजा की ब्रह्मा की, व्रत धारण किया और पुत्र की इच्छा लिए हुए दोनों दम्पती गुरु वसिष्ठ के आश्रम चले। (३६) वे दोनों एक ही रथ पर बैठे थे। रथ का निर्घोष स्निग्ध भी था और गम्भीर भी। वे ऐसे लग रहे थे जैसे लगते है एक ही मेघ पर आरूढ़ विद्युत् और ऐरावत। (३७) आश्रम को पीड़ा न हो इस कारण उनके आगे चल तो रहे थे कुछ ही परिजन, परन्तु वे ऐसे लग रहे थे कि सेना से परिवृत हों, अपने विशिष्ट तेज के कारण। (३८) उन्हें सेवा अर्पित कर रहे थे वायु के झोंके, जिनका स्पर्श सुखद था, वृक्षों के निर्यासा फूटे रस से जो सुरभित थे, जिनमें पुष्पों से रेणु उड़ रही थी और जिनसे वनराजि कुछ कुछ काँप रही थी (३९) वे रथ की चकील की घरघराहट से उन्मुख मयूरों की दो प्रकार की मनोरम और षड्जसंवादिनी केका सुनते जा रहे थे। (दो प्रकार की = मोरों की ध्वनि मोरनी की ध्वनि से और विपरीत।) (४०) वे रास्ते के पास खड़े होकर रथ पर टकटकी लगाए मृगों के जोड़ों में परस्पर का अक्षिसादृश्य देख रहे थे। (परस्पर = मृग–मृगी, राजा–रानी, मृग राजा, मृगी रानी।)

---

३७. वशानागौ सगन्धाल्पकलभानुगताविव। गता=वृता व.अ.ना.। ३८. ०त्किरै=०त्करै० व.म.अ.ना.।
३९. भिन्ना मिश्रिता इत्यर्थः।

श्रेणीबन्धाद् वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ।। ४१ ।।
पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ।। ४२ ।।
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ।। ४३ ।।
ग्रामेष्वात्मवि/निसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ।। ४४ ।।
हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ।। ४५ ।।
काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ।। ४६ ।।
तत् तद् भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ।। ४७ ।। षड्भिः कुलकम्

(४१) वे कहीं कहीं ऊपर दृष्टि डालते तो देखते कि सुन्दर निर्ह्राद कर रहे सारसों की पंक्तियों ने बिना स्तम्भ की तोरणमाला तान रखी है। (४२) पवन अनुकूल (पीछे से आगे की ओर बह रहा था)। उससे सूचना मिल रही थी अभीष्टसिद्धि की और घोड़ों की टाप से उड़ी धूल उनका किरीट नहीं छू पा रही थी। (४३) जहाँ तलैयें आतीं तो उन्हें सूँघने को मिलती अनेक प्रकार के अरविन्दों की सुगन्ध जो तरंगों के स्पर्श से शीतल होती और रहती अनुकरण करती अपने निःश्वासों का। (४४) उन्हें उनके ही द्वारा प्रदत्त गाँवों में, जिनमें यज्ञयूप खड़े दीखते, मिलते याज्ञिकों के अर्घ्य और (अमोघ) शुभाशीष। उन्हें वे शिरोधार्य करते जा रहे थे। (४५) रात को दुहे दूध के नवनीत का उपहार लेकर उपस्थित ग्रामवृद्धों से वे पूछते जाते मार्ग में मिले वृक्षों के नाम। (४६) सफेद वस्त्र पहने निराली ही छवि लिए जाते हुए वे दोनों लग रहे थे, तुषारमुक्त 'चित्रा–चन्द्र' की जोड़ी से। (४७) प्रियदर्शन और बुध (ग्रह) जैसे राजा को रास्ता बीत गया पर समझ न पड़ा, वह पत्नी को मार्ग की वे वे वस्तुएँ दिखाने में जो व्यस्त रहा।

४३. विक्षोभ = विक्षेप; मुप = मपि; कारिणम् = वादिनम्। ४५. पस्थितान् = पागतान्।

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ।। ४८ ।।
वनान्तरादुपावृत्तैः स्कन्धासक्तसमित्कुशैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ।। ४९ ।।
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ।। ५० ।।
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ।। ५१ ।।
आतपापायसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्त्तित–रोमन्थमुटजाङ्गनभूमिषु ।। ५२ ।।
अभ्युद्धृताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर् धूमैराहुतिगन्धिभिः ।। ५३ ।।

(४८) दुष्प्राप था उसका यश। थके वाहनों के साथ महिषीसहित वह सायंकाल पहुँचा संयमी महर्षि वसिष्ठ के आश्रम। 'धारणा, ध्यान, समाधि' तीनों का नाम संयम (योगशास्त्र) (४९) आश्रम भरता जा रहा था तपस्विजनों से जो समिधा और कुश कंधों पर लिए दूसरे वनों से लौट रहे थे। उनकी अगवानी हो रही थी अदृश्य अग्नि के द्वारा। (५०) आश्रम में जहाँ तहाँ ऋषिपत्नियाँ बच्चों के समान मृगशावकों को नीवार (तिन्नी के पौधे) खिला रही थीं। वे उटज के द्वार छेंके हुए थे। उनका यह रोज का अभ्यास था (उचित = अभ्यस्त)। (५१) मुनिकन्याएँ पौधों में जल सींच कर तुरन्त हट गई थीं, जिससे थाले का पानी पक्षी निश्शंक होकर पी सकें। (५२) धूप समाप्त हो रही थी। नीवार इकट्ठे कर लिए गए थे। हिरन उन पर आकर बैठ गए थे और जुगाली करने में लगे थे। यह दृश्य था उटजों के आँगन की भूमियों का। (५३) अतिथिजन आ रहे थे। उनके हाथ में रखी थी अग्नि। उसी से मिल रही थी उनके आने की सूचना। यज्ञाग्नि से उठा धूम उन्हें स्नान करा रहा था, क्योंकि हवा उधर की थी। धूम में आहुति की सुगन्ध भी थी।

४९. पूर्य००ग्नि=अग्निप्रत्युद्गमात् पूतैः पूर्यमाणम् व. ।। ।।
५०. रूपान्तरम् – आकीर्यमाणमासन्नविधिभिः समिधाहरैः।
वैखानसैरदृश्याग्निप्रत्युद्गमनवृत्तिभिः।।
५१. भिस्तत्क्षणोज्झि=भिर्विविक्तीकृद्। ५२. पापाय=पात्यय म.। ५३. अभ्युद्धृताग्नि=अभ्युत्थिताग्नि, अभ्युत्थानाग्नि, अभ्युद्धुताग्नि म.।

अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः ।
तामवारोपयत् पत्नीं रथादवरुरोह च ।। ५४।।
तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ।। ५५।।
विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ।। ५६।।
तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ।। ५७।।
तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ।। ५८।।
अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ।। ५९।।

(५४) आश्रम पहुँचने पर उस (राजा दिलीप) ने सारथि को आदेश दिया 'घोड़ों को विश्राम कराओ' और पहले पत्नी को उतारा, तब रथ से स्वयं उतरा। **(५५)** सभ्य मुनिजनों ने उस सपत्नीक (दिलीप) का स्वागत किया। राजा था गोप्ता (रक्षक) और मुनिजनों की भी इन्द्रियाँ अतीव गुप्त थीं। राजा पूज्य था, क्योंकि था नयचक्षु। **(५६)** उसने सायंकालीन सवन के बाद दर्शन किए तपोनिधि (गुरु वसिष्ठ) के। उनकी सेवा में उपस्थित थी अरुन्धती वैसे ही जैसे यज्ञाग्नि की सेवा में 'स्वाहा'। **(५७)** राजा और रानी मागधी ने उनके पाँव पकड़े। प्रसन्न गुरु और गुरुपत्नी ने भी उन्हें आशीर्वाद दिए। **(५८)** राजा का आतिथ्य हुआ। उसकी रथक्षोभजनित थकावट दूर हुई और अब मुनि (वसिष्ठ) ने उससे राज्य में कुशल पूछा। वह भी मुनि ही था, उसका आश्रम था राज्य। **(५९)** पूछने पर राजा ने निवेदन करना शुरू किया। मुनि वसिष्ठ अथर्वनिधि थे और दिलीप शत्रुओं के नगर जीत चुके थे। उसने ऐसे शब्द चुने जो समुचित अर्थ दे सकते थे, वह श्रेष्ठ वक्ता था। वह अर्थ (मनुष्यवती भूमि का) पति जो ठहरा।

५४. विश्राम = विश्रम; रोपयत्=रोहयत्; रुरोह=ततार। ५६. अन्वासितम् = अन्वासीनम्, अध्यासितम्। ५७. पादान् = पादौ । ५८. तमा००मम् = आतिथेयस्तमातिथ्य/थ्यं—विनीताङ्गपरि०। ५९. निधेस् = र्वविद; पुरः पुरः = पुरस्सरः।

उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिकर्त्ता त्वमापदाम् ॥ ६० ॥
तव मन्त्रकृतो मन्त्रैर्दूरात् संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१ ॥
हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टीभवति सस्यानामवग्रहविशोषिणाम् ॥ ६२ ॥
पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।
यन्मदीयाः प्रजास्तत्र हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३ ॥
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥
किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥
नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥

(६०) (भगवन्!) मेरे सातों अंगों में कुशल है, इसलिए कि आप जो हैं मेरे ऊपर आने वाली दैवी और मानवी आपदाओं के प्रतिकर्त्ता (निवारक)। **(६१)** आपके मन्त्रों ने मेरे बाणों को रोक रखा है। वे तो दृष्ट लक्ष्य का ही वेध कर पाते हैं, जबकि आपके मन्त्र दूरस्थित छिपे शत्रुओं का भी शमन कर डालते हैं। आप स्वयं मन्त्रकर्त्ता भी हैं। मन्त्रकृत् (Inventor of new and needed theme)। **(६२)** हे होता! आप अग्नि में विधिपूर्वक जो आहुति देते हैं वही बन जाती है अवृष्टि से सूख रही फसल पर वृष्टि। **(६३)** पूरी पुरुषायुष (१२०वर्ष) जी रही मेरी प्रजा में न आतङ्क है न रोग। इसका एकमात्र हेतु है आपका ब्रह्मवर्चस। **(६४)** आपको मेरा इस प्रकार लगातार बना रहता है ध्यान। मैं शिष्य आप गुरु। आप सन्तान हैं साक्षात् ब्रह्मा की तब क्यों न रहें मेरी सभी सम्पत्तियाँ वृद्धिंगत और निरापद। **(६५)** परन्तु, आपकी इस वधू (सुदक्षिणा) में अभी तक मुझे सदृश सन्तति के दर्शन नहीं हुए, अतः रत्नप्रसवा और सद्वीपा यह पूरी धरती मुझे सुहा नहीं रही है। **(६६)** मेरे पितर लोगों में मेरे बाद शंका है पिण्डविच्छेद की । अतः वे श्राद्ध में दिया पिण्ड पूरा नहीं खाकर उसका कुछ कुछ अंश बचाने में तत्पर रह रहे होंगे।

६०. कर्त्ता = हन्ता, हर्ता । ६१. संशमि=प्रशमि, संयमि म.; लक्ष्य=लक्ष। ६२. वृष्टी=वृष्टिः, व्यष्टुः, विष्ट्वै, वृष्ट्वै, सृष्टिः म.अ.ना.। ६३. यन्मदी०=तन्मदी०; तत्र=तस्य म.अ.ना.। ६४. त्वयै=तदे अ.।

मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वे स्वनिश्वासकवोष्णमुपभुञ्जते ।। ६७।।
सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ।। ६८।।
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे ।। ६९।।
तया हीनं विधातर्मां कथं पश्यन् न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम् ।। ७०।।
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवाऽऽलानमनिर्वाणस्य दन्तिनः ।। ७१।।
तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ।। ७२।।

(६७) मेरे बाद अब यह दुर्लभ हो जाएगा ऐसा मानकर पितर लोग मेरे द्वारा दिया जो तर्पणजल ग्रहण करते हैं वह आँसुओं से गरम हुआ रहता होगा। (६८) इस स्थिति में मैं लोकालोक पर्वत सा हूँ जिस पर प्रकाश भी रहता है और अप्रकाश भी। मेरे जीवन में भी एक ओर इज्या (यज्ञ) की विशुद्धि है तो दूसरी ओर सन्ततिलोप की अँधियारी। (६९) तप और दान से उत्पन्न पुण्य तो सुखकारी होता है लोकान्तर में, जबकि शुद्ध वंश की सन्तति सुखकारी हुआ करती है परलोक में भी। इस लोक में वह सुख देती ही है। (७०) आप मेरे विनेता (शिक्षक) हैं। तो क्या मुझे निस्संतान देख आप व्यथित नहीं हो रहे होंगे? आप तो स्नेह के साथ स्वयं सींचे आश्रमवृक्ष को भी वन्ध्य देख व्यथित हुआ करते हैं। (७१)भगवन्! अन्तिम ऋण (पितृऋण) मुझे असह्य पीड़ा दे रहा है अनिर्वाण (स्नानहीन) हाथी को अरुन्तुद (मर्मभेदी) आलान के समान। (७२) हे तात! इस कारण ऐसा कुछ कीजिए कि मुझे इस पीड़ा से मुक्ति मिल जाए। इक्ष्वाकुवंश के दुष्प्राप लाभ में सिद्धि तो आप पर ही निर्भर है।

६७. पूर्वे=पूर्वैः, पूर्व्यैः; स्व००ष्ण=सनिश्वासम्, स्वनिश्वासः, सनिश्वासम् व.म.; **वोष्ण=दुष्ण; भुञ्जते=युञ्जते, युज्यते, भुज्यते** म.अ.ना.। **६८. ०श्चाप्रकाशश्च=०श्चान्धकारश्च** व.। **७०. विधातर्=विनेता, विनेतः, विनीतं, वितानं** व.अ.ना.; **वृक्षकम्=पादपम्,** म.अ.ना.। **७१. ऋणमन्त्यम्=ऋणबन्धम्; अनिर्वाणस्य=अवबद्धस्य, नवबद्धस्य,** अ.ना.। **७२. तस्मा००यथा=यथा विमुच्येऽहं, यथा हि मुच्येऽहं, यथा विमुच्येय तत।**

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ।। ७३ ।।
सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्त्तुरथैनं प्रत्यबोधयत् ।। ७४ ।।
पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ।। ७५ ।।
इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनः ।। ७६ ।।
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ।। ७७ ।।
स शापो न त्वया राजन् न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ।। ७८ ।।

(७३) राजा का यह निवेदन सुन महर्षि ने ध्यान लगाया। उनके नेत्र निस्पन्द हो गए। एक क्षण के लिए इस स्थिति में वे ऐसे लग रहे थे जैसा निश्चल मछलियों वाला जलाशय लगता है। (७४) प्रणिधान में उन्हें दिलीप के यहाँ सन्तति न होने का कारण दिखाई दे गया। संवेदना के स्वर में तब उन्होंने दिलीप से कहा। (७५) 'एक बार तुम इन्द्र के पास से पृथिवीलोक लौट रहे थे। रास्ते में कल्पवृक्ष की छाया में बैठी थी कामधेनु। (७६) उसी समय यह देवी सुदक्षिणा ऋतुस्नान से निपटी थी, अतः इसके समीप पहुँचने की जल्दी में तुमसे पूज्या कामधेनु की प्रदक्षिणा छूट गई। उसे क्रोध आ गया। (७७) उसने शाप दे दिया– 'तू मेरी अवज्ञा कर रहा है, जा तुझे तब तक सन्तान नहीं होगी जब तक तू मेरी सन्तान की आराधना नहीं करेगा।' (७८) आकाशगङ्गा की धार में उद्दाम दिग्गज चिंघाड़ रहे थे, अतः हे राजन्! वह शाप न तुम्हें सुनाई दिया और न तुम्हारे सारथि को।

७३. ०पितो=०पिते अ.ना.; न इव=नो यथा। ७४. सन्ततेःस्त=सन्ततिस्त अ.ना.; भुवो=पुरो। ७५. प्रति या=प्रतियास्यत;०छायामाश्रिता=छायासेविनी। ७६. धर्मलोपभयाद् राज्ञीमृतुस्नातामिमां स्मरन्/मृतुस्नातां तु संस्मरन्/मिमां संचिन्त्य सत्वरः, प्रदक्षिणक्रियार्हायां/प्रदक्षिणक्रियार्हायास् म.अ.ना.; तस्याः कोपमजीजनः/ तस्यां त्वं साधु नाचरः।

ईप्सितं तदवज्ञानाद् विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।। ७९ ।।
हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ।। ८० ।।
स त्वमेकान्तरां तस्या मदीयां वत्समातरम् ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ।। ८१ ।।
इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ।। ८२ ।।
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ।। ८३ ।।
भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्त्तिना ।। ८४ ।।

(७९) उसी की अवज्ञा के कारण तुम्हारी सन्तान–कामना पूरी नहीं हो रही है। पूज्य की पूजा छूट जाए तो श्रेयःप्राप्ति में रुकावट आ ही जाती है। (८०) वह कामधेनु तो इस समय पाताललोक में है, वहाँ वरुण एक बड़ा यज्ञ कर रहे हैं। उसमें हविष्य की पूर्त्ति कामधेनु को ही करनी है। (८१) ऐसा करो– तुम मेरी सवत्सा गौ की आराधना करो। वह कामधेनु की दूसरी पीढ़ी में आती है और प्रसन्न हो जाए तो वह भी कामनाओं की पूर्त्ति कर सकती है।' (८२) महर्षि वसिष्ठ ने इतना कहा कि उसी समय उनके हविष्य की पूर्त्ति करने वाली नन्दिनी नामक शुभ गाय जंगल से लौटी। (८३) उसके ललाट पर सफेद बालों का टेड़ा चँदोवा था और स्वयं वह थी (नवीन) पल्लव सी चिकनी और पाटल वर्ण की। लग रही थी वह संध्या जैसी ज़िसमें चन्द्रकला निकल आई थी। (८४) वत्स को देखते ही उसके ऐन से दूध की धारा चल पड़ी। उस कुनकुने और यज्ञान्त स्नान जल से भी

७९. ईप्सितं=अवैमि, अवेमि, अवेहि; तदवज्ञानात्=तदप/व–ध्यानात् अ.ना.; यत्नापेक्षं/क्ष्यं मनोरथम्, ०दनपेक्षं मनोरथम्। ८१. स त्व००स्या= स त्वमेकां सुतां, स गां मदीयां सुरभेः, सुतां मदीयां सुरभेः; मदीयां००तरम्= कृत्वा प्रतिनिधिं शुचिः, सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः, आराधय; प्रीता००सा= सा वः कामं/मान् वि/निधास्यति। सर्वकामान् विधास्यति।

८२. रूपान्तरमस्य – ताम्रां ललाटजां रेखां बिभ्रती सासितेतराम्।
सन्ध्या प्रातीपदेनेव प्रतिभिन्ना हिमांशुना।

८४. भुवम्=क्षितिम्; प्रस्न=प्रस्र म.; प्रवर्त्तिना=प्रवर्त्तिनी।

रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ।। ८५।। कुलकम्
तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः/धनः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ।। ८६।।
अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ।। ८७।।
वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ।। ८८।।
प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ।। ८९।।
वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।
प्रयातां प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ।। ९०।।
इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ।। ९१ ।।

अधिक पवित्र दूध से वह पृथ्वी माँ का अभिषेक करती आ रही थी। (८५) पास बैठे राजा पर पड़ी उसके खुर से उड़ी धूल तीर्थस्नान की शुद्धि प्रदान कर रही थी। (८६) नन्दिनी का दर्शन बड़ा पवित्र था। उसे उपस्थित देख शकुन के ज्ञाता महर्षि ने मन ही मन समझ लिया इसकी इच्छा सफल होने वाली है और राजा से पुनः कहा– (८७) 'राजन्! तुम्हारे मनोरथ की पूर्त्ति दूर नहीं है, क्योंकि यह कल्याणी नन्दिनी नाम लेते ही आ पहुँची। (८८) तुम इसे प्रसन्न करो अभ्यास से विद्या के समान। इसके लिए वन्यवृत्ति बनकर इसका अनुगमन करो। (नन्दिनी नामक कोई विद्या भी गुरु वसिष्ठ ने राजा को दी थी।) (८९) जब यह चले तो तुम भी चलना, जब रुक जाए तब तुम भी रुक जाना। बैठे तब बैठना और पानी पी ले तब तुम भी पानी पीना। (९०) यह वधू (सुदक्षिणा) भी इसकी पूजा कर प्रातःकाल इसके पीछे तपोवन तक जाए और सायंकाल लौटने पर इसकी अगवानी करे। (९१) इस क्रम से इसकी परिचर्या तब तक करो जब तक यह प्रसन्न न हो जाए। जाओ तुम्हारा अनुष्ठान निर्विघ्न पूरा हो और अपने पिता के समान तुम भी पुत्रवान्

८५. **षेकजां शुद्धिम्=षेकसंशुद्धिम्** व., **षेकसंसिद्धिम्**, अ.ना.; **धाना=दाना**; **क्षितः=भृतः** व., **पतेः**।
८८. **विद्यामभ्यसनेनेव=सम्यगाराधनेनेव**। प्रकृतद्वयोपमा। ८९. **स्थिति=स्थान**; **पीता० = शीता०**।
९०. **प्रयातां=प्रयता**। प्रत्युत्प्रयात्विति तु वाच्यमत्र। ९१. **स्थेयाः = भूयाः** व.।

तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ।। ९२।।
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक् स्रष्टुर्विससर्जोर्जितश्रियम् ।। ९३।।
सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्।। ९४।।
निर्दिष्टां कुलपतिना स पर्णशाला–
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ।। ९५।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ वसिष्ठाश्रमे नन्दिनीविद्याधिगमो नाम प्रथमः सर्गः।। १।।

पिताओं में अग्रगण्य [illegible]।’ (९२) ‘जो आज्ञा’ कहकर पत्नीसहित प्रसन्न राजा ने अपने शासक गुरु के आदेश को झुककर शिरोधार्य किया, उसे देशकाल की पहँचान जो थी। (राजा प्रजा का शासक और राजा का शासक गुरु)। (९३) अब उपस्थित थी रात्रि। महर्षि वसिष्ठ ब्रह्मा के पुत्र थे। उनकी वाणी मीठी थी। उन्हें ज्ञान था (समयोचित आचार का पालन न करने से शरीर में उत्पन्न होने वाले) दोषों का। अतः तेजःश्री से युक्त राजा को विदा किया सोने हेतु। (९४) मुनिवर वसिष्ठ में तप की सिद्धि थी, तब भी नियम पर दृष्टि देते हुए राजा के लिए सुविधा वही की जो वनोचित थी। वे कल्प के वेत्ता जो थे। (९५) कुलपति वसिष्ठ ने जो पर्णशाला बतलाई दिलीप ने उसी में संयत पत्नी के साथ कुश के बिछौने पर लेटकर रात बिताई। रात बीतने की सूचना मिली वसिष्ठ के शिष्यों के वेदपाठ से।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में पूरा हुआ
वसिष्ठाश्रम में नन्दिनीविद्याधिगम नामक प्रथम सर्ग।

भारती कालिदासस्य समपादि समीक्षया ।
येन तेनानुवादोऽपि मयकैव व्यधाय्यसौ ।।

---

९३. र्जित = दित, ज्झित म.। ९५. पर्ण = धर्म; अ.ना., निनाय = मनैषीत्।

।। द्वितीयः सर्गः।।

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ।।१।।
तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।।२।।
निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ।।३।।
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।।४।।
आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतः स्वैरगतेः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ।।५।।

(१) प्रातःकाल होने पर यशोधन, प्रजाधिपति राजा दिलीप ने, जाया (सुदक्षिणा) के द्वारा गन्धमाला से पूजित ऋषिधेनु नन्दिनी को वन के लिए छोड़ा। उसके बछड़े को दूध पिलाकर बाँध दिया गया था। (२) उसके मार्ग पर राजपत्नी सुदक्षिणा वैसे ही चली जैसे श्रुति के अर्थ के पीछे चलती है स्मृति। मार्ग की धूलि यदि नन्दिनी के खुर रखने से पवित्र थी तो सुदक्षिणा भी निष्पाप महिलाओं में प्रथम थी। (३) दयालु राजा ने पत्नी को लौटाया और लग गया वह उस नन्दिनी गौ की रक्षा में। नन्दिनी यदि सुरभि (कामधेनु) की पुत्री थी तो दिलीप स्वयं यश से सुरभि था। वह उस नन्दिनी की रक्षा पृथिवी की रक्षा के समान कर रहा था, मानों पृथिवी ही गौ का रूप धारण किए हुए थी, इसलिए कि पृथिवी पर चार पयोधर (समुद्र) हुआ करते हैं, तो नन्दिनी के भी चार थन थे पयोधर। (पय=जल और दूध।) (४) व्रत के निमित्त धेनु के पीछे चले उस राजा ने अपने अन्य अनुयायियों को भी रोक दिया। उसके शरीर की रक्षा के लिए अन्य किसी की अपेक्षा नहीं थी। मनु के उत्तराधिकारी स्वयं अपने बल से रक्षित रहते हैं। (५) सम्राट् दिलीप ने उस धेनु का समाराधन दत्तचित्त होकर किया। वह उसे घाँस के स्वादु कौर खिलाता, खुजलाता और डाँस दूर रखता। वह जहाँ चाहती वहाँ चरती। उधर वह भी कहीं भी पहुँचने में रुकता नहीं।

५. **अव्याहतः स्वैरगतेः=अव्याहतैः स्वैरगतैः** म.; **अव्याहतस्वैरगतेः** हे.ना.हामा.–२४१,९१८।

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ।। ६।।
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ।। ७।।
लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान् विनेष्यन्निव दुष्टसत्त्वान् ।। ८।।
विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ।। ९।।
मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम् ।
अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ।। १०।।
धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तः–करणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ।। ११।।

(६) वह तब रुकता जब नन्दिनी रुकती, उसके चलते ही वह चल पड़ता, बैठती तो बैठने की इच्छा करता। जल की इच्छा तब करता जब वह जल पी लेती। इस प्रकार राजा (दिलीप) उस (गौ) के पीछे उसकी छाया सा घूमता। (७) दिलीप के साथ राजलक्ष्मी के चिह्न तो नहीं थे, किन्तु इसके विशिष्ट तेज से उसका अनुमान हो रहा था। वह उस गजराज सा लग रहा था, जिसमें मद पर्याप्त मात्रा में बन तो चुका हो, किन्तु उसकी धारा न फूटी हो। (ऐसा हाथी 'भद्र'– गज कहा जाता है)। (८) धनुष पर प्रत्यञ्चा चढ़ाए हुए वह लताओं के प्रतानों से केश बाँधे हुए जंगल में घूम रहा था। गोरक्षा के बहाने वह वस्तुतः जंगल के दुष्ट प्राणियों को विनय की शिक्षा देना चाह रहा था। **(९)** वह उसके पार्श्ववर्त्ती अनुचरों को छोड़े हुए था तब भी पास के वृक्ष उन पर बैठे उन्मद पक्षियों की ध्वनि में उसका जय जयकार सा कर रहे थे। क्यों न हो, वह वरुण के समान जो था। **(१०)** अग्नि जैसा तेजस्वी वह पास आता दिखाई देता तो बाललताएँ उस पर पुष्पवर्षा करतीं, नगर में नगर की कन्याएँ जैसे किया करती थीं आचारपालन हेतु लाजवर्षा। **(११)** उसके हाथ में धनुष रहता तब भी हिरनियाँ चौंकती नहीं और उसे जीभरकर देखती रह जातीं, मानों उन्हें उनके नेत्रों के पर्याप्त विस्तृत होने का फल मिलता जाता। ऐसा इसलिए कि राजा का भाव (चित्त) दयार्द्र था।

---

७. स न्य= सन्य व.; राज=राज्य व.। ८. रक्षापदेशान्मुनि=क्षोपदेशाद्गुरु।

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥१२॥
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाऽऽकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३॥
शशाम वृष्ट्यापि विना दवाग्निरासीद् विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ॥१४॥
सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥१५॥
तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद् विधिनोपपन्ना ॥१६॥
स पल्वलोत्तीर्ण–वराहयूथान्यावास–वृक्षोन्मुख–बर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥

(१२) राजा दिलीप ने कुञ्जों में वनदेवियों द्वारा जोर जोर से गाया जा रहा अपना कीर्त्तिगान सुना, उसमें बाँसुरी की संगति हो रही थी छिद्रित बाँसों के स्वर से, जिनके छेदों से होकर हवा बाहर आ रही थी। (१३) उस राजा की सेवा पवन भी कर रहा था। पवन, गिरिनिर्झरों की फुहारों से युक्त (अतः शीतल) था और (मन्द भी) वृक्षों के तनिक कम्पित पुष्पों की गन्ध से भरा। राजा धूप से क्लान्त था। उस पर छत्र जो नहीं था। पवन पवित्रता भी देता है, किन्तु इस सेवा की आवश्यकता नहीं पड़ी, क्योंकि वह कार्य उसके अपने आचार से हो रहा था। (१४) उस राजा के वन में पहुँचते ही दवाग्नि बिना वृष्टि के ही शान्त हो गई और फल तथा पुष्प की वृद्धि अधिक हो गई। यहाँ तक कि दुर्बल को बलवानों ने पीड़ा देना छोड़ दिया। (१५) सायंकाल आसन्न था तो सूर्य की प्रभा और मुनि की धेनु ने निलय (विलय और आश्रम) के लिए चलना शुरू किया। दोनों की ललोंई पल्लवराग सी थी (१६) मध्यम लोकपाल राजा उसके पीछे चला, वह (गौ) थी देवकार्य, पितृकार्य और अतिथिकार्य में साधन। सत्पुरुषों में समादृत उस राजा से वह गौ इस प्रकार सुशोभित हो रही थी जिस प्रकार विधि से जुड़ी साक्षात् श्रद्धा सुशोभित हुआ करती है। (१७) दिलीप चलते चलते देखते जाते थे कि वन श्यामायमान होते जा रहे हैं, वराहयूथ जलाशयों से

१३. कम्पित = कम्पन; पुष्प = लब्ध; गन्धी म. = गन्धिः व.हे.अ.ना.हामा.२४१, गन्धः। १४. वनं = वने। १५. मुनेश्च = गुरोश्च। १६. बभौ च=बभूव ।

आपीनभारोद्वहनप्रयत्नाद् गृष्टिर् गुरुत्वाद् वपुषो नरेन्द्रः ।
उभावलञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ।।१८।।
वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ।।१९।।
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ।। २० ।।
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ।। २१ ।।
वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत् सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरः—फलानि ।। २२ ।।
गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दिलीपः ।
दोषा/हावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ।। २३ ।।

बाहर आ रहे हैं, मयूर आवासवृक्ष की ओर लौट रहे हैं तथा मृगसमूह घाँस पर जा बैठा है। (१८) राजा दिलीप और नन्दिनी दोनों की गति अञ्चित थी और उससे तपोवन लौटने का मार्ग सुहावना लग रहा था। गौ की अञ्चित गति में कारण था उसके ऐन का भार और राजा की गति में अंचित का कारण था भरा पूरा शरीर। (१९) रानी सुदक्षिणा ने देखा कि उसका प्रिय वसिष्ठधेनु के पीछे आश्रम लौट रहा है तो उसे टकटकी लगाकर अपलक, मानों उपासे नेत्रों से पिया। (२०) नन्दिनी गुलाबी रंग की। उसके पीछे राजा और आगे रानी सुदक्षिणा। इनकी छवि उसी संध्याकाल सी थी — लाल लाल सन्ध्या बीच में, पीछे दिन और आगे रात्रि। (२१) रानी सुदक्षिणा के हाथ में अक्षतयुक्त पात्र था। उसने उस पयस्विनी नन्दिनी की प्रदक्षिणा की और उसको प्रणाम कर उसके भाल की पूजा की। भाल दोनों सींगों के बीच फैला और चौड़ा था। वह मानों अर्थसिद्धि का आगमनद्वार था। (२२) नन्दिनी भी रुकी और उसने रानी की पूजा ग्रहण की, यद्यपि वह भी उत्सुक थी अपने बछड़े के लिए। इससे वे दोनों पतिपत्नी प्रसन्न हुए। भावी सिद्धि का पहला चिह्न प्रसाद ही तो होता है। (२३) भुजाओं से उच्छिन्न कर चुके थे शत्रुओं को दिलीप। वे निश्चिन्त थे। आश्रम आने पर उन्होंने गुरुजी और गुरुपत्नी के चरण पलौटे, सान्ध्य विधि संपन्न की और दुहने के बाद बैठ चुकी दुधारू नन्दिनी की पुनः सेवा की।

२१. ०वार्थ=०वात्म।

R
G ८२
सिद्धि-क

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरुदन्वतिष्ठत् ।। २४।।
इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ।। २५।।
अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।। २६।।
सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।। २७।।
तदीयमाक्रन्दितमार्त्त–साधोर्गुहा–निबद्ध–प्रतिशब्द–दीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्त्तयामास नृपस्य दृष्टिम् ।। २८।।
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ।। २९।।

(२४) पत्नी के साथ राजा दिलीप ने नन्दिनी के समीप पूजादीप रखा और जब वह सो गई तो सोकर उसके जागने के पूर्व ही प्रातःकाल उठ खड़े हुए। (अनु=बाद, साथ 'उदन्वतिष्ठत्' भोजसम्मत पाठ द्र. शृ.प्र. १८.१५८) (२५) राजा दिलीप की कीर्त्ति महनीय थी तदनुरूप उसके, नन्दिनी की सेवा का व्रत पालन करते करते इस प्रकार, २१ दिन बीत गए। उसे अभ्यास था दीनों को उबारने का। (२६) अगले (बाईसवें) दिन मुनि की होमधेनु (नन्दिनी) ने अपने सेवक (दिलीप) का हृदय जानना चाहा और वह हिमालय की एक गुफा में घुस गई। गुफा के बाहर गंगा का प्रपात था और जम चुकी थी घनी घाँस। (२७) राजा को विश्वास था कि नन्दिनी का कोई भी हिंसक प्राणी कुछ भी बिगाड़ नहीं सकता, अतः उसका ध्यान पर्वत की शोभा देखने में बँट गया और एक सिंह ने नन्दिनी को दबोच लिया, जिसे वह देख नहीं पाया। (२८) उसकी दृष्टि उधर खिंची नन्दिनी के आर्त्त आक्रन्दन से, गुहा की प्रतिध्वनि से जिसमें अधिक गंभीरता आ गई थी। उसने राजा की नगेन्द्र पर सटी दृष्टि को मानों रस्सियों में बाँध कर अपनी ओर खींच लिया। (२९) उसे दिखाई दिया कि उस गुलाबी गाय पर एक सिंह चढ़ा हुआ है। गेरू की चोटी पर खिले लोध्र वृक्ष सा लग रहा था वह। राजा धनुष लिए था।

२४. ०रुदन्वति० = ०रनूदति० शृप्र. १८.१५८। २५. धारयतः=पालयतः वं.; कीर्त्तेः = कीर्त्तिः; सप्त तस्य= तस्य सप्त अ.ना.। २६. मुनि=गुरु म.।

127.50

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ।। ३० ।।
वामेतरस्तस्य करः प्रहर्त्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ।। ३१ ।।
बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ।। ३२ ।।
तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ।। ३३ ।।
अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ।। ३४ ।।
कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः कुम्भोदरं नाम निकुम्भमित्रम् ।। ३५ ।।

(३०) राजा ने तरकश से बाण खींचना चाहा और चाहा उस मृगेन्द्र का वध करना। वह वध्य था ही। राजा भी मृगेन्द्रगामी भी था और रक्षाव्रती भी। शत्रुओं को वह जबरन उखाड़ता आया था और उसको देखना पड़ गया अभिषङ्ग/पराभव। (३१) परन्तु हुआ यह कि प्रहार करने हेतु उद्यत उसका दाहिना हाथ बाण के पुंख में ही सटा रह गया। उसकी नखप्रभा से पुंख में लगे कंकपत्र चमक उठे। उस मुद्रा में वह लग रहा था, जैसे उसका चित्र हो। (कंक = सफेद गिद्ध) (३२) बाहु का हो गया प्रतिष्टम्भ (स्तम्भन) तो उसका क्रोध भड़क उठा। इसलिए और कि अपराधी बिलकुल पास और उसे छूना असंभव। इस स्थिति में राजा स्वयं ही अपने तेज से, भीतर ही भीतर जल रहा था, उस सर्प के समान जिसको मन्त्र या औषधि से कीलित कर दिया गया हो। ('मन्त्रौषधिरुद्ध = मन्त्रप्रतिबद्ध' शृ.प्र. १४.६७।) (३३) इसी समय राजा के विस्मय का ठिकना नहीं रहा जब सिंह मनुष्य की भाषा में उससे बोला। वे (दिलीप) मनुवंश केतु भी थे आर्यों के पक्षधर भी थे और सिंह के समान बलशाली भी। (३४) रहने दो महीपाल! तुम्हारी मेहनत व्यर्थ होगी। छोड़ भी दोगे तो तुम्हारा अस्त्र मोघ ठहरेगा। वायु का वेग पेड़ तो उखाड़ सकता है, पर पर्वत पर उसकी नहीं चलती। (३५) मैं हूँ भगवान् अष्टमूर्त्ति शिव का किंकर और निकुम्भ (कीर्त्तिकेय जी) का मित्र 'कुम्भोदर'। भगवान् शिव

---

३२. **मन्त्रौषधिरुद्ध=मन्त्रोपनिबद्ध, मन्त्रेण निरुद्ध** अ.ना.। ३३. **विस्माय=विस्माप** व.; **सिंहोरुसत्त्वं=भूपालसिंहं** व.। ३५. **गौरं=शुद्धं** हे.; **अवे=अवै,** अ.; **मित्रम्=तुल्यम्** व.अ.ना.। निकुम्भः कार्त्तिकेयेपीत्येके। आश्रयतरूच्छेत्तुः काशिराजस्य दाहको काशीस्थितो गणविशेष इत्यरुणगिरिः।

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ/यं वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ।। ३६।।
कण्डूयमानेन कटं कदाचिद् वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ।। ३७।।
तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ।। ३८।।
तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्ट/निर्दिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव/कलेव ।। ३९।।
स त्वं निवर्त्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद् यशः शस्त्रभृतां क्षिणोति ।। ४०।।
इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ।। ४१।।

जब कैलाश जैसे धवल वृषभ पर चढ़ना चाहते हैं तो वे मेरी ही पीठ को अपने पादार्पण के अनुग्रह से पवित्र करते हैं। (३६) यह देखो, सामने रहा देवदारु। भगवान् वृषभध्वज शिव ने इसे पुत्र माना है। कार्त्तिकेय की माता के हेमकुम्भरूपी स्तनों से इसने निस्सृत पय का रस लिया है। (३७) एक बार जंगली हाथी ने इससे अपना गण्डस्थल खुजला दिया और इसकी छाल उखाड़ दी, तो माता पार्वती को उतना ही दुःख हुआ जितना हुआ था पुत्र कार्त्तिकेय को असुरों के अस्त्रों से घायल देखकर। (३८) तभी से शूलधारी भगवान् शंकर ने यहाँ जंगली हाथियों को डराने के लिए मुझे नियुक्त कर रखा है, मेरा वेतन है पास आया प्राणी। (३९) इस गौ को समय से स्वयं भगवान् परमेश्वर ने शोणितपारणा के रूप में भेजा है। मुझे भी भूख लगी है और इससे मेरी भूख मिट भी सकती है, चन्द्रसुधा से राहु की भूख के समान। (४०) तो, अब आप लौट जाएँ, लज्जा छोड़ें, आप गुरुभक्ति दिखला ही चुके हैं। शस्त्र की पहुँच से परे रक्ष्य की रक्षा कोई शस्त्रधारी न कर सके तो उससे उसका अपयश नहीं होता। (४१) पुरुषाधिराज दिलीप ने जब मृगाधिराज सिंह की यह बात सुनी तो उसकी आत्मग्लानि यह जानकर शिथिल हुई कि उसका अस्त्र भगवान् शिव के प्रभाव से रुका है।

---

३८. वनद्विपा=मतङ्गजा; वृत्ति=वृत्तिः व.। ४०. गुरो=गुरौ।

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२॥
संरुद्धचेष्टस्य मृगेन्द्र! कामं हास्यं वचस्तद् यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ॥ ४३॥
मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत् पुरस्तादनुपेक्षणीयम् ॥ ४४॥
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः ॥ ४५॥
अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्त्ती किञ्चिद् विहस्यार्थपतिं बभाषे ॥ ४६॥

(४२) और उसने सिंह को उत्तर दिया, उसके बाणप्रयोग में हाथ सटने की घटना पहली बार घटी थी और पहली बार हुआ था उनका प्रयत्न विफल। ऐसे ही वज्रप्रहार के लिए उद्यत इन्द्र भगवान् शिव के दृष्टिपात से जड़ हो गया था। **(४३)** 'हे मृगराज! मैं तो कर दिया गया निश्चेष्ट, अतः मेरा कुछ भी कहना उपहसनीय ही होगा। परन्तु आप तो सभी प्राणियों के मन की सभी बातें जानते ही हैं, अतः कुछ कह भी देना चाहता हूँ। **(४४)** वे भगवान् शिव तो मेरे लिए भी मान्य हैं। वे तो कारण बनते हैं जड़ और जङ्गम सबकी सृष्टि, स्थिति और संहार में। किन्तु, आहिताग्नि गुरु का, आँखो के सामने ही नष्ट हो रहा यह धन (नन्दिनी गौ), भी तो उपेक्षणीय नहीं है। **(४५)** ऐसा कीजिए कि 'आप कृपाकर अपने शरीर के लिए आवश्यक भोजन मेरे देह को बना लीजिए और महर्षि की इस धेनु को छोड़ दीजिए, शाम को इसका छोटा सा बछड़ा भी इसके लिए उत्सुक होगा।' (मैं भी तो आपकी सीमा में आ ही गया हूँ।) **(४६)** इतना सुनकर वह सिंह कुछ मुसकुराते हुए राजा से फिर बोला। उस समय उसकी दाढ़ की, चमक से गुफा की अँधियारी टुकड़े टुकड़े हो रही थी।

४२. **सङ्गे=भङ्गे** म.हे.।
अत्र रूपान्तरम्– **प्रत्याह चैनं शरमोक्षवन्ध्यः सापत्रपत्वात् स्वरभेदमाप्तः ।**
प्रहीणपूर्वध्वनिनाऽधिरूढस्तुलामसारेण शरद्घनेन ॥
४३. **चेष्टस्य=चेष्टस्तु** व., **चेष्टः** स, **चेष्टश्च**। ४४. **प्रत्यवहार=प्रत्युपहार** व.; **दनुपे=दनपे**।
४५. **प्रसीद=यतस्व। विमुच्यताम्=विसृज्यताम्** म.अ.ना.। ४६.**गह्वरा=कन्दरा** व.; **शकलानि=शकलं** प्र।

एकातपत्रं जगत: प्रभुत्वं नवं वय: कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढ: प्रतिभासि मे त्वम् ।। ४७ ।।
भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुन: शश्वदुपप्लवेभ्य: प्रजा: प्रजानाथ! पितेव पासि ।। ४८ ।।
अथैकधेनोरपराधचण्डाद् गुरो: कृशानुप्रतिमाद् बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गा: कोटिश: स्पर्शयता घटोध्नी: ।। ४९ ।।
तद् रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहु: ।। ५० ।।
एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चै: प्रीत्या तमेवार्थमभाषतेव ।। ५१ ।।
निशम्य देवानुचरस्य वाचं मनुष्यदेव: पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाण: सुतरां दयालु: ।। ५२ ।।

(४७) 'मुझे लगता है तुम विचार–मूढ हो। (तुम्हें विचार करना आता नहीं) अरे तुम पृथिवी के एकच्छत्र राजा, नई तुम्हारी उमर और तुम्हारा यह कान्तिमान् शरीर। अदना सी चीज के लिए/थोड़े के लिए बहुत को तिलाञ्जलि। (४८) रही बात भूतानुकम्पा की तो तुम्हारे अन्त से रक्षा होगी केवल इस एक गौ की। जीवित रहोगे तो तुम सुदीर्घकाल तक अपनी समूची प्रजा की रक्षा पिता के समान कर सकोगे। (४९) जहाँ तक प्रश्न है इस भय का कि इस एक धेनु के अपराध पर अग्नितुल्य गुरुजी बिगड़ उठेंगे और शाप दे देंगे इस विचार से तो तुम उनके क्षोभ का शमन करने हेतु कोटि कोटि दुधारू गौ उन्हें दे देना, वे शान्त हो जाएँगे। (५०) इसलिए बचाओ अपना शरीर, इसे कल्याण की परम्पराओं का भोग सुलभ है और यह ऊर्जस्वल भी है। समृद्ध राज्य ऐन्द्र पद कहा जाता है, इतना ही अन्तर है केवल कि उसमें पृथिवीतल स्पर्श रहता है।' (५१) इतना कहकर जब सिंह चुप हो गया तो उसके स्वर की गुफा में हुई प्रतिध्वनि के द्वारा पर्वत ने भी प्रेम से राजा के समक्ष उसी बात को दुहराया सा। (५२) देवदेव महादेव के अनुचर की बात सुनकर मनुष्यदेव (दिलीप) ने पुन: निवेदन किया। गाय उस समय उसे कातर नेत्रों से देख रही थी और उसके हृदय में दया और अधिक बढ़ रही थी।

४७. हातु=दातु; मूढ:=मुग्ध:। ४९. चण्डाद्=दण्डाद् व.; स्पर्शय=कल्पय। ५२. पूर्वार्धे पाठ: 'तथा समर्थं गिरमूचिवांसं प्रत्याह देवानुचरं दिलीप:'; वाचं=वाच:; ध्यासित=ध्यासन व.हे.।

क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ।। ५३।।
कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम् ।। ५४।।
सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद् विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ।। ५५।।
भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्यदशक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।। ५६।।
किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।। ५७।।
संबन्धमाभाषणपूर्व्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते ।
तद् भूतनाथानुग! नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ।। ५८।।

(५३) 'क्षत्रिय, क्षत्रिय इसलिए कहा जाता है कि वह 'क्षत' (क्षति) से त्राण दिलाता है, जो इस प्रवृत्ति का न हो उसके राज्य से भी क्या और क्या उसके निन्दित प्राणों से? **(५४)** अन्य दुधारू गायों के दान से भी महर्षि का अनुनय संभव ही कैसे? यह गाय कामधेनु से कम नहीं है। इस पर तुम जो आक्रमण कर सके, यह संभव हुआ भगवान् शिव के प्रभाव से। **(५५)** अतः इसकी रक्षा मेरे अपने देह की एवज में करना और तुमसे इसे छुड़ाना सर्वथा उचित है। इससे न तो तुम्हारी पारणा रुकेगी और न होगी मुनि के यज्ञकार्य में कमी। **(५६)** इसके अतिरिक्त आप स्वयं परतन्त्र हैं और जानते हैं कि 'रक्ष्य को नष्ट कर रक्षक स्वयं अक्षत रहते हुए स्वामी के समक्ष उपस्थित नहीं हो सकता।' **(५७)** रही बात मेरी तो यदि आप मुझे किसी कारण अहिंसनीय मानते हैं तो मेरे कीर्त्तिकाय पर दया करें। स्थूल शरीर को तो एक दिन जाना ही है, अतः उस पर मुझ जैसों की अनास्था ही समझिए। **(५८)** माना जाता है 'बातचीत हुई कि सम्बन्ध बना'। वह (सम्बन्ध) यहाँ वन में मिले हम

५३. वृत्तेः=वृत्तैः अ.ना.। **५४. शक्यो००र्षेः=शक्यानुनयो महर्षिः** हे.; **च्चान्य=दन्य** व.हे.अ.ना.; **मनूनां=तनूजां** अ.ना.; **प्रहृतं=प्रहृता** अ.ना.; **स्यां=स्यात्,** अ.ना.। **५५. न्याय्या=न्याय्यं, त्याज्यम्,** हे.। न्याय्यमिति 'शक्यं क्षुत् प्रतिहन्तुमि'–तिवन्नादरणीयम्, वाक्यारम्भ एव तथादरः, न तु वाक्यमध्ये।। **विहता=विहिता,** अ., **विफला, वितथा; तवैवं=न चैवं। ५६. अवैति=नवैतु,** अ. ना.; **यद=नहि; हि यत्न=प्रयत्न; नहि=यदि, किमु। ५८. वृत्तः=जातः ; प्रणयं=प्रणयः प्रीतिपूर्णा याच्ञा,** यथा मेघेदूते ५, द्र.काग्र.–२।

तथेति गां मुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
संन्यस्तशस्त्रो हरये स्वदेहमुपानयत् पिण्डमिवामिषस्य ॥ ५९ ॥
तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ ६० ॥
उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥ ६१ ॥
तं विस्मितं धेनुरुवाच साधो! मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्रः ॥ ६२ ॥
भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र! वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥ ६३ ॥

दोनों के बीच बन चुका, अब आप तो भूतनाथ भगवान् शिव के अनुचर हैं, आपको अपने इस सम्बन्धी की याचना तोड़ना शोभा नहीं देता।' (५९) सिंह ने कह दिया 'तथास्तु'। दिलीप का चिपका हाथ तत्काल छूट गया। उसने अस्त्र छोड़ा और सिंह को अपना शरीर मांसपिण्ड की भाँति भेंटकर दिया। (६०) राजा नीचे सिर किए बैठा था और सोच रहा था कि 'सिंह का भीषण पंजा उस पर अब पड़ा तब पड़ा' कि पड़ी उस पर पुष्पवृष्टि, विद्याधर जाति के लोगों के हाथों से छूटी। (६१) उसे सुनाई दिया 'वत्स! उठ!' यह अमृत जैसी मीठी वाणी सुनी तो उठे दिलीप ने देखा कि वहाँ थनों से दूध चुवा रही नन्दिनी खड़ी है, सिंह है ही नहीं। (६२) आश्चर्य में डूबे राजा से धेनु ने कहा 'हे साधो! मैंने यह माया रचकर तेरी परीक्षा ली है। महर्षि के प्रभाव से मुझ पर आक्रमण स्वयं यमराज भी नहीं कर सकते, दूसरे हिंसकों की तो विसात ही क्या (६३) गुरुभक्ति और मुझ पर दया करने से, हे वत्स! मैं तुझ पर प्रसन्न हूँ। वर माँग। यह मत समझ कि मैं केवल दूध ही देती हूँ, प्रसन्न होने पर मैं सभी कामनाएँ भी पूरी कर सकती हूँ।'

५९. गां मुक्त=गामुक्त हे.; संन्य=स न्य व.। ६०. अवाङ्मु=अधोमु । ६१. प्रस्रविणीं=प्रस्नविनीं अ.ना.। ६२. ऋषि=मुनि, गुरु; हिंस्रः=हिंस्राः। ६३. पुत्र=वत्स, हन्त; वलानां=वलं मां।

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्त्तारमनन्तकीर्त्तिं सुदक्षिणायां तनयं ययाचे ।। ६४।।
सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ।। ६५।।
वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः! ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।। ६६।।
इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ।। ६७।।
तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ।। ६८।।
स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुद्धं यशो मूर्त्तमिवातितृष्णः ।। ६९।।

(६४) तब याचकों को मान देने वाले और अपने भुजबल पर वीर कहलाते उस राजा ने हाथ जोड़कर माँगा—'पुत्र, जो सुदक्षिणा के गर्भ से उत्पन्न हो, जिसकी कीर्त्ति अनन्त हो और जिससे वंश भी चले'। **(६५)** पयस्विनी नन्दिनी ने तथास्तु कहकर आज्ञा दी — 'पुत्र दोने में दुहकर मेरा दूध पी लो।' **(६६)** दिलीप ने निवेदन किया 'मातः! आपका दूध मैं अवश्य पीऊँगा, परन्तु बछड़े के पी लेने और होमकार्य पूरा होने से शेष बचे और गुरुजी आज्ञा दें, वह भी रक्षित पृथिवी के षष्ठ अंश के समान साधिकार।' **(६७)** क्षितीश दिलीप ने ऐसा निवेदन किया तो मुनि वसिष्ठ की धेनु और अधिक प्रसन्न हुई और उसके साथ हिमालय की कुक्षि से आश्रम आ पहुँची। उसे तनिक सा भी परिश्रम नहीं हुआ। **(६८)** राजा का चेहरा प्रसन्न था प्रसन्न चन्द्र जैसा। वह राजाओं में सबसे बड़ा था। उसने नन्दिनी के प्रसन्न होने की बात गुरु वसिष्ठ जी को बतलाई। फिर बतलाई प्रिया को जो खुशी के लक्षण देख समझ ही गई थी, वाणी से भी वही निवेदन किया। वस्तुतः वह पुनरुक्ति सी थी। **(६९)** सत्पुरुषों पर स्नेह रखते दिलीप ने नन्दिनी का वत्स और यज्ञ से बचा दूध गुरु वसिष्ठ की आज्ञा मिलते ही बड़ी ही ललक के साथ पिया। वह मानों उसका अपना धवल यश ही था।

६४. **अनन्तकी=अनिन्द्यकी; कीर्तिम्=कीर्त्तिः।** ६५. **त्रोपभु=त्रोपयु** व.हे.अ.ना.। ६७.**मश्रमेण=मश्रमैव** व.। ६८. **प्रह००तं=मुखप्रसादानुमितं।** ६९. **शुद्धं=शुभ्रं** म.; **वातितृष्णः=वातितृप्तः** हे., **वाधितृष्णः** व., **वावितृप्तः।**

प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ।। ७० ।।
प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्त्तुररुन्धतीं च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ।। ७१ ।।
श्रोत्राभिरामध्वनिना रथेन स धर्म्मपत्नीसहितः सहिष्णुः ।
ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ।। ७२ ।।
तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ।। ७३ ।।
पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ।। ७४ ।।

(७०) सबेरा होते ही, उक्त व्रत की पारणा हो जाने पर वशी गुरु वसिष्ठ ने प्रास्थानिक स्वस्त्ययन कर उन पति—पत्नी को अपनी राजधानी विदा कर दिया। (७१) राजा ने प्रस्थान किया। उसके पूर्व प्रदक्षिणा की आहुति से प्रज्वलित यज्ञाग्नि की, गुरु वसिष्ठ की, माता अरुन्धती की और सवत्सा धेनु (नन्दिनी) की। इस उत्तम मङ्गल से उसका तेज और बढ़ गया था। (७२) धर्मपत्नी सहित सहिष्णु दिलीप ने रथ से किया प्रस्थान। उसकी ध्वनि कानों को अच्छी लग रही थी। उसका मार्ग ऊबड़खाबड़ नहीं था अतः सुखदायी था। वह रथ मानों उसका पूर्ण हुआ मनोरथ ही था। (७३) दिलीप राजधानी पहुँचे तो प्रजा ने उनके दर्शन अतृप्त नेत्रों से किए, कारण कि एक तो कुछ दिनों तक दर्शन मिले नहीं थे, अतः उत्सुकता जागी हुई थी और दूसरे प्रजा (पालक सन्तान) के लिए किए व्रत से ही थे वे कृश, नवोदित ओषधीनाथ (चन्द्र) के समान।। (उसका भी दर्शन ललक के ही साथ किया जाता हैं)। (७४) इन्द्र जैसी कान्ति वाले और नगरवासियों से अभिनन्दित किए जा रहे उस दिलीप ने पताकाओं से मण्डित नगर में प्रवेश किया और अपनी सर्पाधिराजतुल्य बलशाली बाहुओं पर भूमि का दायित्व पुनः उठा लिया।

७०. प्रस्थापया=संप्रेषया, व.अ.ना.। **७१. मनन्तरं००तीं च=ततस्तु/श्च होतारमरुन्धतीं च; रप्रभा=तरानु । ७२. वनुद्धातसुखेन=वनुद्घातरयेण; स्वेनेव=स्वेनैव। ७३. तौत्सुक्य=तोत्कण्ठ्य ; प्रजार्थ = प्रजार्थं।**

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः।। ७५।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ सुदक्षिणागर्भाधानो नाम
द्वितीयः सर्गः।। २।।

(७५) अब रानी सुदक्षिणा ने गर्भ धारण किया वैसे ही जैसे द्यौ धारण करती है अत्रि के नेत्र से उत्पन्न ज्योति (चन्द्र) को या शिव के अग्नि में निक्षिप्त तेज (वीर्य) को सुरसरित् (गङ्गा)। यह गर्भ ही था उस राजकुल के अस्तित्व का मूल, उसमें थे निहित (इन्द्र आदि) लोकपालों के गम्भीर अंश।

इस प्रकार पूर्ण हुआ 'महाकवि कालिदास की कृति' रघुवंश महाकाव्य में
सुदक्षिणागर्भाधान नामक द्वितीय सर्ग ।। २।।

पुष्पिका—

महाकाव्ये कालिदासकृतौ सुदक्षिणागर्भाधानो नाम=दिलीपवरयाचनो नाम, प्रसादगर्भाधानो नाम हे., वशिष्ठवरप्रदानो नाम, नन्दिनीवरप्रदानो नाम , वरप्रदानो नाम, दिलीपवरप्रदानो नाम, प्रसादगर्भाधानो नाम।।

।। तृतीयः सर्गः।।

अथेप्सितं भर्त्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणा दोहदलक्षणं दधौ ।।१।।
शरीरसादादसमग्रभूषणा मुखेन साऽलक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ।। २।।
तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्लवम् ।। ३।।
दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान् विलङ्घ्य सा ।।४।।

(१) अब प्रकट हुए रानी सुदक्षिणा में गर्भलक्षण। वह था पति (दिलीप) का प्रकट हुआ अभीष्ट, सखीजनों की कल्पनाओं का कौमुदीमहोत्सव और इक्ष्वाकुवंश का निदान। (२) रानी दुबला गई। वह कुछ ही भूषण धारण करती और उसका चेहरा पड़ गया पीला। उसकी छवि ठीक वैसी ही थी जैसी प्रभात बनने जा रही रात्रि की होती है, जिसमें शशिबिम्ब का प्रकाश थोड़ा ही शेष रहता है और तारे भी इने गिने। (३) (गर्भवती रानी के साथ राजा का शरीरसंपर्क था, परन्तु केवल चुम्बन तक।) राजा दिलीप रानी सुदक्षिणा का मिट्टी से सुगन्धित मुख चूम चूम कर अघाते ही नहीं थे, वैसे ही जैसे कोई हाथी ग्रीष्म बीत जाने पर मेघ की पहली बूँदों से सिक्त वनराजिपल्वल (गड्ढे) को सूँघ सूँघकर। (४) रानी ने, अन्य सभी रसों को छोड़कर मिट्टी खाना पसंद किया, कदाचित् इस भाव से कि उसका भावी पुत्र पृथिवी का भोग वैसे ही करेगा जैसे इन्द्र भोग करता है द्युलोक का। उसके रथ को विश्राम

---

१. मुखम्=महम्, सुखम् हे.; दोहद=दौर्हृद, एवमेवाग्रेऽपि। अत्र रूपान्तरभूतं पद्यद्वयम्—

ततो विशाम्पत्युरनन्यसन्ततेर्मनोरथं किञ्चिदिवोदयोन्मुखम् ।
अनन्यसौहार्दरसस्य दोहदं प्रिया प्रपेदे प्रकृतिप्रियंवदा ।।
मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा ।
स्थिताल्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत् ।।

२. लोध्र=रोध्र व.; प्रभात=विभात व.।३. मृत्सुरभि००श्वरो=सेवितमृत्तिकालवम्, रसविन्मृत्तिकालवं; रहः=नृप; तैः प=तैष्पयो। ४. भुवं=महीं व.हे.; तत्सुतः=मत्सुतः ; अतो=अथो।

न मे ह्रिया शंसति किञ्चिदीप्सितं स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः ।। ५।।
उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्यास् त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ।। ६।।
क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानाऽवयवा रराज सा ।
पुराणपत्त्रापगमादनन्तरं लतेव सन्नद्धमनोज्ञपल्लवा ।। ७।।
दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीढयोः सुजातयोः पङ्कजकोषयोः श्रियम् ।। ८।।
निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ।। ९।।

मिलेगा दिगन्त में। (आसमुद्रक्षितीशत्व।) (५) उत्तरकोसल (अयोध्या जनपद) के स्वामी दिलीप प्रिया की सखियों से पूछा करते कि रानी सुदक्षिणा मुझसे कुछ भी माँगने में लजा रही है। बतलाओ क्या चाहती है वह? (६) गर्भकष्ट में वह (सुदक्षिणा) जो भी चाहती, वह तत्काल उपस्थित पाती। उसके धनुषधारी पति के लिए प्रत्यञ्चा चढ़ा लेने पर रानी की अभीष्ट कोई भी वस्तु स्वर्ग में भी दुर्लभ नहीं थी। (७) गर्भकष्ट के दिन बीत गए और रानी फिर सम्हलने लगी। इस समय वह उस लता सी लग रही थी जिसके पुराने पत्ते छँट गए हों और जिसमें नई कोंपलें भर गई हों। (८) ज्यों–ज्यों दिन चढ़ते गए सुदक्षिणा के आँचर पुष्ट होते गए और जब खूब फूल गए तो उसके अग्रभाग पर श्यामवर्ण छा गया। तब उनसे सुजात और भौंरो से लीन कमलकोष की छवि दब गई। (९) परिपूर्ण गर्भवाली उस पत्नी को देखता तो राजा मानता कि यह निधि छिपाई हुई भूमि है, यह भीतर अग्नि लिए शमी है, यह सरस्वती नदी है, पानी भीतर छिपाई हुई।

५.अस्यास्=अस्य; रभूद=बभूव; दनासाद्य=दुष्प्राप, दुष्प्राप्य। ७. प्रचीयमानावयवा=उपोढगो(गा)त्रोपचया; सन्नद्ध=सम्बद्ध। ८. मानील=माश्याम ; लीढ=लीन म.अ.ना., कीर्ण ।

अत्र रूपान्तरम् – दिनेषु गच्छत्सु मधूकपाण्डुरं तदीयमाश्याममुखं स्तनद्वयम् ।
समुद्गयोर्वारणदन्तकोषयोर्बभार कान्तिं गवलापिधानयोः ।।

९. ससत्त्वां=सगर्भां ।

प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानाञ्च दिगन्तसम्पदाम् ।
यथाक्रमं पुंसवनादिकाः क्रियाः श्रुतेश्च धीरः सदृशीर्व्यधत्त सः ॥१०॥
सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया गृहागतः ।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः ॥११॥
कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥१२॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥१३॥
दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्व्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥१४॥

(१०) उसने गर्भवती रानी के पुंसवन आदि सभी विधान क्रम से प्रिया के अनुराग, अपने मन की ऊँचाई और भुजबल से अर्जित दिग्दिगन्तों की सम्पत्ति के ही अनुरूप किए। (११) राजा जब घर लौटता तो रानी उसका स्वागत तो करती, किन्तु वह जो अंजलि बनाती उसमें उसके हाथ कठिनाई से उठ पाते, उसके नेत्र चंचल रहते और वह आसन भी प्रयत्न से ही छोड़ पाती। इसका कारण था गर्भ, जिसमें था सुरेन्द्र की मात्रा से उत्पन्न भार। (१२) अब कुमारभृत्या में कुशल प्रामाणिक वैद्यों ने 'गर्भभर्म' नामक उपचार पूरा किया और प्रसवोन्मुख प्रिया को आश्वस्त पति (दिलीप) ने प्रतीक्षाभरी आश्वस्त दृष्टि से वैसे ही देखा जैसे समय आने पर अभ्रगर्भित द्यौ को देखा जाता है। ('कुमारभृत्या' और 'गर्भभर्म' दोनों वैद्यशास्त्र की परिभाषाएँ हैं। कुमारभृत्या = बालचिकित्सा। गर्भभर्म = गर्भ का भरण पोषण।) (१३) इसके पश्चात् शचीतुल्य रानी ने जन्म दिया पुत्र को, जैसे तीन साधनों वाली शक्ति देती है जन्म अक्षय अर्थ को। जन्म के समय पाँच ग्रह उच्च थे और उन्हें सूर्य नहीं देख रहा था, जिससे उसकी भाग्यसंपत्ति सूचित हो रही थी। (तीन शक्ति = प्रभावशक्ति, उत्साहशक्ति, मन्त्रशक्ति।) (१४) उस समय सभी लक्षण शुभ ही शुभ हो रहे थे। दिशाएँ प्रसन्न (निर्मल) हो उठीं, सुखद वायु बहने लगी और यज्ञाग्नि प्रदक्षिण होकर हविष्य ग्रहण करने लगा। उस जैसों का तो जन्म होता ही है लोकाभ्युदय के लिए।

१०. श्रुतेश्च=धृतेश्च ।१२. रनु००भर्मणि=धिष्ठि००कर्मणि, वेश्मनि व.; **पतिःप्र००भ्रितामिव= निरत्ययाय प्रसवाय तस्थुषीं, निरत्ययाय प्रसवाय तस्थुषी बभौ समासन्नफला क्रियेव सा। १३. संश्रयैः =संश्रितैः** अ.ना. , **संस्थितैः** हे.; **पुत्रं = सूनुम् ; मक्षयम्= मक्षतम्,** अ.ना.। **१४. र्हविर= र्हुतम।**

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ।।१५।।
जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरम् ।
अदेयमासीत् त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ।।१६।।
निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद् गुरुः प्रहर्षः प्रबभूव नात्मनि ।।१७।।
स जातकर्म्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ।।१८।।
सुखश्रवा मङ्गलतूर्यनिःस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ।।१९।।
न संयतस्तस्य बभूव रक्षितुर्विमोचयेद् यं सुतजन्महर्षितः ।
ऋणाभिधानात् स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ।। २०।।

(१५) उस बालक का जन्म सुखपूर्वक हुआ। चहुँओर फैले उसके अपने तेज से सूतिका गृह की शय्या के आसपास रखे निशीथ दीपक एकाएक हतप्रभ हो उठे। लग रहा था जैसे वे चित्रलिखित दीपक थे। (निशीथ=अर्धरात्रि।) (१६) राजा को अन्तःपुर के जिस सेवक ने 'पुत्रजन्म' यह अमृततुल्य अक्षरवाला शब्द सुनाया, उसके लिए राजा के पास केवल तीन वस्तुएँ अदेय रह गई थीं चन्द्रमा सा श्वेत छत्र और दो वैसे ही चामर। (१७) वातरहित सरोवर के पद्म से निश्चल नेत्र से पिया राजा ने पुत्र का कान्तिमान् चेहरा। उससे हुई खुशी उसमें अँट नहीं रही थी, चन्द्रदर्शन से महोदधि के पूर के समान। (१८) तपस्वी पुरोधा (वसिष्ठ जी) ने तपोवन से आकर पूरा जातकर्म संस्कार संपन्न किया तो दिलीप का वह पुत्र और अधिक सुशोभित हुआ,खरादे जाने पर खदान से निकले मणिरत्न के समान। (१९) उस समय वारवनिताओं के प्रमोदनृत्यों के साथ मंगलतूर्यस्वन गूँज उठे केवल दिलीप के भवन में नहीं, अपितु देवपथ (आकाश) में भी। (२०) दिलीप ऐसा रक्षक था कि उसके यहाँ कोई भी बन्दी नहीं था, जिसे वह पुत्रजन्म की खुशी के अवसर पर मुक्ति देता। हाँ, वह स्वयं मुक्त

१५. **निशीथ=निशान्त** अ.ना.। १६. **त्रय=द्वय** अ.ना.।
अतः परं पद्यान्तरम् – **समीक्ष्य पुत्रस्य चिरान्मुखं पिता निधानकुम्भस्य युवेव दुर्गतिः ।**
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्छितो यथा ।।
१७. **निवात=निवीत, निर्वात; नात्मनि=चात्मनि** व.। १९. **नृत्यैः=नृत्तैः** अ.ना.।
२०. **विमोच=विसर्ज,** व.म.अ.ना.।

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ।। २१ ।।
पितुः प्रयत्नात् स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ।। २२ ।।
उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ।। २३ ।।
रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत् प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत् तयोः परस्परस्योपरि पर्यचीयत ।। २४ ।।
उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ।। २५ ।।

हुआ पितरों के ऋण नामक बन्धन से। **(२१)** पिता दिलीप ने अपने पुत्र का नाम रघु (प्रगतिशील) रखा यह देखकर कि आगे चलकर यह एक ओर तो वैदुष्य के अन्तिम बिन्दु तक पहुँचेगा और दूसरी ओर युद्ध में अपने शत्रुओं के भी अन्त तक 'रघु' शब्द की प्रकृति 'रघि'—धातु का गमन अर्थ देखकर। (द्र. ऋग्वेद ५.२५.३ रघुष्यहं जेतारमपराजितम्') **(२२)** समग्रसंपत्ति वाले पिता (दिलीप) के प्रयत्न से उस बालक के शुभ अंग दिन दिन पुष्ट होते जा रहे थे उसी प्रकार जिस प्रकार बालचन्द्र के अंग सूर्य के अनुप्रवेश से। **(२३)** वे दोनों पतिपत्नी, सुदक्षिणा तथा दिलीप उस पुत्र से उसी प्रकार प्रसन्न हुए जिस प्रकार कार्त्तिकेय के जन्म से प्रसन्न हुए होंगे पार्वती तथा शङ्कर, या जयन्त के जन्म से शची तथा इन्द्र। राजा—रानी की जोड़ी शिव और पार्वती की जोड़ी तथा शची और इन्द्र की जोड़ी सी ही थी। वह पुत्र भी था कार्त्तिकेय और जयन्त सा। (महिमभट्ट ने इस श्लोक में पुनरुक्ति दोष दिखाए हैं, व्यक्तिविवेक द्वितीय विमर्श के अन्त में।) **(२४)** उस एक पुत्र के बीच में आ जाने पर भी सुदक्षिणा और दिलीप का चक्रवाक चक्रवाकी सा एक दूसरे पर जो प्रेम था वह बढ़ा ही। **(२५)** बालक रघु, धाई जो बोलती उसे बोलता, उसकी उँगली पकड़कर चलता। अभिवादन की शिक्षा से झुक झुककर नम्रता प्रदर्शित करता। इन सबको देख पिता की प्रसन्नता बढ़ती जाती।

२२. द्रष्टव्योऽत्र व्यक्तिविवेकस्य द्वितीयविमर्शान्ते विचारः। २४. सुतेन=सुते न व.; पर्यचीयत=न व्यहीयत हे., सुते न००पर्यहीयत व.। २५. उवाच=यदाह हे.; दितं वचः=दितानि यत् अ.ना.; ततान सोऽर्भकः=शिशुस्ततान सः व.अ.।

तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात् सुतस्पर्शरसज्ञतां ययौ ।। २६।।
अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।
स्वमूर्त्तिभेदेन गुणाग्र्यवर्त्तिना पतिः प्रजानामिव सर्गमात्मनः ।। २७।।
स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ।। २८।।
अथोपनीतं विधिवद् विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ।। २९।।
धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ।। ३०।।

(२६) राजा को सुतस्पर्श के सुख का अनुभव बड़ी देरी से हुआ। राजा पुत्र को गोद में बिठाता और सुख का अनुभव करता। वह (पुत्र) त्वचा पर मानों अमृत सींचता। सुखानुभव से उस (दिलीप) की आखों के छोर संकुचित हो जाते। **(२७)** मर्यादास्थापक दिलीप ने अपने वंश को इस पुत्र से अस्तित्वयुक्त माना। क्यों नहीं, इसका जन्म सर्वोत्कृष्ट जो था। ऐसा ही माना था प्रजापति ने अपनी ही सत्त्वगुणी मूर्त्ति (विष्णु) से अपनी सृष्टि को। (सत्त्वगुणी मूर्त्ति–विष्णु, वल्लभ, हेमाद्रि मल्लिनाथ, दिनकर, अरुणगिरिनाथ, नारायण, दक्षादिप्रजापति अधिक उपयुक्त। अभेत्ता=स्थापक अरुणगिरिनाथ) **(२८)** अब हुआ उस बालक का चूडाकर्म संस्कार। उसी के साथ चूडाकर्म हुआ समान वय के अमात्यपुत्रों का। उन सबके साथ रघु का हुआ विद्यारम्भ संस्कार। पहले उसने सीखी विधिवत् लिपि। तब प्रवेश किया वाङ्मय में, वैसे ही जैसे नदीमुख से समुद्र में प्रवेश कर लिया जाता है। **(२९)** अब हुआ रघु का विधिवत् उपनयन संस्कार। इसके पश्चात् विद्वान् गुरुजनों ने गुरुप्रिय उसे शिक्षा (विनय) देना आरम्भ किया और वे अपने यत्न में सफल रहे। शिक्षा में प्रसाद आता ही योग्य शिष्य में पहुँचकर। (क्रिया=शिक्षा कौटल्य, वस्तु=कुशाग्रबुद्धि)। **(३०)** धीरे धीरे चार समुद्रों सी चारों विद्याएँ (आन्वीक्षिकी, त्रयी, वार्त्ता, दण्डनीति) पार कर गया रघु। उसी प्रकार जिस प्रकार पवन वेग से तीव्र वेग वाले अश्वों से सूर्य पार कर जाता है दिगन्तरालों को। रघु की बुद्धि में सभी (सातों

---

२६. उपान्त=त्रिभाग हे.। **२७. वर्तिना=वृत्तिना, वर्त्तिनः**। **२८. चूलः=चूडः** व.हे., **चौलः, चौडः** अ.ना.। **३०. पाति=वर्त्ति**। समग्रत्वं सप्तसंख्यावत्त्वम्, बुद्धिगुणानां सप्तसंख्यावत्त्वस्यैव कौटल्यकामन्दकादिषु प्रसिद्धेः। तथा च कौटल्यस्य सूत्रम् ६.१.३, कामन्दकस्य च ४.२१।

त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न तद्गुरुः केवलमेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ।। ३१।।
महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद् यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ।। ३२।।
अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद् गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ।। ३३।।
युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः ।
वपुः—प्रकर्षादजयद् गुरुं रघुस्तथापि नीचैर् विनयाददृश्यत ।। ३४।।
ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ।। ३५।।

गुण जो थे और वह उदारधी था)। (सात गुण—'शुश्रूषा, श्रवण, ग्रहण, धारण, ऊहापोह, अर्थविज्ञान और तत्त्वज्ञान। ऊहापोह को मिलाकर गिना गया।) **(३१)** अब सीखी उसने शस्त्रविद्या। उसने पवित्र मृगचर्म धारण किया और अपने पिता से ही ग्रहण की शस्त्रविद्या। उसका पिता केवल अद्वितीय राजा ही नहीं था। वह पूरे पृथिवीलोक पर अद्वितीय धनुर्विद्याविशारद भी था। **(३२)** अब रघु युवक हो गया, वैसे ही जैसे छोटा सा बच्छा महोक्ष बन जाता है या करिशावक बन जाता है गजराज। रघु का शैशव बीता और यौवन ने उसके शरीर में पुष्टि, गाम्भीर्य और मनोहारिता ला दी। **(३३)** फिर हुआ रघु का गोदान (मुण्डन) संस्कार। पश्चात् विवाह। अनेक राजकन्याएँ रघु जैसा सत्पति पाकर उसी प्रकार सुशोभित हुई जैसे तमोहारी (चन्द्र) को पति के रूप में प्राप्त कर सुशोभित हुई थी प्रजापति दक्ष की पुत्रियाँ। (गो=केश, दान=काटना। 'दो अवखण्डने' धातु।) **(३४)** यौवन आते ही रघु के बाहु युग (जुए) से लम्बे हो गए। कन्धों पर पुष्टि आ गई वक्षःस्थल (किले के मुख्य द्वार के) किवाड़ों सा फैल गया और ग्रीवा भर गई। इस प्रकार शरीर के प्रकर्ष में वह अपने पिता से आगे था, किन्तु विनय के कारण छोटा ही दिखाई देता था। **(३५)** इसके पश्चात् राजा ने रघु को युवराज का ओहदा दे दिया। यह इस कारण कि उसमें विनय का संस्कार स्वाभाविक रूप से प्रतिष्ठित था और अब लम्बे अर्से से सम्हाले प्रजापालन के बोझ को राजा हल्का करना चाहता था।

३१. स मे = च. मे अ.ना.; वत्=वित् व.। ३२. गाम्भीर्य = गम्भीर व.। ३३. तमोनुदम्= तमोपहम्, व.हे.। ३४. प्रकर्षा = प्रहर्षा। ३५. शब्दभाक् = संज्ञकः।

नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम् ।
अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ।। ३६ ।।
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ।। ३७ ।।
नियुज्य तं होमतुरङ्गरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ।। ३८ ।।
ततः परं तेन मखाय यज्वना तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ।। ३९ ।।
विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ।
वसिष्ठधेनुश्च यदृच्छयाऽऽगता श्रुतप्रभावा ददृशेऽथ नन्दिनी ।। ४० ।।
तदङ्गनिःस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ।। ४१ ।।

(३६) गुणों को चाहती राजलक्ष्मी वृद्ध पिता के पास से युवा पुत्र में आंशिक रूप से संक्रान्त हुई तो वैसे ही बड़ी अच्छी लगी जैसे कमल से नए खिले उत्पल पर संक्रान्त श्री (शोभा) अच्छी लगती है। **(३७)** राजा दिलीप युवराज रघु की शक्ति से और अधिक दुःसह हो गए, वैसे ही जैसे वायु को सारथि पा अग्नि हो जाया करता है, शरद् ऋतु के योग से सूर्य और कटप्रभेद से (मदधारा फूट पड़ने पर) गजराज। **(३८)** इसके पश्चात् राजा दिलीप ने, राजपुत्रों के साथ रघु के संरक्षण में होमतुरंग को स्वच्छन्द छोड़कर, निन्यानवे अश्वमेध तो कर लिए, उनमें कोई बाधा नहीं आई। **(३९)** परन्तु जब सौवाँ अश्वमेध करने हेतु अश्व छोड़ा तो सभी धनुषधारी रक्षकों के देखते देखते ही उस (अश्व) को अदृश्य इन्द्र ने हरण कर लिया। **(४०)** (उसी समय हुआ चमत्कार) कुमार–सेना विषाद में डूब गई। उसे कुछ भी समझ नहीं आ रहा था कि एकाएक उपस्थित दिखाई दी वसिष्ठधेनु (नन्दिनी) जिसका प्रभाव सुना जा चुका है (सर्ग–२ में)। **(४१)** रघु ने उसकी पवित्र गुमातर से आँखें धोईं और सत्पुरुषों में अग्रगण्य उसकी दृष्टि में आ गई शक्ति अतीन्द्रिय पदार्थों को भी देख लेने की।

३७. सुदुःसहः=दुरुत्सहः अ.ना., **दुरासदः, स दुस्सहः** । रघु. ८.४, १८.२५ **३८. द्रुतम्=द्रुतम्।**
३९. ततः=अतः व.हे.अ.ना.; **रक्षिणाम्=रक्षताम्** व.। **४०. विस्मितम्=विस्मृतं; तत्=यत्।**
अतः परं पद्यम्– **स्वेदाम्बुना मार्जय पुत्र लोचने ममैव येनेह तुरङ्गमीक्षसे ।**
धेन्वा निशम्येति वचः समीरितं मुदं परामाप दिलीपनन्दनः ।।

स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसम्भवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ।। ४२ ।।
शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव ।। ४३ ।।
मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र! सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे ।। ४४ ।।
त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत् स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ।। ४५ ।।
तदङ्गमग्र्यं मघवन्! महाक्रतोरमुं तुरङ्गं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् ।। ४६ ।।
इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् ।
निवर्त्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ।। ४७ ।।
यदात्थ राजन्यकुमार! तत् तथा यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर् लङ्घयितुं ममोद्यतः ।। ४८ ।।

(४२) उसे दिखाई दिया कि पूर्व दिशा में इन्द्र रथ के पीछे रस्सी से बाँध कर लिए जा रहा है अश्व को और उसकी चपलता को सूत बारम्बार रोक रहा है। (४३) निमेषरहित हजार नेत्रों से और घोड़ों के हरित् (ज़र्द) रंग से रघु ने समझ लिया कि यह देवराज इन्द्र हैं, तो गंभीर गगनस्पर्शी स्वर में उन्हें लौटाते हुए सा कहा। (४४) हे देवराज! मनीषीजन आपको ही तो मानते हैं प्रथमतम मखांशभागी। तब यह क्या कि आप ही बन रहे हैं विघ्न मेरे निरन्तर यज्ञरत पिता के यज्ञानुष्ठान में। (४५) आप ही तो हैं तीनों लोकों के स्वामी। आपका ही तो है दायित्व यज्ञशत्रुओं पर नियंत्रण का। आप ही यदि विघ्न बनेंगे धर्मानुष्ठान करने में लगे सत्पुरुषों के अनुष्ठान में तो फिर नष्ट है सारी विधि। (४६) इसलिए हे अङ्ग! उचित है कि महाक्रतु के अंग इस अश्व को आप छोड़ दें। श्रुति मार्ग के दर्शक और समर्थ जन कलुषित मार्ग नहीं अपनाया करते। (४७) रघु के ऐसे प्रगल्भ वचन सुने तो देवताओं के अधिपति (इन्द्र) को बड़ा विस्मय हुआ और उन्होंने रथ लौटाकर उत्तर देना आरम्भ किया। (४८) हे राजन्य (क्षत्रिय) कुमार! तुमने जो कहा वह ठीक है, परन्तु यश की रक्षा करना तो प्रत्येक

---

४२. शात=शाति; संयत=संयुत। ४४. देवेन्द्र=देवेश; सदा=यदा अ., यतः। ४५. सदा=सता व. अ.ना.; रायो=रायी व.अ.ना.; तो विधिः=तोऽवधिः। ४६. दर्शयि =देशयि। ४८. यदात्थ=यदाह।

हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ।।४९।।
अतोऽयमश्वः कपिलानुकारिणा गुरोस्त्वदीयस्य मयाऽपहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य सन्ततेः ।।५०।।
ततः प्रहस्यापभयः पुरन्दरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ।।५१।।
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशालिना वपुःप्रकर्षेण विडम्बितेश्वरः ।।५२।।

यशोधन का कर्त्तव्य है, विशेषतः दूसरे व्यक्ति से। तुम्हारे पिता मेरे उसी जगत्प्रसिद्ध यश को यज्ञ पूर्ण कर क्षति पहुँचाने जा रहे थे। **(४९)** जैसे 'पुरुषोत्तम' एकमात्र विष्णु कहलाते हैं, दूसरा कोई नहीं और जैसे त्र्यम्बक केवल महेश्वर अन्य कोई नहीं वैसे ही 'शतक्रतु' नाम से मुनिजन केवल मुझे ही जानते हैं। हमारा यह शब्द किसी और के लिए प्रयुक्त नहीं होता। **(५०)** इस कारण तुम्हारे पिता का यह अश्व मैंने पकड़वा लिया जैसे कभी कपिल (राक्षस) ने पकड़वाया था। तुम्हारे प्रयत्न से कुछ होने वाला नहीं, फलतः सगरपुत्रों के पथ पर पैर मत रखो। (सगर का यज्ञाश्व कपिल नामक राक्षस ने चुराकर पाताल में कपिल महर्षि के पास बाँध दिया था। सगर के सौ पुत्र अश्व की खोज में वहाँ पहुँचे और तपोरत महर्षि को भलाबुरा कहने लगे। उनकी समाधि टूटी तो उनके नेत्र की ज्वाला में सब भस्म हो गए। उनका उद्धार तब हुआ जब भगीरथ और अंशुमान् ने घोर तपकर गङ्गा को स्वर्ग से पृथिवी पर उतारा और वह पहुँची 'भोगावती' नाम से पाताल लोक। अश्व कपिल मुनि के पास बँधा था तो सगर–पुत्रों ने यही सोचा कि उसका अपहरण उन्हींने किया या कराया है।) **(५१)** रघु हँसा और निर्भीक होकर उसने इन्द्र को चुनौती दी 'उठाइए अस्त्र यदि यही निश्चय है आपका। रघु को जीते बिना आप सफल नहीं होंगे, उस पर अश्वरक्षा का दायित्व जो था। **(५२)** रघु ऐसा कहकर इन्द्र की ओर हो धनुष पर बाण का सन्धान करने लगा उसने जो आलीढ–मुद्रा अपनाई उससे वह ऐसा लगा जैसे कभी भगवान् शङ्कर लगे थे। आलीढमुद्रा दाहिना पैर पीछे खींचकर बायाँ घुटना उठाए रखना। (इन्द्र और शिव के युद्ध का स्मरण २.४२ में देखें।)

५०. कारि=सारि म.अ.ना.; **निधाः=कृथाः** व., **नुगाः** अ.ना. **व्यधाः।** **५१. ततः=अतो, अथ** अ.ना.; **प्रहस्या००रक्षिता=प्रहस्याह पुनः पुरन्दरं व्यपेतभीर्भूमिपुरन्दरात्मजः ; सर्ग=गर्व** व.; **भवान्=भवेत्।**
५२. शालिना=शोभिना ; प्रकर्षेण=प्रहर्षेण।

रघोरवष्टम्भमयेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्त्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ।।५३।।
दिलीपसूनोः स बृहद् भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्व्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ।।५४।।
हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रलताक्रियोचिते स्वनामचिह्नं निचखान सायकम् ।।५५।।
जहार चान्येन मयूरपत्त्रिणा शरेण शक्रस्य महाशनिध्वजम् ।
चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ।।५६।।
तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्त्रिभिः ।।५७।।

(५३) रघु के सुवर्णजटित बाण से इन्द्र का वक्षःस्थल घायल हो गया तो नए मेघों पर कुछ देर तक दिखाई देने वाले अपने धनुष पर इन्द्र ने भी अमोघ बाण चढ़ाया। उन्हें क्रोध आ गया था। (५४) भयंकर असुरों के रक्त के पान का अभ्यासी वह बाण दिलीपपुत्र (रघु) के विशाल वक्षःस्थल में आ धँसा और उसने पहली बार पान किया तब तक अनचखे मनुष्य रक्त का, एक प्रकार से कुतूहल में आकर। (५५) कार्त्तिकेय जैसे पराक्रमी कुमार ने भी चलाया बाण। वह जाकर चुभा इन्द्र की भुजा में, ऐरावत का माँथा थपथपाने से जिसकी उँगलिया कर्कश थीं और जिस पर इन्द्राणी ने अपने हाथ से पत्रविशेषक का मण्डन बना रखा था। हाँ! उस बाण में रघु का अपना नाम खुदा था। (५६) रघु ने एक बाण और चलाया जिसमें लगे थे मोर पंख। उसने काट डाली इन्द्र की वज्रांकित ध्वजा। उससे इन्द्र बहुत ही क्रुद्ध हुआ। उसे लगा कि एक प्रकार से सुरलक्ष्मी के केश किसी ने काट लिए। (स्त्री का मुण्डन उसके वैधव्य का सूचक होता है।) (५७) इस युद्ध में एक ओर (इन्द्र के पास) खड़े थे सिद्धपुरुष और दूसरी ओर (रघु के पास) सैनिक। दोनों के बाण, पंखधारी सर्पों से नीचे से ऊपर और ऊपर से नीचे चल रहे थे। युद्ध तुमुल था। एक दूसरे, एक दूसरे को चाह रहे थे जीत लेना।

५३. अवष्टम्भः सुवर्णम्। सायकम्=मार्गणम् ; लाञ्छने=लाञ्छनं। ५४. दिलीप=नरेन्द्र हे.; उचितः = अभ्यस्तः। ५५. पत्रलताक्रियोचिते=पत्रविशेषकाङ्किते म.; सायकम्=मार्गणम् व.। ५६. पत्रिणा=पक्ष्मणा व., पक्ष्मिणा। ५७. पत्रिभिः=सायकैः।

अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥ ५८॥
ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद् विडौजसः ॥ ५९॥
स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ६०॥
रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः ।
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ॥ ६१॥
तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे स्थिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥ ६२॥
अभङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्फुटमाह वासवः ॥ ६३॥

(५८) रघु का तेज नितान्त असह्य था। उस पर इन्द्र ने बाणों की घनघोर वर्षाएँ की, परन्तु वे उसे शान्त कर नहीं पाए, मेघ भी खुद से उत्पन्न अग्नि (विद्युत्) को नहीं बुझा पाता। **(५९)** (यह तो पिता पुत्र की लड़ाई थी) आगे बढ़कर रघु ने अर्धचन्द्र बाण छोड़ा जिसने काट डाली इन्द्र के धनुष की वह प्रत्यञ्चा जो इन्द्र के हरिचन्दनांकित मणिबन्ध में मथे जा रहे समुद्र सी ध्वनि उगल रही थी। **(६०)** इन्द्र के क्रोध की सीमा नहीं रही। उसने चाप फेंका और शत्रु (रघु) को मौत के घाँट उतारने हेतु वह अस्त्र (वज्र) धनुष पर चढ़ाया जिससे काटे जाते रहे थे पर्वतों के पंख और जिसके आसपास बना था स्फुरित कान्ति का मण्डल। **(६१)** उससे रघु के वक्ष पर बहुत ही गहरी चोट पहुँची। वह सैनिकों के अश्रुओं के साथ भूमि पर गिरा, किन्तु पल झपकते ही उठ खड़ा हुआ सैनिको की हर्ष ध्वनि के साथ। **(६२)** इतने पर भी रघु निष्ठुरतापूर्वक चलाता ही जा रहा था शस्त्र। इसके इस निरतिशय वीर्य से इन्द्र को बड़ा तोष मिला, जबकि वह वृत्र से शत्रु को मार चुका था। क्यों नहीं, गुण सभी जगह अपना स्थान बना ही लेंते हैं। **(६३)** वे स्पष्ट रूप से बोले – 'मेरा यह अस्त्र मारक क्षमता में इतना बड़ा

५८. अति=अपि अ.ना., इति; प्रबन्ध=प्रवृद्ध; प्रहि=प्रह; निर्वाप=निर्वर्त। ५९. धीर=भीम अ., घोर। ६०. प्रणाश= प्रवास अ.ना.। 'प्रपूर्वको वसिर्ज्ञेयः कारितान्तप्रमापणे' इति भोजः। व्यप=व्यव; णोचितं=णोद्धतं व.। ६१. वधूय=पनीय; तद्व्यथां=स व्यथां। ६२. स्थिर=चिर; निधी = विधी। ६३. अभङ्ग=असङ्ग, असक्त, असह्य; विसोढ=विसोढु; अवेहि=अवैहि, वामनस्य ५.२.६८; किमि००

ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियम्वदः प्रत्यवदत् सुरेश्वरम् ।। ६४।।
अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ।। ६५।।
यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव सन्देशहराद् विशांपतिः शृणोति लोकेश! तथा विधीयताम् ।। ६६।।
तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ।
नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्त्तत ।। ६७।।
तमभ्यनन्दत् प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः ।
परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ।। ६८।।

है कि यह पर्वतों पर भी कभी विफल नहीं हुआ। इसे तुम्हें छोड़ अभी तक कोई भी सह नहीं सका। मैं तुम पर खुश हूँ। इस यज्ञाश्व को छोड़, जो चाहो माँग लो।' (६४) इसके बाद प्रियंवद राजकुमार रघु इन्द्र से बोले। उन्होंने निषङ्ग से अधखिंचे बाण को वापस किया। बाण के पुंख थे सुवर्ण के, जिनकी कान्ति से रघु की उँगलियाँ पीली पड़ गई थीं (६५) 'प्रभो! यदि आप अश्व नहीं छोड़ना चाहते तो ऐसा वर दीजिए कि यज्ञकर्म में निरन्तर निरत मेरे पिताजी यज्ञकर्म की विधि अधूरी रहने पर भी यज्ञ का पूरा फल पा लेवें। (६६) हे लोकेश! एक प्रार्थना और कि इस घटना की सूचना पिताजी के पास आपका ही कोई दूत पहुँचा दे, क्योंकि वे यज्ञ में दीक्षित, अतएव अष्टमूर्त्ति शिव की एक (उग्र नामक) मूर्त्ति हैं। उनके पास मनुष्य का पहुँचना कठिन है।' (६७) इन्द्र ने 'तथा' कहकर रघु की प्रार्थना को स्वीकृति दी। सारथि मातलि के साथ वे उसी रास्ते लौट गए जिससे आए थे। सुदक्षिणा—सूनु (रघु) भी राजा दिलीप की यज्ञशाला पहुँचे। वे अधिक प्रसन्न नहीं थे। (६८) दिलीप को पहले ही इन्द्र के संदेशवाहक ने सारी सूचना दे दी थी। उन्होंने पुत्र (रघु) का अभिनन्दन किया वज्रघात के व्रण

वासवः=वरं वृणीष्वेति तमाह वासवः, वरं वृणीष्वेति तमाह वृत्रहा हे., वरं वृणीष्वेति तमादिदेश सः, किमिच्छ००स्मितमाह वासवः हे., किमि००ति स्म तमाह वासवः अ.ना.। ६४. मग्रमुदधृतं= मग्रनिस्सृतं व.अ.ना.; नरेन्द्रसू=दिलीपसू, अ.; वदः=वदं हे.; सुरेश्व=पुरन्द। ६५. प्रभो=विभो; विधिनैव=विधिनेव ; प्रयतः स मद्गुरुः=प्रयतः स मे गुरुः व., प्रयतस्य मे गुरुः, प्रयतश्च मे गुरुः, निरतः स मे गुरुः, निरतश्च मद्गुरुः , तनुरद्य मे गुरुः, तनुरस्य मे गुरुः। एवमत्र द्वादशभेदः प्रस्तारः। ६६. च=स; सदो=सभा; शृणोति=शृणोतु अ.ना.; लोकेश=देवेन्द्र हे., देवेश व.। ६८. जडेन=चलेन, व.हे.ना.।

इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ॥ ६९॥

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं यूने दत्वा सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ७०॥

इति रघुवंशे महाकाव्ये कालिदासकृतौ रघुराज्याभिषेको नाम तृतीयः सर्गः ॥ ३॥

से अंकित उसके शरीर पर प्रसन्नता से शीतल हाथ फेरते हुए। (६९) इस प्रकार राजा महनीय शासन वाले दिलीप ने निन्यानवे महाक्रतुओं की सीढ़ी सी फैला दी आयुष्य समाप्त होने पर स्वर्ग तक चढ़ने हेतु। (७०) दिलीप का चित्त (आत्मा) अब विषयों से लौटा। उसने राजा का चिह्न, श्वेतवर्ण का छत्र, युवक पुत्र रघु को विधिवत् प्रदान कर दिया और स्वयं उस रानी (सुदक्षिणा) के साथ जा बैठा मुनिवनतरुओं के नीचे। उमर ढलने पर इक्ष्वाकुवंशीय प्रत्येक व्यक्ति ऐसा ही करते आये हैं। उनका यही रहा है कुलव्रत।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में पूरा हुआ
रघुराज्याभिषेक नामक तृतीय सर्ग ॥ ३॥

---

६९. इति = इत्थं । ७०. यूने दत्वा = दत्वा यूने।

।। चतुर्थः सर्गः ।।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ।। १ ।।
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ।। २ ।।
पुरूहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ।। ३ ।।
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम् ।। ४ ।।
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ।। ५ ।।

(१) पिता द्वारा दिया राज्य पाकर वह (रघु) और अधिक सुशोभित हुआ जैसे सुशोभित होता है अग्नि सायंकाल सूर्य द्वारा निहित तेज पाकर। (वैदिक धारणा है कि सूर्य अस्त होते समय अपना तेज अग्नि में आहित कर देता है।) (२) दिलीप के बाद उस (रघु) को राज्य में प्रतिष्ठित सुना तो शत्रु राजाओं के हृदय में धुआँ उगल रही अग्नि लपट फेंकने लगी। (३) प्रजावर्ग उसे प्रसन्न होता देख देखकर, जैसे उदित हुए चन्द्र को ऊँची दृष्टि करके देख देखकर प्रसन्न होता है। ('पुरूहूत–ध्वजश्चन्द्रश्चन्द्रमा मृगलाञ्छनः'–हेमाद्रिः। पुरूहूतध्वज इन्द्रध्वज। वर्षा के लिए उसका उत्सव व.म. आदि।) (४) गजगामी रघु ने दोनों को एक साथ आक्रान्त किया (१) पिता के सिंहासन को और (२) शत्रुओं के पूरे मण्डल को। (सिंहासन पर बैठना उसको आक्रान्त करना।) (५) सम्राट् बने उस (रघु) की सेवा अदृश्य पद्मा (लक्ष्मी) ने की पद्माकार छत्र के रूप में। अदृश्य होने पर भी वह छायामण्डल से समझ में आ रही थी।

१. न्यस्तशस्त्रं दिलीपं च तं च शुश्रुवुषां प्रभुम् ।
राज्ञामुद्धृतनाराचे हृदि शल्यमिवार्पितम् ।।

तं च०० भुम्=श्रुत्वा दिशाम्पतिम्; प्रभुम्=पतिम्; धृत=खात।। २. मितो=मिते व., पिते, पितो। ३. सप्रजा=सुप्रजा, सप्रजः। 'पुरूहूतध्वजश्चन्द्र' इति हेमाद्रिः। ४. पित्र्यम्=पैत्र्यम्; मखि००लम्=मण्डलं च महीक्षिताम्। ५. छाया००क्ष्येण=सितच्छायानुमानेन; क्ष्येण=क्षेण हे.।

परिकल्पितसान्निध्या काले काले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ।।६।।
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ।।७।।
स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ।।८।।
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ।।९।।
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत् पक्षस्तस्मिन्नाभवदुत्तरः ।।१०।।
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन् महीपाले सर्व्वं नवमिवाभवत् ।।११।।
यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ।।१२।।

(६) सरस्वती ने भी उस स्तुत्य रघु की स्तुति की, समय समय पर होती वन्दिजनों की सार्थक स्तुति में समाकर। **(७)** माना कि मनु आदि मान्य राजाओं द्वारा पृथिवी का भोग किया जा चुका था तथापि उस (रघु) के लिए वह नई सी ही थी। **(८)** उचित दण्ड देने से उस (रघु) ने लोगों का मन अपनी ओर खींच लिया, दक्षिण दिशा के पवन (मलयानिल) के समान वह न अधिक शीत था और न अधिक उष्ण। **(९)** रघु गुणों में अधिक था, अतः उसने उसके पिता के प्रति जनता की उत्कण्ठा कम कर दी, सहकार का फल जैसे सहकार के बौर के प्रति उत्कण्ठा कम कर देता है। **(१०)** न्यायविद् विद्वानों ने उस नए राजा के समक्ष सत् और असत् दोनों पक्ष प्रस्तुत किए, किन्तु उसको प्रथम (सत्) पक्ष ही मान्य हुआ, दूसरा नहीं। **(११)** उस नए राजा के राजा होते ही पाँचो भूतों के गुणों में उत्कर्षवृद्धि हो उठी। ऐसा लगा जैसे उस नए राजा के लिए सब कुछ नया हो उठा हो। **(१२)** रघु उसी प्रकार प्रकृति के रञ्जन से अन्वर्थ राजा था जैसे प्रह्लादन के कारण चन्द्र और प्रतपन के कारण तपन (सूर्य)।

७. सीद् वसुन्धरा=सीद्धि मेदिनी; वेंव=र्व्वेव। ८. युक्त=यादृग्। १०. च्चोप=चापि। अत्र पाठे सच्चासच्चापीति वक्तव्यं भवति। ११. क्वचित् पद्यमिदं नापि पठ्यते। १२. रञ्जनाद् राजेति महाभारतादागमः।

कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ।।१३।।
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ।।१४।।
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः ।।१५।।
वार्षिकं सञ्जहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ।।१६।।
पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ।।१७।।

(रञ्जनाद् राजा=महाभारत की भाषा। द्र. ६.२१) **(१३)** भले ही उसके नेत्र भी कर्णान्त तक विस्तृत थे, किन्तु वह चक्षुष्मान् था सूक्ष्म कार्य में अभीष्ट अर्थ दिखलाने वाले शास्त्र से। **(१४)** नए राज्य में प्रशमन आवश्यक होता है। वह रघु ने प्राप्त कर लिया था और वह उधर से निश्चिन्त था। अब उसकी सेवा में शरत् उपस्थित हुई। वह द्वितीय राजश्री थी, क्योंकि वह भी पङ्कजलक्षणा थी। शरद् ऋतु का लक्षण कमलपुष्प। **(१५)** उस रघु और सूर्य इन दोनों का प्रताप एक साथ दिशाओं में फैल उठा। उस प्रताप का मार्ग मेघों ने छोड़ दिया था जो बरस कर हल्के पड़ गए थे। वह दुस्सह भी था। **(१६)** इन्द्र ने वार्षिक धनुष बटोरा और रघु ने जैत्र धनुष उठाया। दोनों ही प्रजा के अर्थ की सिद्धि में एक–एक कर क्रमशः धनुष चढ़ाए रहते थे। **(१७)** ऋतु (शरत्काल) ने प्रयत्न तो किया उस (रघु) की तुलना का, उसने पा लिया सफेद कमल (पुण्डरीक) का छत्र और खिले काशपुष्पों का चामर, परन्तु वह रघु की श्री (शोभा और लक्ष्मी) नहीं पा सका।

१३. कामं००लोचने=कामं कमलपत्राणां नेत्रे तस्यानुकारिणी म.हे.अ.ना.; **तु=च; दर्शिना=दर्शिनः** व.अ.ना.। **१४. स्वस्थं=स्वच्छं।। १५. निर्वृष्ट=निवृष्टि, निर्वृष्टि, निर्व्विष्ट; सुदुःसहः=दुरुत्सहः** व.अ.ना. **दुरासहः।**
अतः परं पद्यद्वयम्—
निर्वृष्टलघुभिर्मेघैः सवितुस्तस्य चोभयोः ।
वर्धिष्णवे/वो दिशां भागाः प्रतापायेव रेचिताः ।।
अधिज्यमायुधं कर्त्तुं समयोऽयं रघोरिति ।
स्वं/स्व धनुः शङ्कितेनेव संजह्रे/संहृतं शतमन्युना ।।
१६. योद्यतकार्मुकौ=योद्यमविश्रमौ, व.म.हे.अ.ना.। **१७. विकस=विलस,** म.हे.अ.ना.।

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥१८॥
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥१९॥
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥२०॥
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥२१॥
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥२२॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥२३॥

(१८) शरद् ऋतु में आँखों वालों को या तो प्रिय था प्रसन्नमुख रघु या फिर उज्ज्वल कान्ति वाला चन्द्र, दोनों में आखें समान तृप्ति पातीं। (१९) हंस–पंक्तियों, तारों और कुमुदवाले जलाशयों में एक प्रकार से उस रघु के यशों की विभूतियाँ बिखरी हुई थीं (२०) उस गोप्ता की गुणमयी कथाएँ धान की रखवाली करने वाली वनिताएँ बचपन से ही आरम्भ कर गाती रहतीं। (२१) तेजस्वी कुम्भयोनि (अगस्त्य) के उदय से पानी तो स्वच्छ हुआ, किन्तु शत्रुओं का मन हुआ क्षुभित, रघु से हार की आशंका से। (२२) महोक्ष (बड़े बड़े बैलों) ने अनुकरण किया रघु की लीला के खेल का। मद से हुए वे उदग्र, ककुद्मान् वे थे ही और नदीतट को गिराने में लगे हुए थे। (२३) उसके हाथी सात–सात अंगों से मदस्राव कर रहे थे, कदाचित् उन्हें ठेस लगी थी मद जैसी गन्धवाले सप्तपर्ण के पुष्पों से। (सात अंग ='सूँढ, कटद्वय, नेत्रद्वय और शिश्न।' सूँढ के दो छिद्रों के कारण वह भी दो। अतः सात।)

१८. दसु=दाभि, दसन्मु, व.म.हे.अ.ना.; रसा=द्रवा। १९. श्रेणीषु=श्रेणिषु व., श्येनासु हे.।
२०. छाय=छाया; थोद्घातं=थोद्भूतं, थोद्गाथं, थोद्गीतं, थोपेतं, थोद्धूत।

तस्य गोप्तुर्द्विरेफाणां कर्णोत्पलनिपातिनाम् ।
स्वरसंवादिभिः कण्ठैः शालिगोप्यो जगुर्यशः/र्गुणम्/णान् ॥ पाठान्तरम्।

२१. रभि=त्वभि, परा, परि; चुक्षुभे द्विषतां=द्विषतां चुक्षुभे। 'च द्विषामि'ति तु युक्ततरम्।
२२. मुद्रुजः=मुद्रुजाः; विक्रमः पादचारः। २३. हताः=हिताः।


रघु-दिग्विजय मार्ग
रक्तरेखा - दिग्विजययात्रा
उत्तर
वंक्षुतट
कम्बोज
हूण
उत्तरापथ
हि
मा
ल
य
किन्नर किरात उत्सवसंकेतगण
कामरूप
प्राग्ज्योतिष
अयोध्या
सुह्म
वङ्गदेश
उत्कल
गङ्गास्रोत
कपिशा
कलिंग
दक्षिणापथ
महेन्द्रगिरि
त्रिकूट
सह्याद्रि
मुरला (केतक)
पारसीक क्षेत्र
पश्चिमाब्धिः
पूर्वसागरः
केरल
पाण्ड्यदेश
कावेरी
मलयगिरि
दर्दुर
ताम्रपर्णी
दक्षिणाब्धिः

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ।। २४।।
तस्मै सम्यग्घुतो वह्निर्वाजि–नीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ।। २५।।
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ।। २६।।
अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ।। २७।। युग्मम्।
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनवर्हिषा ।
अहिताननिलोद्धूतैस्तर्ज्जयन्निव केतुभिः ।। २८।।

(२४) शक्ति के पहले शरद् ने ही उसे (दिग्विजय) यात्रा के लिए किया प्रेरित, क्योंकि शरद् ने नदियों को बना दिया थाहयोग्य और मार्गों की कीचड़ सुखा दी। (२५) यात्रा के पूर्व हुई वाजिनीराजना। उसमें जो अग्नि में ठीक से आहुति दी गई उसने अपनी लौ घुमा घुमाकर उसके बहाने उस (रघु) को मानों हाथों से प्रदान की जीत। (२६) यात्रा के पहले उसने सुरक्षा की व्यवस्था की अपने आवास स्थान की भी और सीमा प्रान्त के दुर्गों की भी, पीछे से घात करने वाले शत्रुओं को हटाया, और भाग्योदय के शुभ मुहूर्त्त में छहों प्रकार की सेना लेकर दिग्विजय के लिए आरम्भ की यात्रा। ('सेना = मौल, भृत्य, सुहृत्, श्रेणी, द्विषत्, आटविक और सेना' इस प्रकार का बल।) (२७) नगर की वयोवृद्ध महिलाओं ने उस पर लाजा बरसाए, ठीक वैसे ही जैसे क्षीरोर्मियों ने फुहार बरसाई थी अच्युत पर (समुद्रमन्थन के समय)। (२८) पहले चला वह पूर्व की ओर। वह था भी प्राचीनबर्ही (इन्द्र) के ही समान। पूर्वी हवा से हिल रहे केतुओं से वह शत्रुओं की तर्जना सी करता जा रहा था।

---

२४. **तः=त्सु** अ.ना.; **गाधाः=गाधं** अ.ना.; **चोद=नोद, प्रेर** म.हे.अ.ना.। २५. **तस्मै सम्यग्=सम्यक् तस्मै** व.; **तेने=तेनै**। २६. **प्रत्यन्तः=पर्यन्तः** व.हे.। प्रत्यन्तो राष्ट्रान्तः। 'अयः शुभावहो विधिः'। बलस्य सैन्यस्य षड्विधत्वं मौलभृत्यसुहृच्छ्रेणिद्विषदाऽऽटविकत्वेन। **आदाय=आस्थाय; प्रतस्थे००षया= स प्रतस्थे जिगीषया**। पाठेऽत्र सुगुप्तेति पठनीयं भवति प्रथमं पदम्। २८. **प्रथमं=प्रशमं**। द्र. मेघदूतस्य तस्मिन्निति द्वितीयं पद्यम्। **अहितानन्नि=अनुलोमानि** अ.ना.; **तर्ज्जयन्निव=कम्पयन्निव**।

रजोभिः स्यन्दनोद्धूतैर् गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ।। २९।।
प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद् रथादीति चतुःस्कन्धेव सा चमूः ।। ३०।।
मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ।। ३१।।
स सेनां महतीं कर्षन् पूर्व्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ।। ३२।।
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ।। ३३।।

(२९) रथों से उड़ी धूल और घनतुल्य गजों से वह करता जा रहा था आकाशतल को भूमितल सा और भूमितल को आकाशतल सा। (३०) वह सेना मानों अपने चारों अंगों के साथ आगे बढ़ रही थी। सबसे आगे चल रहा था प्रताप, उसके पीछे शब्द (कोलाहल), उसके पीछे धूल और सबके पश्चात् रथादि। (चार स्कन्ध = पत्ति, अश्ववार, गजारोही तथा रथी।। रघु की विजययात्रा का नक्शा संलग्न।) (३१) रघु शक्तिशाली था, अतः मरुस्थलों को बदल दिया जलसंपूरित स्थलों में। गहरी और नावों से ही पार की जाने योग्य नदियों को बना दिया सुख से पार करने योग्य। घोर जंगलों को खुलवा दिया। (नहरों की व्यवस्था।) (३२) रघु विशाल सेना को लिए हुए पूर्व सागर की ओर बढ़ते समय पीछे पीछे गङ्गा की धारा को लिए चल रहे महाराज भगीरथ से दिखाई दे रहे थे। (३३) जैसे हाथी जिस रास्ते निकलता है उसे साफ करता चलता है। वह उसको फलों से रहित बना देता, पेड़ों को उखाड़ और तोड़ देता है, उसी प्रकार रघु ने राजाओं से किया अपना मार्ग साफ। उनके कोश छीन लिए, उन्हें उखाड़ फेंका या उनकी कमर तोड़ दी।

२९.स्यन्दनोद्धूतैः=तुरगोद्धूतैः, स्यन्दनोत्कीर्णैः, तुरगोत्कीर्णैः। युग्मम्। इदमेवास्माभिरुपरि स्थापितम्।
३०. परागः=पुरोगाः व.; रथादीति=रथादित्वात्। चत्वारः स्कन्धाः रथाश्वगजपदातयः अ.ना.।
३१. रुपृ=रुत्पृ व.; नाव्याः = नव्याः। नावा, तार्या, नाव्याः।
अतः परं नूतनं पद्यम् — पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः कृशाः ।
पश्चात्प्रयायिभिः पङ्काश्चक्रिरे मार्गनिम्नगाः ।।
क्वचिदिदं २९—३०योर्मध्येऽपि लिखितं लभ्यते। ३२. हरजटा हिमालयः।

पौरस्त्यानेवमाक्रामंस्ताँस्ताञ् जनपदाञ् जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ।। ३४।।
अनम्राणां समुद्धर्त्तुस्तस्मात् सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ।। ३५।।
वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ।। ३६।।
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ।। ३७।।
स तीर्त्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ।। ३८।।
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ।। ३९।।

(३४) इस प्रकार पूर्व दिशा के उन उन जनपदों को जीतता वह (रघु) समुद्र की तालीवन से श्याम तटभूमि तक जा पहुँचा। **(३५)** वहाँ मिले सुम्ह। उन्होंने रघु से आत्मरक्षा की, नदीवेग के सामने वेंत के समान झुककर। अनम्रों को तो रघु उखाड़ फेंकता था। **(३६)** इस प्रकार नौसेना से युक्त बङ्गजनपदों को जबरन उखाड़ कर रघु ने जयस्तम्भ स्थापित किए गङ्गा के स्रोतों के बीच (डेल्टा में)। **(३७)** बङ्ग के राजा लोगों ने अपनी धान का अनुकरण किया। उन्हें रघु ने उखाड़ा अवश्य, परन्तु वहीं वापस रोप दिया। उन्होंने भी रघु को पर्याप्त फल दिया। (प्रस्तुतोभयोपमा।) **(३८)** वहाँ मिली उसे कपिशा (नदी)। उसे रघु ने सैनिकों सहित पार किया गजसेतु बनाकर। वहाँ मिले उत्कलों के द्वारा दिखलाए मार्ग से वह कलिङ्ग की ओर बढ़ा। **(३९)** वहाँ मिले महेन्द्रगिरि के शिखर पर रघु ने खड़ा कर दिया अपना तीक्ष्ण प्रताप, वैसे ही जैसे पीलवान् गंभीरवेदी हाथी के सिर पर गँपा देता है अङ्कुश।

३४. वनश्याम=वनाश्यान। ३५. तस्मा=अस्मा; श्रित्य=स्थाय; वैत=वेत। ३६. त्खाय=द्धृत्य व.; नेता=रिपून् अ.ना.; द्यतान्=द्धतान् व.हे.अ.ना. द्यतः; रेषु सः=रेष्वसौ। ३७. णताः=वणाः व.हे.अ.ना. ; फलैः=धनैः अ.ना.। ३८. कपिशां=कपिसां, कलमां अ.ना., कळभां म. करभां; कलादर्शि=कलादेशि, कलैर्देशि, कलैर्दर्शि व.; मुखो=मुखं।

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्व्वतः ॥ ४० ॥
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥
गृहीतप्रतिमुक्तस्य स धर्म्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्यचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥

(४०) कलिङ्ग के शासक गजसेना के साथ आगे बढ़े और उन्होंने अस्त्रों से रघु का सामना किया। यह वैसी ही चेष्टा थी जैसे पंख काटने के लिए उद्यत इन्द्र पर पर्वतों की ओर से शिला वर्षा की निरर्थक चेष्टा। (४१) शत्रुओं ने वहाँ रघु पर बाणों की झड़ी लगा दी, किन्तु जयश्री मिली उसी को। बाणवर्षा से मानों रघु का मङ्गलाभिषेक हुआ। (४२) वहाँ रघु के योद्धाओं ने ताम्बूल के पत्ते बिछाकर रची पानभूमि और पिया नारिकेल का आसव जो था शत्रुओं के यश जैसा श्वेतवर्ण का। (४३) रघु विजय यात्रा पर निकला अवश्य था, परन्तु था वह धर्मविजयी। अतः उसने महेन्द्रनाथ की केवल श्री ली, भूमि नहीं। (४४) अब चला अगस्त्य महर्षि की दिशा दक्षिण की ओर। तदर्थ अपनाया उसने मार्ग समुद्री तट का जिसमें मिले फल से लदे हुए सुपारी के पेड़। उसे जय का विचार नहीं करना था वह तो सुनिश्चित थी। (४५) वहाँ मिली कावेरी नदी। उसका किया सैनिकों ने जमकर परिभोग। गजमद से उसका जल सुगन्धित हो गया। एक प्रकार से वह अपने पति समुद्र के लिए संदेह का विषय

४१. पद्यान्तरं – **'वायव्यास्त्रविनिर्धूतात् पक्षाविद्धान्महोदधेः ।**
गजानीकात् स कालिङ्गं तार्क्ष्यः सर्पमिवाददे ॥' व.

४२. **रिकेला=रिकेरा, लिकेला, लिकेरा** व.अ.ना.; **च=व** म.अ.ना., **वा। अत्र इवार्थे व/वा।** यथा मेघदूते ८१, मालविकाग्निमित्रे ५.२१, रघुवंशे १६.२१, १९.५१; **पपुर्यशः=यशः पपुः।** ४३. **श्रियं=ह्रियं** हे.; **महेन्द्र=माहेन्द्र।** ४४. **पूगमा=मूगमा; अगस्त्यच=अगस्त्याच, अगस्त्याध्यु** हे., **आगस्त्यच** अ.ना.।

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥४६॥
ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥४७॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां ग्रैवं त्रिपदीछेदिनामपि ॥४८॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥४९॥
ताम्रपर्णीसमेतस्य मुक्तासारं पयोनिधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥५०॥
युग्मम्– स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥५१॥

बन गई (४६) उस विजिगीषु राजा रघु को आगे बढ़ने पर मिला मलयाचल। उसकी तराई में मरिच का वन था जिसमें फुदक रहे थे हारीत पक्षी। रघु के सैनिक इन तलहटियों पर छा गए। (४७) वहाँ था उद्यान इलायची का। घोड़ों की टाप से उठी उसकी धूल गजों के उन्हीं जैसे सुगन्धित गण्डस्थलों में चिपक रही थी। (४८) हाथियों ने पाँव की साकलें तो तोड़ लीं, पर गले की साँकल वे नहीं सरका पाए, क्योंकि वे बँधी थीं चन्दन वृक्षों के उन कटानों में, जो बने थे लिपटे सर्पों की रगड़ से। (४९) यह थी दक्षिण दिशा जिसमें सूर्य का तेज भी मन्द पड़ जाता है, किन्तु रघु का प्रताप यहाँ पाण्ड्य लोग सह नहीं पाए। (५०) उन्होंने प्रणत होकर रघु को भेंट किए ताम्रपर्णी और समुद्र के संगम के मोती। वे मोती उनका संचित यश ही था, वैसा ही धवल। (५१) रघु ने पहले तो जमकर भोग किया मलय और दर्दुर नामक पर्वतों का जिनके तट पर लगा था चन्दनवन, अतः जो लग रहे थे उस दिशा के चन्दन चर्चित स्तन।

४६. मारीचो=मरीचो व.हे., मारिचो अ.ना., मरिचो, हारीतो; चोद्भ्रान्त=तोद्वान्त, तोच्छिष्ट, तोत्सृष्ट। मारी००रीता=हारीतोद्भ्रान्तमारीचा। ४७. रेणवः=धूतयः।
पद्यान्तरम् – आजानेयखुरक्षुण्णपक्वैलाक्षेत्रसंभवम् ।
व्यानशे सपदि व्योम कीटकोशाविलं रजः ॥
४८.भोगि=भोग; स्रसत्=स्रंसत्,श्र/श्रंसत् व.;'नास्र–ग्रैवं'=नालानं करिणां सस्रे; त्रिपदी=त्रिपदि। ४९. मन्दायते=सञ्जायते; घोः पा=घोष्पा; ड्याःप्र=ड्याष्प्र। ५०. सञ्चितं=सिञ्चितं। ५१. लीन=लीढ, धीन व., नील; दर्दुरौ=दुर्दुरौ म., दुर्दरौ।

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ।।५२।।
तस्याऽनीकैर् विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः ।।५३।।
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधी—कृतः ।।५४।।
मुरलामारुतोद्धूतमगमत् कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ।।५५।।
अभ्यभूयत वाहानाञ्चरतां गात्रसिञ्जितैः ।
मर्मरः पवनोद्धूतराजतालीवनध्वनिः ।।५६।।
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ।।५७।।

(५२) फिर वह पहुँचा सह्य पर्वत जिसे समुद्र ने दूर तक छोड़ रखा था, अतः बना हुआ था वह मेदिनी का विवस्त्र नितम्ब। असह्यपराक्रमी रघु उस पर जा चढ़ा। **(५३)** अपरान्त (पश्चिमी घाट) को जीतने के लिए आगे बढ़े रघु की सेना उधर फैली तो समुद्र सह्य से आ सटा, यद्यपि उसे परशुराम ने दूर हटा रखा था। **(५४)** अब वह जा पहुँचा केरल जहाँ की महिलाओं ने भय से सजना छोड़ रखा था। उनके अलकों का सिन्दूर बनी रघु की सेनारेणु। **(५५)** वहाँ मिली मुरला (मुरवी, मुरुची) नामक नदी। उसके किनारे लगा था केतकीवन। हवा चली तो उसका ढेर सारा पराग रघु के योद्धाओं के कवचों पर अपने आप पटवास बन गया। **(५६)** यहाँ लगा था राजतालीवन। पवन से उद्धूत उनके पत्तों से निकल रही थी मर्मर ध्वनि। उसे रघु के घोड़ों के शरीर की ध्वनि ने दबा दिया। **(५७)** वहाँ लगा था वन पुंनागवृक्षों का। उनमें बैठे भौंरे उड़े और वहीं खजूर के पेड़ों में बँधे मदचुआते हाथियों के सुगन्धित गण्डस्थलों पर आ टूटे ।

५२. स्रस्तां=श्रस्तां। ५३. विसर्प=प्रसर्प; रामास्त्रो=रामेषू। ५४. केरल=केवल, चोलक इति केवलोऽरुणगिरिनाथो यो हि केरलपाठमप्युल्लिखति। निधीकृ=निधिः कृतः हे.। ५५. मुरला=मरुला हे., मुरुला, मुरवी म. मुरची अ.ना. मुरुची, मुरुवी, सुसेना, पुरो यन्; वारबाणानां=वानवाराणां, वारवाहानां। ५६. चरताङ्गात्र=रथानाञ्चास्य, चलताङ्गात्र; सिञ्जि=शिञ्जि; मर्मरः=मुर्मुरः, वर्म्मभिः। ५७. नद्धा=बद्धा।

अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ।।५८।।
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भञ्चकार सः ।।५९।।
पारसीकांस्ततो जेतुं प्रतस्थे(ऽ)स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ।।६०।।
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ।।६१।।
सङ्ग्रामस्तुमुलस्तत्र पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ।।६२।।
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ।।६३।।

(५८) वहाँ समुद्र ने भगवान् परशु को तो मार्ग दिया था अभ्यर्थना करने पर, परन्तु अपरान्त जनपद के राजा के बहाने रघु को दिया कर। **(५९)** वहाँ रघु ने अपना जयस्तम्भ बनाया त्रिकूटाचल को ही, जो ऊँचा तो था ही, जिस पर मदमत्त हाथियों ने अपने दातों से प्रशस्ति भी खोद रखी थी। चित्तौड़ का जयस्तम्भ आज भी ऐसा है। **(६०)** पश्चिमी घाट से अब रघु ने यात्रा शुरू की पारसीकों को जीतने हेतु। उसने अपनाया स्थल/अस्थल (जल) मार्ग। पारसीक लोग एक विस्तृत क्षेत्र में फैले हुए थे। उन सबके केन्द्र को जीतने से सभी रघु की मुट्ठी में वैसे ही आ गए जैसे संयम (ध्यान धारणा समाधि) से तत्त्वज्ञानी के वश में इन्द्रियाँ। **(६१)** वहाँ मिला देखने को उसे यवनवनिताओं का मधुमद। उसे वह सह नहीं सका। यह वैसे ही जैसे अकाल जलदोदय कमलों के बालातप को नहीं सह पाता। **(६२)** रघु का इन पारसियों से हुआ तुमुल युद्ध। अश्वसेना थी उनका साधन। उसमें ऐसी घनी धूल उड़ी कि धनुष की टंकार से समझ पड़ते प्रतियोद्धा। **(६३)** पारसियों को दाढ़ी थी। रघु ने उनके सिर भल्ल (भालों या अर्धचन्द्र बाणों) से काट गिराए। भूमि उनसे छा गई। लगती थी जैसे इस पर मधुमक्खी के छत्ते छा गए हों।

५९. रद=वद, दश; र्ण=र्ण; त्रिकू=त्रिजू। **६०. पार=परा, सी=शी।** अस्थलवर्त्म जलमार्गः। अत्र यावद्येन स्थलवर्त्मना यात्रा कृता तद्विहाय नवीनेन नौसेनया सामुद्रिकेण जलमार्गेण प्रतस्थ इत्याकूतिः। कारणञ्चात्र स्थलमार्गस्य दुर्गमत्वं पारसीकानाञ्चेन्द्रियौपम्यद्योत्यं स्थल इव जलेऽपि विकीर्णत्वम्। **६१. यवनी=युवनी, जमनी।** बाला कन्याराशिरिति हेमाद्रिः। **६२. पाश्चात्त्यैरश्व=पारसीकाश्व।** **६३. क्षौद्रपट=क्षौद्रैः पट।**

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ।। ६४।।
विनयन्ते स्म तद्योधा मधुभिर् विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ।। ६५।।
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।। ६६।।
विनीताध्वश्रमास्तस्य वङ्क्षुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ।। ६७।।
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटनाऽऽदेशि बभूव रघुचेष्टितम् ।। ६८।।

(६४) शेष पारसीक अपने अपने शिरस्त्राण हटाकर रघु की शरण में आ गए। बड़े लोगों का क्षोभ शान्त होता है केवल प्रणिपात से। **(६५)** वहाँ मिली अंगूर की भूमि। रघु के सैनिकों ने विजयश्रम को दूर किया उसी के मधु से, उत्तम मृगचर्मों को फैला फैलाकर। **(६६)** वहाँ से रघु ने प्रस्थान किया उत्तर दिशा की ओर सूर्य के ही समान। वह वहाँ बाणों से उदीच्यों को उखाड़ता जा रहा था जिस प्रकार किरणों से भास्वान् उड़ाते जाते हैं रस (जल)। **(६७)** वहाँ मिला वंक्षु नामक नद। उसके तीर पर रघु के घोड़ों ने मार्ग की थकावट हटाने के लिए लेट लगाई और खड़े होकर अपनी गरदनें हिलाई जिनमें केसर की धूल लगी थी। **(६८)** वहाँ रघु की, पतियों पर दिखलाई विक्रमचेष्टा बनी हूणस्त्रियों में कपोल—पाटन का आदेश। (हूण जाति की प्रथा में विधवा स्त्रियों के कपोल चीर दिए जाते थे।)

६५. विनयन्ते स्म=विनिन्युरेव; श्रमम्=श्रियम्, रत्नासु=चर्मासु; वलय=वलज, 'वलजे क्षेत्रपूद्वरि' इत्यमरः। ०मूर्ध्वांश इत्यपमुद्रणम्। ६६. वोदी=वौदी;।
अत्र पद्यान्तरम्– जितानजय्यस्तानेव कृत्वा रथपुरस्सरान् ।
महार्णवमिवौर्व्वाग्निः प्रविवेशोत्तरापथम् ।। व.। स्तानेव=काकुत्स्थः; पथं=पथः।
६७. वङ्क्षु=वंक्षण, वक्ष, वक्ष्ण, वक्षु, वंकू, वंकु, मंक्षू, सिन्धु म.हे.अ.ना.; वङ्क्षुतीर=सिन्धोस्तीरे वि; चेष्टनैः=वेष्टनैः अ.ना., चेष्टितैः; वाजिनः=वारणाः, वा/करिणः अ.ना.। ६८. हूणा=हूना; व्यक्त=व्यस्त; नादे=लादे।

'हूना महाभारततो गृहीता इहेति निध्याय समाहितेक्षाः।
वैदेशिकानामितिहाससाक्ष्ये विचित्सितान्तःकरणा हि विज्ञाः।।'

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ।। ६९ ।।
तेषां सदश्वभूयिष्ठास्तुङ्गद्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ।। ७० ।।
ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ।। ७१ ।।
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम् ।
गुहाशयानां सिंहानां परिवृत्त्यावलोकितम् ।। ७२ ।।
भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गासीकरिणो मार्गे मरुतस्तं सिषेविरे ।। ७३ ।।

(६९) कम्बोज देश के वासी रघु के वीर्य को सह नहीं सके और अखरोटों के साथ झुक गए, हाथियों को बाँधने से अखरोट पहले से ही जर्जर थे। (७०) उनकी ऊँची धनराशियाँ, जिनमें उत्तम नस्ल के अश्व बड़ी संख्या में थे, तो कोसलेश्वर रघु में स्थान कर सकीं, किन्तु उनका गर्व नहीं। (७१) इसके आगे रघु चढ़ा हिमालय पर। अब उसके साथ थी घुड़सवारों की सेना। उससे जो धातु/रेणु उड़ी उससे वह उसके शृङ्गों को अधिक ऊँचाई देना चाह रहा था। (७२) सैन्य घोष सुनकर भी गुहा में सोए तुल्यसत्त्व सिंह संरम्भ (क्रोध) में नहीं आए। उन्होंने केवल पीछे दृष्टि भर डाली। (७३) गङ्गा की फुहार लिए आ रहे और कीचकों को बजा रहे हवा के झोंकों ने मार्ग में रघु की सेवा की।

६९. 'गजा००ष्टै'=तद्गजालानतां प्राप्तै; अक्षोटै=अक्षोडै हे., अक्षोठैः, अङ्कोलैः अ.ना.। ७०. तुङ्गद्रवि=तुङ्गा द्रवि म.हे.। तुङ्गा द्रविणराशयो यासु ता उपदा। तुङ्गत्वं राशिष्वेव शक्यसंभवम्, न तूपदासु। 'उपदा००श्वरम्'= 'उपदा विविशुः शश्वत् समुद्रमिव निम्नगाः',
'विशांपतिन्तं विविशुरुदन्वन्तमिवापगाः'
'विविशुस्तं विशां नाथमुदन्वन्तमिवापगाः'
'विविशुस्तं विशां नाथं महार्णवमिवापगाः',
'विविशुस्तं कोसलेशमुदन्वन्तमिवापगाः'। नोत्सेकाः = नोत्सेकः।
७१. उद्धूतै=उद्धतै। ७२. शशंस=प्रशंसन्; घोषेऽप्य=घोषेऽथ; शयानां=श्रयाणां, गतानां; सिंहानाम्=सत्त्वानाम्। ७३. मर्मरीभू=मन्थरीभू; भूताः की=भूतकी।

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ।। ७४।।
सरलऽऽसक्त–मातङ्ग–ग्रैवेय–स्फुरित–त्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ।। ७५।।
तस्योत्सृष्टनिवेशेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ।। ७६।।
तत्र जन्यं रघोर् घोरं पर्व्वतीयैर् गणैरभूत् ।
नाराच–क्षेपणीयाश्म–निष्पेषोत्पातितानलम् ।। ७७।।
शरैरुत्सवसङ्केतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ।। ७८।।
परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ।। ७९।।

(७४) रघु के सैनिकों ने विश्राम किया नमेरु वृक्षों की छाया में कस्तूरी से सुगन्धित चट्टानों पर बैठ बैठ कर। (७५) रात में औषधियाँ बनीं रघु के लिए बिना तेल की दीपिकाएँ, उनकी प्रभा सरल वृक्षों में बँधे हाथियों की गले की साँकलों पर चमक रही थीं। (७६) रघु के हाथी तो हट चुके थे, परन्तु किरातों को उनकी ऊँचाई का अनुमान हो जाता था देवदारु वृक्षों की त्वचा से, जो हाथियों की कण्ठरज्जु से उपटी थी। (७७) वहाँ पर्वतीय गणों के साथ रघु का घोर युद्ध हुआ। रघु की ओर से चलते बाण और पर्वतीय गणों की ओर से गोफन से फिंकते पत्थर दोनों रगड़ा जाते तो बिखर उठती चिनगारियाँ। (७८) रघु ने वहीं उत्सव/संकेत जनपद को बाणों से निरुत्सव बना दिया और किन्नरों से अपनी भुजाओं के जयगीत गववाए। (७९) किन्नर जब उपायन लेकर उपस्थित हुए तो राजा को पता चला हिमाद्रि के सार (संपत्ति) का और हिमाद्रि को पता चला राजा रघु के सार (बल) का। इस प्रकार दोनों को दोनों के

७४. छायास्व=छायाम। ७५. यस्फुरित=योपचित; नेतुः=जेतुः। ७६. 'तस्यो००त्वचः'='तन्निवासेषु दानार्द्रैर्गण्डभित्तिविघट्टनैः'; वर्ष्म=वर्त्म, वर्म। ७७. जन्यम्=यु/जुद्धं; 'तत्र जन्यं००घोरं'='संग्रामः/विमर्दः सह तैस्तस्य/तत्र'; पर्वतीयै=पार्वतीयै। 'तीयैरभूद् रघोः' 'तीयैरभूद् गणैः', 'यैर्गणैरभूत्'; निष्पेषो=निक्षेपो; त्पाति=त्पति, त्पादि; नलम्=बलम्, नलः, स्थलम्। ७८. उत्सव=उत्सन्न, उच्छिन्न, उत्खात; 'कृत्वा विरतोत्सवान्'=कृत्वा करदान् कृती; उदाहरणपदं विक्रमोर्वशीयेऽपि द्र. १.१५–१६, २१.३; गापया=गायया; किन्नरान्=किन्नरैः अ.ना.। ७९. रेण= रस्य; ज्ञातस्=ज्ञातम्।

तत्राऽक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ।। ८० ।।
चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्यौतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालाग/गुरुद्रुमैः ।। ८१ ।।
न प्रसेहे स रुद्धार्कमधारावर्षि दुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ।। ८२ ।।
तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ।। ८३ ।।
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेणच्छायामानर्च पादयोः ।। ८४ ।।
इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ।। ८५ ।।

सार का पता चला। (८०) वहाँ रघु ने अपनी अक्षोभ्य यशोराशि स्थापित की और उतर आया। रावण द्वारा उठाए गए पर्वत (कैलाश) को लज्जित करते हुए/की लज्जा हटाते हुए। (८१) जब वह लौहित्य नद पार हुआ तो प्राग्ज्योतिष जनपद का राजा काँप उठा उसके हाथियों के आलान बने कालागुरु वृक्षों के साथ। (८२) वह तो सूर्य को ढँक देने वाले और धारावर्ष से रहित दुर्दिन बने उसके रथमार्ग की धूली को भी नहीं सह सका, सेना की तो बात ही कहाँ। (८३) वहाँ कामरूप के स्वामी ने रघु की सेवा की फूटे गण्डस्थलों वाले हाथियों के उपहार से, जिनसे अन्यों का सामना करता रहा था वह। (८४) कामरूपेश्वर ने रघु के पैरों की छाया की पूजा की, जो बनी हुई थी हेमपीठ की अधिदेवी। पूजा में उसने चढ़ाए रत्नपुष्पोपहार। (८५) इसी प्रकार निरन्तर विजय प्राप्त करता रघु लौट आया रथ से उठी धूली को राजाओं के छत्रशून्य सिरों पर उड़ेल कर।

८०. **धान=दान; ह्रियम्=श्रियम्** व.। अत्र वाक्यार्थद्वयमेवमुन्नेयम् 'आदधान इव ह्रियमित्येकम्, आददान इव श्रियमिति चापरम्।' ८२. **वर्षि दु=वर्षिदु** हे., **वर्षदु** ; **वर्त्म=वर्त्मा** अ.ना., **वंश, वेग**। ८३. **मत्याख=मत्वाऽऽख**। ८४. **कामरूपेश्वरस्तस्य=उपपन्नसुखश्चास्य; हेम=हैम,. पाद; रत्न=हेम**। ८५. **रथोद्धतम्=रथोद्धुतम्, रथोद्धुतम्, रथोदितम्, रथोद्गतम्** हे., **खुरोद्धतम्** अ.ना; **विश्रामयन्=विश्रमयन्** व., **विनमयन्**।

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ।।८६।।

सत्रान्ते सचिवसखः पुरस्क्रियाभिर्
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकाऽवरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ।।८७।।

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु—
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ।।८८।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ रघुदिग्विजयो नाम चतुर्थः सर्गः।।४।।

(८६) आकर उसने ठाना विश्वजित् नामक यज्ञ जिसकी दक्षिणा में सर्वस्व दे दिया जाता है। सत्पुरुषों का आदान तो होता ही है विसर्ग के लिए, मेघों के समान। (८७) सत्र हो जाने पर सचिव सहित रघु ने राजाओं को बड़े बड़े पुरस्कार दिए जिससे उनकी पराभव की ग्लानि हट गई। फिर उन्हें अपने अपने नगर लौट जाने की अनुज्ञा दी। उन सबकी रानियों को बिछुड़े अब तक काफी समय हो गया था। (८८) जाते समय उन्होंने सम्राट् रघु के उनकी कृपा से ही प्राप्य चरणयुगल को प्रणाम किया, जिससे उनके सिर पर लगी माला के मकरन्द से उनकी उँगलियाँ धवल हो गईं।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में
रघुदिग्विजय नामक पूर्ण हुआ चतुर्थ सर्गः।। ४।।

८६. आजह्रे=आरेभे व.म.हे.; यज्ञं=क्रतुं। ८७. सत्रान्ते=यज्ञान्ते; जय=भव; वृत्त=वर्त। ८८. रेखा=लेषा; कुलिशा=कलशा; गौरम्=गौरम्।।८८।।, गौरम्।।९१।।, गौरम्।।९३।।, गौरम् ।।९४।। , गौरम्।।९५।।

पाठान्तरम्— यज्ञान्ते तमवभृथाभिषेकपूतं सत्कारैः शमितपराजयव्यलीकान् ।
आमन्त्र्योत्सुकवनितानि तेन सृष्टाः स्वानि स्वान्यवनिभृतः पुराणि जग्मुः ।।

जग्मुः।।९५।।, जग्मुः।।९६।।, जग्मुः।।९७।। पूतम्=युक्तम्; सत्कारैः=संस्कारैः; व्यलीकान्=व्यलीकाः; वरुद्ध=विरुद्ध; तानि तेन सृष्टाः=तान्यतद्विसृष्टाः, तानिरुद्धचित्ता, तानिरुद्धचित्तान्।

।। पञ्चमः सर्गः।।

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ।।१।।
स मृन्मये वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ।। २।।
तमर्चयित्वा विधिवद् विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशाम्पतिर्विष्टरभाजमारात् कृताञ्जलिः कृत्यविदित्युवाच ।। ३।।
अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे! कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं चैतन्यमुग्रादिव दीक्षितेन ।। ४।।

(१) विश्वजित् यज्ञ में राजा रघु ने सारा राजकोष दान में दे डाला। उसी समय महर्षि वरतन्तु का शिष्य 'कौत्स' रघु के पास पहुँचा। वह विद्याध्ययन पूर्ण कर चुका था। अब उसे गुरुदक्षिणा देनी थी। (२) रघु ने उसकी अगवानी की। हिरण्य न बचने के कारण उसके हाथ में अर्घ्यपात्र मिट्टी का था, वह अमूल्य शील का धनी, यश से प्रकाशित और अतिथिसत्कार में निपुण था। उधर अतिथि कौत्स भी विद्या से प्रकाशवान् था। (३) मानधनों में अग्रयायी और विधिज्ञ राजा रघु ने उस तपोधन अतिथि की विधिवत् पूजा की और जब वे आसन पर बैठ गए तो हाथ जोड़ उस कृत्यविद् ने यह कहा। (४) 'हे कुशाग्रबुद्धे! मन्त्रकृत् ऋषियों में अग्रणी आपके गुरु तो सकुशल हैं, जिनसे आपने अशेष आप्त ज्ञान उसी प्रकार पाया है जिस प्रकार यजमान उग्र (शिव की एक मूर्त्ति) से चैतन्य पाया करता है।

२. मृन्मये=मृण्मये म.हे.; अर्घ्यम्=अर्घम्; मनर्घ=मनर्घ्य ३. विशांपतिर्विष्टरभाजमारात्=विशांपतिर्विष्टर-भाजमाह, कृताञ्जलिः कृत्यविचारदक्षो; कृताञ्जलिः कृत्यविदित्युवाच= कृताञ्जलिः कृत्यविचारदक्षः, विशांपतिर्विष्टरभाजमाह। ४. अपि=अयि;—अत्र पाठान्तराणि —

यतस्त्वया ज्ञानमशेषमाप्तं/त्तं लोकेन चैतन्यमिवोष्णरश्मेः — इति म.
यतस्त्वया ज्ञानमशेषमाप्तं/त्तं चैतन्यमुग्रादिव दीक्षितेनेति — इति व. हामा.२४१, ९१८ म.
टीकायां मूलं पुनः भिन्नमेव।

ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूकम् — इति हे.
यतस्त्वयाः ज्ञानमशेषमाप्तं चैतन्यमर्कादिव जीवलोकः — इति हेपा.
ज्ञानं यतस्त्वां विशदं विवेश चैतन्यमुग्रादिव जीवलोकम् — इति हेपा.

कायेन वाचा मनसापि शश्वद् यत् संभृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥५॥
आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ॥६॥
क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥७॥
निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥८॥
नीवारपाकादि कडङ्गरीयैरामृश्यते जानपदैर्न कच्चित् ।
कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ॥९॥
अपि प्रसन्नेन महर्षिणा त्वं सम्यग् विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥

(५) मुनि का काय, मन और वाणी से अर्जित वह त्रिविध तप तो विघ्नों द्वारा व्यय नहीं हो रहा, जिससे इन्द्र का भी धैर्य डिग जाता है। (६) आपके आश्रमवृक्षों में आँधी आदि का उपद्रव तो नहीं है, जो श्रम दूर करते हैं और जिन्हें आप टेकी लगा लगाकर बाँध बाँधकर और अन्य उपायों से पुत्रों की भाँति बढ़ाते हैं। (७) मृगों के वे छौने तो सकुशल हैं जिनकी वात्सल्य के कारण यज्ञ के लिए सञ्चित कुश चबाने की इच्छा भी तोड़ी नहीं जाती और जिनकी नाल मुनियों की गोद में ही गिरती है। (८) जिनसे आपका नियमित स्नान संपन्न होता है, जिनसे पितरों के लिए तर्पण की अंजलि दी जाती है और जिनकी बालू में उञ्छ का षष्ठ भाग रखा रहता है, आपके वे तीर्थजल तो शुद्ध और स्वच्छ हैं। (९) गाँव के भुसखाने वाले पशु आपके नीवार आदि की वह फसल चर तो नहीं जाते, जिनसे आप समय पर उपस्थित अतिथियों का सत्कार करते और अपना शरीर भी बचाते हैं। (१०) क्या ठीक से पढ़ा कर महर्षि ने आपको गृहस्थ आश्रम के लिए अनुमति दे दी है आपका यह वह वय है जब आपको सभी के उपकार में समर्थ द्वितीय (गृहस्थ) आश्रम में प्रवेश कर लेना है।

५. पि=च,ऽथ; शश्वत्=तप्तं; 'संभृतं वासवधैर्यलोपि'='वज्रिणो धैर्यविपर्य्ययाय' 'वज्रिणो धैर्यविलोपि तप्तम्'। अन्तरायैः=अन्तरायम् ६. पादपानाम्=वृक्षकाणाम् ९. कडङ्ग=कडङ्क; कल्प्यभागं=कल्पभागम् व.म.हे.अ.ना. कल्पभाजम्, भागधेयम् १०. अपि=अयि।

तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ।।११।।
इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद् वरतन्तुशिष्यः ।।१२।।
सर्वत्र नो वार्त्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ।।१३।।
भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्व्वान् महाभाग तयातिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ।।१४।।
शरीरमात्रेण नरेन्द्र! तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवाऽवशिष्टः ।।१५।।
स्थाने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ।।१६।।

(११) आप पूज्य हैं। आप पधारे, बड़ा भाग्य, परन्तु इतने भर से मेरा चित्त संतुष्ट नहीं है। वह आज्ञा के लिए उत्सुक है। आप वन से मेरे पास पधारे क्या कोई गुरुजी की आज्ञा है या मुझे मान देने हेतु आप स्वयं पधारे हैं।' (१२) रघु की बात बड़ी उदार थी। उसे सुनकर और रघु के (मिट्टी के) अर्घ्य पात्रों को देखकर कौत्स के मन में कार्यसिद्धि की आशा क्षीण हो गई और वरतन्तु के वे शिष्य बोले। (१३) 'राजन्! सर्वत्र कुशल ही कुशल है हमारा। जब स्वामी आप हैं तब प्रजा का अशुभ हो ही कैसे सकता है? सूर्य के तपते रात्रि लोक में आँखों को ढँक कैसे सकती है। (१४) राजन्! पूज्यों के प्रति भक्ति आपमें अपने कुल के अनुरूप है, प्रत्युत उसमें आप अपने पूर्वजों से आगे हैं। मुझे खेद है कि मैं समय बिताकर आपके पास याचक के रूप में आया । (१५) राजन्! आप अपना संपूर्ण कोष सत्पात्रों में बाँट चुके हैं और केवल शरीर से राजा हैं। आपकी स्थिति धान के उस पौधे जैसी है जिसकी बाल तो चुन ले गए हों आरण्यक और जिसमें बचा हुआ हो केवल तना। (१६) राजा होते हुए भी आप यज्ञ के कारण दिखाई दे रहे हैं अकिञ्चन। यह भी आपके अनुरूप ही है। चन्द्रमा की कलाएँ देवजन

११. 'तवार्ह००त्सुकं मे' = 'तवार्हतोऽभ्यागमनेन तृप्तं मनो नियोगक्रिययोत्सुकं मे', 'अनुग्रहेणाभिगमस्थितेन तवार्हतस्तृप्यति / स्तुष्यति मे न चेतः'; अपि = अयि व.हे.; त्मना = त्मनो।
१२. तमित्यवोचद् वरतन्तुशिष्यः = तं प्रत्यवोचद् वरतन्तुशिष्यः व.हे., प्रत्याह कौत्सस्तमपेतकुत्सम्।
१३. तमिस्रा=तमिस्रम्, तमिश्रम्। १४. भाग तया=भागतया म.हे.अ.ना., भाग्यतया व.; कालः=कालं; विषादः=वितर्कः।

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्त्तुमहं यतिष्ये ।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ।।१७।।
एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद् वेति तमन्वयुङ्क्त ।।१८।।
ततो यथावद् विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ।।१९।।
समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत् पुरस्तात् ।।२०।।
निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।।२१।।
सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ।।२२।।

एक एककर खाते जाते हैं तब एक कला के रूप में बचे चन्द्रमा का कलाक्षय ही कलावृद्धि से प्रशंसनीय होता है। (१७) सो मैं गुरुदक्षिणा का द्रव्य अन्य किसी से प्राप्त करने का यत्न करूँगा। आपका कल्याण हो। चातक भी शरत्काल के मेघ से प्रार्थना नहीं करता।' (१८) इतना कहकर वरतन्तु के शिष्य ने लौटना चाहा। उसे राजा रघु ने रोका और पूछा 'विद्वन्! बतलाएँ तो कि गुरुजी को कौन सी वस्तु देनी है और कितनी मात्रा में।' (१९) तब उस विद्वान् ब्रह्मचारी ने वर्ण और आश्रम के मान्य, गर्व और आवेश से रहित और विधिवत् यज्ञ करके निपटे उस (रघु) से अपेक्षित बात कहना शुरू किया। (२०) 'भगवन्! मैं जब विद्याध्ययन पूर्ण कर चुका तो मैंने महर्षि से गुरुदक्षिणा पूछी। उत्तर में उन्होंने मेरी चिरकाल तक विधिवत् संपादित सेवा से व्यक्त भक्ति को ही प्रथम स्थान दिया। (२१) किन्तु जब मैंने बारम्बार पूछा तो गुरुजी गुस्से में आ गए और मेरी गरीबी पर ध्यान न देकर कह बैठे 'विद्या की संख्या का चौदह करोड़ वित्त (निष्क) ला दो'। (२२) मैं देख रहा हूँ कि आपके पास शेष है केवल 'प्रभु' शब्द। यह स्पष्ट है आपके इन मिट्टी के पूजापात्रों से। उधर गुरुदक्षिणा की राशि छोटी नहीं है, अतः जुटा नहीं पा रहा हूँ उत्साह आपको कष्ट देने का।'

१७. तदन्य=त्वदन्य व.हे.; माहर्तु=मानेतु हे.; नार्दति=नन्दति। १८. निषिध्य=निषेध्य; विद्वन् गु=विद्वद्गु।
२२. शब्द=शक्ति।

इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ।। २३ ।।
गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत् परीवाद–नवावतारः ।। २४ ।।
स त्वं प्रशस्ते महितो मदीये वसँश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद् यते साधयितुं त्वदर्थम् ।। २५ ।।
तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत् संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ।। २६ ।।
वसिष्ठमन्त्रोक्षणजात् प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ।। २७ ।।
अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितमस्त्रगर्भम् ।
सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ।। २८ ।।

(२३) चन्द्र सी कान्ति वाले राजा रघु से जब उस उत्कृष्ट वेदज्ञ द्विज (कौत्स) ने इस प्रकार निवेदन किया तो निष्पाप इन्द्रियवृत्ति वाले सारे जगत् के प्रमुख स्वामी उस रघु ने फिर कहा। **(२४)** 'मैं नहीं चाहता कि 'गुरु के लिए याचक बने वेद के एक पारदृश्वा विद्वान् को रघु के पास से निराश हो कर अन्य दाता के पास जाना पड़ा' इस अपयश को नया जन्म मिले **(२५)** तो आप ऐसा कीजिए कि मेरे प्रशस्त अग्न्यगार में चतुर्थ अग्नि बनकर दो तीन दिन रुकिए, जब तक मैं आपका प्रयोजन पूरा करने का यत्न करता हूँ। आप तो स्वयं पूज्य हैं।' **(२६)** ब्राह्मण वर्णी ने रघु का अनुरोध 'तथा' कहकर स्वीकार किया और रघु ने भी पृथिवी को धनहीन देख कुबेर से अर्थ प्राप्त करने का संकल्प किया। **(२७)** महर्षि वसिष्ठ के मन्त्रोच्चारण कर अभ्युक्षण करने का था यह प्रभाव कि रघु के रथ की गति न समुद्र में रुकती थी, न आकाश में और न पर्वतों पर, चलती हवा पर सवार मेघ के समान। **(२८)** रघु ने अपना रथ तैयार किया। उसमें अस्त्र रखे और रात को उसी में किया शयन। वह (लोकपाल) कुबेर को सामन्त सा मानकर उसे जबरन जीतना चाह रहा था।

२३. वेदितो=वेदिते, निवेदितो/ते; विदां=विदा। २४.वाप्यकामम्=वाप्तकामः। २५.महितो=महिते म. **२६. तथं प्रती=तथा प्रतीं, तथप्रती, तथप्रतिज्ञ** व.**, तथप्रयत्नः** व.**; संगर=तां गिरम्** व.**, शासनं; मग्रजन्मा=मात्मजन्मा। २७. जात् प्र=जप्र** अ.ना.**। २८. मस्त्र=शस्त्र** म.हे.अ.ना.**; यैव=येव।**

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ।। २९।।
तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्सस्य समस्तमेव शृङ्गं सुमेरोरिव वज्रभिन्नम् ।। ३०।।
जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ।। ३१ ।।
अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्व्वकायं संप्रस्थितो वाचमुवाच कौत्सः ।। ३२।।
किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ।। ३३।।

(२९) प्रातः ज्योंही वह कूच करने वाला था कि कोषागार में नियुक्त विस्मित सेवक दौड़े आए और सूचना दी–'कोषागार के बीच आकाश से हिरण्य (सुवर्ण) वृष्टि हुई है'। **(३०)** राजा रघु ने समझ लिया कि 'यह सुवर्णवृष्टि कुबेर ने की है जिस पर मैं चढ़ाई करने जा रहा था'। उसका दूसरा कदम यह था कि उस पूरी की पूरी सुवर्णराशि को कौत्स की ओर बढ़ा दिया। वह राशि तो एक प्रकार से वज्र से टूटा सुमेरु का शृङ्ग ही था । **(३१)** साकेत निवासी प्रत्येक व्यक्ति दोनों की मानसिक उच्चता (सत्त्व) की प्रशंसा कर रहा था– याचक की भी जो गुरुदक्षिणा से अधिक अर्थ के प्रति निस्स्पृह था और दाता की भी जो याचित राशि से कई गुना अधिक द्रव्य दे रहा था। **(३२)** रघु ने सैकड़ों ऊँटों और सैकड़ों घोड़ियों पर लदवा दिया वह सोना। तब प्रसन्न महर्षि चलने लगे। उस समय रघु ने उन्हें झुककर प्रणाम किया तो कौत्स ने कहा। **(३३)** जो राजा हो और राजवृत्त का पालन करता हो उसकी कामना यदि पृथ्वी पूर्ण करती हो तो इसमें क्या आश्चर्य। अचिन्तनीय तो प्रभाव आपका है जिसने आपका अभीष्ट द्युलोक तक से दुह लिया। (राजवृत्त–'न्याय से अर्थार्जन, वृद्धि, रक्षा और सत्पात्र में विनियोग'– कामन्दक)।)

२९. **कोष/श–गृहे=प्राप्तमुदो,** तत्र पदे। कोषपदस्याऽऽवृत्तिरत्र पुनर्गुणः। यदि पुनरावृत्तिमिमाम–सह्यपीडां कलयामः तर्हि 'हिरण्मयीं कर्मकराः प्रसन्ना' इत्येवं पठेम। **वृष्टिं शशंसुः पतितां नभस्तः=वृष्टिं नभस्तः पतितां शशंसुः।** ३०. **लब्धं=प्राप्तं; कौत्सस्य=कौत्साय, कुत्साय; शृङ्गं=पादं** म.हे.अ.ना., **शैलं** हे., **खण्डं, गण्डं।** ३१. **गुरुप्र=गुरौ प्र; दधिकप्र=भ्यधिक।** ३२. **वाहिता=हारिता** हे.अ.ना.; **महर्षिः=मनीषी; स्पृशन् करेणा=परास्पृशन्ना; वाच=वाक्य।** ३३. **वृत्ते स्थि=वृत्तस्थि** अ.ना.

आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्व्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यो भवतः पितेव ।। ३४।।
इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मादालोकमर्क्कादिव जीवलोकः ।। ३५।।
ब्राह्मये मुहूर्त्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ।। ३६।।
रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद् बिभिदे कुमारः प्रवर्त्तितो दीप इव प्रदीपात् ।। ३७।।
उपात्तविद्यं विधिवद् गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीर्गन्तुकामाऽपि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ।। ३८।।
अथेश्वरेण क्रथकैशिकानां स्वयम्वरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ।। ३९।।

(३४) 'आप सभी श्रेय प्राप्त कर चुके हैं, अतः अन्य किसी वस्तु का आशीर्वाद पुनरुक्ति होगा। हाँ! आपको पुत्र प्राप्त हो आपके पूज्य पिता को आपके समान।' **(३५)** अग्रजन्मा कौत्स ऐसा आशीर्वाद कर गुरुजी के पास चले गए। उनके आशीर्वाद से राजा रघु को भी शीघ्र ही पुत्र प्राप्त हुआ जैसे सूर्य से जीवलोक को प्राप्त होता है आलोक। **(३६)** रघु की पट्टमहिषी (प्रभावती) ने पुत्र को जन्म दिया ब्रह्माजी के मुहूर्त्त (अभिजित) में (जो मध्याह्न में आता है), अतः पिता रघु ने उस आत्मजन्मा (पुत्र) को ब्रह्माजी के ही नाम पर 'अज' नाम दिया। **(३७)** वह कुमार (अज) अपने कारण (पिता) से तनिक भी भिन्न नहीं लगा, वही ओजस्वी रूप, वही बल और वही स्वाभाविक उन्नतत्व (ऊँचा कद, ऊँची मानसिकता)। ऐसा लगा जैसे दीप प्रदीप से सुलगा दिया गया हो। **(३८)** गुरुओं से विधिवत् विद्या प्राप्त कर लेने पर जब वह यौवन से विशेष कान्त हो गया तब राजलक्ष्मी उसकी होने के लिए उत्सुक हो गई, किन्तु पिता की आज्ञा धीर कन्या के समान चाह रही थी। **(३९)** इस बीच विदर्भराज भोज ने अपनी बहिन इन्दुमती के स्वयंवर के लिए कुमार को लाने हेतु एक विश्वसनीय दूत रघु के पास

३४. भूतं=दोषं; मीड्यो=मीड्यं म.अ.ना.। ३५. दालोक=प्रकाम(श), चैतन्य म.; लोकः=लोकम्। ३६. ब्राह्मये=ब्राह्मे। ब्रह्मदैवत्येऽभिजिन्नाम्नि मध्याह्नकालिके मुहूर्त्ते इति देवी प्रभावतीति च हेमाद्रिः। आत्म=अग्र, अग्न्य, उग्र। ३७. तदेव=तथैव; प्रवर्त्तितो=प्रदीपितो। ३८. कान्तम्=रम्यम्; गन्तुकामा=साभिलाषा म.अ.ना., कामयाना हे.पा.। ३९. क्रथ=कृथ; कैशि=कैश, कौशि।

तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम् ।
प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम् ।। ४० ।।
तस्योपकार्यारचितोपचारा वन्ध्येतरा जानपदोपदाभिः ।
मार्गे निवेशा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ।। ४१ ।।
स नर्म्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा क्लान्तं रजोधूसरकेतु सैन्यम् ।। ४२ ।।
अथोपरिष्टाद् भ्रमरैर्भ्रमद्भिः प्राक्सूचिताऽन्तः—सलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ।। ४३ ।।
निःशेषविक्षालितधातुनाऽपि वप्रक्रियामृक्षवतस्तटेषु ।
नीलोर्ध्वरेखाशबलेन शंसन् दन्तद्वयेनाश्मविकुण्ठितेन ।। ४४ ।।

भेजा। (४०) रघु ने देखा कि वह सम्बन्ध श्लाघनीय है और पुत्र भी इस योग्य हो चुका है कि वह दारक्रिया कर सके तो अज को सेना के साथ विदर्भराज की राजधानी भेज दिया। (४१) उस राजसूनु के लिए मार्ग में स्थान स्थान पर तम्बू तने पड़ाव बनाए गए, जो जनपदीय उपहारों से परिपूर्ण थे, ऐसा लगता था जैसे उद्यानगृह हों। (४२) अज का एक पड़ाव हुआ नर्मदातट पर। नर्मदा की फुहारों से आर्द्र हवा के झोकों से कंजी के पेड़ वहाँ खूब नचाए जा रहे थे। उधर लम्बा रास्ता पार करते करते सेना भी थक गई थी। उसके ध्वज धूलिधूसरित दिख रहे थे। अज ने वहीं डाला पड़ाव। (४३) वहाँ नर्मदा जल के ऊपर भौंरे टूट रहे थे, उनसे जिसके प्रवेश की सूचना मिल रही थी ऐसा एक जंगली हाथी नर्मदा के प्रवाह से ऊपर आया। उसके गण्डस्थल का पूरा मद धुला हुआ था, अतः उसकी गण्डभित्तियाँ अमल हो गई थीं। (४४) उसके दोनों दाँत बतला रहे थे कि वह ऋक्षवान् पर्वत के तट पर वप्रक्रिया करके आया है, क्योंकि वे पत्थर की टक्कर से कुण्ठित हो गए थे और नीले रंग की ऊर्ध्वरेखा से चित्रित भी दिख रहे थे यद्यपि उनमें लगी धातु तो पूरी तरह धुल चुकी थी। (वप्रक्रिया – ढूहा ढहाने की चेष्टा। द्र. मेघदूत २।)

४१. कार्यारचि=कार्या रचि म., **कर्याः रचि; चारा=कारा** व.; **वन्ध्येतरा=वन्येतरा** म.हे.अ.ना., **व्याप्तान्तरा, कीर्णान्तरा मार्गे निवेशाः=मार्गे निवासाः** अ.ना.हे., **मार्गेनिवेशाः, मार्गेनिवासाः; मनुजेन्द्र=भुवनेन्द्र।** विहाराः पटमण्डपा इति यावत्। **४१. माले=मालैः; 'क्लान्तं००सैन्यम्'=सैन्यं श्रमोत्फेनवनायुजाश्वम्; क्ला=क्रा। ४३. निर्धौत=निर्धूत** वि., **निर्धौति; गण्ड=गल्ल; भित्तिः=लेखः। ४४. ऋक्ष=ऋष्य; कुण्ठि=कुश्चि।**

संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् बृहतस्तरङ्गान् वार्यर्गलाभङ्ग इव प्रवृत्तः ।।४५।।
शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् ।
पूर्व्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ।।४६।।
तस्यैकनागस्य कपोलभित्त्योर्ह्रदावगाहक्षणमात्रशान्ता ।
वन्येतराऽनेकपदर्शनेन पुनर्दिदीपे मद्दुर्दिनश्रीः ।।४७।।
सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखीबभूवुः ।।४८।।

(४५) सूँढ़ को चटाचट सिकोड़ता फैलाता, चिंघाड़ता और बड़ी बड़ी तरंगों को चीरता हुआ तीर की ओर बढ़ रहा वह ऐसा लग रहा था जैसे कोशिश में हो अपनी बन्धन शृङ्खला को तोड़ने की। (४६) पहाड़ जैसा वह हाथी तो शैवालमञ्जरी जाल को छाती से खींचता तट पर पहुँचा बाद में, पहले जा पहुँचा उससे उत्पीड़ित वारिराशि वाला नदी का प्रवाह। (४७) वह हाथी ऊँची जाति का हाथी था। उसके दोनों गण्डों से बहा मद पानी से कुछ देर के लिए धुल तो चुका था, परन्तु पालतू हाथी दिखाई देते ही वह फिर से फूट पड़ा और लगा दी उसने झड़ी। (४८) उसके मदजल की गंध छितवन के दूध सी कटु थी। उसका वह असह्य मदप्रवाह सूँघा तो सेना के गजेन्द्र विमुख हो गए, पीलवानों ने तीव्र प्रयत्न किए, किन्तु वे उन्हें भी लाँघते गए।

४५. सशब्दम्=सशब्दः; बृहतः=सहसा; अत्र नूतनौ पाठान्तरश्लोकौ—

१. स भोगिभोगाधिकपीवरेण हस्तेन तीराभिमुखः सशब्दम्/ब्दः।
संवेष्टतार्धप्रसृतेन दीर्घा/संवेष्टितोर्ध्वप्रहरेण दीर्घा/संवेष्टतार्ध प्रयुतेन दीर्घां/
संवर्धितार्धाप्रहितेन दीर्घां
प्रतिक्षिपंस्तीरमुखः सशब्दं चिक्षेप वारीपरिघानिवोर्मीन् ।।
२. कारण्डवोत्सृष्टमृदुप्रताना पुलिन्दयोषाम्बुविहारकाञ्चीः ।
कर्षन् स शैवाललता नदीष्णः प्रौहावलग्नास्तटमुत्ससर्प ।।

त्सृष्ट=च्छिष्ट; प्रताना=प्रवाला, प्रतान्ता; शैवा=सैवा; नदीष्णः=नदीनाम्; ४६. मञ्जरीणाम्=वल्लरीणाम् व.; उरसा=तरसा व., सहसा; प्रवाहः=प्रवाहात्। प्रौहाव=प्रोहाव, प्रवाह, स्कन्धाव; ससर्प=ससर्ज। ४७. ह्रदा=जला म.हे.; नेकप=नेद्विप। ४८. विमुखीब=विमुखा ब म.।

स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ।। ४९ ।।
तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान् कुमारः ।
निवर्त्तयिष्यन् विशिखेन कुम्भे जघान नात्यायतकृष्टशार्ङ्गः ।। ५० ।।
स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः ।
स्फुरत्प्रभामण्डलमध्यवर्त्ति कान्तं वपुर्व्योमचरं प्रपेदे ।। ५१ ।।
अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ।। ५२ ।।
मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्व्वपतेस्तनूजं प्रियम्वदं मां प्रियदर्शनस्य ।। ५३ ।।
स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत् सा प्रकृतिर्जलस्य ।। ५४ ।।

(४९) उस हाथी ने सेना का पूरा पड़ाव क्षण भर में तहस नहस कर डाला। घोड़े बन्धन तुड़ा कर भाग खड़े हुए, जूआ टूट जाने से रथ ढह गए, सैनिक बचाने में लगे हुए थे स्त्रियों को। (५०) उस हाथी को अपनी ओर टूटते देख कुमार अज ने लौटाने के लिए धनुष को कुछ खींच कर बाण मारा। बाण उसके कुम्भ पर लगा। कुमार को यह मर्यादा विदित थी कि वन्य हाथी को जान से नहीं मारना चाहिए । (५१) बाण ज्योंही लगा त्योंही वह हाथी का शरीर छोड़कर विस्मित सैन्य की आँखों के सामने देखते ही देखते स्फुरित प्रभामण्डल के मध्य अवस्थित आकाशचारी कान्तिमान् रूप में बदल गया। (५२) इसके बाद उसने प्रभाव से प्राप्त कल्पद्रुम के पुष्पों की कुमार अज पर बरसा की और कहना शुरू किया। वह वाग्मी था और दन्तकान्ति से वक्षःस्थल के लम्बे हार को उसने और अधिक लम्बा कर दिया था। (५३) 'भगवन्! मैं मतङ्ग ऋषि के मेरी ही नासमझी से मिले शाप से हाथी बन गया था। हूँ मैं प्रियदर्शन गन्धर्वपति का प्रियंवद नामक प्रिय पुत्र। (५४) उन महर्षि का प्रणाम करके अनुनय किया तो वे कुछ पिघले। बात यह है कि पानी में ऊष्मा अग्नि के संसर्ग से ही आती है, अपने आप में तो वह शीतल ही होता है ।

४९. तुमुलं=तुमलं, चपलं हे.ना., **शिथिलं। ५०. शार्ङ्गः=चापः** व.हे.। **५१. कान्तं=रम्यं। ५२. तार=चारु। ५३. अवेहि=अवैहि** हे.। **५४. हि यत् सा=हि यस्मात्, हि नाम।**

इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुम्भमयोमुखेन ।
संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत् स तपोनिधिर्माम् ॥५५॥
संमोचितः सत्त्ववता त्वयाऽहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद् भवतो न कुर्यां वृथा हि मे स्यात् स्वपदोपलब्धिः ॥५६॥
संमोहनं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्व्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ॥५७॥
अलं ह्रिया, मां प्रति यन्मुहूर्त्तं दयापरोऽभूः प्रहरन्नपि त्वम् ।
तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ॥५८॥
तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रवदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ॥५९॥

(५५) तब उन महर्षि जी ने मुझसे कहा 'तुम्हें अपने शरीर की महिमा तब पुनः मिल जाएगी जब इक्ष्वाकु वंश में उत्पन्न अज तुम्हारे कुम्भ को लोहे के फल वाले बाण से घायल करेंगे।' (५६) आप सत्त्वशाली हैं। आपने मुझे शाप से मुक्ति दिला दी। आपके दर्शन की प्रार्थना मैं लम्बे समय से कर रहा था। अब मेरी बारी है। यदि मैं आपका प्रतिप्रिय न करूँ तो व्यर्थ होगी मेरी अपने पद की प्राप्ति। (५७) आप मेरे सखा हैं। आप मेरा यह 'संमोहन' नामक अस्त्र स्वीकार करें। इसके प्रयोग का मन्त्र अलग है और संहार का अलग। यह गान्धर्व अस्त्र है इससे अरिहिंसा भी नहीं होती और विजय हाथ में उपस्थित रहती है। (५८) लज्जा न करें। अरे आपने प्रहार करते समय भी दयालुता से काम लिया। अतः मेरी इस भेंट को अस्वीकार करने की बेरुखी न दिखलाएँ।' (५९) अज ने कहा 'ठीक है' और नर्मदा के पवित्र जल से आचमन कर उत्तर मुख बैठकर अस्त्र के ही समान अस्त्रमन्त्र शापमुक्त प्रियंवद से ग्रहण कर लिया। नर्मदा 'सोम' से उत्पन्न हैं और अज भी नृसोम था। (सोम = उमासहित शिव।)

५५. क्ष्यसे=ज्यसे; वपुर्म=पुनर्म हे.अ.ना.; तदेत्यवोचत्=तदैतदूचे। ५६. संमो=स मो; सत्त्व=धर्म; वृथा=व्यर्था; पदो=फलो। ५७. दत्स्व=धत्स्व; योक्तु=हर्त्तु; श्च=स्व। इतः परं पद्यान्तरम्—

गान्धर्व्वमस्त्रं तदितः प्रतीच्छ प्रयोगसंहारविभक्तमन्त्रम् ।
प्रस्वापनं नाम यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ॥

तीच्छ=तीक्ष; प्रयोक्तु=प्रहर्तु। ५८. रौक्ष्यम्=रूक्ष्यम्। ५९. अस्त्रवद=अस्त्रविद, शस्त्रवद; निगृ=विगृ हे.; शापात्=शासी।

एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ।। ६० ।।
तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः ।
प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्म्मिरिवोर्म्मिमाली ।। ६१ ।।
प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ।
मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ।। ६२ ।।
तत्राधिकारपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् ।
रम्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात् परामिव दशां मदनोऽध्युवास ।। ६३ ।।
तत्र स्वयम्वरसमाहृतराजलोकं कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखीबभूव ।। ६४ ।।
तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छद–विमर्दकृशाङ्गरागम् ।
वैतालिका ललितबन्धमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः ।। ६५ ।।

(६०) इस प्रकार दैवयोग से मार्ग में अकल्पित सख्य को प्राप्त उन दोनों में से एक (प्रियंवद) तो चला गया कुबेरधाम और अन्य चल पड़ा सौराज्य से रम्य विदर्भजनपद की ओर। (६१) अज नगर के पास पहुँचा तो उसके आगमन से अत्यधिक प्रसन्न विदर्भराज भोज अगवानी में आए, चन्द्र की अगवानी में तरङ्गित समुद्र के समान। (६२) विदर्भराज ने अज को नगर में प्रवेश कराया और बड़ी नम्रता के साथ उनका ऐसा सत्कार किया कि देखने वालों को अज ही गृहपति लगा और भोज ही आगन्तुक। (६३) अज विदर्भराज के नम्र अधिकारियों द्वारा बतलाई नई उपकार्या (पटमण्डप) में जाकर ठहर गए। उसके पूर्वद्वार पर पूर्णकुम्भ रखा हुआ था। देखने में भी वह रम्य थी। रघु का प्रतिनिधि अज उसमें वैसे ही आ जमा जैसे काम बाल्य के बाद की दशा में आ जमता है । (६४) उसमें, अज की आँखों में रात को नींद देरी से आई। अज के मन में तो जाग रही थी उस कन्यारत्न की लिप्सा जिसके स्वयंवर ने राजा लोगों को खींच रखा था। नींद भाँप गई और इसीलिए रूठ भी गई थी पूर्व प्रेयसी के समान। (६५) सबेरा हुआ तो उदारवाक् वैतालिकों ने ललितबन्ध से मनोहर उक्तियों से अज का प्रबोध मङ्गल करना आरम्भ किया। वैतालिक समवयस्क थे। अज के

६०. एवं=इत्थं अ.ना.। **६१. हर्षः=मोदः; कैशिके=कैशके** व., **कौशिके। ६२. तत्र=पौर; मेतो=मस्तो, मग्नो। ६३. कार=कारि; दिष्टाम्=हृष्टाम्; पूर्ण=हेम; कार्याम्=कर्याम्** अ.ना.; **ध्युवास=ध्यवात्सीत्। ६४. दयिता=वनिता। ६५. कृशा=हृता; वैता००राभिः=वैतालिकाः स्फुटपदप्रकटार्थबन्धम्, वैता००सवयसः प्रथितप्रबोधम्, सूतात्मजाः सवयसः प्रथितप्रबोधम्** म.अ.ना., **सूतात्मजाः सवयसः**

रात्रिर्गता मतिमतां वर! मुञ्च शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।
तामेकतस्तव बिभर्त्ति गुरुर्विनिद्रस्तस्या भवानपरधुर्यपदावलम्बी ॥ ६६ ॥
निद्रावशेन भवताप्यनवेक्ष्यमाणा पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥ ६७ ॥
तद् वल्गुना युगपदुन्मिषितेन तावत् सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमान–परुषेतर–तारमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ ६८ ॥
वृन्तश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९ ॥

पीवर स्कन्ध कर्णाभूषणों से पीड़ित थे। शय्या के उत्तरच्छद में रगड़ा कर उसका अंगराग भी पुछ गया। (६६) हे मतिमतांवर! रात्रि बीत चुकी है, अब शय्या छोड़िये। विधाता ने संसार का भार दो भागों में बाँट रखा है। उनमें से एक को तो आपके पिता धारण करने में जागरूक हैं। अन्य भाग के लिए अधिकृत आप किए गए हैं। (६७) लक्ष्मी रात भर पर्युत्सुक बनी रही, क्योंकि आप निद्रा के वश में थे, अतः उसे देख नहीं पाए। वह बेचारी जिसे देख देख दिल बहला रही थी वह चन्द्र भी अब दिगन्त में लटक कर आपके मुख की कान्ति छोड़ता जा रहा हैं । (६८) तो एक साथ सुन्दरता के साथ खिलकर दो (वस्तुएँ) एक दूसरे की तुलना पा लें, आपका तरल और कोमल पुतली वाला नेत्र और भ्रमरसंचार से युक्त कमल। (६९) यह जो प्रभातपवन है यह एक प्रकार से चाह रहा है आपके मुख से निकलती साँस की स्वाभाविक सुगन्ध का अनुकरण करना। वह एक बार तो वृन्त पर श्लथ पड़े पुष्प को उड़ाता है, और एक बार मिलता है, अरुणोदय वेला में खिले कमलों से, परन्तु हैं तो ये परगुण।

प्रथितं प्रबोधं, वैतालिकाः/ सूतात्मजाः सवयसः प्रतिबोधहेतोः; वाचः=वाचम्। ६६. तामे=यामे; विनिद्रः=वितन्द्रिः हे., वितन्द्रः। ६७. ताप्य=ता ह्य; वेक्ष्यमाणा=वेक्षमाणा अ.ना., पेक्ष्यमाणा।
अत्रापरं पद्यम्–

निद्रावशं त्वयि गते शशिना कथञ्चिदात्मानमाननरुचा भवतो वियुज्य ।
लक्ष्मीर्विभातसमयेऽपि हि दर्शनेन पर्युत्सुका प्रणयिनी निशि खण्डितेव ॥

६८. स्पन्द=स्यन्द। ६९. वृन्तश्लथं=वृन्ताच्छ्लथं व.म.हे.अ.ना., वृन्तच्छल; ररुणांशु=ररुणार्क; ईप्सुरिव=माप्तुमिंव। समानप्रायार्थकं पद्यान्तरमप्यत्र –

मन्दं विवाति हिमसंभृतशीतभावः संसृज्यते सरसिजैररुणांशुभिन्नैः ।
सौरभ्यमीप्सुरिव ते मुखमारुतस्य यत्तो गुणान् प्रति निशापरिणामवायुः ॥

ताम्रोदरेषु पतितं द्रुमपल्लवेषु निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाऽधरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयम् ।। ७० ।।
यावत् प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर! याते किं वा रिपूँस्तव गुरुः स्वयमुच्छिनत्ति ।। ७१ ।।
शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगाद् भिन्नाद्रिगैरिकतटा इव दन्तकोषाः ।। ७२ ।।
दीर्घेष्वमी नियमिताः पटमण्डपेषु निद्रां विहाय वनजाक्ष! वनायुदेश्याः ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः ।। ७३ ।।
भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ।। ७४ ।।

(७०) ताम्रवर्ण के तरुपल्लवों पर अटकी यह बड़े हार के स्वच्छ मोती सी ओस की बूँद ऐसी लग रही है जैसी लगती है आपके अधरोष्ठ पर उछली आपकी दन्तकान्ति। दोनों के मिलन से एक तीसरी ही छवि निष्पन्न हो रही है (उसी की संज्ञा है 'परभाग')। **(७१)** जब तक प्रतापनिधि भगवान् सूर्य आकाश में आरूढ़ नहीं तभी तक, देखिए तो अरुण ने ही रात्रि का अन्धकार दूर कर दिया। युद्ध में जब आप आगे बढ़ जाते हैं तब क्या रिपुओं को आपके पिताजी स्वयं मारते हैं? **(७२)** देखिए! ये सेनागज भी दोनों करवट सोकर शय्या छोड़ रहे हैं। इनकी खिंचती शृङ्खलाएँ बज रही हैं, और इनके दन्तकोषों पर तरुण अरुण की ललोंई पड़ रही है तो ऐसा लग रहा है कि ये गैरिकतटों को तोड़कर आए हैं (वप्रक्रीडा)। **(७३)** लम्बे—लम्बे तम्बुओं में बँधे ये अरबी घोड़े (वनायु देशी) भी नींद छोड़कर, हे कमलाक्ष! मुख की भाप से चाटने हेतु सामने पड़ी नमक की शिलाएँ मटमैली कर रहे हैं। **(७४)** ये जो फर्श पर पड़ी फूल की लडी़ (उपहार) हैं ये म्लान हैं अतः इनकी जो रचना थी (भाँति) वह भी विरल पड़ती जा रही हैं। दीपक की किरणें अब दिखाई नहीं पड़ रही हैं। और पिंज़रे में बैठा मधुरवाणी वाला यह शुक भी आपकी स्तुति में उच्चरित हमारे शब्दों का अनुवाद करने लगा है ।

७०. द्रुम=तरु हे.ना., **नव; धौंत=धूत** व.; **आभाति०० दीयम्=संल्लक्ष्यते दशनचन्द्रिकयाऽनुविद्धं बिम्बोष्ठ—लब्धपरभागमिव स्मितं ते। ७१. वीर=धीर। ७२. स्तम्बेरमाः=सेनागजाः; राग=कान्ति। ७३. क्ष वनायुदेश्याः=क्ष वनायदेश्याः, वनायुजास्ते, क्षणं वाह्लिदेश्याः। ७४. भक्तिः=पङ्क्तिः; हारः=हारैः; स्वकि=सकि; द्भेद = मेष।**

इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ।। ७५ ।।

अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशल–विरचिता–ऽनुरूपवेषः क्षितिपसमाजमगात् स्वयम्वरस्थम् ।। ७६ ।।

इति रघुवंशे महाकाव्ये कविकालिदासकृतौ स्वयम्वराभिगमनो नाम पञ्चमः सर्गः ।। ५ ।।

(७५) वन्दिपुत्रों ने इस प्रकार काव्यमयी (विरचित) वाणी सुनाई तो जागा अज चट से तल्प से अलग हो गया, जिस प्रकार मद से उच्च और मधुर स्वरों में बोल बोल कर राजहंसों द्वारा जगाया 'सुप्रतीक' नामक दिग्गज गङ्गा की बालू को छोड़ देता है। (७६) जागकर अज ने दिन उगते समय की शास्त्रोक्त विधि पूरी की। सुन्दर बरौनियों वाले उस अज को कुशल जनों ने समयोचित वेष पँहनाया और वह स्वयम्वर में इकट्ठे राजसमाज पहुँचा।

इस प्रकार पूर्ण हुआ महाकवि कालिदास की कृति रघुवंश महाकाव्य में
अजस्वयम्वरसभाभिगमन नामक पञ्चम सर्ग ।। ५ ।।

७५. विगत=विहत, गलित, विहित; मद=मृदु।

पद्यान्तरमत्र—

इति स विहतनिद्रस्तल्पमल्पेतरांसः
सुरगज इव गङ्गासैकतं सुप्रतीकः ।
परिजनवनितानां पादयोर्व्यापृतानां
वलयमणिविदष्टं प्रच्छदान्तं मुमोच ।।

दयोर्व्यापृतानां=दसंवाहिनीनां; वलय=कटक।

७६. मञ्चिता=मञ्जिता; रूप=कूल म.; रस्थम्=रार्थम्।

रेवाप्रसादेन सनातनेन व्यलेखि यः पञ्चम एष सर्गः ।
भूयादसौ श्रीरघुवंशकाव्ये विदग्धविद्वत्परितोषहेतुः ।।

३१.०३.२००३

२०५९ विक्रमसंवत्सरपूर्त्तिपर्व्वणि चैत्रकृष्णामावस्यायाम् ।
काशीकालिदाससंस्थाने वाराणस्याम् ।।

।। षष्ठः सर्गः ।।

स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान् नरलोकपालान् ।।१।।
रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ।। २।।
वैदर्भनिर्दिष्टमथो/सौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम् ।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह ।। ३।।
परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ।।४।।
तासु/तस्य श्रिया राजपरम्परासु प्रभाविशेषोदयदुर्निरीक्ष्यः ।
सहस्रधाऽऽत्मा/सौ व्यरुचद् विभक्तः पयोमुचां पङ्क्तिषु विद्युतेव ।।५।।

(१) अज ने स्वयम्वर सभा में देखा कि मञ्च बने हुए हैं। उन पर रखे हुए उपचार (पीकदान आदि) से लेस सिंहासन। उन पर बैठे हुए हैं सजे धजे राजा लोग, उन्होंने विमानारूढ़ देवों की शोभा ग्रहण कर रखी है। (२) उन राजाओं के बीच अज ऐसा लग रहा था जैसे काम हो, रति की प्रार्थना पर शिव ने जिसे उसका शरीर लौटा दिया हो। उसे देखा तो अन्य राजाओं के मन में इन्दुमती के लाभ की आशा मिट गई। (३) राजकुमार अज विदर्भराज द्वारा दिखलाए मञ्च पर बनी सीढ़ियों से जा चढ़ा, वैसे ही जैसे कोई सिंहशावक शिलाखण्डों पर पाँव रखते हुए पर्वत की ऊँची गोद में चढ़ जाता है। (४) उस मञ्च पर लगे आसन पर बिछी थी उत्तम वर्ण की चादर। उस पर बैठे अज की कान्ति मयूरपृष्ठ पर बैठे कुमार कार्त्तिकेय की कान्ति से अत्यधिक उपमेय थी। (५) उन राजाओं की पाँत में उनकी आत्मा शोभा से ऐसी प्रदीप्त लग रही थी जैसे मेघपङ्क्ति की आत्मा लगती है बिजली से। उसमें एक विशिष्ट शोभा जाग उठी थी जिसे देख पाना कठिन था।

१. रूपान्तरमस्य— स तत्र मञ्चेषु विमानकल्पेष्वाकल्पसंमूर्छितरूपशोभान् ।
सिंहासनस्थान् नृपतीनपश्यद् यूपान् प्रशस्तानिव हैमवेदीन् ।।
शोभान्=शोभः; अपश्यद्=ददर्श।

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज भूम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥६॥
नेत्रव्रजाः पौरजनस्य तस्मिन् विहाय सर्व्वान् नृपतीन् निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥७॥

अथ कुलकम्

अथ स्तुते वन्दिभिरन्वज्ञैः सोमार्कवंश्ये नरदेवलोके ।
सञ्चारिते चागरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः ॥८॥
पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्तहेतौ ।
प्रध्मातशङ्खे परितो दिगन्ताँस्तूर्य्यस्वने मूर्छति मङ्गलार्थे ॥९॥
मनुष्यवाह्यं चतुरस्त्रयानमध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं पतिम्वरा क्लृप्तविवाहवेषा ॥१०॥

इति कुलकम्।

(६) महार्ह आसनों पर कीमती वेष धारण किए उन सबके बीच रघुपुत्र 'अज' ही अधिक सुशोभित लग रहा था, कल्पद्रुमों में पारिजात की नाँई। (७) पुरवासी लोगों के नेत्र अन्य सब राजाओं को छोड़ उसी पर टूट पड़े, जैसे मदोत्कट वन्यगज पर पुष्पवृक्षों को छोड़ टूट पड़ते हैं भौरे। (८) उस समय वंशावली के जानकार वन्दी लोग सोम तथा सूर्यवंश के राजाओं की स्तुति गा रहे थे अगुरुसार की धूप फैल फैलकर वैजयन्ती बन रही थी। (९) मङ्गलतूर्य बज रहे थे जिनसे पुर के पास के उपवनों के मयूर ताण्डव करने में लग गए थे, उनके साथ शङ्ख भी फूँके जा रहे थे। वह ध्वनि चारों ओर दिगन्त तक फैल रही थी। (१०) अब मञ्चों के बीच के मार्ग में प्रवेश किया स्वयंवर—कन्या इन्दुमती ने सखियों के साथ। स्वयंवर का वेष पहने वह चौकोर यान पर बैठी थी जिसको मनुष्य ढो रहे थे।

६. संस्थि=संश्रि; भूम्ना=धाम्ना म.; रेव=रेकः। ८. धूपे = धूमे; समुत्सर्पति=शिखाभावित, शिखाद्योतित, शिखावासि/शित, शिखास्थापित अ.ना.; वैजयन्तीः = वैजयन्तीम् अ.ना.; ०केतुमाले। ९. श्रयाणाम्= श्रितानाम्; कलापि=शिखण्डिना व.हे.; मुद्धत=मुन्मद; नृत्त=नृत्य; परितो=पुरतो। १०. रस्त्र=रन्त, रङ्ग; अध्यास्य = आस्थाय; कन्या परि = कन्यापरि; मार्गं = मार्गे; क्लृप्तविवाहवेषा = कौतुकशुद्धवेषा; कुलकम् = त्रिभिः कुलकम्, त्रिभिर्विशेषकम्।

तस्मिन् विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ।।११।।
तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालचेष्टा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ।।१२।।
कश्चित् कराभ्यामुपगूढनालमालोलपत्त्राभिहतद्विरेफम् ।
रजोभिरन्तः–परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ।।१३।।
विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रावारमुत्कृष्य यथाप्रदेशं निनाय साचीकृतचारुवक्त्रः ।।१४।।
आकुञ्चिताग्राङ्गुलिना तथान्यः किञ्चित्समावर्जितनेत्रशोभी ।
तिर्यग् विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठम् ।।१५।।
निवेश्य वामं भुजमासनार्धे तत्संनिवेशाद् व्यतिलङ्घिनीव ।
कश्चिद् विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ।।१६।।

(११) कन्या क्या, वह तो विधाता का कन्यारूप में प्रकाशित सर्वोत्कृष्ट विधान था। वह बना हुआ था सैकड़ों नेत्रों का प्रमुख लक्ष्य। उस पर सभी राजा चित्त से टूट पड़े, आसनों पर केवल शरीर से अवस्थित रहे। **(१२)** राजाओं के मनोरथ उस कन्या के प्रति अभिव्यक्ति पा रहे थे। उनमें विविध प्रकार की शृङ्गारचेष्टाएँ प्रकट हुईं, जो प्रणय की (याचना की) अग्रदूतियाँ थीं। **(१३)** किसी ने दोनों हाथों से नाल पकड़ कर लीलारविन्द घुमाना शुरू किया। उसकी चंचल पंखुड़ियों से भौंरे आहत हो रहे थे, पराग से भीतर ही भीतर घेरा बन गया था। **(१४)** किसी ने चेहरा टेढ़ा किया और कंधे से खिसककर रत्नजटित बाजूबन्द की नोक में अटके उत्तरीय को अपने स्थान पर ले जाता दिखाई दिया। **(१५)** इसी प्रकार अन्य किसी ने अपनी नेत्रशोभा कन्या की ओर किञ्चित् आवर्जित की और उँगलियों के आकुञ्चित अग्रभाग से पैर के द्वारा कुरेदना शुरू किया सुवर्ण पीठ को। **(१६)** किसी ने बायाँ हाथ जमाया आसन के आधे भाग में, जिससे उसका कन्धा अधिक ऊँचा हो गया था और कमर टेढ़ी होने के कारण हार हट गया था। इस स्थिति में बैठकर वह लगा बातचीत करने अपने सुहृत् राजा से।

११. शतैक=सहस्र; लक्ष्ये=लक्षे अ.ना.। **१२. प्रवाल=प्रवात; चेष्टा=शोभा** म.अ.ना.। **१३. वेष=वेश, वार; बन्धि=शोभि। १४. रत्नानु००ग्नम् = केयूरकोटिक्षणजातसङ्गम्;प्रावार=प्रालम्ब** म.अ.ना.; **उत्कृष्य =उत्क्षिप्य** म.अ.ना.; **प्रदेशम्=वकाशम्** म.अ.ना.; **वक्त्रः=नेत्रः। १५. आकुञ्चिता=आकुण्ठिता; तथा=ततो** म.ना., **नृपो ; शोभी=शोभि** अ.ना., **शोभः; तिर्यग्=रत्नांशु; संसर्पि=संपृक्त।**

विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकबर्हमन्यः ।
प्रियानितम्बोचितसन्निवेशैर्विपाटयामास युवा नखाग्रैः ॥१७॥
कुशेशयाताम्रतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन ।
रत्नाङ्गुलीयप्रभयाऽनुविद्धानुदीरयामास सलीलमक्षान् ॥१८॥
कश्चिद् यथाभागमवस्थितेऽपि स्वसन्निवेशाद् व्यतिलङ्घिनीव ।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ॥१९॥

(१)

ततो नृपाणां श्रुतवृत्तवंशा पुंवत् प्रगल्भा प्रतिहाररक्षी ।
प्राक् सन्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत् सुनन्दा ॥२०॥
असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा ॥२१॥

(१७) कोई युवा राजा अग्रनखों से भूरे रंग के केतक पत्र छेद रहा था। केतकपत्र था विलासिनी वनिताओं के लिए हाथी दाँत का पत्र। उसके उन नखों को अभ्यास था प्रियानितम्बों पर क्षतचिह्न बनाने का। (१८) कोई राजा कुशेशय सी लाल हथेली वाले और रेखाध्वज से अंकित हाथ से लीलापूर्वक पाशे फेंक रहा था, जो रत्न की अँगूठी की प्रभा से रंग जाते थे। (१९) किसी को लगा कि उसका किरीट खिसक गया है यद्यपि था वह यथास्थान स्थित। उसने हीरे की किरणों भरे अंगुलिरन्ध्रों वाले हाथ से उसे सम्हालना शुरू किया। इसके पश्चात् उपस्थित राजाओं का परिचय कराना आरम्भ हुआ। (२०) यह कार्य किया एक प्रतीहारी ने जो राजवंशों के वृत्त जानती और पुरुष जैसी प्रगल्भ थी। उसका नाम था 'सुनन्दा'। सबसे पहले वह कुमारी को (१) मगध जनपद के राजा के पास ले गई और बोली– (२१) 'ये हैं महाराज 'परंतप' प्रजारञ्जन के कारण ये ऐसे ही हैं यथानाम तथागुण। इनका राज्य है मगध में। इनके सत्त्व (बल, मानसिकता) की थाह नहीं। शरणागत को ये ठीक से शरण देते हैं। (द्र. ४.१२ टिप्पणी।।)

१७. पाण्डुरं=पाण्डरं अ.ना.; बर्ह = पत्र म.हे.अ.ना., गर्भ। १८. रेखा=लेखा; रत्ना=हेमा; उदीरया=उल्लालया। १९. भाग=स्थान; वेशाद्व्य = वेशव्य; वज्रांशु=रत्नांशु, गर्भांशु; भिन्नाङ्गुलि, विद्धाङ्गुलि। २०. वृत्तवंशा = वंशवृत्ता, वीर्यवंशा, वीर्यवृत्ता; रक्षी=रक्षा। २१. णोन्मुखा=णोत्सुका।

कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ।। २२।।
क्रिया—प्रबन्धादय—मध्वराणा—मजस्र—माहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकांश्चकार ।। २३।।
अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंस्थितानां नेत्रोत्सवं पुष्पपुराङ्गनानाम् ।। २४।।
एवं तयोक्ते तमवेक्ष्य किञ्चिद्विस्रंसिदूर्वाङ्कमधूकमाला ।
ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा ।। २५।।

(२)

तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय ।
समीरणोत्थेव तरङ्गलेखा पद्मान्तरं मानसराजहंसीम् ।। २६।।

(२२) राजा तो हजारों हैं. परन्तु भूमि को राजन्वती कहा जाता है इन्हीं के कारण। ठीक ही है, रात्रि में नक्षत्र भी रहते हैं, तारे भी और ग्रह अथवा ताराग्रह भी तब भी उसे ज्योतिष्मती तो केवल चन्द्रमा से ही कहा जाता है। (२३) ये यज्ञकार्य निरन्तर करते आ रहे हैं जिनमें इन्द्र इन्हीं के यहाँ बना रहता है। और शची के केशों को बहुत समय बीत गया मन्दार (पुष्प) शून्य हुए। विरह में कोई भी सधवा स्वयं को सजाती नहीं। (२४) ये हैं तो वरण करने योग्य। यदि इनके साथ पाणिग्रहण अभीष्ट हो तो कर दे उत्पन्न 'पुष्पपुर' की सुन्दरियों में नेत्रोत्सव, वे तुम्हारे प्रवेश के समय वातायनों पर जमी होंगी।' (२५) सुनन्दा के ऐसा कहने पर कुमारी ने मगधराज पर दृष्टि डाली। उसके हाथ में रखी दूर्वा और महुए की माला कुछ खिसकी और शुद्ध (ऋजु) प्रणाम करके ही उसको अस्वीकार कर दिया, बोली कुछ नहीं। (२६) वही वेत्रग्राहिणी सुनन्दा उस राजपुत्री को अन्य राजा के पास ले गई, ठीक वैसे ही जैसे हवा से उठी तरङ्गलेखा राजहंसी को अन्य कमल के पास ले जाती है।

२२. सन्ति=सन्तु म.ना.; शोऽन्ये=संख्याः; तीमाहु=तीं त्वाहु, तो त्वाहु; भूमिम्=भूमिः; सैव=सेव। २४. संस्थिता=संश्रिता ना., संसृता, संश्रयाणा। २५. यैव=येव। २६. सैव=साथ, हेम; लेखा=रेखा, माला।

जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते ।। २७।।
अनेन पर्यासयताश्रुबिन्दून् मुक्ताफलस्थूलतमान् स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ।। २८।।
निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि! तयोस्तृतीया ।। २९।।
अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत् कुमारी ।
नासौ न काम्यो, न च वेद सम्यग् द्रष्टुं न सा, भिन्नरुचिर्हि लोकः ।। ३०।।

(३)

ततः परं दुष्प्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ ।
निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ।। ३१।।

(२७) वहाँ ले जाकर बोली (२) 'ये हैं अंगराज। इनके यौवन की जो श्री है उसकी चाह सुरलोक की अङ्गनाएँ भी करती रहती हैं। इसने सूत्रकारों से प्रशिक्षित करा रखी हैं गजसेना इस कारण पृथिवी पर रहते हुए भी ये इन्द्रपद का करते हैं भोग। (सूत्र=गजसूत्र।) **(२८)** ये शत्रु–विलासिनियों को भी बड़े बड़े मौक्तिक हार पहँना चुके हैं, जिन्हें धागे में गूँथना आवश्यक नहीं था। ये हार थे आँखों से टपकते अश्रुबिन्दुरूपी मोतियों के। **(२९)** ये ऐसे राजा हैं जिनमें स्वभावतः अलग अलग रहने के लिए प्रसिद्ध दोनों ही एक साथ दिखती हैं– एक श्री और एक सरस्वती । उनमें तुम्हीं हो तीसरी बनने योग्य, क्योंकि तुममें वैसी ही कान्ति भी है और वैसी ही प्रिय वाणी भी।' **(३०)** कुमारी ने कुछ भी सोचा और अंगराज पर से दृष्टि हटा कर सेविका से कहा 'चल'। यह राजा काम्य नहीं था ऐसा नहीं, ऐसा भी नहीं कि कुमारी देखना नहीं जानती थी, इतने पर भी इस निर्णय से लगता है सबकी रुचि भिन्न होती है। **(३१)** इसके पश्चात् उसी द्वारपालिका ने उस राजकुमारी इन्दुमती को दर्शन कराए अन्य राजा के, जो सभी शत्रुओं के लिए असह्य था, किन्तु था सुन्दर और विशेषरूप से दर्शनीय, नवोदित चन्द्र के जैसा।

२७. जगाद=उवाच; चैना=सेना; नाथः=राजः; नागः=भागः, भागम्; सूत्रकारैः=सूत्रधारैः, सत्रकारैः; पदं=सुखं। २८. सयता=सयिता, श्रयता; अश्रु=अस्र ना.; उन्मुच्य=उन्मोच्य, आक्षिप्य, आक्षेप, प्रौतव्य। ३०. राजा = नाथा; चक्षुः=दृष्टिं; याही=याते अ.ना.; जन्याम् = जन्यान्, जान्या, यान्या।

अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ।। ३२।।
अस्य प्रयातस्य समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि ।
कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ।। ३३।।
असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभिर् ज्योत्स्नावतो निर्विशति प्रदोषान् ।। ३४।।
अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु विहर्त्तुमुद्यानपरम्परासु ।। ३५।।
तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ।। ३६।।

(३२) परिचय में कहना शुरू किया– 'ये हैं अवन्तिजनपद के स्वामी। इनकी भुजाएँ तो देखो कितनी बडी़ हैं। इनका वक्षःस्थल विशाल है और मध्यभाग क्षीण तथा सुडौल। ये ऐसे लगते हैं कि जैसे यत्नपूर्वक खराद पर चढ़ाकर त्वष्टा ऋषि ने तैयार किए सूर्य हों ये। अपनी कन्या संज्ञा के लिए सह्य बनाने हेतु त्वष्टा महर्षि ने सूर्य को तराश कर बारह भागों मे विभक्त किया था। (३३) जब ये अपनी पूरी शक्ति के साथ प्रयाण करते हैं तो आगे चलते घोड़ों की टाप से उड़ी धूल सामन्त राजाओं की शिखामणियों की प्रभा अस्त कर देती है। (३४) एक विशेषता इन्हीं में है कि ये कृष्ण पक्ष में भी अपनी प्रिया के साथ चाँदनी का सुख लिया करते हैं। ऐसा इसलिए कि ये निवास करते हैं भगवान् महाकाल के समीप जिनके सिर पर चन्द्र है। (३५) यह राजा युवक भी है। हे रम्भोरु! क्या तू चाहेगी इसके साथ सिप्रा की तरङ्गों को छूकर आने वाली वायु से कम्पित उद्यानों में विहार करना। (३६) अवन्तिराज में दोनों विशेषताएँ थीं वे बन्धु रूपी कमलों को खिलाते और शत्रुरूपी कीचड़ को सुखा डालते थे, किन्तु उत्तम सौकुमार्य वाली कुमारी का मन उस ओर आकृष्ट हुआ नहीं, सूर्य की ओर कुमुद्वती के मन सा। एकनिष्ठ प्रेम उत्तम सौकुमार्य/कुमुद्वती चन्द्र को ही देखकर खिलती है (द्र. यहीं ४४)।

३२. भ्रम=भ्रमि; तेजाः=रश्मिः; यत्नो=यन्त्रो; विभाति=ऽवभाति।**३३.** त्थितानि=द्धतानि, द्धतानि; शिखा=शिरो। **३४.** वसन्न००मौलेः=चन्द्रार्धमौलेर्निवसन्नदूरे हे.; तमिस्र=तामिश्र अ.ना.; तमिस्र०० प्रियाभिः = दिवापि जालान्तरचन्द्रिकायां; ज्यो००षान् = नारीसखः स्पर्शसुखानि भुङ्क्ते हे.। **३५.** सिप्रा=शिप्रा म.हे.अ.ना., क्षिप्रा म.हे.अ.ना.। **३६.** अभिद्योतित=अपि द्योतित, समुद्योतित।

(४)

तामग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनूनाम् ।
विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सुदतीं सुनन्दा ।। ३७।।
सङ्ग्राम–निर्विष्ट–सहस्र–बाहुरष्टादशद्वीप–निखात–यूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्त्तवीर्यः ।। ३८।।
अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ।। ३९।।
ज्याबन्धनिष्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ।। ४०।।
तस्यान्वये भूपतिरेष जातः प्रदीप इत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ।। ४१।।

(३७) विधाता की कमलगर्भ सी कान्ति वाली गुणवती ललित और सुदती सृष्टि को (४) अनूपराज के सामने ले जाकर सुनन्दा ने पुनः बोलना शुरू किया। **(३८)** 'एक हुए हैं कार्त्तवीर्य नामक योगी। उनकी भुजाएँ हजार (असंख्य) थीं और उन सबका उपयोग वे संग्रामों में करते रहते थे। वे पृथिवी के सभी अट्ठारहों द्वीपों पर यूप गाड़ चुक थे और उनके समय केवल वे ही कहलाते थे राजा, अन्य किसी को राजा नहीं कहा जाता था। **(३९)** वे गलत कार्य का संकल्प होते ही धनुष लिए सामने उपस्थित हो जाते थे, अतः वे ऐसे नियामक थे कि उन्होंने गलत कार्य को जनता के मन से भी हटा दिया था। **(४०)** उनका प्रताप ऐसा कि सुवर्ण की लंका का स्वामी रावण भी उनके कारागृह में उनकी प्रसन्नता तक पड़ा रहा था। उन्होंने उसकी बीसों भुजाएँ धनुष की डोरी से बाँधकर निस्पन्द बना दी थी और उसके दशों मुख हाँफते रह गए थे, यद्यपि वह इन्द्र को जीतने में सफल था। **(४१)** ये महाराज उसी के वंश में उत्पन्न हैं। इनका नाम है 'प्रदीप' (प्रतीप)। ये लगे रहते हैं आगमवृद्धों की सेवा में। इन्होंने संश्रय दोष के कारण उत्पन्न अपयश को कि 'श्री तो स्वभाव से ही चंचला है' श्री से हटा दिया है।

३७. विधाय=निधाय। ३८. निर्विष्ट=निर्दिष्ट, निर्वृत्त। ४०. बन्ध = घात; निष्पन्द = निर्विष्ट; लङ्केश्वरेणो = दशाननेनो; णोषित = नोक्षित। ४१. प्रदीप हे. = प्रतीप म.।

आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम् ।
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् ।। ४२।।
अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मती-वप्र-नितम्बकाञ्चीम् ।
प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ।। ४३।।
तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ।। ४४।।

(५)

सा शूरसेनाधिपतिं सुषेणमुद्दिश्य देशान्तरगीतकीर्त्तिम् ।
आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ।। ४५।।
नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ।। ४६।।

(४२) यही वह राजा है जिसने अग्नि को साथ लेकर युद्ध किया और परशुराम जी के परशु की तीक्ष्ण धारा को नीलकमल की पँखुड़ी सा कोमल सिद्ध किया था जो थी क्षत्रिय जाति के लिए कालरात्रि। **(४३)** इस दीर्घबाहु की अंकलक्ष्मी बन जा, यदि तेरी इच्छा हो माहिष्मती की नितम्बकाञ्ची नर्मदा में प्रतिबिम्बित अट्टालिकाओं की रमणीय छवि निहारने की।' **(४४)** वह राजा था तो काफी प्रियदर्शन, किन्तु उस (इन्दुमती) को रुचा नहीं, जैसे शरत्काल का मेघमुक्त पूर्णचन्द्र कमलिनी को नहीं रुचता। (द्र. यहीं ३६) **(४५)** अब वह पहुँची (५) शूरसेन जनपद के अधिपति 'सुषेण' के सामने। सुषेण की कीर्त्ति देशान्तरों तक फैली थी और जिसके दोनों वंश (मातृवंश तथा पितृवंश) आचारपूत थे, जिनका यह था प्रदीप। **(४६)** यह राजा 'नीप'—वंश का है। यह यज्ञ करता ही रहता है। इसके गुणों से प्राणियों ने इसके पास पहुँच कर अपना स्वभावसिद्ध नैसर्गिक विरोध भी छोड़ दिया, जैसा शान्त सिद्धाश्रम में देखा जाता है।

---

४२. कृष्णगतिं = कृष्णमसिं; रात्रिम्=रात्रीम्, रात्रे; सारम्=सारम्। ४५. देशान्तर=लोकान्तर म.अ.ना.; **दीपम्=दीपः, जातम्; कुमारी=कुमारीम्। ४६. नीपान्वयः=नीपान्वये** अ.ना.; **श्रमं=श्रय; मिवैत्य=मिवेत्य, मवाप्य।**

यस्यात्मगेहे नयनभिरामा कान्तिर्हिमांशोरिव सन्निविष्टा ।
हर्म्याग्रसंरूढतृणाङ्कुरेषु तेजोऽविषह्यं रिपुमन्दिरेषु ॥ ४७॥
यस्यावरोधस्तनचन्दनानां प्रक्षालनाद् वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥ ४८॥
त्रातेन तार्क्ष्यात् किल कालियेन मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम् ॥ ४९॥
सम्भाव्य भर्त्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये ।
वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि! यौवनश्रीः ॥ ५०॥
अध्यास्य चाम्भः—पृषतोक्षितानि शैलेयनद्धानि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्तं कान्तासु गोवर्धनकन्दरासु ॥ ५१॥
नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥ ५२॥

(४७) इसके अपने भवनों पर तो छाई रहती है चाँदनी सी नयनाभिराम कान्ति और शत्रुभवनों पर छाया रहता है इसका अविषह्य तेज। इसीलिए उन पर जमे दिखाई देते हैं तृणाङ्कुर। (४८) इसकी रानियाँ जब वारिविहार करती हैं और उनके स्तनों पर लगा चन्दन धुल जाता है तब मथुरा की यमुना भी गङ्गातरङ्गों से मिश्रित लगती है। (४९) इसी ने गरुड से बचाया था कालियनाग को। यमुना में रह रहे उसने उपहार में जो मणि दी है उसकी कान्ति इसके वक्षःस्थल पर फैली रहती है तो यह कौस्तुभधारी कृष्ण (विष्णु। द्र.रघु. ६.४९ तथा कुसं. ३.१४ विष्ण्वर्थे कृष्णशब्दः; माल. ५.२ कृष्णार्थे विष्णुशब्दः) को भी लज्जित सा कर देता है। (५०) 'हे सुन्दरि! वृन्दावन कुबेर के उपवन चैत्ररथ से कम थोड़े ही है। युवावस्था के इस राजा को पति बनाकर वहाँ कोमल किसलय और पुष्प की सेज पर अपनी यौवनश्री का करना भोग (५१) जब वर्षा ऋतु आ जाए तो शिलाजतु से युक्त और पानी की फुहारों से सिंचे शिलातलों पर बैठ गोवर्धनपर्वत की रम्य गुफाओं में देखना मयूरों का नृत्य।' (५२) आवर्त्त की सी सुन्दर नाभि वाली उस इन्दुमती ने उस राजा को छोड़ा और आगे बढ़ी। वह बनने वाली थी अन्य किसी की वधू। यह वैसे ही हुआ जैसे सागर के वरण के लिए चली नदी बीच में पड़े पहाड़ को डाँक जाती है।

४७. गेहे=देहे। ४८. यस्या=अस्या; मथुरां=मधुरां म.हे., मथुरा०; गङ्गोर्मि=महोर्मि; संसक्त=संपृक्त; जलेव=जलैर्वि। ४९. त्रातेन=त्रस्तेन म., अनेन, प्रीतेन, रुचं=रुचिं; विष्णुम्=कृष्णम् म.। ५२. आवर्त्त= आलोक्य।

(६)

अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ।।५३।।
असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च ।
यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ।।५४।।
ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्त्ति यश्चापभृतां पुरोगः ।
रिपुश्रियां साञ्जनबाष्पसेके बन्दीकृतानामिव पद्धती द्वे ।।५५।।
यमात्मनः सद्मनि सन्निविष्टं मन्द्रध्वनित्याजितयामतूर्य्यः ।
प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम् ।।५६।।
अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तराऽऽनीत–लवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ।।५७।।

(५३) अब उस भुजिष्या (सुनन्दा) ने शत्रुपक्ष को नष्ट कर चुके, अङ्गदधारी कलिङ्गनाथ (६) 'हेमाङ्गद' के पास उपस्थित पूर्णचन्द्र सी मुखवाली कुमारी से कहा। (५४) 'ये हैं महेन्द्राद्रि से सार वाले महेन्द्र और महोदधि के नाथ। जब ये यात्रा करते हैं तो इनके आगे आगे मद चुआते गजों के बहाने स्वयं महेन्द्रगिरि ही चलता मिलता है। (५५) ये धनुर्धरों में अग्रगामी हैं। इनकी दोनों भुजाओं पर प्रत्यञ्चा की चोट की जो रेखाएँ हैं वे बन्दी बनाई गई शत्रुलक्ष्मी के कज्जलमिश्रित आँसुओं के ही दो प्रवाहमार्ग हैं। (५६) इन्हें प्रातःकाल समुद्र ही जगाया करता है। ये जिस भवन में सोते हैं उसमें भीतर तक प्रविष्ट है समुद्र। जब वह गड़गड़ाता है तो उसकी गम्भीर ध्वनि से यामतूर्य की आवश्यकता नहीं रह जाती। उसकी तरंगे प्रासाद वातायन से भी देखी जा सकती हैं। (५७) इसके साथ समुद्र के तट पर विहार करना जिस पर ताल वृक्षों की मर्मरध्वनि होती रहती है। वहाँ तुम्हारा पसीना पोंछ दिया करेंगे पड़ोसी जलद्वीपों से लवंग पुष्प के साथ आए पवन के झोंके।'

५५. रेखे=लेखे; श्रियां=श्रियः, श्रिया, श्रियं; सेके=सिक्ते; कृताना=कृतायाः व.हे. कृतायाम्।

अत्र नवीनं पद्यान्तरम् – रणेऽभ्यमित्रीणतया प्रकाशः शरासनज्यानिकषौ भुजाभ्याम् ।
विस्पष्टरेखौ रिपुविक्रमाग्नेर्निर्वाणमार्गाविव यो बिभर्त्ति ।।

अत्रापि पाठभेदाः– विस्पष्ट=विसृष्ट; माग्नेः=मस्य।

५६. सन्निविष्टं=सन्निविष्टः व., सन्निकृष्टः/ष्टम् म.अ.ना., शुद्धियुक्ते, सिद्धियुक्तम्, सौधजालैः; (सौधजालैर)मन्द्र ध्वनित्याजितयामतूर्य्यः, आलोक्य वेलातटपूगमाली/मालाः; प्रासादवातायनदृश्यवीचिः= मन्द्रध्वनि–त्याजितयामतूर्य्यः। ५७. तीरे=तटे।

प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्त्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥५८॥

(७)

अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य ।
इतश्चकोराक्षि! विलोकयेति पूर्वानुशिष्टां निजगाद भोज्याम् ॥५९॥
पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥६०॥
विन्ध्यस्य संस्तम्भयिता महाद्रेर्निःशेषपीतोज्झितसिन्धुराजः ।
प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥६१॥

(५८) सुनन्दा ने इस प्रकार आकृति से लुभा लेने वाली उस कुमारी को प्रलोभन दिया, किन्तु वह उससे भी हट गई, जैसे नीति से दूर तक खिंची लक्ष्मी प्रतिकूल दैव वाले व्यक्ति से हट जाती है। **(५९)** अब द्वाररक्षिका वह सुनन्दा उरगपुर के देव जैसे रूप वाले स्वामी के पास पहुँची और पूर्वोक्त राजकुमारी से बोली– 'हे चकोराक्षि! इस ओर देखो। **(६०)** ये (७) पाण्ड्यनरेश हैं। इन्होंने दोनों कन्धों पर (मोती के उज्ज्वल) हार पँहन रखे हैं और लगा रखा है लालचन्दन का अंगराग। ये ऐसे लग रहे हैं जैसे अद्रिराज लगता है जिस पर छाई हो अरुणोदय की बाल धूप और जिससे गिर रहे हों दो झरने। **(६१)** जब ये पाण्ड्यराज अश्वमेध का यज्ञान्तस्नान (अवभृथ) करते हैं तो बड़ी प्रीति के साथ इनके सौस्नातिक (सुस्नान पूछने वाले) बनते हैं वे महर्षि अगस्त्य जिन्होंने विन्ध्यगिरि की वृद्धि रोकी थी और संपूर्ण समुद्र को पीकर निकाल दिया था।

५८. प्रलो=विलो; प्याकृतिलोभनीया=सत्यपि सा नतभ्रू, सत्यपि सन्नतभ्रूः; वरजा=वरजां; दपाव=दुपाव। केचिदत्र ''अथाधिगम्यो०'' इति वक्ष्यमाणं पठन्ति। ५९. अथोरगाख्य=अथोरुगाख्य, अथोरगाक्ष, अथोरुगाक्ष; अथोरगाख्यस्य पुरस्य नाथम् व.= अथाधिागम्योरगराजकल्पं, अथाधिगत्यो०; दौवारिकी=कैवारिकी; दौवारिकी देवसरूपमेत्य व.हे.=पतिं पुरस्योरगपूर्व्वनाम्नः; शिष्टां=दिष्टां, सृष्टां, शिष्टा; पूर्वानुशिष्टाम्=नागाङ्गनाभाम्; निजगाद=०भिजगाद, भोज्याम्=भोगान्। अतः परं पद्यम्–

अथाभिगम्यो/गत्यो/त्योरग/भुव–राजकल्पं पतिं पुरस्योरगपूर्वनाम्नः/थम् ।
आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥

६०. लम्ब=लम्बि म.हे.अ.ना.; क्लृप्ता=कृता म.हे.अ.ना.; हरि=नव। ६१. विन्ध्यस्य=वन्ध्यस्य; राजः=नाथः।

अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय सृष्टः ।
पुरा जनस्थानविमर्दशङ्की सन्धाय लङ्काधिपतिः प्रतस्थे ।। ६२।।
अनेन पाणौ विधिवद् गृहीते महाकुलीनेन महीव गुर्व्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ।। ६३।।
ताम्बूलवल्ली–परिणद्ध–पूगास्वेलालताऽऽलिङ्गित–चन्दनासु ।
तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ।। ६४।।
इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ।। ६५।।
स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ।। ६६।।
सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।। ६७।।

(६२) इन्द्रलोक को जीतने के लिए उद्यत (सृष्ट) लङ्काधिपति रावण जनस्थान में युद्ध की शङ्का से इस पाण्ड्यराज के साथ सन्धि करके ही आगे बढ़ा था, इसने भगवान् शिव से 'ब्रह्मशिरा' नामक दुर्लभ अस्त्र जो प्राप्त कर रखा था। (सृष्ट = उद्युक्त द्र. कुमारसंभव २.५१ तदिच्छा० पद्य।) **(६३)** इसका कुल महान् है। इसके साथ विधिवत् पाणिग्रहण कर ले और तू बन जा पूरी दक्षिण दिशा की सपत्नी, जिसकी मेखला है रत्नानुविद्ध समुद्र। **(६४)** इस पाण्ड्यराज का वरण कर करती रहना रमण उन स्पृहणीय मलयस्थलियों में जिनमें ताम्बूलवल्लियों से आबद्ध रहते हैं सुपारी के वृक्ष, इलायची से आलिङ्गित रहते हैं चन्दनतरु। वहाँ बिछौने की चादर बनेंगे तमाल पत्र। क्या कहना। मान भी जा। **(६५)** माना कि यह राजा नीलकमल सा श्याम है और तुम रोचना सी गौर। किन्तु तुम्हारे योग से दोनों की ही शोभा बढ़ेगी बिजली और मेघ के योग के समान।' **(६६)** विदर्भाधिपति की बहिन इन्दुमती के मन में उसका उपदेश स्थान पा सका नहीं, सूर्य के दर्शन के बिना बँधे कोश वाले अरविन्द में चन्द्रांशु के समान। **(६७)** रात में संचार करती दीपशिखा के जैसी वह जिस जिस राजा को

६२. कावजया= काविजया, कापजया; सृष्टः = दृप्तः; पतिः प्र=पतिष्प्र। ६४. वल्ली = पत्री; रन्तुं प्रसीद शश्वन्म = शश्वत् प्रसीद रन्तुं। ६५. तनुः = रुचिः; सौ = यं; यष्टिः = कान्तिः, दृष्टिः; वृद्धये = वृत्तये; वां = वः। ६६. नक्षत्रनाथांशु = तारापतेरंशु।

६७. यदा यदा राजकुमारिकासौ न पूर्वपूर्वं गणयाञ्चकार ।
तदा तदानीमितरेतरेषामाशालता पल्लविनी बभूव ।।

(८)

तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् ।
वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ।। ६८।।
तं प्राप्य सर्वावयवानवद्यं व्यावर्त्ततान्योपगमात् कुमारी ।
न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली ।। ६९।।
तस्मिन् समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुमतीमवेक्ष्य ।
प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा ।। ७०।।
इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्राः ।। ७१।।
महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः ।। ७२।।

छोड़कर आगे बढ़ी राजमार्ग पर बने प्रासाद के समान वह प्रत्येक विवर्ण हो गया। **(६८)** अब वह पहुँची (८) 'अज' के पास तो वह भी यह सोचकर व्याकुल हो गया कि यह मेरा भी वरण नहीं करेगी, किन्तु उसका संशय दूर कर दिया केयूर के हिलने से उसी की दक्षिण भुजा ने। **(६९)** उसे पाकर कुमारी अन्य किसी के पास जाने से रुक गई। अज का प्रत्येक अंग अनवद्य था (वह सर्वाङ्गसुन्दर था)। भौरों की पंक्ति को खिला सहकार मिल जाता है तो वह अन्य किसी वृक्ष की आकाङ्क्षा नहीं करती। **(७०)** सुनन्दा ने इन्दु सी इन्दुमती की चित्तवृत्ति को अज में समावेशित देख इस प्रकार विस्तारपूर्वक कहना शुरू किया। अनुक्रम तो उसे ज्ञात था ही। **(७१)** 'इक्ष्वाकु के वंश में अत्यन्त श्रेष्ठ नृप हुए हैं जिनका नाम ककुत्स्थ प्रसिद्ध है। उसके कारण उत्तरकोसल जनपद के सभी उन्नतेच्छ शासक स्वयं को 'काकुत्स्थ' कहते हुए गौरव का अनुभव करते हैं। **(७२)** ककुत्स्थ को ककुत्स्थ इस कारण कहा गया कि युद्ध में उसने बाणों से असुराङ्गनाओं के कपोल पत्रलेखा से शून्य कर दिए थे। उस समय उसकी सवारी था वृषभ के रूप में परिणत स्वयं इन्द्र। उस समय उसने लीला धारण कर रखी थी पिनाकी भगवान् शङ्कर की।

६८. मां=मा, वा; वामेतर००नुनोद=आश्वासितस्तत्क्षणमंसकूटे वामेतरेण स्फुरता भुजेन; बन्धोच्छ्वसितैः=कोटिश्वसितैः। ६९. व्यावर्त्त=यवर्त्त, व्यवर्त; काङ्क्षति=गच्छति। ७०. अवेक्ष्य=अवेत्य हे.; सविस्तरं=सुविस्तरं, सविस्मयं। ७१. ककुदं=ककुदः; उन्नतेच्छाः=उन्नतेस्थाः, उन्नतेच्छम्; श्लाघ्यं=ऋद्धं; कोसले=कोशले। ७१–७२ पद्ययोः क्वचित् क्रमे विपर्यासः। ७२. महे=माहे; पिनाकि=पिनाक; गण्ड=गल्ल।

ऐरावतास्फालनविश्लथं यः संघट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्त्तिमग्र्यमर्द्धासनं गोत्रभिदोऽधितष्ठौ ।। ७३ ।।
जातः कुले तस्य किलोरुकीर्त्तिः कुलप्रदीपो नृपतिर्दिलीपः ।
अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ।। ७४ ।।
यस्मिन् महीं शासति वाणिनीनां निद्रां विहारार्द्धपथे गतानाम् ।
वातोऽपि नास्त्रंसयदंशुकानि को लम्बयेदाहरणाय हस्तम् ।। ७५ ।।
पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद् विभूतिम् ।। ७६ ।।
आरूढमद्रीनुदधीन् प्रतीर्णं भुजङ्गमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य च नानुबन्धि यशः परिच्छेत्तुमियत्तयालम् ।। ७७ ।।

(७३) जीत के बाद जब इन्द्र अपने पूर्व रूप में पहुँच गए तब भी यह उनके ऐरावत को थपथपाने से ढीले कन्धे से कन्धा मिलाकर रगड़ते हुए उनके आधे आसन पर बैठा। **(७४)** उसी के वंश में हुए राजा दिलीप जो बहुत बड़ी कीर्त्ति के धनी और कुल के दीपके थे। उनकी महत्ता यह कि उन्होंने सौवाँ अश्वमेध केवल इन्द्र की ईर्ष्या मिटाने के लिए छोड़ दिया और वे शतक्रतु बनने की जगह एकोनशतक्रतु (निन्यानवे यज्ञ करने वाले) होकर ही संतुष्ट रहे। **(७५)** उनका प्रताप ऐसा कि स्वेच्छाविहारिणी ललनाएँ यदि आधे ही विहारमार्ग में सो जाएँ तो वायु का भी साहस नहीं होता था कि वह उनका पल्ला खिसका दे, उनके आहरण के लिए हाथ फैलाने का साहस तो करता ही कौन? । **(७६)** उनके स्थान पर अब शासन कर रहे हैं महाराज रघु, जिन्होंने अनुष्ठान किया विश्वजित् नामक महाक्रतु का और उसमें चारों दिशाओं से एकत्रित विभूति को मृत्पात्रशेष कर दिया, ऐसा कर दिया कि इनके पास विभूति के नाम पर केवल मिट्टी के पात्र बचे थे। **(७७)** उनके यश की सीमा नहीं। वह चढ़ा हुआ है पर्वतों पर, पार कर गया है समुद्रों को और प्रविष्ट हो गया है पाताल में। ऊपर भी गया है और वह लगातार फैलता ही जा रहा है, अतः जिसकी इयत्ता निश्चित नहीं की जा सकती।

७३. **ऐरावता=ऐरावणा; विश्लथं=कर्कशं; स्वामपि=स्वामिव; मग्र्यां=मन्यां; तष्ठौ=तस्थौ** (पा.सू. ८.३. ६४), तस्थे। ७४. **कीर्त्तिः=कीर्त्तेः** अ.ना.। ७५. **यस्मिन्=तस्मिन्; वाणिनी=वानिनी, पाणिनी; विहारा=विहाया; नास्त्रंस=नाश्रंस, नाभ्रंस; लम्बये=वाहये; हरणा=भरणा** व.हे.। ७६. **०गावर्जितसंभृतां यः** अ.ना., ०गाव/गन्ता—र्जित/ र्जनसंभृतानां/ यां। ७७. **प्रतीर्णं=वितीर्णं** म., च तीर्णं, प्रतीतं; **वसतिं=वसती;**, निलयं हे.; **बन्धि=बन्धात्** अ.ना.।

असौ कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः ।
गुर्व्वीं धुरं यो भुवनस्य पित्रा धुर्य्येण दम्यः सदृशीं बिभर्त्ति ।।७८।।
कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यमिमं वृणीष्व रत्नं समागच्छतु काञ्चनेन ।।७९।।
ततः सुनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत् संवरणस्रजेव ।।८०।।
सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ।।८१।।
तथागतायां परिहासपूर्व्वं सख्यां सखी वेत्रभृदाबभाषे ।
आर्ये! व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ।।८२।।
सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्त्तमिवानुरागम् ।।८३।।

(७८) यह कुमार (अविवाहित) अज उन्हीं पर गया है जैसे इन्द्र पर उनका पुत्र जयन्त। यह पृथिवी का बोझ पिता के ही समान ढो रहा है धुर्य का बोझ दम्य के समान। (धुर्य=प्रौढ बैल, दम्य नया निकला नटवा।) (७९) कुल, कान्ति, नई उमर और विनय आदि गुणों से यह तुम्हारे अनुरूप है। इसका वरण कर लो। हो जाए रत्न का काञ्चन से योग।' (८०) इसके अनन्तर सुनन्दा जब बोल चुकी तो राजकन्या इन्दुमती ने लज्जा का कुछ संवरण किया और प्रसन्न स्वच्छ दृष्टि से कुमार अज का वरण कर लिया। दृष्टि भी स्वयंवरमाला सी थी। (८१) शालीनता के कारण वह कुमारी उस कुमार अज के प्रति अपनी चाह को शब्द से तो नहीं कह सकी, किन्तु वह उस कुटिलकेशी की गात्रयष्टि को भेदकर रोमांच के रूप में निकल ही पड़ी। (८२) सखी ने उसे उस स्थिति में देखा तो परिहास में कहा 'आर्ये! चलो, आगे बढ़ें'। वधू ने उसे असूयाकुटिल दृष्टि से देखा। (८३) उधर करभोपम ऊरु वाली कुमारी ने रघुनन्दन अज के गले में चूर्ण से गौर माला धात्री के हाथों से यथास्थान डलवा दी। एक प्रकार से वह माला उसका मूर्त्त अनुराग थी।

७८. दम्यः = सम्यक्, अ.ना.; सदृशीं=सदृशं व.अ.ना.। ७९. इमम्=अमुम्। ८०. तनू=मृदू व.हे.अ.ना.; कुमारम्=कुमारीम्; दृष्ट्या००जेव=वमास दृष्ट्या पद्मजा संवरणार्थयेव। ८२. सख्यां=सख्या अ.ना.; भृदा=भृता अ.ना., वती, धरा; व्रजामः=प्रजाम; एनां=एनं। क्वचित् ८१—८२ पद्ययोः क्रमे विपर्यासोऽपि। ८३. आसञ्ज=आयोज; यथाप्रदेशं=शिरोधरायां; गुणं=स्रजं।

तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बयाऽजः ।
अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ।। ८४।।

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ।। ८५।।

प्रमुदितवरपक्षमेकतस्तत् क्षितिपतिमण्डलमन्यतो वितानम् ।
उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ।। ८६।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ इन्दुमतीस्वयंवरो नाम षष्ठः सर्गः ।। ६।।

(८४) विशाल वक्षःस्थल पर लटकती उस मङ्गल पुष्पमाला से उस कुमार ने समझा जैसे स्वयं विदर्भराज की बहिन ने अपना बाहुपाश कण्ठ में डाल दिया हो। (८५) सभी नगरवासी लोगों ने समान गुण के योग पर प्रसन्न होकर एक ही बात कहना आरम्भ किया-- 'यह तो 'मेघमुक्त' शशी से आ मिली है कौमुदी, अनुरूप जलनिधि में आ उतरी, है जह्नुकन्या (गङ्गा)। ये शब्द राजा लोगों के लिए श्रवणकटु थे। (८६) उपस्थित राजमण्डल में वरपक्ष प्रमुदित था और अन्य राजा उदास। इसलिए वह उषःकाल के उस सरोवर सा लग रहा था जिसमें पद्म खिल रहे हों और कुमुद पर छा रही हो नींद।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में इन्दुमतीस्वयंवर नामक छठा सर्ग पूर्ण हुआ।। ६।।

८४. मय्या=वत्या ना.; याऽजः=या सः म.हे.अ.ना.; पाशां=राशां। ८५. मनुरूपं=मनुरूपा। 'धिमनु००र्णा'=धिमवतीर्णा जह्नुकन्यानुरूपम्, जलनिधिमनुरूपं जह्नुकन्या समेता। ८६. वतानम्=विपन्नम्; उषसि=अहनि व.हे.अ.ना.; प्रफुल्ल=प्रफुल्त अ.ना.।

इति रघुवंशे महाकाव्ये = इति रघुवंशमहाकाव्ये, इति कालिदासकृतौ रघु०। कालिदासकृतौ=श्रीकालिदासकृतौ, कविचक्रवर्त्तिश्रीकालिदासकृतौ; स्वयंवरो नाम=इन्दुमतीस्वयम्वरो नाम, विदर्भीस्वयम्वरो नाम, इन्दुमतीस्वयम्वरवर्णनो नाम, स्वयम्वरवर्णनो नाम, स्वयम्वरासम्प्रदायवर्णनो नाम।

।। सप्तम: सर्ग:।।

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् ।
स्वसारमादाय विदर्भनाथ: पुरप्रवेशाभिमुखो बभूव ।।१।।
सेनानिवेशान् पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभास: ।
भोज्यां प्रति व्यर्थमनोरथत्वाद् रूपेषु वेषेषु च साभ्यसूया: ।।२।।
सान्निध्ययोगात् किल तत्र शच्या: स्वयम्वरक्षोभकृतामभाव: ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोक: ।।३।।
तावत् प्रकीर्णाभिनवोपचार–मिन्द्रायुध–द्योतित–तोरणाङ्कम् ।
वर: स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ।।४।।
ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ।।५।।

(१) स्वयंवर संपन्न हो जाने के पश्चात् विदर्भनाथ प्रत्यक्ष स्कन्द से युक्त देवसेना के समान अनुरूप पति से युक्त बहिन को लेकर पुरप्रवेश के लिए चले। (२) राजा लोग भी अपने अपने सेना–निवेशों को चले गए, वे प्रभातकालीन ग्रहों के समान धूमिल थे। इन्दुमती के प्रति अपनी इच्छा विफल होने के कारण उन्हें न अपना रूप अच्छा लग रहा था न अपना वेष। (३) स्वयंवर स्थल में शची का निवास रहता है, अत: स्वयंवर में तो किसी ने कोई क्षोभ पैदा नहीं किया और अज के प्रति मात्सर्यग्रस्त होने पर भी असफल राजा शान्त रहे। (४) तभी तक वह वर (अज) उस वधू (इन्दुमती) के साथ राजमार्ग पहुँचा। राजमार्ग पर पुष्पों की नई नई लड़ियाँ बिखरी हुई थीं, तोरण की गोद में इन्द्रधनुष झलक रहा था और ध्वजो की छाया से गर्मी शान्त थी। (५) इसके बाद वर–वधू को देखने हेतु तत्पर पुरसुन्दरियाँ सब काम छोड़कर सुनहली जाली वाले सौधों पर इस प्रकार की चेष्टाओं में देखी गई।

१. नाथ:=राज:। २. क्षितो=भृतो म.अ.ना., भुजो; विभात=प्रभात। ३. उद्दिश्य=आलोक्य; समत्सरोऽपि= यथाप्रदेशम्। ४. चारम्=चारात्, कारम्; द्योतित=द्योतन, उद्भासित; प्राप=प्रापत्। ५. तत्परा=सत्वरा; जालवत्सु=जालकेषु; पुर=सुर; त्यक्ता=मुक्ता, युक्ता।

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न संभावित एव तावत् करेण रुद्धोऽपि न केशपाशः ॥ ६ ॥
प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ७ ॥
विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ॥ ८ ॥
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ ९ ॥
अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥ १० ॥

(६) कोई चोटी गूँथ रही थी और एकाएक चल पड़ी, फलतः जूड़ा खुल गया और फूल गिर पड़े। वह जूड़ा बाँध तो पाई ही नहीं, उसे हाथ से रोक भी नहीं सकी। (७) कोई पैर में प्रसाधिका से अलता लगवा रही थी। उसने प्रसाधिका द्वारा पकड़ा पंजा खींचा और लीलापूर्ण गति छोड़कर भागी तो गवाक्ष तक का मार्ग अलते से रंग गया, वह गीला था। (८) एक आँख में अंजन लगा रही थी। वह दाहिनी आँख में तो अञ्जन लगा पाई, किन्तु बायीं आँख को अंजन से वंचित ली हुई हाथ में शलाका लिए जा पहुँची वातायन के पास। (९) कोई चली तो उसकी नीवी खिसक गई, उसने उसे बाँधा नहीं और वस्त्र को हाथ से पकड़े रही। किन्तु उसकी दृष्टि लगी रही खिड़की की जाली में ही। (१०) कोई करधनी बुन रही थी। वह एकाएक उठ खड़ी हुई और आड़े टेढ़े पैर रखती हुई आगे बढ़ी। उसकी अधगुँथी करधनी के गुरिए टपकते गए। अन्त में उसके अंगुष्ठमूल में धागा ही शेष रह गया।

६. वान्त=वीत; बन्धुं=बद्धुं न=च म.अ.ना., हि; रुद्धोऽपि न=बद्धोऽपि हि, रुद्धोऽपि च; पाशः=हस्तः अ. ना.। ७. लम्बि= लम्भि। अग्रपादपदे द्रष्टव्यं वामनस्य काव्यालङ्कारसूत्रम् २.१९। ८. तथैव=प्रासाद। दशमपद्यानन्तरं दत्तं स्तनन्धयेति पद्यमत्रैव पठ्यते कैश्चित्। ९. प्रेषि=प्रेरि, प्रेक्षि। १०. चिता=ञ्चिता म., चिंता; दुर्निमिते=दुर्नमिते, दुर्नमिता। इतः परं पद्यम्

स्तन्धयन्तं तनयं विहाय विलोकनाय त्वरया व्रजन्ती ।
संप्रस्नुताभ्यां पदवीं स्तनाभ्यां सिषेच काचित् प्रमदाऽऽगवाक्षात् ॥

अत्रापि पाठभेदः 'नाय त्वरया=थंञ्च रसात्; क्षात्=क्षम्'।

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥११॥
ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥१२॥
स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त बाला ।
पद्मेव नारायणमन्यथाऽसौ लभेत कान्तं कथमात्मतुल्यम् ॥१३॥
परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥१४॥
रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला ।
गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसंगतिज्ञम् ॥१५॥
इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन् कथाः श्रोत्रसुखाः कुमारः ।
उद्भासितं मङ्गलसंविधाभिः संबन्धिनः सद्म समासाद ॥१६॥

(११) घने कुतूहल से भरी उन ललनाओं के मुखों से लग रहा था कि झरोखों में कमलपुष्प का सिंगार किया गया है। आसव की गन्ध उनमें फैली हुई ही। विलोल नेत्र बन रहे थे भ्रमर। (१२) वे नारियाँ अज को बार बार देखती और देखती ही जाती। उनका मन अन्य किसी विषय की ओर जा ही नहीं रहा था। ऐसा लग रहा था जैसे शेष इन्द्रियों की वृत्तियाँ भी चक्षुरिन्द्रिय में ही सर्वात्मना आ समाई थीं। (१३) माँगा तो सहस्रों राजाओं ने था तब भी इस कुमारी ने स्वयंवर चाहा। ठीक ही किया इसने। नहीं तो यह अपने अनुरूप पति कैसे पाती नारायण को लक्ष्मी के समान। (१४) परस्पर में स्पृहणीय शोभा वाली इस जोड़ी को न मिलाता तो इन दोनों में रूपविधान पर किया विधाता का परिश्रम व्यर्थ हो जाता। (१५) निश्चित ही ये दोनों रति और काम रहे, तभी तो इस बाला ने सहस्रों राजाओं के बीच अपने अनुरूप का ही वरण किया। मन में पुराने जन्म की पँहचान छिपी रहती है। (१६) ऐसे उद्गार नगर की महिलाओं के मुख से निकल रहे थे। उन कर्णप्रिय वाक्यों को सुनते–सुनते कुमार अज अपने सम्बन्धी के भवन आ पहुँचा, जो मांगलिक विधि विधानों

---

११. सहस्र=प्रयुक्त, प्रफुल्ल; पत्रा=पद्मा। १२. ता=तं; शेषे=सर्वे। तथाहीत्यस्य स्थाने 'क्षणेऽत्रे'ति पठितुमुचितम्, इवार्थस्योत्प्रेक्षणस्य आहार्यत्वेनैव सिद्धेर्हेतूक्तौ पौनरुक्त्यापत्तेः। **१३. वृता=द्रुता; परोक्षैः=परोक्षे; थाऽसौ=थाऽऽर्या।** केचित् पुनः पद्यमिदं न पठन्ति। **१४. शोभं=रूपं; वितथो=विफलो। १५. तिज्ञम्=तज्ञम्, भीतम्। १६. शृण्वन्०००कुमारः=एवं कथाः श्रोत्रमुषी कुमारी;॥ १६॥ कुलकम्।**

ततोऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः ।
वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः ।। १७ ।।
महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्क्कमिश्रम् ।
भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः ।। १८ ।।
दुकूलवासाः स बधूसमीपं निन्ये विनीतैरवरोधरक्षैः ।
वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ।। १९ ।।
तत्रार्च्चितो भोजपतेः पुरोधाः हुत्वाग्निमाज्यादिभिरग्निकल्पः ।
तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयाञ्चकार ।। २० ।।
हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे ।
अनन्तराऽशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ।। २१ ।।

से उद्भासित था। (१७) वहाँ अज हाथिनी से उतरा, उसे दिया हाथ कामरूप के महाराज ने। फिर स्वयं वैदर्भ भोज के द्वारा बतलाए गए भवन के भीतरी चौक और नारियों के मन में साथ ही प्रविष्ट हुआ कुमार। (१८) वहाँ बहुमूल्य सिंहासन पर बैठे अज ने रत्नसहित अर्घ्य, मधुपर्क और भोज द्वारा उपहृत दुकूल का जोड़ा वनिताओं के कटाक्षों के साथ ग्रहण किया। (१९) दुकूल धारण किए हुए अज को सधे सधाए अन्तःपुररक्षक ले गए वधू के पास, उसी प्रकार जिस प्रकार नई चन्द्रकिरणें फेन से अलंकृत समुद्र को ले जाती हैं वेला के पास। (वेला = तटभूमि।) (२०) वहाँ विराजमान थे भोजपति के अग्नि जैसे तेजस्वी पुरोधा, जिनकी पूजा हो चुकी थी। उन्होंने घृत आदि से हवन कर अग्नि प्रज्वलित की और उसी को विवाह का साक्षी बनाकर वर और वधू को मिला दिया। (२१) वह राजकुमार अपने हाथ से वधू का हाथ पकड़े और अधिक सुहावना लगा। पास की अशोकलता का प्रवाल अपने पल्लव में लिए आम्रवृक्ष भी ऐसा ही सुहावना लगता है।

१७. १७–१९ पद्यानि मल्लनाथटीकासनाथेषु बहुषु हस्तलेखेषु न दृश्यन्ते। ततो=तत्रा; आशु=अथ; अथो=पथो, अजो; मन्तः=मञ्चः। १८. महार्हसिंहा=महार्हशय्या, ततो महार्हा; संस्थि=संश्रि; मर्घ्य=मर्घ; मधुपर्क्कमिश्रम्=मधुमच्च गव्यम्, मधुमद्यमिश्रम्, मधुमद्यगन्ध्यम्, मधुमच्च मिश्रम्, मधुपर्कगन्ध्यम्, मधुपर्कगव्यम्, मधुपर्कयुक्तम्; दुकूलयुग्मम्=तु चतुष्कमाद्यम्। १९. रक्षैः=रक्ष्यैः, दक्षैः, मुख्यैः; राजिः=राशिः। २०. रग्निकल्पः=रामकल्पः; वधूवरौ=वधूवरं। केचन पुनः पद्यमिदं त्यजन्ति। २१. सूनुः=पुत्रः; चकासे=चकाशे, बभासे। चूतः=भूतः, नूतः।

आसीद् वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।
तस्मिन् द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ।। २२।।
तयोरुपान्त–प्रतिसारितानि क्रियासमापत्ति–विवर्त्तितानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ।। २३।।
प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्त्तमानमन्योन्यसंसक्तमहस्त्रियामम् ।। २४।।
नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ।। २५।।
हविः–शमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः ।
कपोलसंसर्पिशिखः स तस्या मुहूर्त्तकर्णोत्पलतां प्रपेदे ।। २६।।
तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरम् ।
वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद् बभूव ।। २७।।

(२२) एक दूसरे के स्पर्श से वर की कलाई में रोमांच दिखाई दिया और वधू की उँगलियों में पसीना। उस समय काम ने अपनी वृत्ति (सात्त्विक भाव) एक साथ बाँट सी दी। (२३) उनके नेत्र बाजू की ओर बढ़े और काम पूरा हो जाते ही लौट पड़े। यह थी बड़ी ही मीठी लाज। दोनों के नेत्र थे इनकी यन्त्रणा में। (२४) अब हुई अग्नि प्रदक्षिणा। प्रज्वलित अग्नि की प्रदक्षिणा कर रहे वे दोनों ऐसे लग रहे थे जैसे मेरु के आसपास वर्त्तमान अन्योन्यसंसक्त 'दिन और रात' लगते हैं। (२५) नितम्बगुर्वी और मत्तचकोरनेत्रा वधू ने गुरु के निर्देश पर अग्नि में लजाते लजाते लाजाहुति छोड़ी। (२६) हविष्य में शमीपल्लव थे और लाजा। अग्नि से उनकी सुगन्ध लिए धुँआ उठा। कपोल के पास आया वह क्षणभर उस वधू के लिए करनफूल बन गया। (२७) इस धूम के ग्रहण का प्रभाव वधू के मुखमण्डल पर दिखाई दिया। उसके नेत्रों में लगा काजल फैल गया, कान पर लगा बीजाङ्कुर कुम्हला गया

२२. आसीद्=अभूद्; तस्मिन्=अस्मिन्; द्वये=तयोर् म.; तत्क्षणमात्मवृत्तिः=पाणिसमागमेन म.। २३. उपान्त=उपाङ्ग, अपाङ्ग हे., अपान्त; प्रति=प्रवि, अ.ना.; सारि=चारि अ.ना., चालि, प्रेरि हे.; क्रियासमाप=किञ्चिद् व्यवस्था; क्रियासमापत्तिनिवर्त्ति हे., क्रियासमापत्तिविवर्जि, त्तिषु कातराणि व.हे., त्तिषु वर्जितानि, त्तिषु संहृतानि; आनशि=व्यानशि हे.; मनोज्ञामन्यो=मनोज्ञान्यन्यो अ.ना.। २४. चकासे= चकाशे, बभासे; संसक्त=संपृक्त। २५. प्रयुक्ता=नियुक्ता; विधातृ=विधात्री; प्रतिमेन=प्रतिभेन, प्रतिभेव; सर्ग=मोक्ष, मोक। २६. गन्धी=गन्धिः,म.अ.ना.; धूमः=धूपः; तस्या=तस्यां। २७. क्लेद=क्षोभ; गण्ड= गल्ल; लेख=रेख।

तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम् ।। २८।।
इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ।। २९।।
लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः ।
वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाच्छलेन ।। ३०।।
स राजलोकः कृतपूर्व्वसंविदारम्भसिद्धौ समरोपलभ्यम् ।
आदास्यमानः प्रमदामिषं तमावृत्य पन्थानमजस्य तस्थौ ।। ३१।।
भर्त्तापि तावत् क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः ।
सत्त्वानुरूपाहरणीकृतश्रीः प्रास्थापयद् राघवमन्वगाच्च ।। ३२।।

और कपोल पर लाल रेखाएँ उभर उठीं। (२८) अब कन्या और कुमार बैठाए गए सोने के सिंहासन पर। वहाँ उनको लगाए गए आर्द्राक्षत। आर्द्राक्षत लगाए स्नातकों ने, राजा ने, उसके बन्धु बान्धवों ने और सुहागिनों ने क्रम से। (२९) इस प्रकार भोजकुलप्रदीप राजा ने अपनी बहिन का पाणिग्रहण संपन्न किया और समागत अन्य राजाओं की पूजा के लिए अधिकारियों को अधिकृत कर दिया। विदर्भराज श्री—संपन्न था। (३०) राजाओं के मन में था तो विकार, परन्तु उसे वे छिपाए रहे। वे उस समय ऐसे लगे जैसे घड़ियाल छिपाए स्वच्छ सरोवर लगते हैं। उन्होंने विदर्भनरेश से अनुज्ञा ली और चल दिए। चलते समय भेंट के बहाने लौटा गए भोज की सौगात। (३१) वे सब राजा सलाह कर अज का रास्ता रोककर खड़े हो गए, उन्हें ज्ञान था कि इन्दुमती की प्राप्ति में सफलता केवल युद्ध से ही संभव है। वे अभी भी उस इन्दुमतीरूपी वस्तु को पाने के इच्छुक थे। (३२) विदर्भ के राजा भोज ने भी छोटी बहिन का विवाह संपन्न कर अपनी शक्ति के अनुसार दहेज दिया और अज को विदा किया। पीछे खुद भी चला।

२८. स्नातकै=ष्णातिकै स्नातिकै। २९. इति=इत्थं; स राजा=सराजः; कृतान्=कृताम्। ३१. संवित्=सन्धिः ; आरम्भ=प्रारम्भ; सिद्धौ=सिद्ध्यै; समरोपलभ्यम्=समयोपलभ्यम् म.अ.ना., समराक्षलभ्यम्, समरादलभ्यम्, समरेण लभ्यम्। ३२. सत्त्वा=शक्त्या; रूपाहरणी=रूपं हरणी, रूपाभरणी, रूपं भरणी। हरणं यौतुकम् इत्यमरः।

तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्त्तत कुण्डिनेश: पर्व्वात्यये सोम इवोष्णरश्मे: ।। ३३।।
प्रमन्यव: प्रागपि कोसलेन्द्रे प्रत्येकमात्तस्वतया बभूवु: ।
अतो नृपाश्चक्षमिरे समेता: स्त्रीरत्नलाभं न तदात्मजस्य ।। ३४।।
तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगण: स सृष्ट: ।
बलिप्रतिष्ठां श्रियमाददानं त्रैविक्रमं पादमिवेन्द्रशत्रु: ।। ३५।।
तस्या: स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमार: ।
प्रत्यग्रहीत् पार्थिववाहिनीं तां ज्योतीरथीं शोण इवोत्तरङ्ग: ।। ३६।।
पत्ति: पदातिं रथिनं रथेशस्तुरङ्गसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद् गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ।। ३७।।

(३३) त्रैलोक्य में प्रसिद्ध अज के पीछे तीन रात चलकर कुण्डिनपुरेश भोज लौटे पूर्णिमा के बीत जाने पर सूर्य से चन्द्र की नाँई। **(३४)** ये राजा लोग कोसलेन्द्र पर पहले से ही नाराज थे, क्योंकि उनमें से प्रत्येक का धन दिग्विजय के समय छिना लिया गया था। इस कारण आज जब उसके पुत्र को स्त्रीरत्न का लाभ हुआ तो उसे वे सह नहीं सके। **(३५)** इन्दुमती के साथ जा रहे उस राजकुमार अज को उद्यत (सृष्ट) राजसमूह ने रास्ते में रोका, बलि द्वारा प्रदत्त श्री को धारण किए त्रिविक्रम के चरण को इन्द्रशत्रु (प्रह्लाद) के समान। **(३६)** अज ने इन्दुमती की रक्षा में पिता के सचिव को पर्याप्त सैनिकों के साथ नियुक्त किया और उस राजसेना का सामना किया, जैसे उत्तरंग शोणभद्र नद करता है ज्योतीरथी नदी का सामना (अमरकण्टक के पहले)। **(३७)** अब युद्ध ठना। उसमें तुल्य को चुना गया प्रतिद्वन्द्वी। पदाति भिड़ा पदाति से, रथी से रथस्थ, असवार से असवार और हाथी पर आरूढ़ हाथी पर सवार के साथ।

३३. लोकप्रथितेन=लोकीप्रथितेन, लोकीतिलकेन; अजे=अने। ३५. राजन्यगण: स सृष्ट:= राजन्यकमेकवीर:; सृष्ट:=दृप्त:, दृष्ट:। सृष्टो युद्धायोद्युक्त:, यथा अत्रैव ६.६२ कुसं २.५१ पद्ये वा। **प्रतिष्ठां=प्रदिष्टां, प्रदत्तां प्रतिष्ठामिति वल्लभपाठ:।** कालिदासग्रन्थावल्यामित: पूर्वमादृत: पाठ: दृप्त इति प्रदिष्टामिति च। इन्द्रशत्रुरित्यप्यत्र निध्येयम्, ध्येयञ्च काव्यमार्गे स्वरो न गण्यत इति। **३६. ज्योतीरथीं= ज्योतीरथां** व.हे., **भागीरथीं** म.ना., **द्योतीरथां।** ज्योतीरथीति साम्प्रतमप्याम्रकूटात् प्रभवन्ती 'जोहिले'ति सरित्। सैषा शोणमभियुङ्क्ते, भागीरथी पुन: शोणेनैवाऽभियुज्यमाना लक्ष्यते पाटलिपुत्रपरिक्षेत्रे। **३७. रथेश:=रथस्थ:; गजस्या=गजेना।**

नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलाऽपदेशान् ।
बाणाक्षरैरेव परस्परस्य नामोर्ज्जितं चापभृतः शशंसुः ।। ३८ ।।
उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
विस्तारितः कुञ्जरकर्णतालैरनुक्रमेणोपरुरोध सूर्यम् ।। ३९ ।।
मत्स्यध्वजा वायुवशाद् विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः पर्य्याविलानीव नवोदकानि ।। ४० ।।
रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नागः ।
स्वभर्त्तृनामग्रहणाद् बभूव सान्द्रे रजस्यात्मपराऽवबोधः ।। ४१ ।।
आवृण्वतो लोचनमार्गमाजौ रजोऽन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद् रुधिरप्रवाहः ।। ४२ ।।

(३८) ऐसा घोर युद्ध हुआ कि नगाड़ों की गड़गड़ाहट में योद्धा अपने कुल का उल्लेख शब्दों में नहीं कर रहे थे। धनुषधारी वे परस्पर का नाम बाणों पर लिखे अक्षरों से ही बतला पाते थे। (३९) धूल इतनी उठी कि उसने क्रम से सूर्यबिम्ब को ढँक लिया। धूली उठी अश्वों की टाप से, घनी हुई रथचक्रों से और फैला दी गई हाथियों के कर्णतालों से। (४०) ध्वजों पर बने मत्स्यों के मुख हवा की चोट से फट गए और पीने लगे वे सेना की धूल। तब वे बाढ़ का मटमैला पानी पीते हुए सचमुच के मत्स्य लग रहे थे। (४१) धूल इतनी घनी थी कि रथ समझ में आता था चकों की ध्वनि से, हाथी समझ पड़ता था हिलते घण्टों की ध्वनि से और योद्धाओं को अपने पराए का ज्ञान होता था अपने स्वामी का नाम लेने से। (४२) शस्त्रों से घायल अश्व, हाथी और वीरों के रक्त का प्रवाह बालारुण बन बैठा आँखों का मार्ग ढँके हुए रज के अंधकार के लिए।

३८. कुलाऽप=कुलोप म.अ.ना.; परस्परस्य=परस्परं ते, परस्परा, परस्परेण; मोर्जितम्=मौर्जितम्।

अत्र पद्यान्तरम्— ललाटबद्धभ्रुकुटीतरङ्गैः पृथ्वीभृतां दन्तनिपीडितोष्ठैः।
आतस्तरे भल्लनिकृत्तकण्ठैर्हुङ्कारगर्भैरवनिः शिरोभिः।।

अत्रापि भेदः — पृथ्वीभृतां=तनुत्यजां; अवनिः=द्विषतां। ३९. वंशचक्रैः=वंशतालैः, वृन्दचक्रै, पुञ्जचक्रैः, नेमिचक्रैः, चक्रचक्रैः; विस्तारितः=विस्तारितैः; अनु हे. = अणु, इति, नेत्र म.अ.ना.। नेत्रं क्षौमो वस्त्रपट्ट इति मल्लिनाथः। तन्मते क्रमपदमत्रौपम्यपरम्। नेत्रेणेवेति तन्मतोऽत्रार्थः। अनुक्रमः पुनरत्रैव श्लोकार्थे निबद्धः। ४०. दीर्णै=शीर्णै, कीर्णै; नवो=वनो। ४१. रथो=रथं; विजज्ञे=विजज्ञुः; नागः=नागम् अ.ना.।

सच्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात् पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ॥४३॥
प्रहारमूर्च्छाण्गमे रथस्था यन्तॄनुपालभ्य विवर्त्तिताश्वान् ।
यैस्सादिता लक्षितपूर्व्वकेतूँस्तानेव सामर्षतया निजघ्नुः ॥४४॥
अप्यर्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः ।
संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यम् ॥४५॥
आधोरणानां गजसंनिपाते शिरांसि मुक्तैर्निशितैः क्षुरप्रैः ।
हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥४६॥
पूर्वप्रहर्त्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥४७॥
तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः ।
उद्यन्तमग्निं शमयाम्बभूवुर्गजा विविग्नाः करसीकरेण ॥४८॥

(४३) उड़ी हुई धूल की जड़ तो रक्त से कट गई, किन्तु ऊपर उसे हवा उठाए ही रही। तब लगा कि वह अंगारों के रूप में परिणत अग्नि के पूर्वोत्थित धूम जैसा है। (४४) किसी रथस्थ योद्धा की प्रहारजन्य मूर्च्छा हटते ही उसने सारथि को फटकार कर रथ को लौटाया और जिनके प्रहार से मूर्च्छा आई थी उन्हीं पर गुस्से में भरकर आघात करना शुरू कर दिया। उन्हें पँहचाना उनके पूर्वदृष्ट केतु देखकर। (४५) कुशल धनुषधारी वीरों ने जो बाण छोड़े थे वे शत्रुबाणों से बीच में काट तो दिए गए, परन्तु अगले भाग से वे शत्रु तक पहुँच ही गए, उनमें वैसा वेग था ही। (४६) गजयुद्ध में गज पर बैठे वीरों के सिर तीक्ष्ण बाणों से कट तो गए थे, किन्तु बीच में उनके केश श्येनों के नखाग्र में फँस गए, फलतः उनके गिरने में कुछ समय लगा। (४७) घुड़सवार सैनिकों में पहले जिसने प्रहार किया उसने दूसरा प्रहार नहीं किया। वह प्रतीक्षा करता रहा घायल होकर अश्व के कंधे पर लटके शत्रु के होश में आने की। (४८) कवचधारी जो वीर प्राण छोड़ रहे थे उनकी नंगी तलवारें जब हाथियों के दाँतों पर पड़ी तो उनसे निकली चिनगारियाँ। हाथियों ने उन्हें अपनी सूँढ़ की फुहारों से बुझाया।

४४. रथस्था=रथस्थान् व.; विवर्त्तिताश्वान्=निवर्त्तिताश्वान्, विवर्त्तिताश्वाः, निवर्त्तिताश्वाः, विनर्त्तिताश्वान्; सादिताः=आहताः; निजघ्नुः, विजघ्नुः, विचिक्युः। ४६. मुक्तैः=चक्रैः म.अ.ना.; निशितैः=निशिता व.म. अ.ना.; क्षुरप्रैः=क्षुभितैः, क्षुराग्रैः, ग्रधारैः व.हे.ना.; हृता=हता, कृत्ता हे.। क्षुरप्रा बाणा इति न पौनरुक्त्यम्। ४७. पूर्वप्र=पूर्वं प्र म.हे.अ.ना.। ४८. तनुत्यजां=धनुर्भृतां, व., वर्मभृतां, वर्मवतां, चर्मभृतां; उद्यन्त=उद्धूत अ.ना., उद्धत्त अ.ना.; सीकरे=शीकरे।

शिलीमुखोत्कृत्तशिरः—फलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥ ४९ ॥
उपान्तयोर्निष्कुषितं विहङ्गैराक्षिप्य तेभ्यः पिशितप्रियाऽपि ।
केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥ ५० ॥
कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ॥ ५१ ॥
अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ बाहुविमर्द्दनिष्ठौ ॥ ५२ ॥
परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ॥ ५३ ॥
व्यूहावुभौ तावितरेतरस्माद् भङ्गं जयं चापतुरव्यवस्थम् ।
पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्म्मी ॥ ५४ ॥

(४९) रणभूमि मृत्यु की पानभूमि लग रही थी। बाणों से कटकर पड़े सिर थे उसमें ढेर सारे फल, गिरे शिरस्त्र थे चषक और शोणित था मद्य। (५०) किसी वीर की भुजा कटकर गिरी हुई थी। उसे पक्षी टोंच चुके थे। उनसे उसे शिवा (लोमड़ी) ने छीना और मांसप्रिय होते हुए भी उसे छोड़कर दूर खड़ी हो गई। क्यों! इसलिए कि उसके केयूर के नोंकदार सिरे से उसका तालु घायल हो गया था। (५१) किसी वीर का सिर शत्रुखड्ग से कट गया। तुरन्त ही वह स्वर्गीय विमान पर आरूढ़ हुआ। सुराङ्गना बाँए भाग में संसक्त हो गई और उसने देखा कि उसका कबन्ध युद्ध में नाच रहा है। (५२) एक दूसरे के सूतों के कालकवलित हो जाने से कोई दो वीरों में से वे ही बन गए सूत और रथी दोनों। उनके घोड़ों के मर जाने पर वे ही करने लगे गदा से भीषण प्रहार और जब गदा भी कट गई तो लगे करने बाहुयुद्ध। (५३) दो वीर समरभूमि में एक दूसरे के प्रहार से एक साथ निष्प्राण हो गए और बन गए देवता, किन्तु वहाँ भी उनका युद्ध चलता ही रहा। वे दोनों किसी एक अप्सरा को चाह रहे थे और लड़ रहे थे। (५४) वे दोनों व्यूह एक दूसरे से कभी हारते और कभी जीतते जाते। पीछे और सामने की हवा से उठी समुद्री तरङ्गों के समान एक एक कर।

४९. कृत्त=क्षिप्त। ५०. उपान्त=अपान्त; निष्कुषि=निःकुषि, निर्घुषि, निर्धुषि; तेभ्यः=तेषाम्; मपाच=मुपाच। ५१. हृतो=हतो; सद्यो विमा=सद्योवि; नृत्यत् कब=नृत्यत्कब। ५२. निष्ठौ=नस्तौ, नष्ठौ, नष्टौ। ५३. प्रार्थित=प्रार्थनयो अ.ना.। ५४. इतरेतरस्मात्=इतरेतरेण, इतरेतरोत्थम्।

परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्त्येत समीरणेन यतस्तु कक्षस्तत एव वह्निः ।।५५।।
रथी निषङ्गी कवची धनुष्मान् दृप्तं स राजन्यकमेकवीरः ।
विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः ।।५६।।
न दक्षिणं तूणमुखे न वामं व्यापारयन् हस्तमलक्ष्यतासौ ।
आकर्णकृष्टा सकृदस्य योद्धुर्मौर्व्वीव बाणान् सुषुवे रिपुघ्नान् ।।५७।।
स रोषदष्टाधरलोहिताक्षैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठैर्हुङ्कारगर्भैर्द्विषतां शिरोभिः ।।५८।।
सर्व्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्व्वायुधैः कङ्कटभेदिभिश्च ।
सर्व्वप्रयत्नेन च भूमिपालास्तस्मिन् प्रजह्रुर्युधि सर्व्व एव ।।५९।।

(५५) शत्रु सेना ने अज की सेना तो नष्ट कर दी, परन्तु अज शत्रु सेना की ओर बढ़ता ही गया। हवा धूम को भगा दे, परन्तु अग्नि तो उस ओर बढ़ता ही जाता है जिधर घाँस रहती है। (५६) उस अकेले वीर अज ने रथी का भी काम किया, निषङ्गी का भी तथा धनुषधारी का भी और मथ डाला उस दृप्त राजसमूह को। कल्पक्षय में महार्णव के उफनते जल को भगवान् महावराह ने अकेले ही मथ ही डाला था। (५७) न वह दिखाई देता था दाहिने तूणीर पर हाथ घुमाते और न दिखाई देता था बाएँ तूणीर पर हाथ घुमाते। एक बार कान तक खिंची प्रत्यञ्चा ही, ऐसा लगता था, जैसे शत्रुघाती बाण पैदा करती जा रही थी। (५८) उसने शत्रुओं के सिरों से भूमि पाट दी। सिरों की आँखें रोष से काटे अधर सी लाल थीं, भौंहे ऊपर चढ़ी दिखाई दे रही थीं, भल्ल (अर्धचन्द्राकार) बाणों से कण्ठ कट चुके थे और उनमें हुङ्कार भरी हुई थी। (५९) सेना के सभी अङ्गों के द्वारा, जिनमें हाथी प्रधान थे, कवचभेदी सभी अस्त्रों के द्वारा और सभी प्रयत्नों से उन सभी राजाओं ने उस अकेले अज पर प्रहार किए, उस युद्ध में।

५५. महौजाः=महोक्षः; निवर्त्त्येत=निवर्त्तेत; यतस्तु = यतो हि। ५६. दृप्तं=दृप्तः व.म.हे.अ.ना., दृष्टम्; विलोड=निवार म.; उद्वृत्त=उद्भूत, उद्बद्ध। ५७. न दक्षिणं=स दक्षिणं; मुखे न=मुखेन म., मुखे च; तासौ=ताजौ म.अ.ना.; सुषुवे=ससृजे। ५८. स रोष=सरोष; दंष्टाधरलोहिताक्षैः=दष्टाधरलोहितोष्ठैः, दष्टाधिकलोहितोष्ठैः व.म.हे.अ.ना., दृष्टाधरलोहिताक्षैः; भ्रुकुटी=भ्रकुटी; कण्ठैः=कङ्कैः; हुंका=हूंका म., हङ्का। ५९. बलाङ्गै=बलाङ्कै, बलौघै; कङ्कट=कङ्कक।

सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ।
नीहारमग्नो दिनपूर्व्वभागः किञ्चित्प्रकाशेन विवस्वतेव ।। ६० ।।
प्रियम्वदात् प्राप्तमथो कुमारः प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्व्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ।। ६१ ।।
ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम् ।। ६२ ।।
ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ।
येन स्वहस्तार्जितमेकवीरः पिबन् यशो मूर्त्तमिवाबभासे ।। ६३ ।।
शङ्खस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः ।
निमीलितानामिव पङ्कजानां मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ।। ६४ ।।

(६०) अस्त्रों से अज का रथ छिप गया। ध्वजाग्र मात्र से वह लक्षित हो रहा था, दिन का कुहरे से आवृत पूर्वभाग जैसे लक्षित होता कुछ कुछ प्रकाशित सूर्यबिम्ब से। (६१) अब काम से सुन्दर अधिराजसूनु अज ने राजाओं पर चलाया प्रियम्वद से प्राप्त प्रस्वापननामक गान्धर्व अस्त्र। अज स्वयं स्वप्न की चपलता से दूर था। (६२) परिणाम यह हुआ कि राजाओं की सेना नींद के वश में हो गई। उसके हाथ धनुष का खींचना भूल गए, शिरस्त्र एक कंधे पर लटक गए और ध्वज के स्तम्भ से उनके जा टिके शरीर। (६३) इसके पश्चात् कुमार अज ने प्रिया द्वारा चुम्बित अधरोष्ठ पर रखकर फूँका शङ्ख। मुँह से शङ्ख लगाए वह ऐसा लग रहा था कि वह मूर्त्त यश का पान कर रहा है। वह वीर था अपने बाहुबल पर। (६४) युद्धभूमि से भागे योद्धा शत्रुओं को ध्वस्त कर चुके उस कुमार के पास लौटे, वे उसके शंख की ध्वनि से परिचित जो थे। उन ध्वस्त शत्रुओं के बीच वह ऐसा लगता था जैसे निमीलित कमलों के बीच स्फुरित चन्द्रबिम्ब लगता है।

६०. छन्न=छिन्न; मग्नः=मग्ने; भागः=भागे; लक्ष्यः=लक्ष्यम्; पूर्व्व=पर्व्व; विवस्वतेव=यथा विवस्वान्। ६१. प्राप्त=आप्त; मथो कुमारः=मसौ कुमारः म.; मथ प्रियार्हः, प्रियार्हम्, प्रियार्थम्; कान्तः=कान्तिः ; निवृत्त=विवृत्त, निवृत्य; लौल्यः=लौल्यम्। ६२. मूढ=शून्य; जालम्=जातम्; स्तम्भ=स्ताम्भि। ६३. निवेश्य=निधाय; येन=तेन; एकवीरः=वीरशब्दः व.म.हे.अ.ना.। ६४. सन्न=छिन्न, भग्न, शान्त।

सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिता केतुषु पार्थिवानाम् ।
यशो हृतं संयति राघवेण न जीवितं वः कृपयेति वर्णाः ।। ६५ ।।
स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ।
ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ।। ६६ ।।
इतः परानर्भकहार्यशस्त्रान् वैदेहि! पश्यानुमता मयासि ।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ।। ६७ ।।
तस्याः प्रतिद्वन्द्विभवाद् विषादात् सद्यो विमुक्तं मुखमाबभासे ।
निःश्वासबाष्पापगमात् प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ।। ६८ ।।
हृष्टापि सा ह्रीविजिता न साक्षाद् वाग्भिः सखीनां प्रियमभ्यनन्दत् ।
स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृन्दम् ।। ६९ ।।

(६५) अज ने शत्रु राजाओं के ध्वजपटों पर रक्तरंजित बाणों से ये अक्षर लिख दिए कि आप लोगों का यश ही युद्ध में छिनाया है कुमार अज ने, प्राण नहीं। वह कृपालु भी है। **(६६)** अज अब पहुँचा डरी प्रिया के पास। उसका एक बाहु चाप के सिरे पर निहित था, शिरस्त्राण निकालने से उसके केश बिखरे हुए थे और उसके ललाट पर पसीनें की बूँदें झलक रही थीं। उसने कहा। **(६७)** 'वैदर्भि! मेरी अनुमति है। तुम देखो तो क्या स्थिति है इन राजाओं की। इनके शस्त्र तो बच्चे भी खींच सकते हैं। ये मेरे द्वारा हस्तगत तुमको चाह रहे थे इस प्रकार की युद्धचेष्टा के द्वारा।' **(६८)** प्रतिद्वन्द्वियों से उत्पन्न विषाद से उस (इन्दुमती) का मुखमण्डल तुरन्त मुक्त होकर ऐसा लगा, जैसा लगता है आदमकद आदर्श अपनी श्वास के हट जाने पर अपनी स्वाभाविक स्वच्छता को प्राप्त होने पर। **(६९)** इन्दुमती को बड़ी प्रसन्नता हुई, किन्तु लज्जावश उसने स्वयं नहीं, अपितु, सखियों की वाणी में प्रिय का अभिनन्दन किया, उस स्थली के समान जो नई बूँदों की वर्षा पर अभ्रवृन्द का अभिवादन मयूर केका से करती है।

६५. हृतं=हतं; संयति=संप्रति। ६६. टी=टौ; हितै=मितै अ.ना. ६७. इतः=एतान्, अतः; मता=मिता; मयासि=मैतान्; प्रार्थ्यसे=प्राप्यसे। ६८. गमात्=गमे; प्रपन्नः=प्रपन्नम्; प्रसादम्=स्वरूपम्; दर्शः=दर्शम्। ६९. प्रिय=पति; वृष्टा=षिक्ता, सिक्ता, वृष्ट्या, मृष्टा; वृन्दम्=जालम्।

इति शिरसि स वामं पादमाधाय राज्ञा–
मुदवहदनवद्यां तामवद्यादपेतः ।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ।। ७० ।।
प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् ।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू–
न्नहि सति कुलधुर्ये सूर्यवंश्या गृहाय ।। ७१ ।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ अजविवाहो नाम
सप्तमः सर्गः ।। ७ ।।

(७०) इस प्रकार वह अज शत्रुओं के सिर पर बाँया पैर रखकर उस अनवद्य राजकुमारी को ब्याह सका, स्वयं भी वह अनवद्य था। उसके लिए वह इन्दुमती ही मूर्त्त समरविजयलक्ष्मी बनी, जिसके अलकाग्र रथतुरगरज से रूक्ष थे ही। (७१) रघु को पहले ही मिल चुकी थी सारी सूचनाएँ। उसने श्लाघ्य जाया के साथ आए विजयी पुत्र अज का अभिनन्दन किया और कुटुम्ब को उसे सौंप वह शान्ति मार्ग के लिए उत्सुक हो गया। सूर्यवंश के वीरों का यही क्रम है कि कुल को सम्हालने वाला तैयार हो जाने पर वे घर में रहना पसन्द नहीं करते।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में अजविवाह नामक
पूरा हुआ सप्तम सर्ग।। ७।।

७०. काग्रा=कान्ता व.। ७१. गतार्थः=गतार्थैः; कुटुम्ब=कुटम्बः:; शान्ति= शान्त; शान्तिमार्गोत्सुकोऽभूत्= चीरमाधातुमैच्छत्।

।। अष्टमः सर्गः।।

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ।। १ ।।
दुरितैरपि कर्त्तुमात्मसात् प्रयतन्ते नृपसूनवो हि यत् ।
तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ।। २ ।।
अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनम् ।
विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ।। ३ ।।
स बभूव दुरासदः परैर्गुरुणाथर्ववविदा कृतक्रियः ।
पवनाग्निसमागमो ह्यसौ सहितं ब्रह्म यदस्त्रतेजसा ।। ४ ।।
रघुमेव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान् गुणानपि ।। ५ ।।
अधिकं शुशुभे शुभंयुना द्वितयेन द्वितयं समागतम् ।
पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनम् ।। ६ ।।

(१) रघु ने पुत्र अज का विवाह होते ही वानप्रस्थ आश्रम में जाने का निश्चय कर लिया। अज अभी विवाह का ललित कंगन पहने ही था कि दूसरी इन्दुमती सी पृथिवी को भी रघु ने उसकी हस्तगामिनी बना दिया। (२) उधर अज ने यह दायित्व ग्रहण किया केवल इसलिए कि पिता की वैसी आज्ञा थी, भोग तृष्णा से नहीं, जिसे राजपुत्र पाप करके हड़पते रहते हैं (यथा उदायु, बिम्बसार, औरंगजेब)। (३) महर्षि वसिष्ठ के द्वारा एकत्रित कराए पवित्र जलों से उस अज के साथ अभिषेक का अनुभव कर पृथिवी ने विशद उच्छ्वास लिया और अपनी कृतार्थता सी व्यक्त की। (४) गुरु वसिष्ठ अथर्ववेद के ज्ञाता थे। उनके अनुष्ठानों से अज शत्रुओं के लिए दुरासद हो गया। ब्रह्म का अस्त्रतेज से जुटना अग्नि का वायु से समागम था। (५) उस नए राजा को प्रजा ने माना जैसे रघु का यौवन लौट आया हो। अज ने पिता से केवल श्री ही नहीं पाई थी, सभी गुण भी प्राप्त कर रखे थे। (६) दोनों से मिलित दोनों ही विशेषताएँ अधिक सुशोभित हो रही थीं 'पिता का समृद्ध पद अज से (मिलकर) और अज

१. विवाह=विहाय; एव=पूर्व; अपराम्=अपरम्। २. पितुराज्ञेति=पितृभक्त्येति। ३. तेन सहा=तस्य महा, तस्य सहा; षेचनम्=षेचनाम्। ४. सदः/दोपरैः=सदोऽरिभिः; नाग्निसमागमो=नोऽग्निसमाग; ह्यसौ=ह्ययं। ५. नवेश्वरं=नरेश्वरं। ६. द्वितयं समागतम्=द्वयमेव सङ्गतम्।

सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ।।७।।
अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ।।८।।
न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो नमयामास रिपूननुद्धरन् ।।९।।
अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया ।
विषयेषु विनाशधर्म्मसु त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ।।१०।।
गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ।।११।।

का यौवन विनय से (मिलकर)।' (७) राजा बने महाभुज अज ने तुरन्त मिली पृथिवी का भोग दयापूर्वक किया, सहसा भोग से नवोढा वधू के समान यह उद्विग्न हो जाएगी यह सोचकर। (प्रासंगिक उभयोपमा, इन्दुमती का भोग भी दयापूर्वक किया)। (८) प्रकृति (अमात्य, जनता) वर्ग में प्रत्येक यह सोचता रहा कि राजा मुझे ही मानता है। जैसे समुद्र की ओर से उसमें मिल रही सैकड़ों नदियों में से किसी के प्रति अवमानना का भाव नहीं होता। (९) उसने मध्यम मार्ग अपनाया, वह न अधिक खरा ठहरता और न अधिक मृदु, जैसे वायु वृक्षों को झुका भर देता है उखाड़ता नहीं। (१०) रघु ने देखा कि पुत्र अज आत्मवत्ता के कारण प्रकृति में प्रतिष्ठित हो चुका है तो वह स्वर्ग के भी विनश्वर विषयों से निस्स्पृह हो गया। (११) दिलीप(ककुत्स्थ)—वंश में उत्पन्न पुरुष उमर ढलते ही गुणी सन्तान/पुत्र पर राज्यभार डालकर तरुवल्कल पहनने वाले संयमी महापुरुषों का मार्ग पकड़ते ही रहे हैं। और वहाँ भी संयत रहते हैं।

८. महीपतेः=अस्य भूपतेः। ९. रुहानिव=रुहामिव; क्रम;=क्रियः रिपून्=नृपान् अ.ना.; अनुद्धरन्=अनन्तरान्। १०. वत्तया=वित्तया, वृत्तया; विनाश=विनाशि हे.; धर्म्मसु=धर्म्मि हे.अ.ना.। अत्र पद्यान्तरम्— अथ वीक्ष्य गुणैः प्रतिष्ठितं प्रकृतिष्वात्मजमाभिगामिकैः ।
पदवीं पर(रि)णामदेशितां रघुरादत्त वनान्तगामिनीम् ।।
११. दिलीप=ककुत्स्थ; प्रयताः संयमिनां=प्रयताः यमिनः, यमिनः संप्रियया, यमिनः संप्रयताः।

तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥१२॥
रघुरश्रुमुखस्य तस्य तत् कृतवानीप्सितमात्मजप्रियः ।
न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥१३॥
स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद् बहिः ।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥१४॥
प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥१५॥
यतिपार्थिवलिङ्गधारिणौ ददृशाते रघुराघवौ जनैः ।
अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ॥१६॥
अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः ।
अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ॥१७॥

(१२) अज ने रघु को अरण्य जाने हेतु उद्यत देखा तो राजकीय वेष्टन से शोभित सिर चरणों पर रखकर अपना अपरित्याग माँगा। (१३) रघु को पुत्र पर प्यार था। उसकी आखों में आँसू देखे तो उसकी इच्छा पूरी कर दी, किन्तु छोड़ी केंचुल को सर्प के समान उसने छोड़ी राजलक्ष्मी को पुनः ग्रहण नहीं किया। (१४) वह नगर के बाहर निवासस्थान बनवाकर अन्तिम आश्रम (वानप्रस्थ) ग्रहण कर वहीं रहने लगा। राजलक्ष्मी उसकी सेवा पुत्रवधू के रूप में करती। वह रहता इन्द्रयों से अविकृत। (१५) उस राजकुल की स्थिति उस आकाश जैसी थी जिसमें चन्द्रमण्डल छिपने जा रहा हो और सूर्यमण्डल उदित हो चुका हो, क्योंकि पूर्वपार्थिव (रघु) प्रशम—साधना में लीन था और नया राजा अभ्युदय प्राप्त कर रहा था। (१६) वेष भी यति और पार्थिव के धारण कर रखे थे दोनों पिता—पुत्र ने। उन्हें लोग ऐसा मानते जैसे अपवर्ग (मोक्ष) और महाभ्युदय इन दो धर्मों के पृथिवीलोक पर दिखाई देते शरीरधारी अंश हों। (१७) अज तो मन्त्रणा करता नीतिविशारद मन्त्रियों से अजित भूभाग को प्राप्त करने हेतु,

१२. सुतः=नृपः। १३. व्यपवर्जितां=व्ययवर्जितां, ह्यपवर्जितां। १४. स किलाश्रममन्त्यमाश्रितः=स किल क्षितिपालवेश्मनः, स बहिः क्षितिपालवेश्मनः; पुराद् बहिः=यतिप्रियः, यतिव्रतः; भोग्यया=योग्यया। १५. अभ्युद्यत=ऊर्जस्वल हे.। १६. अपवर्ग=अपवृत्ति व., अनिवृत्ति अ.ना., विनिवृत्त, अनुवृत्ति; यार्थयोः=यार्थिनौ। १७. नीतिविशारदैः=मन्त्रविशारदैः, नीतिविचक्षणैः। आप्तैरिति वञ्चकनिरासः। नीति/मन्त्र + विशारद/विचक्षण इत्येवं चतुर्धाऽत्र भेदः। पायि=पाय।

नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा ।
परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् ॥ १८ ॥
अनयत् प्रभुशक्तिसंपदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥ १९ ॥
अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात् ।
इतरो ववृते स्वकर्म्मणां दहने ज्ञानमयेन वह्निना ॥ २० ॥
पणबन्धमुखान् गुणानजः षडुपायुङ्क्त समीक्ष्य तत्फलम् ।
रघुरप्यजयद् गुणत्रयं प्रकृतिस्थं समलोष्टकाञ्चनः ॥ २१ ॥

रघु मिलता आप्त योगियों से उस पद की प्राप्ति के लिए जो अनपायी बना रहता (जो नष्ट नहीं होता)। (१८) राजा अज तो आरूढ़ होता व्यवहारासन (न्यायपीठ) पर प्रजावर्ग की प्रकृति तय करने हेतु और वृद्ध रघु बैठता कुशपूत आसन पर, उपांशु (चुपचाप) धारणा का परिचय प्राप्त करने हेतु। (१९) एक ने प्रभुशक्ति की सम्पत्ति से पड़ोसी राजाओं को किया वश में और दूसरे ने किया वश में शरीर के भीतर संचरणशील पाचों (प्राण, उदान, व्यान, समान तथा अपान नामक) प्राणों को प्रणिधान के अभ्यास से। (२०) नए नए राजा अज ने तो भस्मसात् किया शत्रु के षड्यन्त्रों को, अन्य ने ज्ञानाग्नि में अपने कर्मों को कर डाला भस्मसात्। (२१) अज ने तो किया उपयोग पणबन्ध (सन्धि) आदि (सन्धि, विग्रह, यान, आसन, द्वैधीभाव तथा आश्रय नामक) छः गुणों का उनके फल की समीक्षा कर, रघु ने जीत लिए प्रकृति के तीन

---

१९. नवीनमत्र पद्यत्रयम्–

१. समयुज्यत भूपतिर्युवा सचिवैः प्रत्यहमर्थसिद्धये ।
अपुनर्जननोपपत्तये प्रवयाः संयमिभिर्विनेतृभिः ॥

अत्रापि पाठभेदाः– समयुज्यत=समपृच्यत व., समदृश्यत; सिद्धये=लब्धये; अपुनर्जननो=अपुनर्जनतो, नपुनर्जननो, संयमिभिः=संयुयुजे हे.; विनेतृभिः=मनीषिभिः।

२. अनुरञ्जयितुं प्रजाः प्रभुर्व्यवहारासनमाददे नवः ।
प्रथमः शुचिविष्टराश्रयः परिचेतुं यतते स्म धारणाम् ॥

प्रथमः=अपरः; राश्रयः=रास्थितः, रासनः; मण्डले=मण्डलम्, सञ्चरम्। चेतुम्=छेतुम्।

३. नयचक्षुरजो दिदृक्षया पररन्ध्रस्य ततान मण्डले ।
हृदये समरोपयन्मनः परमं ज्योतिरवेक्षितुं रघुः ॥

२०. इतरः=अपरः; ववृते=ववृधे; ज्ञान=ध्यान व.अ.ना.; वह्निना=तेजसा, चक्षुषा, वाजिना।
२१. प्यजयद्=प्यगमद् व.हे., ध्यगमत्, प्यनयत्।

न नवः प्रभुराफलोदयात् स्थिरकर्म्मा विरराम कर्म्मणः ।
न च योगविधेर्नवेतरः स्थिरधीरापरमात्मदर्शनात् ॥ २२॥
इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसृतावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥ २३॥
अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः ।
तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः ॥ २४॥
श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकीं यतिभिः सार्धमनग्निमग्निचित् ॥ २५॥
अकरोत् स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् ।
न हि तेन पथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः ॥ २६॥

(सत्त्व, रजस्, तमस्,) गुणों को समदर्शी होकर। (लोष्ट) मिट्टी का ढेला और काञ्चन को समान देखते हुए। (२२) नया राजा तब तक कर्म से विरत नहीं हुआ जब तक उसका फल नहीं उदित हुआ। वह स्थिरकर्मा जो था। उधर वृद्ध राजा (रघु) स्थिरधी बना रहा परमात्मा के दर्शन तक । (द्र. गीता. २.५५–७२।) (२३) इस प्रकार (पिता और पुत्र) दोनों शत्रुओं और इन्द्रियों का प्रसार रोककर जागरूक बने रहे और अभ्युदय तथा अपवर्ग की दोनों प्रकार की सिद्धियों तक दोनों जा पहुँचे। (२४) अब समदर्शन रघु ने अज की ओर देखकर कुछ वर्ष बिताए, बाद में योगसमाधि लगाकर अव्यय पुरुष को प्राप्त हो गए। (२५) पुत्र अज ने जब सुना कि पिता रघु ने देह छोड़ दिया तो बहुत देर तक उसने आँसू बहाए और अन्त में यतिजनों की उपस्थिति में उसका अन्तिम संस्कार कर दिया, जिसमें अग्नि का उपयोग नहीं किया गया था, यद्यपि स्वयं अज अग्निचित् था। (२६) अज ने रघु का और्ध्वदैहिक कृत्य पितृभक्ति के साथ किया। वह स्वयं कल्पशास्त्र का वेत्ता था। वैसे उस (योगसमाधि और अन्तिम आश्रम की साधना के) मार्ग से जो शरीर छोड़ते हैं उन्हे पुत्र द्वारा दिए पिण्ड की अपेक्षा रहती नहीं है।

२२. स्थिर=स्थित हे.; मात्म=मार्थ। २३. प्रसृता=प्रसिता, प्रथिता, प्रश्रिता। प्रसितोत्सुकाभ्यां तृतीया इति तृतीयाप्रसक्तिवारणाय प्रसृतावित्येव पाठः श्रेयान्, उभयीं=उभयां। २५. 'विद–चित्'='वितातान समं पुरोधसा क्रतुमन्त्यं पृथिवीशतक्रतोः'। यतिभिः=मुनिभिः; चित्=वित्। २६. अकरोत्=विदधे; स=च; और्ध्वदैहि=और्ध्वदे, ऊर्ध्वदे/दै; हिकं–वित्'= 'हिकं–पितृकार्यमर्थवित्'।

स पराध्र्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः ।
शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् ।। २७।।
क्षितिरिन्दुमती च भाविनी पतिमासाद्य तमग्र्यपौरुषम् ।
प्रथमा बहुरत्नसूरभूदितरा वीरमजीजनत् सुतम् ।। २८।।
दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्व्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ।। २९।।
ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ परिधेर्मुक्त इवोष्णदीधितिः ।। ३०।।
बलमार्त्तभयोपशान्तये विदुषां सत्कृतये बहु श्रुतम् ।
वसु तस्य विभोर्न केवलं गुणवत्ताऽपि परप्रयोजना ।। ३१।।

(२७) अज को सदर्थवेदी विद्वानों ने बतलाया कि उसके पिता को जो गति प्राप्त हुई है वह सबसे उत्कृष्ट गति है, अतः उनके विषय में शोक नहीं करना है तो उसका मानसिक संताप शान्त हुआ। अब उसने खींचा धनुष और कर दिया जगत् को प्रतिशासन से रहित। **(२८)** पृथिवी और इन्दुमती अज के प्रति भाव बनाए हुई थीं। वह था प्रथम कोटि के पौरुष का धनी पति। उससे प्रथम पृथिवी तो हुई प्रसू रत्नराशि की और दूसरी (इन्दुमती) ने जन्म दिया वीर पुत्र को। **(२९)** उस पुत्र को नाम दिया गया 'दशरथ' क्योंकि वह था दशशतरश्मि (सहस्ररश्मि=सूर्य) के समान द्युतिशाली, प्रसिद्ध था दशों दिशाओं में कीर्ति से और होने वाला था पिता दशकण्ठ (रावण) के शत्रु का। **(३०)** वह पार्थिव श्रुत (स्वाध्याय),याग (यज्ञ) और सन्तति से ऋषि, देव तथा पितरों के ऋण से मुक्त हो चुका था। वह ऐसा लगा जैसे परिवेष से मुक्त सूर्यमण्डल लगता है। **(३१)** अज में बल था आपद्ग्रस्तजनों का भय दूर करने के लिए और गम्भीर वैदुष्य था विद्वानों के सत्कार के लिए। इस प्रकार केवल धन ही नहीं, उसकी गुणवत्ता भी परप्रयोजन के लिए थी।

२८. **भाविनी=भामिनी** म.हे.अ.ना.; **मासाद्य तम=मासाद्य सम, माजग्मतु, मासेदतु; मग्र्य=मुग्र; पौरुषं=संपदम्; रत्नसू=रत्नभू; इतरा=अपरा; वीर=धीर।** २९. **यमाख्यया=समाख्यया।** 'दशरथ' इति हि दशरथस्याख्या, न पुनः 'दशपूर्व्वरथ' इत्यत्र विप्रतिपद्यते महिमभट्टः। ३१. **सत्कृतये=सन्नतये, संगतये, संमतये, संयतये; विभोर्न केवलं=न केवलं विभोः** व.; **विभोः=बभौ; योजना=योजनम्** व.हे.अ.ना.।

स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजाः ।
नगरोपवने शचीसखो मरुतां पालयितेव नन्दने ।। ३२ ।।
अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवेरुदगावृत्तिपथेन नारदः ।। ३३ ।।
कुसुमैर्ग्रथितामपार्थिवैः स्त्रजमातोद्यशिरोनिवेशिताम् ।
अहरत् किल तस्य वेगवानधिवासस्पृहयेव मारुतः ।। ३४ ।।
भ्रमरैः कुसुमानुसारिभिर्विनिकीर्णा परिवादिनी मुनेः ।
ददृशे पवनाऽवलेपजं सृजती बाष्पमिवाञ्जनाऽऽविलम् ।। ३५ ।।
अभिभूय विभूतिमार्त्तवीं मधुगन्धातिशयेन वीरुधाम् ।
नृपतेरमरस्त्रगाप सा दयितोरः–स्थलकोटि–सुस्थितिम् ।। ३६ ।।

(३२) उत्तम सन्तति वाला अज प्रजावर्ग का अवेक्षण कर एक समय अपनी प्रिया इन्दुमती के साथ उसी प्रकार नगर के उपवन में विहार कर रहा था जिस प्रकार शची के साथ इन्द्र विहार करता है नन्दनवन में। (३३) इधर दक्षिणाब्धि के तट पर गोकर्ण–धाम में जो प्रतिष्ठित भगवान् शङ्कर हैं उनकी वीणासपर्या पर सूर्य के उत्तरायण पथ से निकले महर्षि नारद। (३४) नारद की वीणा के सिरे पर लगी थी स्वर्ग के पुष्पों की माला। तेज हवा ने उसका हरण कर लिया, एक प्रकार से स्वयं को सुगन्धित करने के लिए। (३५) माला पर टूट रहे भौरों से नारदजी की वीणा भरी हुई थी। ऐसा लग रहा था कि पवन की चोट से वह कज्जल मलिन आँसू टपका रही थी। (३६) स्वर्ग के पुष्पों की उस माला की मीठी और घनी सुगन्ध से सभी लताओं के ऋतु पुष्पों की सुगन्ध दब गई थी। वह आकर टिकी राजा की प्रिया इन्दुमती के वक्षःस्थल पर।

३२. तप्रजः=तप्रजाः; सुप्रजाः=सुप्रजः; वने=वनं; नन्दने=नन्दनम्। ३३. श्रित=श्रुत व.हे.; वीणयितुं=वेणयितुं, वर्णयितुं; ययौ रवेः=मुनिः पथा; उदगावृत्ति=उदयावृत्ति व., पवमानस्य। ३५. कुसुमानु=सुमनोऽनु; विनिकीर्णा=परिकीर्णा म.। ३६. मधुगन्धा=पटुगन्धा, अथ गन्धा; 'नृपतेरमरस्त्रगाप सा'= नृपतेरमरस्त्रगञ्जसा', 'स्त्रग–सज्य/ञ्ज–त सा महीपतेः'; तोरःस्थल=तोरुस्थल, तोरुस्तन, म., तोरश्छद हे.अ.; कोटिसु=कोटिषु स्थितिम् व.हे., कोटिषु स्थितम् अ., कोटिसंस्थितम्, कोटिरत्नयोः, रत्नकोटिषु।

क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया हृतचन्द्रा तमसेव कौमुदी ।। ३७।।
वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्च्चिरुपैति मेदिनीम् ।। ३८।।
उभयोः परिपार्श्ववर्त्तिनां तुमुलेनार्त्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ।। ३९।।
नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता ।
उपचारविधानमायुषः सति शेषे हि फलाय कल्पते ।। ४०।।

(३७) सुजात स्तनों की सखी बने अभी क्षणमात्र बीता था कि उसे देखते ही नरोत्तम अज की प्रिया विह्वल होकर मूर्च्छित हो गई, राहु ग्रसित चन्द्र की कौमुदी के समान। (३८) इन्द्रियों से रहित शरीर से गिरती इन्दुमती ने पति को भी गिरा दिया। दीप की लौ गिरती है तो जलते तैल के बिन्दु को भी साथ लिए भूमि को छूती है। (३९) दोनों पार्श्ववर्त्ती सेवकों के आर्त्तरव से घबराए तालाब के पक्षी भी समान पीड़ा का अनुभव करते हुए ऊँचे स्वर में चिल्लाने लगे। (४०) पंखा झलने आदि से राजा की मूर्च्छा तो हट गई, किन्तु रानी वैसी ही रही आई और चल ही बसी। उपचार फलीभूत तब होते हैं जब आयुष्य शेष रहती है।

३७. 'क' 'निमि००कौमुदी'। नरोत्तमप्रिया=नरेश्वरप्रिया,
नराधिपप्रिया, नरेन्द्रसुन्दरी; हृत=हत; कौमुदी=शर्वरी।
'ख' 'पुनरप्रतिबोधलब्धये निमिमील क्षितिपालसुन्दरी'।
'ग' 'तमसा हृतचन्द्रचन्द्रिका समसंस्था निमिमील सुन्दरी'।

३८. समानार्थकमत्र पद्यान्तरम्—

सममेव नराधिपेन सा गुरुसंमोहविलुप्तचेतना ।
अगमत् सह तैलबिन्दुना ननु दीपार्च्चिरिव क्षितेस्तलम् ।।

चेतना=चेतसा; ननु/नव/तनु; सहदीपा = नवदीपा; पैति=पैत्; मेदिनीम्=भूतलम्।

३९. परि=अपि व.म.हे.अ.; वर्त्तिनाम्=वर्त्तिभिः; तुमुलेन=तुमलेन, करुणेन अ.; वेजिताः=पीडिताः अ., बोधिताः; करालयाः=कराश्रयाः, म.। ४०. सा तु=सा च। संस्थितापदे द्र. रघुवंश १२.५५, वामनस्य काव्यालंकारसूत्रवृत्तिः ०२.०१.२१।

प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्त्वविप्लवात् ।
स निनाय नितान्तवत्सलः परिगृह्योचितमङ्कमङ्गनाम् ।। ४१ ।।
पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ।। ४२ ।।
विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ।। ४३ ।।
कुसुमान्यपि गात्रसंगमात् प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत् प्रहरिष्यतो विधेः ।। ४४ ।।
अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।
हिमसेक–विपत्तिरत्र मे नलिनी पूर्व्वनिदर्शनं मता ।। ४५ ।।
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया ।। ४६ ।।

(४१) प्राण निकल जाने से इन्दुमती को अतीव वत्सल अज ने गोद में उठा लिया जैसे साधने के लिए वीणा को उठा लिया जाता है। (४२) पति के अंक में रखी हुई उस निष्प्राण और बदले वर्ण की सुन्दरी से युक्त अज उषःकाल के उस चन्द्रमा सा लगा, जिसमें मलिन वर्ण की मृगलेखा झलक रही होती है। (४३) उसने अपनी सहज धीरता को छोड़कर बाष्प गद्गद विलाप करना शुरू किया। तपने पर तो लोहा भी कोमल हो जाता है, शरीरधारियों की तो बात ही क्या? (४४) पुष्प भी शरीर से छुआकर यदि प्राण ले सकते हैं तो अन्य कोई वस्तु विधाता के लिए विनाश का साधन कैसे नहीं बन सकती। ('प्रहणिष्यतः' संभावित पाठान्तर)। (४५) अथवा प्रजा का अन्त करने वाला मृदु वस्तु की हिंसा में मृदु वस्तु से ही काम लेता है। यह ऐसा ही उदाहरण है। ऐसा ही दूसरा उदाहरण है ओस के सेक से गली कमलिनी। (४६) यदि यह माला प्राण ले सकती है तो मेरे हृदय की माला मेरे प्राण क्यों नहीं ले रही। ईश्वर की इच्छा से कहीं विष भी अमृत हो सकता है और अमृत भी विष।

४१. सत्त्वविप्लवात्=सत्त्वसंप्लवात्, सत्त्वविह्वलाम्, विह्वला पुनः; केचित् पुनरुत्तरार्धं पूर्वार्धीकृत्योत्तरा–र्धमेवंपाठकमामनन्ति– सलिलोद्धृतपद्मिनीनिभां दयितामङ्कमुदश्रुलोचनः/परिवृत्तप्रथमच्छविं क्षणात्/छलात्' हे.। द्धृत=चित; निभाम्=तुलाम्, हे.। ४२. करणापायविभिन्न=करणप्रायण अ.; भ्रदा=भ्रमा; लेखा=रेखा अ.। ४३. सहजा=सहसा; मप्य=मथ; अभितप्त=अतितप्त; भजते कैव=भजनेनैव; शरीरिषु=शरीरिणाम्। ४४. अपि=अति। ४५. मता=गता व.हे., जनाः। ४६. हृदये किं निहिता=हृदये संनिहिता, निहिता किं हृदये।

अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ।। ४७ ।।
कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ।। ४८ ।।
ध्रुवमस्मि शठः शुचिस्मिते! विदितः कैतववत्सलस्तव ।
परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ।। ४९ ।।
तदपोहितुमर्हसि प्रिये! प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ।। ५० ।।
दयितां यदि तावदन्वगाद् विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम प्रबलामात्मकृतां तु वेदनाम् ।। ५१ ।।
सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते ।
अथ चास्तमिता त्वमात्मना धिगिमां देहभृतामसारताम् ।। ५२ ।।

(४७) या तो मेरे भाग्य के विपर्य्यय से इसी माला को ऐसा वज्र बना दिया जिसने तरु को तो दिया छोड़ और नष्ट की उसकी शाखा पर फैली केवल लता। (४८) प्रिये! अपराध कर देने पर मेरी कभी अवज्ञा नहीं की तुमनें चिरकाल तक। और आज मुझ निरपराध से बात भी नहीं करना चाह रही हो। एकाएक ऐसा क्यों?। (४९) हे शुचिस्मिते! मुझे तुमने सचमुच शठ और झूठा प्रेमी समझा। इसीलिए तो कभी न लौटने वाली परलोक की इतनी बड़ी यात्रा पर मुझसे बिना पूछे ही चल पड़ी। (५०) प्रिये! उठो जागो और मेरा विषाद तुरन्त दूर करो, हिमाचल की गुफा के अन्धकार को औषधि के समान प्रज्वलित होकर। (५१) अरे मेरे प्राण जब प्रिया के साथ चले ही गए थे तो उसके बिना लौट क्यों आए? हे मेरे अभागे जीवन! अपने हाथ से झेली इस वेदना को सह। (५२) प्रिय! अरे ये सुरत–स्वेद–बिन्दु तेरे चेहरे पर झलक ही रहे हैं और तू सदा के लिए चल बसी। शरीरधारियों की ऐसी असारता? धिक्कार है इसे।

४७. मम भाग्यविप्लवाद= सुरमाल्यरूपभाग व.हे.; कल्पित=निर्मित; वेधसा=कर्म्मणा; तरुर्न पातितः=न पातितस्तरुः, निपातितस्तरु; क्षपिता=निहता; विटपाश्रिता=विटपाश्रया व.हे.। ४८. राद्धे=राधे; यदा=सदा; चिरं मयि=पुरा प्रिये; इमं=अमुम्। ४९. शठः=शिवः; विदितः=कलितः; पृच्छ्य=मन्त्य हे.। ५१. कृतां तु=कृतां नु व., कृतां च, कृतान्त, कृतेन।

५२. (क) ‘सुरतश्रमसंभृतो मुखे’
‘ध्रियते स्वेदलवोद्गमोऽपि ते’
(ख) ‘सुरतश्रमवारिबिन्दवो’
‘न तु तावद् विरमन्ति ते मुखे’ व.

मनसापि न विप्रियं मया कृतपूर्व्वं तव किं ज़हासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ।।५३।।
कुसुमोत्खचितान् वलीमतश्चलयन् भृङ्गरुचस्तवालकान् ।
करभोरु! करोति मारुतस्त्वदुपावर्त्तनशङ्कि मे मनः ।।५४।।
इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरलीनषट्पदम् ।।५५।।
शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ।।५६।।
नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु! चिताधिरोहणम् ।।५७।।

(५३) मैंने तेरा विप्रिय मन से भी कभी नहीं किया, तब क्यों त्याग रही है मुझे। यह तो तुझे भलीभाँति विदित है कि पृथिवी का पति कहने भर को हूँ मैं, मेरी हृदय की लगन तो प्रिये! तुझ में ही है। **(५४)** हे करभोरु! तेरे फूलों से खचित और कुञ्चित केशों को हवा डुला रही है। मुझे लग रहा है तू लौट आई। **(५५)** प्रिये! तेरे मुख पर अलक तो हिलते दिखाई पड़ रहे हैं, पर तूने बात करना बन्द कर रखा है। कितना अखर रहा है यह मुझे। अरे रात को भौंरो से युक्त कमलकोष तो दिखाई दे, परन्तु भौंरो की गुञ्जार सुनाई न पड़े। **(५६)** शशी के पास शर्वरी फिर लौट आती है। ऐसे ही सदा जोड़े में रहने वाले पक्षियों (चक्रवाक–चक्रवाकी) में दयिता अपने प्रिय के पास। इसलिए वे तो विरह की दूरी सह लेते हैं। तुम तो गई सो गई। लौटने वाली नहीं, कितना नहीं है परिताप मुझे। **(५७)** कोमल पत्तों की शय्या पर भी सोते हुए तेरे मृदु शरीर को कष्ट होता था। हे वामोरु! यही कैसे सहेगा चिताधिरोहण।

'अ/क–थ चा/मस्तमिता त्वमात्मना'	'स्वयमस्तमितासि/स्य हा/हो कथम्/बत' 'स्वयमस्तमितासि हा कथं'
'धिगिमां देहभृतामसारताम्'	'धिगिमां देहभृतामसारताम्' 'देहवता, देहभवा।
० ० ० ०'देहवता, देहभवा'	००० 'देहवता/भृता'

५४. त्वखचि=त्कचि व.म.हे.अ., द्गथि, त्कलि, द्विचितैः खचि म.; वलीमतः=वलीभृतः म., बलीमतः; त्वदु=तदु। ५५. सुप्त=गुप्त; लीनषट्पदम्=षट्पदस्वनम्,षट्पदावलीः। ५६. शर्वरी=कौमुदी। ५७. रोहणम्=रोपणम्।

इयमप्रतिबोधशायिनीं रशना त्वां प्रथमा रहः–सखी ।
गतिविभ्रमसादनीरवा न शुचा नाऽनुमृतेव लक्ष्यते ।।५८।।
कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ।।५९।।
त्रिदिवोत्सुकयाऽप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया ।
विरहे तव ते गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ।।६०।।
मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम् ।।६१।।
कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत् तव नेष्यामि निवापमाल्यताम् ।।६२।।

(५८) यह करधनी भी सदा के लिए सो गई, यह भी जागने वाली नहीं। यही तो तेरी एकान्त की सबसे बड़ी सखी है। पदचार के अभाव में यह भी चुप है, यह भी तेरे पीछे ही तो निष्प्राण नहीं हो गई। (५९–६०) प्रिये! स्वर्ग की उत्सुकता में भी तूने मेरा ध्यान रख अपनी मीठी वाणी कोकिला में छोड़ रखी है, अपनी मदालस गति कलहंसियों में, अपनी चंचल चितवन हिरनियों में और पवन से आन्दोलित लताओं में अपने विभ्रम, किन्तु तेरे न रहने पर गुरुतम व्यथा में पड़े मेरे हृदय को सम्हाल नहीं पा रहे हैं ये सब। (६१) और प्रिये! 'सहकार' और 'फलिनी' का जो जोड़ा तूने तय किया था, इनका विवाहसत्कार किए बिना ही तुम चल बसी यह ठीक नहीं। (६२) यह जो अशोक है इसका दोहद तुमने ही किया है। अब यह फूलने वाला है। इसके पुष्प कहाँ तो मैं तुम्हारे अलकों में लगाता और अब इन्हीं को कैसे बनाऊँगा तुम्हारे श्राद्ध की माला।

५८. क. इयम०० सखीं' शायिनीं=शायिनी; सखी=सखीं, सखा; रशना=रसना
ख. घनचारुनितम्बगोचरा रसनेयं मुखरा तवाधुना।
००० संस्थिता रसना त्वां प्रति बोधशायिनीम्।
सादः=सादि; नीरवा न=नीयवान्; शुचा नानु=शुचा त्वानु; मृतेव=मृतेन।
५९. युग्मम्।। मदालसं गतम्=गतं मदालसं व.म.हे.अ., गतं मनोहरम्, गतं मनोरमम्, सदासनम्; पृषती=हरिणी; नाधूत=नोद्धूत व.हे.; विभ्रमाः=विभ्रमः, चेष्टितम्। ६०. ताः सत्यममी गुणास्त्वया= ताः सन्ति गुणा अमी त्वया;न तु=ननु; क्षमाः=क्षमम्। युग्मम्=युगलम्। द्र. मेघ. १०२; कुसं. ५.१३।
६१. अविधाय०००याम् = अविधाय विहाय सत्क्रिया। द्र. शाकु. १.१९.१–५; माल. ४.१३।
६२. दोहद = दौहृद; सौहृद; माल्य = माल।

स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि! शोच्यसे ॥ ६३॥
तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया ।
असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि! सुप्यते ॥ ६४॥
समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ ६५॥
धृतिरस्मिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं चिरशून्यं शयनीयमस्ति/द्य मे ॥ ६६॥
गृहिणी, सचिवः, सखा, मिथः, प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ ६७॥

(६३) अन्य वृक्षों को दुर्लभ तुम्हारे चरणों का नूपुरध्वनि पूर्ण अनुग्रह याद कर करके, हे सुगात्रि! यह अशोक भी तुम्हारे शोक में कुसुमाश्रु बरसा रहा है। **(६४)** तुम्हारे निःश्वासों जैसे बकुलपुष्पों की जो विलासमेखला मेरे साथ तुमने बनाना आरम्भ किया था उसे अधूरी छोड़, हे किन्नरकण्ठि! इस प्रकार क्यों सो गई हो। **(६५)** ये सखियाँ जो सुख–दुःख में साथ रहती रहीं, यह पुत्र प्रतिपदा के चन्द्र जैसा और यह मैं जिसका रस एकमात्र तुम में। इतने पर भी तुम्हारा यह उपक्रम निश्चित ही निष्ठुर है। **(६६)** धृति अस्त, रति च्युत, गीति समाप्त, ऋतु निरुत्सव, आभरण निष्प्रयोजन और मेरी शय्या सदा सदा के लिए शून्य हो उठी। **(६७)** तुम मेरी गृहिणी थी, सचिव थी, सखा थी, और तुम ही थी ललित कलाविधि में प्रियशिष्या। करुणाविमुख मृत्यु ने तुमको छिनाते हुए मेरा क्या नहीं छीन लिया।

६३. **नुग्रहमन्यदुर्लभम्=नुग्रहदुर्लभं तव**। ६४. **कारि=वादि** व.हे.अ.; **विलास=विलाप, विशाल, विकल्प**। ६५. **निभो=मुखो; आत्मजः=अर्भकः** हे.अ.; **निष्ठुरः=निष्ठुरम्**। अत्र प्रतिपत्तिः निश्चय इति मल्लिनाथः, प्रतीतिरित्यरुणगिरिनाथः, दुराग्रह इति हेमाद्रिः, प्रकृतिरिति च विश्वप्रकाशः। व्यवसायो निश्चयः प्रतीतौ निष्ठुर इति त्वध्यवसीयतेऽस्माभिः। ६६. **धृति=रति; रति=धृति, गति; विरतं=विगतं: चिर=परि**। ६७. **सखा मि** हे. = **सखी मि** व.म., **मिथः सखी, मिथः सखा; कला=कथा; त्वां=त्वं; वद=बत; हृतम्=कृतम्**। सखा न तु सखीति, भासादिषु तथैव व्याहारस्य दर्शनात्, स्वाभाविकत्वाच्च तस्यैव।

मदिराक्षि! मदाननार्पितं मधु पीत्वा रसवत् कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ।। ६८ ।।
विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्व्वे विषयास्त्वदाश्रयाः ।। ६९ ।।
विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत् पृथिवीरुहानपि स्रुतशाखारसबाष्पदुर्दिनान् ।। ७० ।।
अथ तस्य कथञ्चिदङ्कतः स्वजनस्तामपनीय सुन्दरीम् ।
विससर्ज कृतान्त्यमण्डनामनलायागुरुचन्दनैधसे ।। ७१ ।।
प्रमदामनुसंस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् ।
न चकार शरीरमग्निसात् सह देव्या न तु जीविताशया ।। ७२ ।।
अथ तेन दशाहतः परे गुणशेषामपदिश्य गेहिनीम् ।
विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ।। ७३ ।।

(६८) हे मदिराक्षि! मेरे मुख से अर्पित सरस मधु पीकर अब तुम कैसे पिओगी मेरी अश्रुदूषित जलाञ्जलि, वह तो मुझे परलोक जा चुकी तुम्हें देनी पड़ेगी। (६९) विभव तो है, परन्तु तुम्हारे बिना अज का सुख इतने ही क्षणों तक गिना जाए। अन्य प्रलोभनों से अनाकृष्ट मेरे सभी विषय केवल तुझ पर ही आश्रित थे। (७०) कोसलदेश के स्वामी अज का ऐसा विलाप सुना तो वृक्षों से भी शाखारसरूपी आँसू बह निकले। उसके विलाप की प्रत्येक उक्ति प्रिया के प्रति व्यक्त करुण अर्थ से ग्रथित थी। (७१) इसके पश्चात् सम्बन्धियों ने उस इन्दुमती को अज के अंक से जिस किसी प्रकार हटाया और अन्तिम अलंकरण कर अगुरु तथा चन्दन के ईंधन की अग्नि को प्रदान कर दिया। (७२) अज ने जो अपना शरीर भी चिताग्नि को अर्पित नहीं किया वह इस अपयश के भय से कि 'राजा होते हुए भी स्त्री के पीछे चल बसा।' इसलिए नहीं कि उसे जीवित रहना अभीष्ट था। (७३) इसके अनन्तर दश दिन बीत जाने के बाद गुणशेष गेहिनी के निमित्त उस विद्वान् राजा ने श्राद्ध की सभी

६८. नतं=नताम्। ६९. एतावदिदंक्षणावधिकमिति यावत्। ७०. विलप=प्रलप; कोस=कोश; लाधिपः=लेश्वरः; ग्रथितं=ग्रहणं; स्रुत=च्युत; रसबाष्प=कुसुमाश्रु; दुर्दिनान्=दूषितान् म.। ७१. अपनीय=अवतार्य; कृतान्त्य=तदन्त्य व.म.अ., तदन्त; मण्डनाम्=मण्डलाम्; अगुरु=अगरु; धसे=धसः। ७२. शुचा=शुची; नृपतिः=क्षितिपः; नतु=नच; ताशया=तेच्छया। ७३. परे=परम्, पराः; अपदिश्य= उपदिश्य, उपविश्य; गेहिनीम्=भामिनीम् म.हे.अ., सुन्दरीम्, व., महर्द्धयः=समापिताः;

स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवाऽवलोकयन् स्वशुचः पौरवधूमुखाश्रुषु ।। ७४।।
अथ तं सवनाय दीक्षितः प्रणिधानाद् गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ।। ७५।।
असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः ।। ७६।।
मयि तस्य सुवृत्त! वर्त्तते! लघुसंदेशपदा सरस्वती ।
शृणु विश्रुतसत्त्वसार! तां हृदि चैनामुपधातुमर्हसि ।। ७७।।
पुरुषस्य पदेष्वजन्मनः समतीतञ्च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ।। ७८।।

विधियाँ बड़ी समृद्धि के साथ नगर के उपवन में ही पूरी की। (७४) जब वह दिवंगत इन्दुमती के बिना नगर में प्रविष्ट हुआ तो लग रहा था जैसे रात्रिविहीन चन्द्रमण्डल हो। उसने देखा कि नगर की वनिताओं में उसके शोकाश्रु की बाढ़ आई हुई थी। (७५) इसके बाद गुरु वसिष्ठ ने ध्यान से देखा कि अज शोक से व्याकुल है तो शिष्य से इस प्रकार उद्बोधित किया, स्वयं व्यस्त थे वे यज्ञकार्य में। (७६) 'मर्यादा की रक्षा में निरत महर्षि 'वसिष्ठ राजन्! आपके संताप की घटना जानते हुए भी आपको प्रकृतिस्थ करने हेतु स्वयं 'इसलिए उपस्थित नहीं हुए कि यज्ञानुष्ठान पूरा नहीं हुआ था। (७७) हे सुवृत्त! संक्षिप्त पदों में उनके संदेश की सरस्वती मेरे भीतर है। हे विश्रुतसत्त्वसार! उसे सुनिए और हृदय में धारण कीजिए। (सत्त्वसार = मानसिक दृढ़ता)। (७८) महर्षि वसिष्ठ! अजन्मा पुरुष के तीनों पदों में जो हो चुका है, जो हो रहा है और जो होने वाला है उन तीनों को ज्ञानमय अव्याहत चक्षु से देखते रहते हैं। (तीन पद = त्रिविक्रम के।)

समापिता=महर्द्धय हे., वितेनिरे, हे.। ७४. पुरीम्=पुरम् ७५. अथ तं सवनाय दीक्षितः=अथ संसवनाय दीक्षितः, तमवेक्ष्य मखाय दीक्षितः; गुरुराश्रमस्थितः=गुरुराश्रमाश्रितः, गुरुणाश्रमस्थितः, प्रसमीक्ष्य तं मुनिः; अभिषङ्गजडं विजज्ञिवान्= अभिषङ्गिणमीश्वरं विशां/क्षितेः, अभितापजडं विजज्ञिवान्। ७६. यतो मुनिः=मुनिर्यतः; यती मुनिः, धृतो मुनिः व.म., तपोनिधिः; ताप=शोक; कृतस्थितिः=ततश्चयुतम्, स्वतश्चयुतम्, पथश्चयुतम्। ७७. मयि=अयि; लघु=स्फुट हे.; पदा=हरा, वहा; चैना=वैना; उप=अव, अप। ७८. पुरुषस्य पदेष्वजन्मनः=त्रिषु धामसु शार्ङ्गधन्वनः; स हि=सह; निष्प्रतिघेन=प्रतिमेन स; त्रितयं=ऽवितथं।

चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिणीं नाम हरिः सुराङ्गनाम् ।। ७९ ।।
तपसा प्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद् भव मानुषीति तां शमवेलाप्रलयोर्म्मिणा मुनिः ।। ८० ।।
भगवन्! परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवानासुरपुष्पदर्शनात् ।। ८१ ।।
क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ।। ८२ ।।
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ।। ८३ ।।

(७९) (उन्होंने देखा कि) तपोरत तृणबिन्दु महर्षि की दुश्चर तपस्या से शंकित इन्द्र ने समाधिभङ्ग करने वाली हरिणी नामक अप्सरा को उनके पास भेजा। **(८०)** उस अप्सरा ने महर्षि के समक्ष आकर्षक चेष्टाएँ करना आरम्भ किया। तप में विघ्न की चेष्टा से महर्षि को क्षोभ हो गया। उन्होंने उसे 'मानुषी' होने का शाप दे दिया। उनका क्षोभ शमरूपी वेला के लिए प्रलयोर्मि था। **(८१)** भगवन्! यह जन तो परवश है, मेरा प्रतिकूल आचरण क्षमा करें। यह कहकर वह अप्सरा विनत हो गई तो महर्षि ने उसके पृथिवी लोक में रहने का शाप स्वर्गलोक के पुष्प के दर्शन तक सीमित कर दिया। **(८२)** वह विदर्भराज के वंश में पैदा हुई और चिरकाल तक तुम्हारी रानी रहकर स्वर्ग से गिरा पुष्प पा गई, जिससे उसका शाप निवृत्त हो गया। वह विवश थी। **(८३)** इस कारण उसके न रहने की चिन्ता छोड़िए। जो उत्पन्न हुआ है उसे जाना ही है। तुम पृथिवी की देखभाल करो। राजा कलत्रवान् माने जाते हैं पृथिवी से ही।

८०. तपसा=स तपः; बन्ध=घात; प्रमुखा=मदना; विभ्रमाम्=दर्शनाम्; र्म्मिणा=र्म्मिवान्; मुनिः=भुवि। ८१. जनः=यतः; चरितम्=चरणं; क्षमस्व=सहस्व; स्पृशं=स्पृशां, स्पृशन्, क्षितं स्पृशं; पुष्प=माल्य। क्षितिस्पृक्त्वायावधिः सुरपुष्पदर्शनमित्यर्थः। इदमेव मानुषीत्वं यत् क्षितिस्पृक्त्वम्। दिव्यानां क्षितिस्पर्शस्य निरयत्वेन स्वीकृतत्वात् 'मनुष्यत्वं हि देवानां निरय'इति। उपनतां प्रपन्नाम्। ८२. उपलब्धवती=अपलब्धवती म.हे.अ.; उत्तरार्धपाठौ — (१) 'उपलब्धवती तनुं जहौ सुखतः शापनिवृत्तिकारणम्'। (२) 'मुनिशापनिवृत्तिकारणं ध्रुवमापाशु यतस्तनुं जहौ'। ८३. उत्पत्तिमतामुप= उत्पत्तिमतो व्यवस्थिता/तः सुनिश्चिता/ पत्तिरिव व्यवस्थिता। उपस्थिता उत्पत्तिक्षणादेवेत्यभिप्रायः व. म.हे.। कस्यापि कदापि विपन्नत्वदर्शनात्।

उदये यदवाच्यमुज्झता श्रुतमाविष्कृतमात्मनस्त्वया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ।। ८४।।
रुदता कुत एव सा पुनर्भवता नानुमृताऽप्यवाप्यते ।
परलोकजुषां स्वकर्म्मभिर्गतयो भिन्नपथा हि देहिनाम् ।। ८५ ।।
अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः ।
स्वजनाश्रु किलातिसन्ततं दहति प्रेतमिति प्रचक्षते ।। ८६ ।।
मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ।। ८७।।
अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ।। ८८।।

(८४) आपने अभ्युदय के समय भी अवाच्य को छोड़कर जो अपनी विज्ञता प्रकट की है, मन का संताप आने पर भी वीरता के साथ उसे दिखलाइए। (८५) आपके आँसू बहाने से तो क्या शरीर छोड़ देने से भी वह आपको मिलने वाली नहीं। परलोक गए देहधारियों की अपने कर्म के अनुसार अलग–अलग होती हैं गतियाँ। (८६) मन से शोक अलग कर अपनी कुटुम्बिनी को निवापाञ्जलि देकर अनुगृहीत करो। दिवंगत प्राणी को स्वजनों के अश्रु अधिक तीव्रता के साथ दाह पहुँचाते हैं। (८७) शरीरियों के लिए मरण ही स्वाभाविक है। उनके लिए जीवन ही है अस्वाभाविक। यदि वह एक क्षण भी साँस ले लेता है तो वह निश्चित रूप से लाभ में रहता है। (८८) प्रियनाश को हृदयशल्य नासमझ लोग ही मानते हैं। जो 'स्थिरधी' होते हैं वे उसे ही कुशलता के साथ संपन्न 'शल्योद्धार' समझते हैं।

८४. **यदवाच्य=मदवाच्य** म.अ., **मदकार्य, यदकार्य, यदि वाक्य, वद वाक्य; उज्झता=अघ्नता; आत्मनस्त्वया=आत्मवत्तया, आत्मवत्त्वया; तदुपस्थिते=समुपस्थिते,** व.; **ज्वरे=शुचे। अशुद्धमिदम्, शुक्शब्दस्य नियतैकस्त्रीलिङ्गत्वात्।** ८५. **नुमृता= मृतेन; प्यवाप्यते=मृतेन लभ्यते, मृतेऽप्यते, मृतेरवाप्यते, मृते च लभ्यते; स्वकर्म्म=सुकर्म्म; हि देहिनाम्=शरीरिणाम्।**

इतः परमन्यदेव समानार्थकं पद्यमिदं क्वचिदुपलभ्यते–

रुदितेन न सा निवर्त्तते नृप! तत् तावदनर्थकं तव ।
न भवाननुसंस्थितोऽपि तां लभते कर्म्मवशा हि देहिनः ।।

अत्रापि भेदः पाठस्य– 'नृप तावत् तदनर्थकं तव/दपार्थकं तव/ कं च तत्'। वल्लभमते पाठान्तरमेवेदम्। ८६. **अपशोक=अवशोक; अतिसन्ततम्=अतिषिञ्चितम्, अतिपातितम्; प्रचक्षते= 'प्र–च/व–क्ष्यते'।** ८७. **जीवितम्=जीवनम्; असौ=अयम्।** ८८. **अव=अधि; मूढ=गूढ; स्थिर=इतर;**

स्वशरीरशरीरिणावपि क्षणसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद् वद बाह्यैर्विषयैर्विपश्चितः ।। ८९।।
न पृथग्जनवच्छुचो वशं वशिनामुत्तम! गन्तुमर्हसि ।
द्रुमसानुमतोः किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ।। ९०।।
स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ।। ९१।।
तेनाष्टौ परिगमिताः समाः कथञ्चिद् बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणिकसमागमोत्सवैश्च।। ९२।।

तस्य प्रसह्य! हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमन–त्वरया स मेने ।। ९३।।

(८९) जब अपने शरीर और शरीरी भी मिलते बिछुड़ते हैं तब बाह्य विषयों का विरह किसी विद्वान् को कैसे दे सकता है अनुताप। (९०) साधारण व्यक्ति के समान शोकावेग में आना आपको शोभा नहीं देता। आप तो वशियों में भी उत्तम हैं। वृक्ष और पर्वत में क्या रहेगा अन्तर यदि हवा चलने पर दोनों ही हिल उठें।' (९१) उदारमति गुरुजी के ये वचन अज ने 'तथा' कहकर स्वीकार तो कर लिए, परन्तु वे उसके शोक से संतप्त हृदय में स्थान नहीं पा सके और गुरुजी के ही पास वापस लौट गए। (९२) उसने जिस किसी प्रकार आठ वर्ष बिताए, क्योंकि पुत्र छोटा था। इस बीच उसने वाणी की प्रियता नहीं खोई। इस बीच वह अपना मन प्रिया के चित्र, प्रिया की प्रतिकृति आदि को देख देखकर बहलाता रहा। कभी कभी स्वप्न में उसे प्रियासमागम का क्षणिक सुख भी मिल जाता था। (९३) शोक के काँटे से उसका हृदय प्लक्ष (पाकड़) की जड़ से सौधतल के समान जबरन विदीर्ण हो चुका था। यह काँटा उसके लिए प्राण लेने वाला था और वैद्यों के लिए असाध्य था, तथापि उसे उसने लाभ माना, क्योंकि उससे उसे

तु=च; तु तदेव=सुखदेव। ८९. क्षण=श्रुत म., श्रित, स्मृत अ., स्मृति, धृत व., कृत, स्थिर, प्रिय, श्रुति; यदा=यदि हे.अ., स्मृतौ व.; किम्=कम्, कः; इवा=इहा; अनु=अभि व.; वद=नृप। ९०. सानुमतोः=सानुमतां; द्वितयेऽपि ते चलाः=द्वयमेति चापलम्, द्वितयेऽपि चापलाः, द्वितये च लोचने। ९१. मतेः=मतिः। ९२. अष्टौ=अस्यै; सूनृतेन=भाषितेन; सादृश्य=सादर्श। ९३. प्रसह्य=प्रविश्य; बिभेद=बबाधे; भिषजाम=भिषजाभि; गमनत्वरया=गमने त्वरया म.हे.अ.; स मेने=नुमेने।

सम्यग्विनीतमथ वर्महरं कुमार–
मादिश्य रक्षणविधौ विधिवत् प्रजानाम् ।
रोगोपसृष्ट–तनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमति–र्नृपतिर्बभूव ।। ९४।।
तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो–
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकतररुचा संगत: कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ।। ९५।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ अजविलापो नाम
अष्टम: सर्ग:।। ८।।

प्रियानुगमन में शीघ्रता दिखाई दी । (९४) इसके पश्चात् उस राजा अज ने ठीक से शिक्षित, विनीत और कवचधारण करने योग्य पुत्र पर प्रजापालन का दायित्व विधिवत् डाल कर अपने रोग से उपसृष्ट शरीर रूपी दु:खदायी आवास को छोड़ने की इच्छा से आमरण अनशन करना शुरू कर दिया। उसका रोग वैद्यों के लिए असाध्य था। (९५) अज ने गङ्गा और सरयू के संगम की पुण्य भूमि में छोड़ दिया शरीर। वह तुरन्त देवताओं में गिन लिया गया। वह पूर्ववर्त्ती आकार से अधिक कान्तिमान् शरीर वाली प्रिया के साथ नन्दनवन में लीलागारों में रमण करने लगा।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में अजविलाप नामक
अष्टम सर्ग पूर्ण हुआ।। ८।।

---

९४. हरं=धरं; विधौ=निधौ; रोगोप=भोगोप, रागोप, शोकोप, शोकोपविष्ट। नमतिर्नृपति=वेशनपरो म.; ९५. तीर्थे तोय=तोये तीर्थ; त्यागात्=यासात्; काराधिकतररुचा=पूर्वाकाराधिकचतुरया व.अ.; नन्दनाभ्यन्तरेषु= न क्षमाभ्यन्तरेषु।

।। नवमः सर्गः।।

पितुरनन्तरमुत्तरकोसलान् समधिगम्य समाधिजितेन्द्रियः ।
दशरथः प्रशशास महारथो यमवतामवताञ्च धुरि स्थितः ।। १।।
अधिगतं विधिवद् यदपालयत् प्रकृतिमण्डलमात्मकुलोचितम् ।
अभवदस्य ततो गुणवत्तरं सनगरं नगरन्ध्रकरौजसः ।। २।।
उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्म्मणाम् ।
बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम् ।। ३।।
जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः ।
कृषिरभूत् फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ।। ४।।
दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् ।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ।। ५।।

(१) पिता (अज) के बाद उत्तर कोसल जनपद को प्राप्त कर दशरथ ने उसका शासन किया। दशरथ शमवानों में भी अग्रसर थे और रक्षकों में भी, वे महारथी भी थे और समाधि से जितेन्द्रिय भी। (२) इसने प्राप्त प्रकृतिमण्डल का पालन विधिवत् किया। प्रकृतिमण्डल उसके अपने गुणों के अनुरूप था। इस कारण इसके लिए नगरसहित वह(प्रकृतिमण्डल) अधिक गुणवान् (लाभकर) सिद्ध हुआ। क्यों न हो यह, वह कुमार कार्त्तिकेय जैसा तेजस्वी जो था। (३) दो ही को मनीषीजन कार्य कर देने वालों का श्रम दूर करने वाला कहते, इन्द्र को और मनु नामक दण्डधर के वंश में उत्पन्न इस दशरथ को । दोनों समय से वर्षा करते रहते थे। (४) इसके जनपद में बीमारी ने पैर नहीं दिया, शत्रुजनित अभिभव की तो बात ही दूर थी। उसके समय में कृषि पर्याप्त फल देती रही। वह शमरत था और अमरों (देवताओं) जैसा तेजस्वी। (कृषि / क्षिति।) (५) दश दिगन्तों को जीतने वाले महाराज रघु से जैसे पृथिवी ने श्रीवृद्धि की और जैसे उनके पश्चात् महाराज अज से उसी प्रकार उस (दशरथ) को स्वामी पाकर पृथिवी ने और अधिक श्रीवृद्धि की ही, नहीं की ऐसा नहीं। उसके पराक्रम में किसी भी प्रकार की कमी नहीं थी।

---

१. कोसलान् = कोशलान्, कोशलाम्। २. गुणवत्तरं = गुणतत्परम् व.हे.अ.ना., गुणवत्परम्। ३. बल = बलि। ४. अभि = परि; सपत्नजः = सपत्नतः ; कृषि=क्षिति म.। ५. ततः परम् = ततष्परम्।

समतया वसुवृष्टिविसर्जनैर्नियमनादसताञ्च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ।। ६ ।।
न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु ।
तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ।। ७ ।।
न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ।। ८ ।।
उदयमस्तमयं च रघद्वहादुभयमानशिरे वसुधाधिपाः ।
स हि निदेशमलङ्घयतामभूत् सुहृदयोहृदयः प्रतिगर्ज्जताम् ।। ९ ।।
अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः ।
जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः ।। १० ।।

(६) उस राजा दशरथ ने (१) समता, (२) वसु (स्वर्ण/धन) की वृष्टि और विसर्जनों तथा (३) असत् व्यक्ति के नियमन से अनुकरण किया क्रमशः (१) यम, (२) कुबेर तथा (३) वरुण नामक लोकपालों का। कान्ति में तो वह अरुण से आगे था ही। **(७)** दशरथ का स्वयं पर नियन्त्रण रहता था, इसलिए, उसके अभ्युदय के मार्ग में न तो बाधक बना आखेट, न द्यूत और न चन्द्रकला की प्रतिमा से अलंकृत मधु। इसी प्रकार सौन्दर्यशालिनी नवयौवना भी उसे खींच न सकीं प्रियतम बनाकर। इन्हीं को कहा जाता है व्यसन। **(८)** दशरथ को क्रोध नहीं आता था। उसने सर्वोपरि शासक इन्द्र के समक्ष भी कभी दीन वाणी नहीं बोली। मिथ्याभाषण हँसी में भी नहीं किया और शत्रु से भी कभी कटु वचन नहीं कहा। **(९)** राजा लोगों ने राजा दशरथ से दोनों ही प्राप्त किए उदय भी और अस्त भी। आज्ञा का उल्लंघन न करने वालों के लिए वह सुहृद् था और उलट कर गुर्राने वालों के लिए लौहहृदय। **(१०)** हाथ में धनुष लेकर उस अकेले (दशरथ) ने समुद्ररशना पृथिवी को जीत लिया था, हाथी और तेज घोड़ों की सेना तो उसके पीछे जयघोषमात्र करती चल रही थी।

६. वसु स्वर्णमपि। द्र० रघुवंश ५.२९–३२। ७. प्रियतमा००हरत् = प्रियतमाः ०० हरन् व.। ८. प्रभव = प्रस; न च = अप; जनेष्वपि = जनेन च। ९. उभय = द्वितय; हि = ह; दयः प्रति = दयष्प्रति। 'हृदयोहृदयो व्यतिलङ्घिनाम्' इति तु पाठे परिकल्पिते यमकस्यापि निर्वाहः। १०. हिं=तु म.। हस्तालेखास्तु केचन ९–१० पद्ययोः प्रक्षिप्तत्वमप्यभ्यमन्यन्त।

अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः ।
विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ॥११॥
शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरन्दरः ।
स शरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः ॥१२॥
चरणयोर् नखरागसमृद्धिभिर् मुकुटरत्नमरीचिभिरस्पृशन् ।
नृपतयः शतशो मरुतो यथा शतमखं तमखण्डितपौरुषम् ॥१३॥
निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।
समनुकम्प्य सपत्नपरिग्रहाननलकानलकाऽनवमां पुरीम् ॥१४॥

(११) कुबेर जैसी संपत्ति वाले दशरथ ने एक रथ और सेना लेकर पूरी पृथिवी जीत ली तो समुद्र बने विजयदुन्दुभि, उनकी ध्वनि गम्भीर थी ही। (१२) इन्द्र ने तो तीखे वज्र से काटा पर्वतों के पंखों का बल और नए कमल जैसे मुख वाले उस (दशरथ) ने शरवृष्टि करते और गरजते धनुष से शत्रुओं के दलों का बल॥ (पक्ष = राजाओं के पक्ष में दल, पर्वतपक्ष में — पंख।) (१३) सैंकड़ों राजाओं ने उस (दशरथ) के चरणों को छुआ। उनके सिर पर लगे रत्नों की किरणें नखराग से समृद्धि पा रही थी। यह ठीक वैसे ही हुआ जैसे सैंकड़ो देवताओं द्वारा देवेन्द्र के चरण छूते समय होता है। (१४) वह अपनी दिग्विजय यात्रा में समुद्रतट तक पहुँचकर अपनी, देवपुरी सुधर्मा से किसी भी प्रकार अन्यून पुरी लौट आया। बीच में अनुग्रह करता आया शत्रुओं की अलकविहीन (विधवा) पत्नियों पर, उनके सचिवों ने अपने बाल राजकुमारों से दशरथ को हाथ जुड़वाकर प्रणाम कराए।

११. इतः परं पद्यान्तरम्

जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान् ।
स रिपुदारगणानकरोद् बलादनलकानलकाधिपविक्रमः ॥

अत्रापि पाठभेदः अनुचिता=अपचिता। 'स रिपुदारमदारमणानकरोद् बला' इति तूत्तरार्धभेदः।

१२. शमितपक्षबलः शतकोटिना=स्फुरितकोटिसहस्रमरीचिना; शतको=शितको। इतः परं पद्यम्

स्फुरित–कोटिसहस्रमरीचिना समचिनोत् कुलिशेन हरिर्यशः ।
स धनुषा बहु/युधि सायकवर्षिणा स्वनवता नवतामरसाननः ॥ व.

१४. अलकानवमां = अलकामिव तां।

उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः ।
श्रियमवेक्ष्य च रन्ध्रचलामभूदनलसोऽनलसोमसमद्युतिः ।।१५।।
तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभुवं च पतिव्रता ।
नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ।।१६।।
तमलभन्त पतिं पतिदेवताः शिखरिणामिव सागरमापगाः ।
मगधकोसलकेकयशासिनां दुहितरोऽहितरोपितमार्गणम् ।।१७।।
प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः ।
उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ।।१८।।
स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः ।
स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ।।१९।।

(१५) मण्डलनाभि बने दशरथ ने अन्य किसी पर श्वेतच्छत्र उदित नहीं होने दिया, किन्तु लक्ष्मी को छिद्र पाकर चञ्चल देखकर वह सदा निस्तन्द्र रहता रहा। वह दोनों के ही समान था अग्नि के समान (प्रतापी) भी और चन्द्र के समान (कान्त) भी। (मण्डलनाभि के लिए द्र. चित्र रघुवंश साहित्य अकादमी से।) (१६) उस ककुत्स्थवंशीय दशरथ को या स्वभूपुरुष (विष्णु) को छोड़कर पतिव्रता लक्ष्मी (सकमला देवता) अन्य किस राजा को आश्रय बना सकती थी, जो अर्थियों (याचकों) में लाघवरहित हो? (१७) शत्रुओं पर बाण रोपित कर देने वाले उस दशरथ को 'मगध, कोसल और केकय' के राजाओं की पुत्रियों ने पति के रूप में प्राप्त किया, उसी प्रकार जिस प्रकार पर्वतों की पुत्री नदियाँ सागर को प्राप्त करती हैं। (१८) तीन रानियों और तीन शक्तियों से युक्त दशरथ ऐसे लगे जैसे प्रजा को कर्त्तव्यरत रखने के लिए स्वर्ग से इन्द्र पृथिवी पर आ गए हों। इन्द्र के समान दशरथ भी शत्रुघाती योगों में दक्ष था। (१९) युद्ध में वह इन्द्र का सहायक बना और उस महारथी ने सुरबालाओं से अपने भुजवीर्य के गीत गववाए ऊँचे स्वर में। वह अपने शरों के बल पर निर्भीक था।

१५. अनुदिता=अनुचिता; श्रियमवेक्ष्य च रन्ध्रचला=अ/न जितमस्ति नृपास्पद। अत्र भीमसेनदत्तं चित्रमस्माकं साहित्याकादमीसंस्करणे दृश्यम्। १६. भुवम्=वहम्; नृपति=न पति। १७. मगध=मलय व.; कोसलकेकय=के/कै—कयको/कौ—सल; शासिनाम्=वासिनाम् । १८. हरिहय इन्द्रः, तथा चात्रैव ९.२३,३.४३। १९. रथः = यशाः, भुजः; वीर्यम=गीतम हे.; उच्छ्रितम्=ऊर्जितम्।

क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः ।
कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः ।। २० ।।
अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम् ।
अधिवसंस्तनुमध्वर–दीक्षितामसमभासमभासयदीश्वरः ।। २१ ।।
अवभृथप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः ।
नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः ।। २२ ।।
असकृदेव हि तेन तरस्विना हरिहयाग्रसरेण धनुर्भृता ।
दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम् ।। २३ ।।
अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् ।
यम–कुबेर–जलेश्वर–वज्रिणां समधुरं मधुरञ्चितविक्रमम् ।। २४ ।।

(२०) उसने शुरू किए यज्ञानुष्ठान। उस समय वह राजमुकुट उतारे रहा। उसने अपने भुजबल पर दिग्दिगन्तों से इकट्ठी की सम्पदा से तमसा और सरयू के तटों पर सुवर्ण निर्मित अनेक यूप खड़े कर दिए थे। दशरथ तम (शोक, दुःख, अज्ञान) से रहित था। (२१) यज्ञ में वह अजिन और दण्ड धारण किए रहता, कुश मेखला पहने रहता, हाथ में मृगशृङ्ग लिए रहता। इस प्रकार यज्ञ में दीक्षित वह अद्वितीय तेज से युक्त अष्टमूर्त्ति भगवान् शिव की (उग्र नामक) मूर्त्ति दिखाई देता। (२२) अवभृथ (यज्ञान्तस्नान) में प्रयत, इन्द्रियसंयमी और सुरसमाज में बैठने का अभ्यासी वह अपना उन्नत सिर पानी बरसाने वाले इन्द्र के ही समक्ष झुकाता था। (२३) उस तरस्वी ने एकाधिक बार धनुष धारण कर इन्द्र के आगे युद्ध यात्रा करते हुए सूर्य की ओर उठी धूल को राक्षसों के रक्त से रोक दिया था। (२४) अब एक प्रकार से, यम, कुबेर, वरुण और इन्द्र (इन चारों लोकपालों) जैसे और अञ्चित मुद्रा के पादचार वाले उस नए और प्रधान पृथिवीपति (दशरथ) की नए नए पुष्पों से सेवा करने के लिए उपस्थित हुआ (ऋतुराज) वसन्त।

२०. हृत = हत; च्छ्रय = च्चय। २१. भृतम्= धराम् हे., **भृताम्, युताम्; यतगिरं= जितगिरम्** व.; **भासम = भाः सम** म.हे.। भाः दीप्तिर्यस्यां तां तनुम् भगवतो ऽष्टमूर्त्तेरुग्रनाम्नो विग्रहस्य समावेशादित्यर्थः। भासतिश्चौरादिकः। **२२. नियते = निजिते, निभृते, विजिते, ऽपि जिते** व.। **२३. हरिहय इन्द्रः**। द्र० अत्रैव पद्यं १८। **देवहि तेन = एकरथेन** म.अ.ना.; **भृता = भृताम्। २४. समाववृते = महेन्द्रसमं; तमिव = तमनु; यमकुबेरजलेश्वरवज्रिणां = उपययौ भुजगेन महीभृता।** अत्र रूपान्तरम्–

अथ महेन्द्रसमं कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् ।
उपययौ भुजगेन महीभृता समधुरं मधुरञ्चितविक्रमम् ।।

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्त्तितवाहनः ।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयन्नगमत्यजत् ।। २५।।
कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् ।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् ।। २६।।
नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः ।
अभिययुः सरसो मधुसम्भृतां कमलिनीमलिनीरपतत्रिणः ।। २७।।
कुसुममेव न केवलमार्त्तवं नवमशोकतरोः स्मरदीपनम् ।
किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः ।। २८।।
विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः ।
मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः ।। २९।।

(२५) अब सूर्य उत्तरायण हो गए। सारथि से रथ उत्तर की ओर मुड़वाकर सूर्य भगवान् ने ठण्ड को निगृहीत करते हुए दिशाओं के मुख विमल कर दिए और छोड़ दिया मलयाचल। (२६) वृक्षों वाली वनस्थलियों में उतरकर मधु क्रम से प्रकट हुआ, पहले निकले पुष्प, फिर दिखलाई पड़े नव पल्लव और उसके बाद सुनाई दी भौरों की गुंजार तथा कोयलों की कूक। (२७) सरोवरों में भ्रमर और जलपक्षी मधु से भरी कमलिनी की ओर चल पड़े, वैसे ही जैसे न्याय से ब्टोरी और बढ़ी राजलक्ष्मी की ओर दौड़ने लगते हैं याचक। (२८) अशोक तरु कामियों पर दोहरी मार कर रहा था। केवल पुष्प ही उसके स्मर को दीप्त नहीं कर रहे थे, विलासियों के कान में लगा उसका किसलयप्रसव भी मादक बना हुआ था। (२९) मधुदान में विशारद कुरबक वृक्ष भौरो में गुंजार के और बड़े कारण बन रहे थे। वे ऐसे लग रहे थे जैसे वसन्त ने उपवन लक्ष्मी पर नए पत्रविशेषक (मॉडने) माड़ रखे हों।

२५. निग्रहै = निर्ग्रहै, विग्रहै; नगम = गिरिम्।
अतः परं पद्यम् — हिमविवर्णितचन्दनपल्लवं विरहयन् मलयाद्रिमुदङ्मुखः ।
विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः ।।

२६. षट्पदकोकिल = कोकिलषट्पद म.अ.ना.। २७. अभि = अनु; सरसः = शतशः। २८. किसल= किशल। २९. लिहाम् = कृताम् हे.अ.ना.।

अत्र पद्यान्तरद्वयम्— दशनचन्द्रिकया व्यवभासितं हसितमासवगन्धि मधोरिव ।
तिलकपुष्पमसेव्यत षट्पदैः शुचिरसं चिरसञ्चितमीप्सुभिः ।। तिलक=बकुल।
अनलसान्यभृतानलसान्मनः कमलधूलिभृता मदनेरिता ।
कुसुमभारनताध्वगयोषितामसमशोकमशोकलताऽकरोत् ।।
धूलि=रेणु; भृता=मुचा; मदने=मरुते।

सुवदनावदनाऽऽसवसंभृतस्तदनुवादिगुणः कुसुमोद्‌गमः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ।। ३० ।।
सुरभिसङ्गमजं वनमालया नवपलाशमधार्यत भङ्गुरम् ।
प्रणयिदत्तमिवार्द्रनखक्षतं प्रमदया मदयापितलज्जया ।। ३१ ।।
व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान् हिमम् ।। ३२ ।।
अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः सकलिका कलिकामजितामपि ।। ३३ ।।

(३०) सुमुखी सुन्दरी ने मुखासव का कुल्ला किया तो उसी जैसी गन्ध लिए हुआ कुसुमोद्‌गम। उससे बकुल वृक्ष आकुल हो उठे टूटती लम्बी–लम्बी भ्रमर पंक्तियों से। (३१) वनमाला ने सुरभिसंगम से उत्पन्न टेढ़ा नवपलाश (पुष्प) धारण किया उसी प्रकार जिस प्रकार नशे में लज्जामुक्त कोई प्रमदा रमण के ताजे नखक्षत धारण किए दिखाई देती है। (यह पद्य मल्लिनाथ में नहीं है, परन्तु व्यक्तिविवेक में यही मिलता है)। (३२) सूर्य ने ठण्ड एकदम समाप्त तो नहीं की, परन्तु उसे विरल अवश्य कर दिया। ठण्ड के कारण प्रमदाओं के अधर फट गए थे और जघन की मेखला छूट गई थी। बड़ा दुःसह था यह समय। (३३) सहकार की टहनी ने उन व्यक्तियों के भी मन में मद (नशा) पैदा कर दिया जो कलिकाल में भी काम को जीत चुके थे। सहकार की टहनी के पत्ते मलय पवन से आन्दोलित थे और हिलती टहनियों से लगता था कि वे अभिनय का अभ्यास कर रही हैं। उनमें कलियाँ भी निकल आई थीं।

३०. द्गमः=द्भवः, त्करः हे.। शिथिल इवाऽत्र सुकवेर्यमकप्रक्रमः। तस्य कृते चतुर्थस्य पादस्य स्थाने प्रथमपादस्यादानात्। वकुलमाकुलेति त्वनुप्रासमात्रमेव।

३१. सुरभिसङ्गमजं=मधुसमागमजं व.हे.। व्यक्तिविवेकाद्युद्धृतमपीदं पद्यं मल्लिनाथो नादात्। एतस्य स्थाने तदभिमतं पद्यान्तरमिदम्–

उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिदत्तमिवार्द्रनखक्षतं प्रमदया मदयापितलज्जया ।।

मुकुल=कुसुम; शोभ=रोच; यापित=यार्पित।

३२. अत्र पद्यान्तरम्– परभृता मदनक्षतचेतसां प्रियसखी लघुवागिव योषिताम् ।
प्रियतमानकरोत् कलहान्तरे मृदुरवा दुरवापसमागमान् ।। हे.

भृता=भृतां; चेतसां=चेतसं; योषितां=योषितम्; कलहा=विरहा; वाप = वाप्त। ३३. उद्यता=उदिता।

प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः ।
सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ।। ३४।।
श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ।। ३५।।
ललितविभ्रमहासविचक्षणं सुरभिगन्धपराजितकेसरम् ।
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितम् ।। ३६।।

(३४) पहले कोयल की कूक यदा कदा सुनाई पड़ती थी, मुग्धा वधू के बोल के समान। फिर सुरभिगन्ध से भरी पुष्पित वनराजियों में वे पर्याप्त मात्रा में सुनाई पड़ने लगीं। (तासु मिता – तास्वमिता।) (३५) उपवन की लताओं के किसयल पवन से आन्दोलित थे। वे लग रहे थे ऐसे जैसे लययुक्त (नृत्त) हस्त हों। उनमें कान को अच्छी लगती भ्रमरझंकार की गीति थी ही। जो कुसुम थे, वे थे मानों कोमल दन्त। (३६) अङ्गनाओं ने पतिजनों के साथ मधु का भोग किया। भोग में मुख्य था स्मर, जिसमें रस अखण्डित था, ललित थी विभ्रमहास की मनोहरता और सुगन्ध ऐसी थी जिससे केसर पराजित हो रहा था।

३४. अत्र पद्यान्तरद्वयम्

तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनुषङ्गसुगन्धिभिः ।
कलमगीयत भृङ्गविलासिभिः स्मरयुतैरयुतैरबलासखैः ।।

विलासिभिः=विलासिनाम्।

गमयितुं प्रभुरेष सुखेन मां न महतीं बत पान्थवधूजनः ।
इति दयात इवाऽभवदायता न रजनी रजनीशवती मधौ ।। व.हे.

दयात इवा = दयालुतया, दयात इवा। ३५. सुख=सुखा; स्वन=स्वर; कोमल=शेखर, केसर।

अत्र पद्यान्तरम्–

लघयति स्म न पत्यपराधजां न सहकारतरुस्तरुणीकृताम् ।
कुसुमितो नमितोऽलिभिरुन्मदैः स्मरसमाधिकरोऽधिकरोषताम् ।।

जां=जं; कृताम्=कृतम्, धृतिम्, धृतम्, भृताम्; करोऽधि=समाधि; रोषताम्=षिताम्; षतम्। ३६. हास=बन्ध व.म.; विचक्षणं=मनोहरम्, गन्ध=गन्धि; मधुम=मद व.; मधुपदस्यार्धर्चादिपठित्वात् पुंस्यपि पाठः, अर्धर्चादयः पुंसि चेत्यनुरोधात्। तथाचोक्तिः –

मकरन्दस्य मद्यस्य माकन्दस्य च वाचकः ।
अर्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधुरि –।। ति।

केसरपराजये गन्धगतं सौरभ्यमेव तन्त्रमिति धर्मिपरो गन्धीतीन्नन्तः पाठो नातीव श्लाघ्यः।

शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथसिञ्जितमेखलाः ।
विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहङ्गमाः ।। ३७।।
उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।
सदृशमिष्टसमागमनिर्वृतिं वनितयाऽनितया रजनीवधूः ।। ३८।।
अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।
कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ।। ३९।।
हुतहुताशनदीप्ति वनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ।। ४०।।

(३७) गृहदीर्घिका में कमल खिल उठे तथा जलपक्षी मदकल और चञ्चल हो उठे। वे ऐसी स्त्रियों जैसी लगने लगीं जिनके चेहरे स्मित से अधिक चारु हो उठे हों तथा जिनकी मेखला श्लथ होकर बजने लगी हो। **(३८)** वसन्त आया तो रजनी खण्डिता (नायिका) बन गई, जिसे इष्टसमागम–सुख प्राप्त न हो रहा हो ऐसी नायिका के समान और जो दुर्बल होती जाती है, उदयकालीन हिमकर बिम्बरूपी मुख पड़ता जाता है पीला। (नायिका के समान कहना अनावश्यक। वह वाक्यार्थ योजना से स्त्रीलिङ्ग सामर्थ्य के द्वारा ही प्रतीत हो सकता था।) **(३९)** अब चन्द्रोदय काम (के बाणों) को किरणों से प्रदीप्त करने लगा, जिनका केतु मकर (मीन) अधिक स्पष्ट हो गया था. (मीनकेतु काम)। तुषार हट गया था और चन्द्र की कान्ति अधिक उज्ज्वल दिखाई देने लगी थी। उनसे सुरतसंग की थकावट मिटने लगी थी। **(४०)** युवतियाँ अब उस पुष्प (कर्णिकारमञ्जरी) को अलक में धारण करने लगी थीं, जिनकी, पँखुड़ियाँ खिली होतीं, जिनका रंग आहुति पड़ी अग्नि जैसा हुआ करता था और वनश्री (रूपी सुहागिन) के लिए कनकाभरण का प्रतिनिधि बना रहता।

३७. अत्र हेमाद्रिभट्टेन मूलतया पठितं पद्यत्रयम्–

रसयति स्म रसातिशयात् सुधाभ्रमकरं मकरन्दमलिव्रजः ।
सह निजाङ्गनयाऽभिसमुच्छ्वसन् कमलकोमलकोषनिषण्णया ।।
विहरति स्म रतिस्मरसुन्दरं तरुतलेष्वधिगन्धसुगन्धिषु ।
विशदचन्द्रकरं सुखमारुतं कुसुमितद्रुममुन्मदकोकिलम् ।।
विशदचन्द्रकरं सुखमारुतं कुसुमितद्रुममुन्मदकोकिलम् ।
तदुपभोगरसं हिमवर्षिणः परमृतोरमृतोपमतां ययौ ।। व.हे.

३८. अत्रोत्तरार्द्धे पाठः 'ग/श–मयितुं प्रियसञ्जनितां व्यथा–मस/थां न स–हया सह यामवती स्त्रिया।' व.हे. ३९. सङ्ग = राग व.हे.ना.; केतनम् = केतकम्। ४०. राहितं = रेंचितम्।

अलिभिरञ्जनबिन्दुमनोहरैः कुसुमपङ्क्तिनिपातिभिरङ्कितः ।
न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव ।। ४१ ।।
अमदयन्मधुगन्धसनाथया किसलयाधरसङ्गतया मनः ।
कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ।। ४२ ।।
अरुणरागनिषे–धि/वि–भिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ।। ४३ ।।
उपचितावयवा शुचिभिः कणैरलि–कदम्बक–योगमुपेयुषी ।
सदृशकान्तिरलक्ष्यत मञ्जरी तिलकजालकजालकमौक्तिकैः ।। ४४ ।।
ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः ।
कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ।। ४५ ।।

(४१) तिलक (पुष्प) वनस्थली को वैसे ही सुशोभित कर रहा था जैसे प्रमदाओं को तिलक शोभित करता है। तिलक में मञ्जरियाँ निकल आई थीं और उन की पङ्क्तियों पर अञ्जन की टिपकी सी मनोहर भौरों की पंक्तियों की पङ्क्तियाँ टूटने लगी थीं। **(४२)** अब नवमल्लिका (नेवारी/रातरानी) में मदगन्ध आ भरी, अधर जैसी कोपलें भी आ गईं, खिले पुष्पों ने किया कार्य स्मित हास का और चारु विलासिनी वह संगम सुख में निरत दिखाई दी तरु के साथ। **(४३)** काम की सेना सक्रिय थी। उसने विलासियों का रस केन्द्रित कर दिया केवल अबलाओं तक। काम की सेना के अंग थे अरुणराग को भुला देने वाले अंशुक, कानों में लगे यवाङ्कुर तथा कोयल की कूक। **(४४)** तिलकमञ्जरी (रूपी नायिका) का अंग अंग उजले पराग से मांसल हो चुका था और उस पर भौरें आ चिपके थे। उसकी कान्ति अलकजाल में लगे मोतियों सी दिखाई दे रही थी। **(४५)** भौंरे उधर ही लौट पड़े जिधर उन्हें दिखाई पड़ी कुसुम की पँखुड़ी और पराग। पराग हवा से फैल गया था, अतः, ऐसा लगता था जैसे वह धनुर्धर कामदेव का ध्वजपट हो तथा (वसन्त समय की) ऋतुश्री का छविकर मुखचूर्ण।

४१. अङ्कितः = अञ्चितः। ४२. संगतया मनः = सन्ततया मनः, सन्तत/सङ्गत–रागया व.हे.अ.ना.; **संभृतया=संगतया, भारभृता, चापभृता; नव/वन–मल्लिका/मालिका** व.म.हे.अ.ना.। **लासिनी=लासिनः** व.हे.अ.ना., **विलासिनाम्, विलासिनीः** म.। **४३. षेधि = षेवि** म.हे.अ.ना.।

अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे भुजलतां जळतामबलाजनः ।। ४६ ।।
त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ।। ४७ ।।
अथ यथासुखमार्त्तवमुत्सवं समनुभूय विलसवतीसखः ।
नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसन्निभः ।। ४८ ।।
परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम् ।
श्रमजयात् प्रगुणां च करोत्यसौ तनुमतोनुमतोधिकृतैर्ययौ ।। ४९ ।।
मृगवनोपगमक्षमवेषभृद् विपुलकण्ठनिषक्तशरासनः ।
गगनमश्वखुरोद्धतरेणुभिर्नृसविता सवितानमिवाकरोत् ।। ५० ।।

(४६) वसन्तोत्सव में आनन्द लिया गया झूला झूलने के नए उत्सव का। पटु अबलाओं ने भी उसमें आसनरज्जु पकड़ने में भुजलता ढीली कर ली। उनकी इच्छा थी रस्सी छोड़कर प्रियकण्ठ ग्रहण करने की। (४७) 'मान छोड़ो, कलह से कोई लाभ नहीं, नई उमर बीतकर लौटती नहीं'— कोयलों ने जब ऐसा कुछ निवेदन किया तो वनिताएँ कामसिद्धान्त में ही रम गईं। (४८) इस प्रकार विलासवती वनिताओं के साथ उस राजा ने वसन्त ऋतु का मधुमय आनन्द जी भर के लिया। इसके पश्चात् मधु और मन्मथ जैसे उसने चाहा मृगया का आनन्द लेना। (४९) मृगया में बड़े लाभ बतलाए जाते हैं। अभ्यास हो जाता है उससे चल लक्ष्य को मार गिराने का, भय और रोष में उन (लक्ष्यभूत शिकारों) की चेष्टाओं से परिचय हो जाता है और श्रम पर जय पाने का अभ्यास शरीर की चर्बी काट देता है, अतः सचिवों ने पक्ष में सलाह दी और उसकी अनुमति पर दशरथ निकल पड़े। (५०) उसने वेष ऐसा धारण किया जो मृगदाव के अनुरूप था। उसके विपुल कण्ठ मे लगा हुआ था धनुष। उस नृसविता ने घोड़ों के खुरों से उठी रेणु से गगन को ऐसा कर दिया जैसे उसमें वितान तना हो।

४६. मृतु=मृदु; पटुः = पटम्। जलता=जडता व.हे.। यथा अग्निमीडे इति। **४८. अथ = इति। ४९. तदिङ्गित= तदङ्कित** व.; **बोधनम्=बोधितम्, बोधने; यात् प्र=यात्म; त्यसौ=तिसा** हे.; **नुमतोऽधिकृतै=नुमतः सचिवै।** अधिकृताश्चात्र सचिवा एव। **५०. निषक्त=विषक्त; धत=धुत, द्धत, धुर, सविता सविता=सविता स वितान।**

ग्रथितमौलिरसौ वनमालया तनुपलाशसवर्णतनुच्छदः ।
तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ।।५१।।
तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ।
ददृशुरध्वनि तं वनदेवताः सुनयनं नयनन्दितकोसलम् ।।५२।।
श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः ।
स्थिरतुरङ्गमभूमि निपानवन्मृगवयोगवयोपचितं वनम् ।।५३।।
अथ नभस्य इव त्रिदशायुधं कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ।।५४।।
तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्णशारम् ।।५५।।

(५१) वह मृगों से युक्त भूमि (के अनुरूप वेष) में भी सुशोभित हो रहा था। उसने जूड़ा बना रखा था वनमाला से, कवच धारण कर रखा था छोटी–छोटी सी पत्तियों के रंग का और तुरग की उछाल से उसके कुण्डल हिल रहे थे। **(५२)** नयमार्ग से कोसल जनपद को दशरथ ने प्रसन्न कर दिया था। उस सुनयन राजा के दर्शन मार्ग की वनदेवियाँ करती जा रही थीं। वे छोटी छोटी लताओं में स्वयं को छिपाए हुए थीं और भौरों में उनकी दृष्टि दिखाई दे रही थी। **(५३)** वह ऐसे जंगलों में पहुँचा जो हिरन, पक्षी और गवय से भरे हुए थे, जिनमें तुरङ्गमभूमि स्थिर थी और दलदली अलग। उसके पहुँचने के पहले उन स्थानों को श्वगणी (कुत्ते वाले) तथा जालिक (जाल लिए) सैनिकों ने घेर लिया था, फलतः उनसे आग और दस्यु (भय) हट चुके थे। **(५४)** अब उस नर वर (उत्कृष्ट शरीर के मनुष्य) राजा दशरथ ने सुनहली प्रत्यञ्चा चढ़ा कर धनुष हाथ में लिया और हाँका मारकर सिंहों को क्षुभित किया। यह सब उसी प्रकार किया जिस प्रकार सुनहली बिजली से युक्त और गड़गड़ाते मेघों वाला भाद्रपद इन्द्रधनुष से करता है। **(५५)** उसके सामने आया मुख में कुश दबाए मृगयूथ, जिसमें थन पीना चाह रहे हिरन के छौने, हिरनियों की गति रोक रहे थे और सामने चल रहा था गर्वित कृष्णशार (काले धब्बे वाला चितकबरा) मृग ।

५१. तनुप = तरुप व.म.हे.अ.ना., नवप, वनप; तनुच्छदः = परिच्छदः। ५२. तनु=तरु व.हे.। ५३. श्व=स्व; गणि=गुणि हे.; मास्थितं=माश्रितं व., मश्रितम्=मस्थितम्। ५४. संयुतम्=सङ्गतम्। ५५. रेणशा/रेणुसा; मृगाणां=मृगीणां; तदग्र=तदाग्र; शारम्=सारम्।

तत् प्रार्थितं जवनवाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति ।
श्यामीचकार वनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकरैरिवाम्भः ॥ ५६ ॥
लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम् ।
आकर्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ॥ ५७ ॥
तस्यापरेष्वपि मृगेषु शरान् मुमुक्षोः कर्णान्तमेत्य निबिडोऽपि बिभेद मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ॥ ५८ ॥
उत्तस्थुषः सपदि पल्वलपङ्कमध्यान्मुस्ताप्ररोहकवलावयवानुकीर्णम् ।
जग्राह स द्रुतवराहकुलस्य मार्गं सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥ ५९ ॥
तं वाहनादवनतोत्तरकायमीषद् विध्यन्तमुद्धतसटाः प्रतिहन्तुमीषुः ।
नात्मानमस्य विविदुः सहसा वराहा वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ॥ ६० ॥

(५६) तेज गति के घोड़े से तूणीर से बाण खीचे राजा ने ज्योंही उसका पीछा किया, वह तितर बितर हो गया और अपने आकुल दृष्टिपातों से वन को श्याम बना दिया, हवा से डोल रहे नीलकमलों के समुदाय से जल के समान। (५७) इन्द्रतुल्य प्रभाव के दशरथ ने जिस हरिण को लक्ष्य बनाया उसे देखा कि हरिणी अपनी ओट में छिपाना चाह रही है तो कान तक खींचकर भी बाण लौटा लिया। वह स्वयं कामी भी था और दयालु। (५८) दूसरे हिरनों पर भी इसी प्रकार बाण छोड़ना चाह रहे उसकी मुट्ठी कान तक पहुँच कर भी खुल गई। त्रास से उनके नेत्र अत्यधिक चञ्चल हो उठे और उन्होंने दशरथ के नेत्रों के समक्ष ला खड़े किए प्रौढ़ प्रियाओं के विभ्रमपूर्ण नेत्र। (५९) उसे मिला भागकर निकल चुके वराहों का झुण्ड। वह गड्ढे की कीच से निकला था, अतः मोथा के टुकड़ों से मार्ग बिछा हुआ था। मार्ग पर उनकी आर्द्रपदपंक्ति स्पष्ट दिखाई दे रही थी जो आयत थी। इन विशेषताओं से दशरथ ने समझ लिया वराहयूथ उसी रास्ते भागा है। (६०) दशरथ ने कुछ झुककर वराहों को वेधना शुरू किया। वराहों ने अपनी सटा हिलाई और प्रयत्न किया प्रतिप्रहार करने का। उन्हें यह समझ में नहीं आया कि उनके मध्यभाग बाणों से वृक्ष में बिंध चुके थे।

५६. श्यामी=श्यामं; वातेरि=वाय्वीरि; वाम्भः=वार्द्रैः म.अ.ना.। ५७. लक्ष्मी=लक्षी हे.अ.ना., लक्षं; देहम्=कायम् व.; बाणं=चापं। ५८. स्मरयत्सु नेत्रैः=स्मरतः सुनेत्रैः व.म., स्मरतः स्वनेत्रैः। ५९. सपदि = शिशिर व.म.हे.अ.ना.; मुस्ता=गुञ्जा व., गुन्द्रा; नुकीर्णम्=वकीर्णम्। ६०. तं=ते; द्धतस=धृतस; विद्ध=वद्ध; श्रयेषु=श्रितेषु व.।

तेनाभिघातरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः ।
निर्भिद्य विग्रहमशोणितलिप्तपुङ्खस्तं पातयां प्रथममास पपात पश्चात् ।। ६१ ।।
प्रायो विषाणपरिमोक्षलघूत्तमाङ्गान् खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः ।
शृङ्गं स दृप्तविनयाधिकृतः परेषामभ्युच्छ्रितं न ममृषे न तु दीर्घमायुः ।। ६२ ।।
व्याघ्रानभीरभिमुखोत्पतितान् गुहाभ्यः फुल्लासनाग्रविटपानिव वायुरुग्णान् ।
शिक्षाविशेषलघुहस्ततया निमेषात् तूणीचकार शरपूरितवक्त्ररन्ध्रान् ।। ६३ ।।
निर्घ्घातोग्रैः कुञ्जलीनाञ्जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान् ।
नूनं तेषामभ्यसूयापरोऽभूद् वीर्य्योदग्रे राजशब्दे मृगाणाम् ।। ६४ ।।
तान् हत्वा गजकुलबद्धतीव्रवैरान् काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् ।
आत्मानं रणकृतकर्म्मणां गजानामानृण्यं गतमिव मार्ग्गणैरमंस्त ।। ६५ ।।

(६१) चोट लगने से तेजी में आए जंगली भैंसे के नेत्रविवर पर दशरथ ने जो बाण छोड़ा था वह इतनी तेज गति से चला कि उसने शरीर छेद दिया, उस पार भी हो गया और उसमें खून नहीं लग पाया। वह स्वयं बाद में जमीन पर गिरा, उसने पहले गिरा दिया उस महिष को। (६२) राजा ने तीक्ष्ण बाणों से गैडों के सींगों को काटना पर्याप्त समझा, उससे उनके सिर का बोझ हटा और उन्हें हलकेपन का अनुभव हुआ। ऐसा इसलिए कि वह राजा बना था दृप्तजनों को विनय का पाठ पढ़ाने के लिए, इसलिए उसे गैंडों के अत्यधिक बढ़े शृङ्ग ही सह्य नहीं हुए, उनकी दीर्घ आयु नहीं। (६३) दशरथ के सामने गुफाओं से कूद कूद कर प्रकट हुए व्याघ्र। उनसे वह डरा नहीं। वे ऐसे लग रहे थे जैसे आँधी से टूटीं किसी अर्जुनवृक्ष की टहनियाँ हो। उनपर दशरथ ने इस कुशलता के साथ बाण छोड़े कि उनके मुख बाणों से भरकर तूणीर बन गए । (६४) धनुष की प्रत्यञ्चा की गड़गड़ाहट से उसने कुञ्जों में छिपे सिंहों में क्षोभ पैदा कर दिया। निश्चित ही उसे उनके मृगों के 'राज'—शब्द पर आपत्ति थी, (क्योंकि उनका राज शब्द रञ्जनमूलक न होकर आक्रमणमूलक था।) (६५) काकुत्स्थ (दशरथ) ने हाथियों के साथ तीव्र वैर बाँधे और उनके विदारित मस्तकों की मुक्ता नाखूनों में लगाए सिंहों को मारकर स्वयं को हाथियों द्वारा युद्ध में सहायता करने के ऋण से छुड़ा लिया।

६१. वन्यस्य=वध्यस्य; निर्भिद्य=निर्भिन्न; पुङ्खः = शल्यः व.हे.। द्र.रघु. १३.६६, १६.८६। ६२. मोक्ष = मोष; क्षुरप्रैः= क्षुराग्रैः, पृषत्कैः; अभ्यच्छ्रि= अत्युच्छ्रि; ममृषे=सहते; तु=च। ६३. वायु = वात; रुग्णान् = भग्नान् म.अ.ना., भुग्नान्। असनं सर्जतरुः। ६४. ऽभूद् = ऽसौ ; मृगाणाम्=मृगेषु म.। ६५. स्थः कुटि = स्थष्कुटि; कृत=कृति।

चमरान् परितः प्रवर्त्तिताश्वः क्वचिदाकर्ण्णविकृष्टभल्लवर्षी ।
नृपतीनिव तान् वियोज्य सद्यः सितवालव्यजनैर्जगाम शान्तिम् ।। ६६।।
अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबन्धे केशपाशे प्रियायाः ।। ६७।।
तस्य कर्कशविहारसम्भवं स्वेदमाननविलग्नजालकम् ।
आचचाम सतुषारसीकरो भिन्नपल्लवपुटो वनानिलः ।। ६८।।
इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरं धराधिपम् ।
परिवृद्ध–रागमनुबन्ध–सेवया मृगया जहार चतुरेव कामिनी ।। ६९।।
स ललित-कुसुम-प्रवाल-शय्यां ज्वलित-महौषधि-दीपिका-सनाथाम् ।
नरपतिरतिवाहयाम्बभूव क्वचिदसमेतपरिच्छदस् त्रियामाम् ।। ७०।।

(६६) चमरी मृगों के आसपास उसने घोड़ा दौड़ाया। कान तक खींच कर अर्धचन्द्र बाण छोड़े और उन्हें राजाओं के समान सित बालव्यजनों से वियुक्त कर दिया और तब पाई शान्ति। (श्वेत चामर राजचिह्न।) **(६७)** रुचिर कलाप (पिच्छ) का मयूर तो घोड़े के पास से ही उड़ा, परन्तु दशरथ ने उसे बाण का लक्ष्य नहीं बनाया, उसका मन चला गया उसकी प्रियाओं के चित्रवर्ण के पुष्पों से गुँथे केशपाश पर, जो रति के समय खुला था। **(६८)** दशरथ ने जो कर्कश वनविहार किया उससे उसके चेहरे पर पसीने की जो बूँदे निकल आई थीं, उन्हें आचमन कर गया तुषारसीकर से युक्त और पल्लवपुटों को अलग अलग कर देने वाला वनानिल। **(६९)** इस प्रकार मृगया ने दशरथ को चतुरा नायिका के समान सर्वात्मना अपने में ही लग्न कर लिया। वह अन्य सभी कार्य भुला बैठा। उसका राजकाज सचिवों के सहारे चल रहा था, वह स्वयं लगातार लगा था मृगया के सेवन में गहन लगाव के साथ। **(७०)** राजा दशरथ कहीं कहीं जंगल में ही बिना परिच्छद (परिजनों) के रात बिता लेता, जिसमें ललित कुसुम प्रवाल की होती शय्या और

६६. प्र/वि/निं–वर्ति व.हे.; **वि/नि/–कृष्ट=षक्त; भल्ल=बाण; 'वियोज्य सद्यः००जगाम शान्तिम्'= जगाम शान्तिम्** व.। एतत्स्थाने क्वचिदिदं पद्यं लभ्यते–

द्रुतमन्वयत क्वचिच्च यूथं चम–रा/री–णां शर–लून/लग्न–वालधीनाम् ।
नृपतीनिव तान्निनाय शान्तिं शितवालव्यजनैर्वियोज्य सद्यः ।।

६७. लक्ष्यी=लक्षी हे.अ.ना.; **चित्र=छिन्न** अ.ना.; **रति=अति; पाशे=हस्ते; प्रियायाः=सुकेश्याः।**
६८. विलग्न=विषक्त अ.ना.; **सतुषार=सुतुषार; सीकरो=शीकरो, शीतलो** व.अ.ना.; **पुटो=पुटे, युगो, युगे। ६९. धराधिपं=नराधिपं** व., **धरापतिम्** व.ना.; **बन्ध=बद्ध** अ.ना.। **'कामिनी' 'कामिनी कुलकम्'।**
७०. स ललित=सुललित व.म.हे.अ.ना.।

उषसि स गजयूथकर्णतालैः पटहपटुध्वनिभिर्विनीतनिद्रः ।
अरमत मधुरस्वराणि शृण्वन् विहगविकूजितवन्दिमङ्गलानि ।। ७१ ।।
अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरङ्गमेण ।। ७२ ।।
कुम्भपूरणभवः पटुरुच्चैरुच्चचार निनदोऽम्भसि तस्याः ।
तेन स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज ।। ७३ ।।
नृपतेः प्रतिषिद्धमेव तत् कृतवान् पङ्क्तिरथोऽविमृश्य यत् ।
अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः ।। ७४ ।।
हा तातेति क्रन्दितमाकर्ण्य विषण्णस्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं तापादन्तः शल्य इवासीत् क्षितिजोऽपि ।। ७५ ।।

ज्वलित महौषधि बनती दीपिका। (७१) सबेरा होते ही वन में दशरथ को ज़ागते समय राजकीय सम्मान सुलभ था। हाथियों के कानों की ध्वनि बनती पटह (नगाड़े) की तीव्र ध्वनि जिससे उसकी नींद खुल जाती। फिर उसे सुनाई देते पक्षियों के मधुर कलरव, वे बन जाते बन्दियों का प्रभातमङ्गल। (७२) इसी क्रम में एक बार दशरथ ने वन में एक कृष्णमृग का पीछा किया। उसके साथ गए परिजन दूर छूट गए। वे देख नहीं पाए और थकावट से फेन छोड़ रहे घोड़े से तपस्वियों से भरी तमसा नदी तक जा पहुँचे। (७३) वहाँ उसे सुनाई दिया घड़ा भरने से उत्पन्न ऊँचा स्वर। उसे दशरथ समझे हाथी का शब्द और उस ओर शब्दवेधी बाण चला बैठे। (७४) यह कार्य राजा के लिए निषिद्ध था तब भी पङ्क्ति (दश) रथ उसे कर बैठे। पढ़े लिखे जन भी अपथ पर पैर रख देते हैं यदि रजोगुण से उनकी आँखे बन्द हो जाएँ। (७५) 'हा तात' ऐसा क्रन्दन उन्हें सुनाई पड़ा। वे विषाद में डूब गए। उसका कारण खोजते खोजते उन्होंने पाया कि वेंत में छिपे हुए एक मुनिपुत्र के मुख से वह निकल रहा है, जो बाण से विद्ध है और कुम्भ लिए हुए है। स्वयं राजा के अन्तःकरण में शल्य सा चुभ गया।

७१. पटहपटु = पटुपटह; विनीत=विधूत; मधुरस्वराणि = मधु—सस्वराणि, मधुसस्वनानि; शृण्वन्=तत्र। ७४. तत्=यत् व.हे.; विलङ्घ्य=विशङ्क्य; ऽविशङ्क्य; विमृश्य, ऽविमृश्य; यत्=तत्। विलङ्घ्येति पाठे किं विलङ्घ्येति कर्म्माप्यत्रोच्येत। नोक्तं च तत्। ७५. अन्विष्यन् = अन्विच्छन् अ.ना.; गूढं प्र = गूढप्र म.हे.; प्रेक्ष्य=वीक्ष्य।

तेनावतीर्य तुरगात् प्रथितान्वयेन पृष्टान्वयः स जलकुम्भनिषण्णदेहः ।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः कथयाम्बभूव ।। ७६ ।।
तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय ।
ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृपतिः शशंस ।। ७७ ।।
तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप हस्तार्पितैर् नयनवारिभिरेव वृद्धः ।। ७८ ।।
दिष्टान्तमाप्स्यति भवानपि पुत्रशोकादन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।
आक्रान्तपूर्वमिव मुक्तविषं भुजङ्गं प्रोवाच कोसलपतिः प्रथमापराधः ।। ७९ ।।
शापोऽप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोऽयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ।। ८० ।।

(७६) वह घोड़े से उतरा और प्रसिद्ध वंश के उस दशरथ ने जलकुम्भ पर पड़े मुनिपुत्र से उसका वंश पूछा तो उसने लड़खड़ाते शब्दों में स्वयं को शूद्रपुत्र बतलाया। (७७) उस विद्ध मुनिकुमार के कहने पर राजा उसका बाण बिना निकाले उसे अवसन्न आँखों वाले (अन्ध) माता–पिता के पास ले गया और उन्हें उनके एकमात्र पुत्र की उस स्थिति में अज्ञानवश स्वयं को कारण बतलाया। (७८) उन दोनों दम्पती ने बहुत विलाप किया और चाहा कि पुत्र के उर में लगा बाण निकाल लिया जाए। निकालते ही पुत्र जाता रहा तो उस वृद्ध मुनि ने राजा को आँसू ही हाथ में लेकर शाप दिया। (७९) 'तुम्हें भी वृद्धावस्था में पुत्रशोक से ही मिलेगी संसार से विदाई मेरे ही समान'– ऐसा शापवचन कहते सुना तो दशरथ ने घायल होकर जहर उगल चुके सर्प जैसे मुनि से निवेदन किया। अपराध तो दशरथ से वह हुआ था जिससे बड़ा कोई अपराध होता ही नहीं। (८०) 'मुझे तो अभी तक पुत्र के मुखकमल की शोभा देखने को नहीं मिली, फलतः आपका यह शाप तो आपने मुझ पर अनुग्रह के साथ छोड़ा है।' आग कृषियोग्य खेत को जलाती भी है तो उसे अधिक उर्वर करते हुए।

७६. सुतम्=सुतः व., सुत०; अक्षर=अक्षय। ७७. तच्चोदितश्च=तन्नोदितः स; तथागत=तथाविध; नृपतिः = नृपतिं, स नृपः। ७८. प्रहर्त्रा = प्रहर्तुः। ७९. दिष्टान्त = दिष्ट्यान्त व., दृष्टान्त; अन्त्ये = अन्ते; विषम् = मुखम् हे.; प्रोवाच=प्रत्याह; राधः= राद्धः म.अ.ना., राधी, कारः। ८०. प्यदृ=पोऽथ; शोभे=भोगे; सानुग्रहो भगवता = सानुग्रहेण भवता, सानुग्रहो हि; कृष्यां=कृष्णां, कक्षा; अपि खलु=अथ खलु; ज्वलनः=दहनः।

इत्थं गते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन ।
एधान् हुताशनवतः स मुनिर्ययाचे पुत्रं परासुमनुगन्तुमनाः सदारः ॥ ८१॥

प्राप्तानुगः सपदि शासनमस्य राजा
संपाद्य पातकविलुप्तधृतिर्निवृत्तः ।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्व्वमिवाम्बुराशिः ॥ ८२॥

इति रघुवंशे महाकाव्ये कालिदासकृतौ मुनिशापवचनो नाम
नवमः सर्ग्गः॥ ९॥

कालिदासकवेः सेयं सनातनकवीरिता ।
वरिवस्या भवेद् दिव्यमञ्जनं चक्षुषोर्विदाम् ॥

(८१) 'अब इस स्थिति में आपके लिए वध्य मैं क्या करूँ' – ऐसा कहने पर मुनि ने जलते ईंधन की याचना की पत्नी को साथ लेकर प्राण छोड़ चुके पुत्र का अनुगमन करने के उद्देश्य से।
(८२) इसी बीच राजा के अनुचर आ पहुँचे। उनसे राजा ने मुनि के आदेश के अनुसार व्यवस्था की और पातक से धैर्य खोए राजधानी लौटा। वह अपने विनाश में हेतु बनने वाली शापाग्नि को उसी प्रकार भीतर छिपाए था जैसे और्ववह्नि को समुद्र छिपाए रहता है।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में मुनिशापवचन नामक
पूरा हुआ नवम सर्ग ॥ ९॥

८१. इत्थं=दृष्टं; भिहितो = भिहिते व.म.हे.अ.ना.।

८२. इतः परं पद्यद्वयम् –

तदर्थमर्थज्ञ गते गतत्रपः किमेष ते वध्यजनोऽनुतिष्ठतु ।
स वह्निसंस्कारमयाचतात्मनः सदारसूनोर्विदधे च तन्नृपः ॥

समेयिवान् रघुवृषभोऽथ सैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्त्तितः ।
मनोगतं गुरुमुनिशापमुद्वहन् क्षयानलं जलधिरिवान्तकं पदम् ॥ व.हे.

ऽथ सैनि=स्वसैनि, ऽन्यसैनि; निवर्त्तितः = निवृत्तः; कं पदम् = कास्पदम्।

॥ दशमः सर्गः॥

पृथिवीं शासतस्तस्य पाकशासनतेजसः ।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥१॥
न चोपलेभे पूर्व्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोऽपहम् ॥ २॥
अतिष्ठत् प्रत्ययापेक्षसन्ततिः स चिरं नृपः ।
प्राङ् मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ३॥
ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ४॥

(१) दशरथ तेज में इन्द्र जैसे थे और उनके पास ऋद्धि कम नहीं हैं। पूरी पृथिवी का शासन करते करते उनके इतने वर्ष बीत गए कि उनकी संख्या दस हजार से कुछ ही कम रही होगी। (२) इतने पर भी उनको पुत्र नामक ज्योति की प्राप्ति नहीं हुई जिससे पितरों के ऋण से मुक्ति मिलती है और जो तत्काल शोकरूपी तम को हटा देती है। (३) वह राजा बड़ी लम्बी अवधि तक ऐसा ही रहा क्योंकि उसे सन्तति पाने के लिए विशिष्ट कारण (प्रत्यय) की अपेक्षा थी। वह वैसा ही लग रहा था जैसा रत्नोत्पत्ति की अभिव्यक्ति के लिए मन्थ के पहले समुद्र लगता है। ('उत्पत्ति+अभिव्यक्ति'—मिलित।) (४) ऋष्यशृङ्ग आदि ऋषियों ने चाहा कि दशरथ के यहाँ सन्तान हो जाए। उसके लिए उन्होंने साधन तय किया पुत्रीयेष्टि और उसे आरम्भ कर दिया। वे सब संयमी थे। वे ही बन गए ऋत्विक् आदि।

१. वीं शासत=वीशासितु। २. स ज्यो=सज्ज्यो, सद्द्योतिः। अतः परं कुत्रचित् पद्यम्—

मनोर्वंशश्चिरं तस्मिन्ननभिव्यक्तसन्ततिः ।
निमज्ज्य पुनरुत्थानान्नदः शोण इवाबभौ ॥ व.हे.

अत्र शोणो रेवा, निमज्य पुनरुत्थत्वस्य तस्यामेव दृश्यमानत्वात्। अस्ति च रेवापदं शोणार्थकमपि। **उत्थानात्=उत्थास्यन्, उत्थास्नुः, उत्थाय, नदः = ह्रदः, शोण=सोन। ३. यापेक्ष=पेक्ष्य, प्रेक्ष्य, स चिरं = सुचिरं, नृपः = नृपम्।** प्रत्ययः सहकारि कारणम्। तथा च कु०सं०३.१८। तथा चामरकोषे 'प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु'। **४. ऋष्यशृङ्गा = वामदेवा, तस्य सन्तः = सन्तस्तस्य, सन्तति= सन्तान** हे.; **आरेभिरे = प्रारेभिरे, यतात्मानः = जितात्मानः।**

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुताः हरिम् ।
अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः ॥५॥
ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्यापेक्षो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम् ॥६॥
अष्टभिः कुलकम्– भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥७॥
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥८॥
प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥९॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥१०॥

(५) यह तो हुआ अयोध्या में, उधर उसी समय रावण से पीड़ित देवसमाज पहुँचा भगवान् विष्णु के पास। धूप से तपे रास्तागीर जैसे छायादार वृक्ष के पास पहुँचते हैं। (६) संयोग से इधर तो वे सब समुद्र जहाँ भगवान् शेषशय्या पर योगनिन्द्रा में सोये रहते हैं और उधर वे आदिपुरुष भगवान् जागे। विलम्ब न होना, होने जा रही कार्यसिद्धि का लक्षण माना जाता है। (७) भगवान् के दर्शन बड़े दिव्य थे– वे उठे और शय्या बने शेषनाग के शरीर पर बैठे हुए थे। शेषनाग की फणामणि प्रकाश की किरणें बिखेर रही थी और उनसे उनका पूरा श्रीविग्रह द्योतित हो रहा था। (८) कमल पर पद्मासन लगाकर बैठी लक्ष्मी उनके चरण हथेली में सम्हाले थी, भगवान् ने लक्ष्मी के अंक में फैला रखा था अपना चरण। अंक में पहनी मेखला क्षौम से ढँकी हुई थी। देवगढ़ में ऐसी एक पाषाणमूर्त्ति भी मिलती है। (९) भगवान् के दर्शन होते ही सुख मिल रहा था देवताओं को वैसे ही जैसे शरद् के दिनों में होता है। भगवान् की आँखे खिले श्वेतकमल सी थीं और शरद् के दिवस में कमल खिला ही रहता है, भगवान् पीताम्बर धारण किए थे जो अरुणोदय की कान्ति लिए था, शरत् के दिनों में भी सूर्य भगवान् बाला अर्थात् कन्याराशि के हो जाते हैं। (१०) भगवान् समुद्रजल के सार 'कौस्तुभ' को विशाल वक्षःस्थल पर धारण किए थे। उसकी प्रभा से 'श्रीवत्स'–चिह्न लिप्त हो

---

५. **तस्मिन्=अस्मिन्।** इदं च प्रसिद्धं कार्त्तिकशुक्लपक्षस्य प्रबोधपर्व। ६. **व्यापेक्षो=व्याक्षेपो।** ७,८,१३ एतेषु नास्ति पाठभेदः। ९. **प्रबुद्ध=प्रफुल्ल,प्रबुद्धे, दर्शनम्=दर्शितम्।** १०. **बिभ्राणम्=बिभ्रतम्** व.।

बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ।।११।।
दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ।।१२।।
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ।।१३।।
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ।।१४।।
प्रणिपत्य/पेतुः सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ।।१५।।

रहा था जिसमें लक्ष्मी अपना शृंगार देखा करती हैं। वह लक्ष्मी के विभ्रम का दर्पण बनता है। (११) भगवान् की चार भुजाएँ वृक्षशाखा सी लम्बी–लम्बी और दिव्य आभरणों से भूषित थीं, लगता था समुद्रजल में दूसरा पारिजात प्रकट हो गया है। (कल्पवृक्षों पर भी आभरण रहते हैं। पारिजात सर्वोत्कृष्ट कल्पवृक्ष द्र. रघु. ६.६।) (१२) भगवान् के अस्त्र चेतन शरीर धारण किए थे जो दैत्यस्त्रियों के गण्ड पर उछली मद(नशा)जनित रेखाओं को (उनके भर्त्ताओं को मारकर) मिटा चुके थे। ये चेतन अस्त्र भगवान् की जय बोल रहे थे।(१३) गरुड शेषनाग से विरोध छोड़े हुए थे उनके शरीर पर पारिजातहरण के समय बना वज्र का घाव स्पष्ट दिख रहा था। वे विनीत होकर हाथ जोड़कर कर रहे थे स्तुति। (१४) भगवान् की योगनिद्रा समाप्त हुई तो सौखशायनिक के रूप में उपस्थित भृगु आदि महर्षियों को उन्होंने अपनी धवलदृष्टि डालकर अनुगृहीत किया। (सौखशायनिक='सुख से सोए'–पूछने वाला।) (१५) देवताओं ने भगवान् को प्रणाम किया क्यों वे ही देवशत्रुओं को शमन करते हैं, वे ही हैं स्तुत्य और अद्‌भुत भी, उन तक वाणी तो जा पाती ही नहीं, मन भी उन्हें विषय नहीं बना पाता।

११. दिव्या=हेमा; मपां मध्ये=मपां मध्यात्, तं पयोम–ध्यात्/ध्ये। १२. गण्ड=गल्ल, लेखानां=रेखाणां, मदराग=मदोद्गार, हेतिभि=आयुधै। १४. अवलोकनैः =अवलोकितैः, अभिवीक्षितैः, सौख=सौख्य। १५. अत्र 'सुरा अथ तस्मै प्राणिपत्य तं तुष्टुवुरि'–त्यन्वयः। तदपेक्षया 'प्रणिपेतु'रिति पाठः श्रेयान्, प्रक्रमभेदस्य अन्वयगतस्यास्वाभाविकत्वस्य च परिहारात्। अतः परं पद्यम्–

एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ।
नानात्वं रागसंयोगात् स्फटिकस्येव ते स्मृतम् ।। व.हे.
स्फ=स्फा, स्फु; ते स्मृतम्=ते मतम्, ते ध्रुवम्, दृश्यते व.हे.।

नमो विश्वसृजे पूर्व्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥१६॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥१७॥
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥१८॥
हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥१९॥
सर्व्वज्ञस्त्वमविज्ञातः सर्व्वयोनिस्त्वमात्मभूः ।
सर्व्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥२०॥

(१६) देवताओं ने स्तुति की– 'प्रणाम आपको। आप ही हैं जो तीन मूर्त्तियों में सक्रिय रहते– 'पहले(ब्रंह्मा रूप में) विश्व की सृष्टि करते रहते हैं, उसके बाद (विष्णु रूप में) उस विश्व का भरण करते हैं और उसके बाद आप ही हैं जो (रुद्ररूप में) उस विश्व को बटोर भी लेते हैं। (सृष्टिस्थितिसंहारहेतु।) (१७) आकाश से बरसा एक ही दिव्य जल अनेक रस (आस्वाद) धारण कर लेता है देशभेद और गुणभेद पाकर, यही स्थिति है आपकी। आप सभी अवस्थाएँ अपनाते रहते हैं, किन्तु आप में विक्रिया नहीं आती। (१८) आपको नापा नहीं जा सकता, परन्तु आपने सारे संसार को नाँप रखा है, आपको कुछ नहीं चाहिए, और आप सभी प्रार्थनाएँ पूरी करते हैं, आपको (बल में) कभी भी नहीं जीता गया जबकि आप सदा ही जीतते रहते हैं, इसी प्रकार आप में सारा संसार छिप जाता है। अतः आप अव्यक्त हैं, साथ ही व्यक्तविश्व के जनक भी। (१९) आप हृदयस्थ हैं (इतने पास हैं) तब भी बहुत दूर हैं, आप में कोई कामना नहीं, तब भी तपोरत हैं, दयालु हैं, परन्तु निष्पाप हैं और बड़े पुराने हैं, परन्तु आप में जरा नहीं आती। (२०) आप सर्वज्ञ हैं परन्तु खुद अज्ञात, सबको जन्म देते हैं, परन्तु स्वयं लेते हैं जन्म स्वयं से यानी आपकी सत्ता ही है आपका जन्म। आप हैं प्रभु सबके ऊपर, परन्तु आप पर प्रभु कोई नहीं। इसी प्रकार आप स्वयं हैं अकेले, परन्तु बन जाते हैं सब कुछ।

१६. त्रेधास्थितात्मने=त्रेधा स्थितात्मने, त्रेधात्मने नमः। १८. अमेयः = अमितः अ.ना.; **अनर्थी=अनर्थः** हे.; **प्रार्थनावहः=प्रार्थनावहम्, प्रार्थितावहः; मत्यन्त=मत्यर्थ, इत्येवम्; व्यक्त=व्यक्ति। १९. अकामम्=चकामदम्, तपस्विनम्=तपस्विनः ; अनघ=अदया** व.म.हे.ना.। **२०. अनीश=अनंश; एकस्त्वं अरूपः।**

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ।। २१ ।।
चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ।। २२ ।।
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ।। २३ ।।
अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ।। २४ ।।

(२१) आप में सात संख्या की बड़ी लगन है 'साम' जो आपका गान करते हैं वे सात, जिस सिन्धु में सोते हैं उसकी भी संख्या सात, आपके मुख में जो अग्नि है उसको भी कहा जाता है सप्तार्चि (सात अर्चियों वाला) और जो लोक आप में फलते फूलते दिखाई दे रहे हैं वे भी सात ही हैं। (सात साम– रथन्तर, बृहत्साम, वामदेव्य, वैरूप्य, पवमान, वैराज, चान्द्रमस; सात सिन्धु– क्षीरसागर, लवणसागर, दधिसागर, घृतसागर, स्वादूदसागर, सुरासागर, इक्षुरससागर; सात अर्चि– हिरण्या, कनका, रक्ता, कृष्णा, सुप्रभा, अतिरक्ता, बहुरूपा; सात लोक– भूर्लोक, भुवर्लोक, स्वर्लोक, महर्लोक, जनोलोक, तपोलोक, सत्यलोक।) **(२२)** आपको चार संख्या भी प्रेम करती है। ज्ञान से फल मिलते हैं वे चार (धर्म, अर्थ, काम और मोक्ष), काल की अवस्था जिन युगों में बँटी मिलती है वे भी चार (सत्, त्रेता, द्वापर, कलि), लोक जिन वर्णों में विभक्त हैं वे भी चार (ब्राह्मण, क्षत्रिय, वैश्य, शूद्र) हैं और जो आप हैं आप जिन मुखों से सृष्टि बाहर निकालते हैं वे भी चार हैं। **(२३)** योगियों को जब विमुक्त होना होता है तो वे मन को अभ्यास से निगृहीत कर लेते अर्थात् सब कुछ हटा देते हैं और अपने हृदय में ही सदा बैठे रहते, आपका जो ज्योतिर्मय विग्रह है उसी की खोज में लग जाते हैं। (हृदय व्यापक, मन व्याप्य।) **(२४)** भगवन्! आपकी वास्तविकता को ठीक से जान कौन सकता है, क्योंकि आप में सभी विरोधी बाते हैं। आप जिस क्षण अजन्मा हुआ करते हैं उसी क्षण जन्म भी ग्रहण करते रहते हैं, आप में खोजने पर भी कोई इच्छा कभी किसी को नहीं मिली तब भी आप

२२. **वर्ग=वर्ण; वस्था चतुर्युगा=वस्थाश्चतुर्युगाः** व.हे.अ.ना., **वस्था चतुर्युगी; चतुर्वर्ण=चातुर्वर्ण्य;** हे. **सर्वं=सर्गः; चतुर्मुखात्=चतुर्भुजात्।** भगवतो विष्णोरपि चतुर्मुखत्वं प्रतीतचरमेव। तथा च खर्जूरवाहक्षेत्रे धङ्गदेवस्य प्रशस्तिः 'दधानामेकां यः किरिपुरुषसिंहोभयजुषं तदाकारोच्छेद्यां तनुमि'त्यादिः। २४. **द्विषः = त्विषः; याथार्थ्यं=याथात्म्यं** हे.।

शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्त्तितुम् ।। २५।।
बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ।। २६।।
त्वदावेशितचित्तानान्त्वत्समर्पितकर्म्मणाम् ।
गतिस्त्वं वीतरागाणामभूयः–संनिवृत्तये ।। २७।।
प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ।। २८।।
केवलं स्मरणेनापि पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ।। २९।।

आपसे द्वेष करने वालों को मारते देखे जाते हैं, भला इच्छा के बिना कहीं कर्म होता है? इसी प्रकार आप जब निद्रा में लीन दिखाई देते हैं तभी जागरूक भी बने रहते हैं। इन्हीं सब उद्गारों को उलट कर भी प्रकाशित किया जा सकता है। **(२५)** भगवन्! आप सब काम एक साथ कर लेते हैं। शब्द आदि का भोग भी आप करते रहते हैं और दुश्चर तप भी, आप प्रजा के पालन में समर्थ रहते हुए भी बने रहते हैं उदासीन। **(२६)** आगम (परम्परा) अनेक हैं, अतः सिद्धि दिलाने वाले साधन मार्ग अनेक प्रकार के हैं, किन्तु सबकी सिद्धि एक है — 'आप तक पहुँचना'। जाह्नवी के जलप्रवाह (आकाश, पृथिवीलोक और पाताल) में अनेक प्रकार के होते हुए भी जहाँ पहुँचते हैं वह समुद्र तो एक ही है। **(२७)** जो चित्त को लगाए रहते हैं आप में और कर्म समर्पित करते रहते हैं आपको ही, उन वीतराग साधकों की गति केवल आप हैं, जहाँ से लौटा नहीं जाता। **(२८)** पृथिवी आदि जो आपकी ही महिमा हैं ये तो सामने ही हैं (प्रत्यक्ष) परन्तु इनकी भी सीमा तय नहीं हो पाती, फिर आप तो ठहरे आप्तवाक् और अनुमान के संमिलित प्रयास से साध्य। भला आपकी सीमा का क्या कहना। **(२९)** आप तो केवल स्मरण करने मात्र से पुरुष को पवित्र कर देते हैं। इससे आपके लिए शेष जो वृत्तियाँ हैं, उनका फल तो स्पष्ट ही है।

२७. त्वदा=त्वय्या व.म.हे.अ.ना.। **२९. स्मरणेनापि=स्मरणादेव; यतः = यदा** व.अ.ना.; **वेदित=वेशित।**

उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूरेण चरितानि ते ।। ३० ।।
अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्म्मणोः ।। ३१ ।।
महिमानं यदुत्कीर्त्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ।। ३२ ।।
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा तु न स्तुतिः परमेष्ठिनः ।। ३३ ।।
तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः ।
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः ।। ३४ ।।
अथ वेला–समासन्न–शैल–रन्ध्राऽनुनादिना ।
स्वरेणोवाच भगवान् परीभूतार्णवध्वनिः ।। ३५ ।।

(३०) आपके चरित स्तुति के भीतर अँट नहीं पाते। कितनी भी स्तुति की जाए वो बचे ही रहते हैं, जैसे उदधि के रत्न या सूर्य की किरणें। (३१) भगवन्! आपके लिए कुछ भी ऐसा नहीं है जो प्राप्त न हो, अतः जिसे प्राप्त करना अपेक्षित रह गया हो, तथापि आप जन्म भी लेते हैं और कार्य भी करते हैं। इसका उद्देश्य लोकानुग्रह ही ठहरता है। (३२) आपकी महिमा का गान करते करते वाणी वाग्व्यापार बटोर लेती है, यह या तो श्रम से या अशक्ति से, इसलिए नहीं कि आपके गुणों की सीमा है। (३३) देवताओं ने उन अधोक्षज (अक्षज – इन्द्रियजन्य ज्ञान, उससे परे अर्थात् जिससे नीचे हैं इन्द्रियजन्यविषय) भगवान् विष्णु की इस प्रकार स्तुति की और उन्हें प्रसन्न किया। सही बात यह है कि यह सत्य और वास्तविकतापूर्ण कथन था, स्तुति नहीं। वे तो ठहरे परमेष्ठी। (३४) भगवान् ने देवताओं से कुशलक्षेम पूछा तो लगा कि वे प्रसन्न हैं। उन्होंने उन्हें फलतः बिना प्रलय समय के ही उद्वेल (तट लाँघते) हुए राक्षससमुद्र से उत्पन्न भय की सूचना दी। (३५) अब भगवान् बोले तो, उनके गम्भीर स्वर की तटभूमि की पर्वतगुफाओं में जो प्रतिध्वनि उठी उससे समुद्र की गड़गड़ाहट दब गई।

३०. रत्नानि=तोयानि; स्तुति=श्रुति; व्यति=ह्यति; दूरेण=दूराणि म.अ.ना., रूपेण। ३२. ह्रियते=क्षिप्यते; शक्त्या=शक्तं। ३३. ते सुरास्तम=सुरास्ते तम, ते देवास्तम हे.; भूतार्थ=भूतार्थः। ३५. नुनादि=वादिना; कारिणा; स्वरेणोवाच=स्वरेण भगवानाह।

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थेव भारती ।। ३६ ।।
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद् गङ्गेवोर्ध्वप्रवर्त्तिनी ।। ३७ ।।
जाने वो रक्षसाऽऽक्रान्तावनुभावपराक्रमौ ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ।। ३८ ।।
विदितं तप्यमानं तु तेन मे भुवनत्रयम् ।
अकामोपनतेनेव साधोर् हृदयमेनसा ।। ३९ ।।
कार्य्येषु चैककार्य्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ।। ४० ।।

(३६) भगवान् ही तो हैं पुराणकवि, उनकी जो भारती उचित वर्णस्थानों से प्रकट हुई उसमें संस्कार समझ में आ रहा था, अतः उसकी संज्ञा ('संस्कृत'–संज्ञा) मानों चरितार्थ थी। (द्र. रघु. १.१; कुसं. २.१७, ७.९०) **(३७)** भगवान् के मुख से उद्गत उस वाणी में भगवान् के दन्तों की ज्योत्स्ना भी मिल गई तो ऐसा प्रतीत हुआ जैसे चरण से निकली गङ्गा ऊपर की ओर प्रवाहित हो उठी हो। **(३८)** मुझे विदित है कि आपके अनुभाव (तेज) और पराक्रम (शक्ति) को राक्षस ने दबा रखा है, वैसे ही जैसे शरीरधारियों के प्रथम और मध्यम गुण (सत्त्व तथा रजस्) को अन्तिम तमोगुण दबा लेता है। **(३९)** यह भी मुझे विदित है कि मेरे तीनों लोकों को वह संतप्त कर रहा है, जैसे पातक से संतप्त हुआ करता है साधु पुरुषों का हृदय। पातक भी ऐसा जो अनिच्छा से आ पड़ा हो। **(४०)** इन्द्र और मैं दोनों का कार्य एक ही है, इसलिए इन्द्र मुझसे प्रार्थना करें यह आवश्यक नहीं है। वायु अग्नि का सारथि अपने आप बन जाता है।

३६. अत्रोत्तरार्धपाठः– **"बभूव भारती भव्या चरितार्था चतुष्टयी'। कृतसंस्कारा=पदसंस्कारा, पदसंस्कारात्, भारती = भव्या; तार्थेव= तार्थैव** म.हे., **तार्था च/तु** अ.ना., **भारती=चतुष्टयी** व.म.हे.अ.ना.। **३७. बभौ स=बभासे; सदशन=सुदर्शन; निर्यातशेषा चरणात् = निर्यातचरणा शेषा; र्त्तिनी=र्त्तनी** **३८.** प्रथमो गुणः सत्त्वम्, मध्यमश्च रजः, तृतीयत्वं तु पारिशेष्यात् तमसः, तत्तु कण्ठरवेणैवोक्तम्। तथैव च रघु. ३.२७ पद्येऽपि। **३९. तप्य=ताप्य; तु=च** म.हे.अ.ना.। **४०. कार्येषु= कार्यस्य**। कार्येषु करणीयेष्वारम्भेषु एककार्यत्वमैकार्थ्यम्। सेयं नाट्यशास्त्रभाषा तथा च तत्रावस्थाङ्गेषु आरम्भो नाम प्रथममङ्गम्। तच्चानुष्ठानारम्भरूपम्। अर्थप्रकृत्यङ्गेषु चार्थापरपर्य्यायस्य कार्यस्यान्तिमत्वम्। यथा चेदं तत् सर्व्वं दशरूपविधाने स्पष्टम् 'आरम्भयत्नप्राप्त्याशानियताप्तिफलागमा' इत्येवमवस्थाः 'बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः अर्थप्रकृतयः' इति पर्यभाषिषत।

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ।
स्थापितो दशमो मूर्धा लव्योंऽश इव रक्षसा ।। ४१ ।।
स्रष्टुर्वरातिसर्गात् तु मया तस्य दुरात्मनः ।
अत्यारूढं रिपोः सह्यं चन्दनेनेव भोगिनः ।। ४२ ।।
धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात् सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ।। ४३ ।।
सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम् ।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ।। ४४ ।।
अचिराद् यज्वभिर्भागं कल्पितं विधिवत् पुनः ।
मायाविभिरनालीढमादास्यध्वे निशाचरैः ।। ४५ ।।
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि ।
पुष्पकाऽऽलोकसंक्षोभं मेघावरणतत्पराः ।। ४६ ।।

(४१) उस राक्षस (रावण) का जो दशम सिर है उसे मेरे खड्ग नन्दक ने अपनी धारा से बचा रखा है वह इसलिए कि उसी राक्षस ने उसे बना रखा है उच्छेद्य, मेरे चक्र सुदर्शन का। जिसका शिकार वही कर सकता है। **(४२)** उसे ब्रह्माजी ने वर दे रखा है इसलिए उस दुरात्मा की बड़ी बड़ी चढ़ाइयों को मैं सहता आया वैसे ही जैसे चन्दन सर्प के उत्पातों को सहता रहता है। **(४३)** तप से प्रसन्न ब्रह्मा से उस दुरात्मा ने माँगी दैवी सृष्टि से अपनी अवध्यता, मनुष्यों पर उसे आस्था थी नहीं। **(४४)** सो, मैं दशरथ के पुत्र के रूप में मनुष्य शरीर धारण करूँगा और तीक्ष्ण शरों से काट काट कर चढाऊँगा रणभूमि को बलि उसके सिर रूपी कमलों की। **(४५)** आप सब बहुत शीघ्र ही प्राप्त करने लगेंगे याज्ञिकों द्वारा विधिपूर्वक दिया अपना भाग। उसे मायावी निशाचर छू भी नहीं सकेंगे। **(४६)** पुण्यात्मा जन अब विमान पर आरूढ़ हो घूमें वायुमार्ग में। पुष्पक के देखने से संत्रस्त होकर उन्हें अब मेघ के आवरण की आवश्यकता नहीं है।

---

४१. हृतः = हृता हे., वृतः; **कामम्=नूनम्; लव्योंऽशः = लव्यांशः, लभ्योंऽशः, लभ्यांश। लव्य इति च्छेदनार्थकस्य लवतेः। ४२. तु=च** व.हे.; **तस्य दुरा=तस्यामरा** अ.ना.; **सह्यम्=सोढम्** म.अ.ना.।
४५. ध्वे=ध्वम्।

मोक्ष्यध्वे सुरवन्दीनां वेणीबन्धानदूषितान् ।
शापयन्त्रित–पौलस्त्य–बलात्कार–कचग्रहैः ।।४७।।
रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ।।४८।।
पुरूहूतप्रभृतयः सुरकार्योद्यतं सुराः ।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ।।४९।।
अथ तस्य विशांपत्युरन्ते काम्यस्य कर्म्मणः ।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ।।५०।।
हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ।।५१।।
प्रजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ।।५२।।

(४७) (नलकूबर के) शाप से यंत्रित रावण बन्दी बनी देवङ्गनाओं के साथ न बलात्कार कर सका न उनका कचग्रह ही, अतः उनके वेणीबन्ध अदूषित ही हैं। उन्हें आप लोग शीघ्र ही मुक्त कर सकेंगे। (रम्भा नलकूबर के पास जा रही थी। बीच में उससे रावण ने बलात्कार किया तो नलकूबर ने उसे शाप दिया 'किसी भी स्त्री को बलात् पकड़ने से तेरा सिर सौ टुकड़े हो जाएगा'– महाभारत (मल्लिनाथ)। **(४८)** वह कृष्णमेघ (विष्णु) इस प्रकार वागमृत द्वारा रावणरूपी अकाल (अवर्षण) से क्लान्त देवतारूपी सस्य को सींचकर तिरोहित हो गया। **(४९)** देवकार्य के लिए उद्यत विष्णु भगवान् का अनुगमन अपने अपने अंशों से देवों ने भी वैसे ही किया जैसे पुष्पों से वृक्ष वायु का अनुगमन करते हैं। **(५०)** अब उस राजा का काम्य कर्म (पुत्रीयेष्टि) पूर्ण होते ही ऋत्विजों के आश्चर्य के साथ यज्ञाग्नि से एक पुरुष उत्पन्न हुआ। **(५१)** वह धारण किए हुए था हेमपात्र। उसे दोनों हाथों से पकड़े हुए था, तब भी वह कठिनाई से सम्हाला जा रहा था। उसमें था 'पयश्चरु' और उसमें थे समाविष्ट आदिपुरुष भगवान् विष्णु। **(५२)** उत्पन्न पुरुष का नाम था 'प्राजापत्य'। उसने दिया चरु दशरथ को। उन्होंने उसे ग्रहण कर लिया। उसमें अन्न था। यह वैसे ही हुआ जैसे समुद्रमन्थन के बाद हुआ था। जब मथित जल से उत्पन्न जल का सार(अमृत) समुद्र ने इन्द्र को दिया था और उसे इन्द्र ने शिरोधार्य किया था।

४७. **मोक्ष्यध्वे=मोक्षध्वम्** हे.,**मोक्ष्यथ** अ.ना., **मोक्षयेऽहं, मोक्षध्वे** म.; **सुर=स्वर्ग** म.अ.ना.; **कार=कृत**। ४८. **वृष्य=षिच्य; मरुत्स=मरुच्छ**। ५१. **हेम=हैम; पात्र=पात्री, पात्रे,पत्री; गतम्=कृतम्** म.हे.अ.ना., **मतम्; धानः = दानः** व.; **अपि=अति; वहम्=वहम्** युग्मम्। ५२. पयसां सारममृतं वृषा महेन्द्र इति यावत्।

अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे यस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ।।५३।।
स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ।।५४।।
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ।।५५।।
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षिताम् ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ।।५६।।
सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि ।
भ्रमरी वारणस्येव मदनिष्यन्दलेखयोः ।।५७।।
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ।।५८।।

(५३) इस घटना से दशरथ के वे गुण स्पष्ट हैं जो अन्यदुर्लभ थे। भला जिसे उस पुरुष ने भी अपनी प्रसूति के लिए चाहा जो प्रसूति है त्रैलोक्य का। **(५४)** वह चरु भगवान् विष्णु का ही तेज था। उसे राजा दशरथ ने दो पत्नियों में बाँट दिया, उसी प्रकार जिस प्रकार सूर्य नया प्रकाश द्यौः और पृथिवी में बाँट देते हैं। **(५५)** कौसल्या दशरथ के लिए पूज्य थी और केकयवंशजा(कैकेयी) थी प्रिय। अतः उन्होंने सुमित्रा को उनके द्वारा दिलाना चाहा आदर/चरु अंश। **(५६)** दशरथ बहुज्ञ थे और वे दोनों रानियाँ भी उनका चित्त जानती थीं, अतः उन दोनों ने चरु के आधे–आधे भाग (अर्थात् दो भाग) सुमित्रा को प्रदान किए। **(५७)** वह (सुमित्रा) भी दोनों सौतों से प्रेम करती थी (सौतिया डाह नहीं), वैसे ही जैसे भ्रमरी हाथी के गण्डस्थल की दोनों मदनिष्यन्द–रेखाओं से। **(५८)** तीनों रानियों ने प्रजाभूति में हेतु सन्तति और जनता के उत्कर्ष के लिए देवांश से निष्पन्न गर्भ धारण किया, जैसे 'अमृत' नामक सूर्यनाडियाँ धारण करती हैं जलरूपी गर्भ।

५३. प्रसूतिं= प्रवृत्तिं, निर्वृतिं; यस्मिन्=तस्मिन्। ५४. संज्ञितम्=संज्ञकम्, संस्थितम्; प्रत्यग्र=प्रत्युग्र; अहर्पति=अहस्पति, अह्नां पति। ५५. कौसल्या=कौशल्या। ५७. सापि=सा हि; लेखयोः = रेखयोः।

सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव सम्पदः ॥ ५९ ॥
गुप्तं ददृशुरात्मानं सर्व्वाः स्वप्नेषु वामनैः ।
जलजाऽसि–गदा–शार्ङ्ग–चक्र–लाञ्छितमूर्त्तिभिः ॥ ६० ॥
हेमपत्रप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६१ ॥
बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम् ।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥ ६२ ॥
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ।
ब्रह्मर्षिभिः ‘परं ब्रह्म’ गृणद्भिरुपतस्थिरे ॥ ६३ ॥

(५९) सभी रानियाँ साथ साथ गर्भवती हुई। उन सबके चेहरे पीले पड़ गए, वैसे ही जब फल लगने को होता है तब सस्यसम्पत्ति पीली पड़ जाती हैं (कतिपय गवेषक इस उद्गार पर कालिदास की तिथि तय करने का दावा करते हैं)। **(६०)** सभी रानियाँ स्वप्न देखती कि उनकी रक्षा वामन (बौने पुरुष) कर रहे हैं, जिनके हाथ में हैं जलज (शङ्ख), असि (नन्दकखड्ग), गदा (कौमोदकी), शार्ङ्ग (धनुष) और चक्र (सुदर्शन) या जलज (कमल) गदा, शङ्ख तथा चक्र। (खड्ग और शार्ङ्ग विष्णु भगवान् के चित्र में प्रसिद्ध नहीं है। पाठ होना चाहिए था ‘शङ्खचक्रगदापद्मपरिलाञ्छितमूर्त्तिभिः’।) **(६१)** वे देखतीं कि गरुड उन्हें पीठ पर बिठाए उड़ रहा है, उसके वेग से मेघ खिंचते आ रहे हैं और उसके सुनहले पंखों का प्रभाजाल फैलता जा रहा है। **(६२)** देखतीं कि लक्ष्मी हाथ में लिए पद्म का पंखा उन पर झूल रही है, जिनके स्तनों के बीच झूल रही है कौस्तुभ मणि। भगवान् ने उसे उनके पास धरोहर बना रखा है। **(६३)** उन्हें अर्घ्य दे रहे हैं आकाशगङ्गाप्रवाह में स्नान किए हुए सातों ब्रह्मर्षि वेदमन्त्र पाठ के साथ।

५९. रेजु=बभु हे.। **६०. जलजं शङ्खः। तथाचात्रैव ७.६३।** जलजपदेनात्र पद्मस्यापि तन्त्रेण संग्रहः। रक्षायोगे तु शङ्खस्यैवाधिको योग इति तस्यैवात्र ग्रहो बलीयान्। **जलजासि–गदा–शार्ङ्गचक्र=असि–शङ्खगदाशार्ङ्गचक्र, असिखड्गगदाशार्ङ्गचक्र। ६१. पत्र=पक्ष** म., **प्रभा=फला; वितन्वता=विचिन्वता; उह्यन्ते स्म=उह्यमानं; वेगाकृष्ट=वेगात् कृष्ट, वेगाद् विद्ध, वेगाविद्ध। ६२. भन्यासं=भं न्यासं; लम्बिनम्=लम्बितम्** व.हे., **विलम्बनम्, पर्युपास्यन्त लक्ष्म्या च=उपास्यमानं लक्ष्म्या च, लक्ष्म्या च पर्युपास्यन्त; व्यञ्जन=व्यञ्जन।** पद्मं व्यञ्जनं लक्षणं हस्ते यस्याः इति। व्यजनेत्यस्माकमेव पूर्वपाठः। **६३. ब्रह्मर्षिभिः परं=महर्षिभिः परं, ऋषिभिः परमं; रुपतस्थिरे= समुपस्थितम्।** त्रिभिः कुलकमिति पक्षोऽपि कालिदासोचित एवान्यत्र तस्य तथैव प्रवृत्तेः तदा च समुपस्थितमित्यादिर्द्वितीयान्त एव पाठः श्रेयान्।

ताभ्यस्तथाविधान् स्वप्नाञ्छ्रुत्वा प्रीतोऽथ पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ।। ६४।।
विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ।। ६५।।
अथाऽग्र्यमहिषी राज्ञः प्रसूतिसमये सती/ति ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ।। ६६।।
राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ।। ६७।।
रघुवंशप्रदीपेन तेनाऽप्रमिततेजसा ।
रक्षागृहगता दीपा प्रत्यादिष्टा इवाऽभवन् ।। ६८।।

(६४) उन रानियों से उनके उपर्युक्त स्वप्न सुनते तो राजा दशरथ फूले न समाते। उन्हें लगता मुझ से बड़ा कौन 'मैं तो सारे संसार के पिता का पिता बनने जा रहा हूँ।' **(६५)** एक ही भगवान् विष्णु उन रानियाँ की कुक्षियों में वैसे ही अनेक होकर विभक्त थे, जैसे स्वच्छ जलाशयों में विभक्त दिखता है प्रतिमाचन्द्र (चन्द्रप्रतिबिम्ब)। **(६६)** अब समय पूरा हो जाने पर उस राजा दशरथ की सती और प्रथम रानी (कौसल्या) को तेजस्वी पुत्र प्राप्त हुआ, उसी प्रकार जिस प्रकार रात्रि आने पर दिव्य ओषधी को प्रकाश प्राप्त हो जाता है। **(६७)** उस पुत्र का शरीर बड़ा ही अभिराम था। उससे प्रेरित होकर गुरु (दशरथ/वसिष्ठ) ने उसे 'राम' नाम दिया, जो सारे संसार के लिए सर्वोत्कृष्ट मंगल बना। **(६८)** यह पुत्र, रघु महाराज के लम्बे वंश का प्रदीप था। उसका तेज इतना था कि उसकी सीमा निश्चित नहीं की जा सकती थी। उस तेज से प्रसूतिगृह के दीपक अनावश्यक लगने लगे थे।

६४. **श्रुत्वा= ज्ञात्वा; तोऽथ=तो हि, तः स** अ.ना., **तोऽपि; परार्ध्य=कृतार्थ।** ६५. **विभक्तात्मा=स विभक्तः** अ.; **विभु=प्रभु।** ६६. सति इत्येव पाठः श्रेयान्, अपूर्णकालायाः प्रसवस्य नेष्टत्वात्, लोकेऽपि च *दिन पूरे हो जाने पर'* इति व्यवहारस्याद्यापि दर्शनात्। ६७. **चोदितः=नोदितः** व.; **प्रथमम्=परमत्वम् उत्कृष्टतमत्वम्।** तथा चात्रैव १०.६, १६.२३; कुसं. ७.७३; मेघ. १; माल. १.१२; विक्रमो.४.१३,१५; शाकु. ५.२१, ७.९,१० भासेऽपि च। परममेति पाठोऽश्लीलः सन्धावमङ्गलार्थप्रतीतेरपरिहार्यत्वात्। रामेति नाम्ने निमित्तत्वमभिरामत्वस्याभिरूपरूपस्य। रमन्ते योगिनोऽस्मिन्निति विकल्पेऽप्यस्यापरिहृतत्वात्। ६८. स्थितमेतेन राम एव रघुवंशकाव्यस्यापि नायकप्रदीप इति। **वंशप्र = वंशे प्र; प्रमित=प्रतिघ, प्रतिम** म.अ.ना., **भिमत** व.हे.। अप्रतिघपदाय द्र.अत्रैव ८.७८, जातकप्रभातिशयाय च ३.१५। **रक्षा=शय्या।**

शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ।। ६९ ।।
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ।। ७० ।।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सषुवे यमौ ।
सम्यगाराधिता विद्या प्रबोधविनयाविव ।। ७१ ।।
निर्दोषमभवत् सर्व्वमाविष्कृतगुणं जगत् ।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ।। ७२ ।।
तस्योदये चतुर्मूर्त्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ।। ७३ ।।
कृशानुरपधूमत्वात् प्रसन्नत्वाच्च भास्करः ।
रक्षो–विप्रकृता–वास्ता–मपविद्ध–शुचाविव ।। ७४ ।।

(६९) माता का पेट छोटा हो गया तो शय्या पर शिशु राम को लिए ऐसी लगीं जैसे शरत्कृशा गङ्गा लगती हैं, जिनकी बालू पर रखा होता है कमलपुष्प का अर्घ्य। (७०) कैकेयी ने जन्म दिया शीलवान् पुत्र भरत को, उसने जननी कैकेयी को उसी प्रकार विभूषित किया जिस प्रकार विनय विभूषित करता है श्री को। (७१) सुमित्रा ने जन्म दिया लक्ष्मण और शत्रुघ्न इन दो जुड़वा पुत्रों को, वैसे ही जैसे सम्यग् आराधिता विद्या देती है जन्म प्रबोध और विनय (ज्ञान तथा नम्रता) को। (७२) इस समय सारा जगत् निर्दोष दिखाई दिया। इतना ही नहीं उसमें गुण भी प्रकट दिखाई दिए। लगता था जैसे पुरुषोत्तम (विष्णु) पृथिवी पर आए तो उनके पीछे स्वर्ग भी चला आया। (७३) वे चतुर्मूर्त्ति भगवान् जब चार--चार मूर्त्तियों में प्रकट हुए तो दिशाओं ने साँस सी ली, धूल हटी हवाओं के बहाने। उन सभी के शासक पौलस्त्य से चकित रहते थे। (७४) अग्नि पर से धुआँ छँट गया और सूर्यमण्डल प्रसन्न हो उठा। रावण के दिए कष्ट भोग रहे ये दोनों ही शोकमुक्त से हुए।

६९. य्याग=य्यां ग; रामेण=चानेन, सा तेन; शातो=सातो। ७०. शील=वीर्य व.। मातरि सप्तमी गर्भाधानप्रयोज्या ग्राह्या। ७१. यमौ=युगौ; आराधिता=आगमिता अ.ना., आवर्जिता, अभ्यासिता हे.। ७२. गुणं जगत्=गुणोदयम्; हि=च, द्र. रघु. १५.२९; कुसं. ६.३७; मेघ. ३०। ७३. तस्य=यस्य। ७४. भास्क=दिवा अ.ना., प्रभा म.हे., क्षपा; अपविद्ध=अपनीत, अपविद्ध। द्र. कुसं. २.२२।

दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुबिन्दवः ।। ७५ ।।
पुत्रजन्मप्रवेश्यानां तूर्य्याणां तस्य पुत्रिणः ।
आरम्भं प्रथमं चक्रुर् देवदुन्दुभयो दिवि ।। ७६ ।।
सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाऽभवत् ।। ७७ ।।
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ।। ७८ ।।
स्वाभाविकं विनीतत्वं तेषां विनयकर्म्मणा ।
मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम् ।। ७९ ।।
परस्पराविरुद्धास्ते तद् रघोरनघं कुलम् ।
अलमुद्द्योतयामासुर् देवारण्यमिवर्त्तवः ।। ८० ।।
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ।। ८१ ।।

(७५) उस समय रावण के किरीट की मणियाँ भूमि पर आ गिरीं, वे मानों राक्षसश्री के आँसू थे। (७६) उस राजा दशरथ के पहले पुत्रजन्म की दुन्दुभियों के बजने का आरम्भ हुआ द्युलोक में देवदुन्दुभियों के बजने से। (७७) दशरथ के महल पर 'संतानक' नामक कल्पवृक्षों के पुष्पों की जो वृष्टि हुई वही बनी सन्मङ्गलोपचारों की प्रथम रचना। (७८) कुमारों के संस्कार हुए और धाइयों का दूध पीते–पीते वे अपने अग्रज राम और पिता के आनन्द के साथ बढ़ते गए। (७९) सभी कुमार स्वाभाविक रूप से ही विनीत थे, उन्हें विनय की जो शिक्षा दी गई उससे उनका विनय और बढ़ उठा, हविष्य से अग्नि के तेज की नाई। (८०) वे चारों राजकुमार परस्पर में अविरुद्ध थे। उन्होंने रघु के उस निष्कलंक वंश को और अधिक उद्योतित किया, देवारण्य को जैसे ऋतुगण उद्योतित करता है। (८१) सभी भाईयों का सभी के लिए प्रेम समान था, तथापि जैसे एक जोड़ी राम–लक्ष्मण की बन गई वैसे ही एक जोड़ी भरत और शत्रुघ्न की। आधार था प्रीति।

७६. प्रवेश्या=प्रवेशा; आरम्भं = प्रारम्भं। ७८. स्तन्य=स्तन व.हे.अ.ना.। **७९. कर्म्मणा=कर्म्मणाम्; मुमूर्छ=अमूर्छत्। ८०. रुद्धास्ते तद् रघोरनघं=द्धास्ते सूनवो राघवं; यामासुः = श्चक्रुः; वारण्य=वोद्यान। ८१.यथोभौ = यथा तौ।**

तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर् यथा चेन्दुसमुद्रयोः ।। ८२।।
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ।। ८३।।
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्म्मार्थकाममोक्षाणामवतार इवाङ्गभाक् ।। ८४।।
गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः ।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ।। ८५।।
सुरगज इव दन्तैर्भग्नदैत्यासिधारैर्नय इव पण/फल—बन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनां तैश्चकाशे/से चतुर्भिः।। ८६।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ भगवदवतारो नाम
दशमः सर्ग्गः।। १०।।

(८२) उन दो–दो भाइयों का ऐक्य कभी भी फूटा नहीं, वैसे ही जैसे वायु और अग्नि का या चन्द्र और समुद्र का। (८३) वे चारों ही थे प्रजापालक। उन चारों ने प्रजावर्ग में प्रत्येक का मन तेज से भी और विनय से भी हरण कर लिया, काली घटा वाले दिनों के समान। (८४) राजा दशरथ के चारों पुत्र ऐसे लगते थे जैसे धर्म, अर्थ, काम और मोक्ष ही शरीरधारी बन गए हैं। (८५) चारों बालक पिताजी को बड़ा प्यार करते थे। उन्होंने अपने गुणों से पिता की आराधना की, जैसे चार महार्णव करते थे रत्नों से। (८६) राजाओं के पति दशरथ उन चार पुत्रों से वैसे ही सुशोभित हो रहे थे जैसे दैत्यों की तलवार की धार विफल कर देने वाले चार दाँतों से सुशोभित होता है सुरगज, पणबन्ध(सन्धि) आदि के रूप में प्रकट उपायों से नय (राजकीय नीतिमार्ग) और गाड़ी के जुए जैसे लम्बे चार बाहुओं से लगते हैं स्वयं साक्षात् विष्णु। ये चारों भाई भी उन (विष्णु) के ही अंश थे।

इस प्रकार महाकवि कालिदास की कृति रघुवंश नामक महाकाव्य में
पूर्ण हुआ भगवदवतार नामक दशम सर्ग ।। १०।।

८२ ऐक्यं=प्रीतिः; बिभदे न = न बिभेद अ., **विभेदे न; चेन्दु=चन्द्र** म.अ.ना.। **८३. प्रश्रयेण=प्रणयेन; श्यामाभ्राः = श्यामलाः, श्यामार्धा, श्यामाब्दाः, श्यामाभ्र। ८४. व्यस्तः प्रस=व्यस्तप्रस; पतेः = क्षितः** हे., **भाक्=वान्** व.अ.ना.।

रेवाप्रसादेन सनातनेन यः काश्यपेनायमलेखि सर्गः ।
भवेदसौ विज्ञजनस्य तोषप्रदोऽस्य काव्यस्य विवेचनासु ।।

।। एकादशः सर्गः ।।

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ।।१।।
कृच्छ्रलब्धमपि लब्धवर्णभाक् तं दिदेश मुनये सलक्ष्मणम् ।
अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ।। २।।
यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः ।। ३।।
तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः ।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः ।। ४।।
तौ पितुर्नयनजेन वारिणा किञ्चिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ।। ५।।

(१) उस राजा दशरथ से महर्षि विश्वामित्र ने राम की याचना की यज्ञविघात की शन्ति के लिए। उस समय राम बिलकुल बालक थे, परन्तु तेज की उमर नहीं देखी जाती। (२) विद्वान् दशरथ ने राम को लक्ष्मण के साथ मुनि को प्रदान कर दिया, यद्यपि वे (राम) उन्हें कठिनाई से प्राप्त हुए थे। प्राण के याचकों को भी रघुवंश ने कभी खाली लौटाया नहीं। (३) राम और लक्ष्मण के नगर में निकलने के अवसर पर नगर के मार्गों के संस्कार के लिए राजा नौकरों को जब तक आदेश दें, तब तक तो वह पुष्प और जल की वर्षा कर वायु और मेघों ने संपन्न कर दिया। (४) धनुष लेकर आज्ञा का पालन करने हेतु उद्यत दोनों शिशु पिता के चरणों पर गिरे और उनके ऊपर गिरे पिता के अश्रुबिन्दु। (५) पौर नर—नारियों की दृष्टियाँ उस समय मार्गतोरण बन गईं थीं, जब वे दोनों शिशु पिता के आँसुओं से अपने जूड़े पर उक्षित हो धनुष लेकर मुनि के पीछे चले।

१. तेजसां=तेजसः; हि न=न हि; अस्यैव रूपान्तरमपि—

सोऽपि/भि—गम्य किल गाधिसूनुना राममध्वरविघातशान्तये ।
याचितः शिशुमपि प्रजेश्वरस्तेजसां हि न वयः समीक्ष्यते ।।

२. लब्धवर्णभाक्=मेदिनीपतिः व.,सोऽविचक्षणः म.हे.अ.ना.;'अप्यसु—दर्थिता'=जीवितप्रणयिनामपिच्छितं नार्हतां रघुभिरप्यतोमुखै'; रघोः कुले=कुले रघोः। ३. पुर=सुर; संस्क्रियाम्=सत्क्रियाम्; तावदा=तावता; विदधे=विहिता; सा सपुष्प=सान्द्रपुष्प। ४. प्रवत्स्यतोः = प्रयास्यतोः।

लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ।। ६।।
मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ।
रेजतुर्गतिवशप्रवर्त्तिनौ भास्करस्य रघुराघवाविव ।। ७।।
वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत ।
तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ।। ८।।
तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः ।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्त्तिनाविव ।। ९।।
पूर्व्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ।।१०।।

(६) ऋषि ने राम के साथ केवल लक्ष्मण को ही माँगा था, अतः राजा ने बालकों के साथ सेना नहीं भेजी, केवल आशीष ही दी, वह भी या वही समर्थ थी उनकी रक्षा करने में। (७) बालकों ने माताओं के चरण छुए और महान् ओजस्वी मुनि के मार्ग पर चलने लगे। तब वे ऐसे लगे जैसे गतिवश घूमते चैत्र—वैशाख मास सूर्य के मार्ग पर लगते हैं। (८) दोनों बालकों की भुजाएँ तरंगित और चंचल थीं। शैशव के कारण उनकी गति भी चपल थी, परन्तु, वह भी लुभावनी ही थी जैसे वर्षारम्भ में 'उद्ध्य—भिध्य' नदों की गति होती है। (लोल भुजाएँ वीचि और वीचिसदृश लोल भुजाएँ।) (९) महर्षि विश्वामित्र ने राम और लक्ष्मण को दी 'बला' तथा 'अतिबला' नाम की विद्याएँ। उनके प्रभाव से वे दोनों सुकुमार बालक म्लान नहीं हुए, थे तो वे अभ्यासी मणिफर्श पर चलने के । पार्श्वर्कैंआ (बुन्देली भाषा) उन्हें लग रहा था कि माताएँ उन्हें कैंया पर बिठलाए हुई हैं। (१०) राम और लक्ष्मण चल तो रहे थे पैदल पर पुराविद् महर्षि की सुनाई पुरानी चरितावली से उन्हें ऐसा लग रहा था जैसे वे पैदल नहीं, अपितु सवारी से चल रहे हैं। थे तो वे वाहन के ही अनुरूप।

६. नुचर=नुगत; असौ=अतो। ७. वशप्र=वशात् म., पञ्चम्या हेत्वर्थकत्वे समासस्यानिषेधात्।
अत्र पद्यान्तरम्— **रेजुतुश्च सुतरां महौजसः कौशिकस्य पदवीमनुद्रुतौ ।**
उत्तरां प्रति दिशं विवस्वतः प्रस्थितस्य मधुमाधवाविव ।। व.हे.

८. उद्ध्य=उह्य। ९. 'विद्ययोस्तदुपदष्टयोः पथि' इति द्वितीयपादपाठान्तरम्। **मुनिप्र=गुरूप; वर्त्तिना=वर्त्तिता, वर्त्तना। १०. कथितैः = कथनै; उह्य=ऊह्य।**

तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः ।
वायवः सुरभिपुष्परेणुभिश्छायया च तरवः सिषेविरे ।।११।।
नाम्भसां कमलशोभिनां तथा शाखिनां च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ।।१२।।
स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः ।
विग्रहेण मदनस्य चारुणा सोऽभवत् प्रतिनिधिर्न कर्म्मणा ।।१३।।
तौ सुकेतुतनयाखिलीकृते कौशिकाद् विदितशापया पथि ।
निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् ।। १४।।
ज्यानिनादमथ गृह्णती तयोः प्रादुरास बहुलक्षपाछविः ।
ताडका चलकपालकुण्डला कालिकेव निबिडा वलाकिनी ।।१५।।

(११) उन दोनों बालकों की सेवा कर रहे थे जल से भरे सरोवर। वे मीठा जल सुलभ करा रहे थे। पक्षी मीठी वाणी सुना–सुना कर उनकी सेवा में लगे थे। वायु के झोंके कर रहे थे सेवा, सुगन्धित पुष्परेणुओं से और छाया द्वारा वृक्ष। पृथिवी, अन्तरिक्ष और द्यौ ये तीनों थे सेवानिरत। **(१२)** तपस्वियों को जितनी प्रीति उन दोनों के प्रियदर्शन से मिल रही थी उतनी न तो कमल से भरे जलाशयों से मिली थी और न परिश्रमहारी छायादार वृक्षों से। **(१३)** धनुष लिए राम जब वहाँ पहुँचे, जहाँ शिवँ ने काम को दग्ध किया था, तो काम के प्रतिनिधि सुन्दर शरीर से ही बने, कर्म से नहीं। **(१४)** ताड़का के शाप की कथा विश्वामित्र जी सुना चुके थे। उसके मार्ग पर उन्होंने जमीन पर टिका कर धनुष पर प्रत्यञ्चा खेल–खेल में चढ़ा ली। **(१५)** प्रत्यञ्चा की ध्वनि सुनाई दी तो उसी का अनुसरण करती हुई वहीं आ पहुँची ताड़का। कृष्णपक्ष की रात्रि सी थी उसकी छवि। कानों में कपाल के कुण्डल हिल रहे थे। वह ऐसी लग रही थी जैसे घनी काली बदली हो, जिस पर वकपंक्ति उछल रही हो।

११. कूजितैः = वा–शि/सि–तैः; सुखैः = सखैः; तरवः =जलदाः। सेवायां पार्थिवानामेवात्र प्रक्रम इति, संवादश्च 'रम्यान्तर' इति ४.११ शाकुन्तलेनेति जलदा इति पूर्वं पठितोऽपि पाठोऽत्र नादृतः। **१२.** पूर्वार्धपाठान्तरमत्र– 'नाम्भसां विकचपद्मशोभिनां वीरुधां फलभृतां न वा तथा', **शाखिनां=वीरुधां; च न=च न। १४. शापया=मायया; टनी=टिनी;** कौशिकपदे द्र. वामनस्य का.सू. २.१.१३। **१५. अथ= अभि** अ.ना., **अनु; गृह्णती=शृण्वती; ताडका=ताटका** अ.ना.; **कपाल=कपोल।**

तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ।।१६।।
उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम् ।
तां विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः ।।१७।।
यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत् ।।१८।।
बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलम् ।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् ।।१९।।
राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद् रुधिरचन्दनोक्षिता जीवितेशपदवीं जगाम सा ।। २०।।
नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात् ।
ज्योतिरिन्धननिपाति भास्करात् सूर्य्यकान्त इव ताडकान्तकः ।। २१।।

(१६) वह सीधे राम पर कूदी। वह श्मशान की आँधी सी थी। उसके तीव्र वेग से मार्ग के वृक्ष हिल उठे थे। वह मुर्दे की चीवर लपेटे थी और बड़ी घोर गर्जना कर रही थी। (१७) उसे देखा कि वह (आततायी की मुद्रा में है) एक हाथ उठाए दौड़ी आ रही है वह और उसकी कमर में पुरुष की आँत की मेखला लटक रही है तो राम ने स्त्रीवध का संकोच (घृणा) बाण के ही साथ छोड़ दिया। (१८) ताड़का के शिला जैसे घने वक्ष में राम के बाण ने जो विवर बनाया वही बन गया मृत्यु के प्रवेश का द्वार राक्षसों के भीतर, जहाँ अभी तक उसे (मृत्यु को) प्रवेश मिल नहीं पाया था। (१९) बाण से उसका हृदय विदीर्ण हो गया और वह गिर पड़ी। गिरते गिरते उसने केवल वनभूमि को ही नहीं अपितु तीनों लोकों की पराजय से स्थिर बनी रावण की श्री को भी कँपा डाला। (२०) वह निशचरी बन गई अभिसारिका, पहुँच गई प्राण प्यारे (प्रियतम तथा यम) के घर। उसने किया था अलंकरण भी, बसा रहे रुधिर को बनाया था चन्दनलेप। रामरूपी मन्मथ के दुःसह बाण से वह आहत थी ही। (अभिसारिका निशाचरी होती ही है।) (२१) यहाँ ताड़कान्तक राम ने अपने अवदान से प्रसन्न महामुनि विश्वामित्र से राक्षसों का मारक अस्त्र उसके मन्त्र के साथ प्राप्त किया, वैसे ही जैसे सूर्यकान्तमणि सूर्य से इन्धन भस्म कर देने वाली ज्वाला प्राप्त करता है।

१६. तीव्रवेगधुत= वेगविप्रकृत व.; सा स्वनोग्रया=सोग्रगन्धया, १७. विलोक्य=निरीक्ष्य। १८. ताड=ताट; विष्ट=दिष्ट। १९. केवलम्=केवलम् व.हे.अ.ना.। २०. चन्दनो=कुङ्कुमो। २१. पाति=घाति।

वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान् ।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ।। २२।।
आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् ।
बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम् ।। २३।।
तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः ।
लोकमन्धतमसात् क्रमोदितौ रश्मिभिः शशिदिवाकराविव ।। २४।।
वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् ।
संभ्रमोऽभवदपोढकर्म्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ।। २५।।
उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात् समुद्धरन् ।
रक्षसां बलमपश्यदम्बरे गृद्धपक्षपवनेरितध्वजम् ।। २६।।

(२२) इसके बाद राम परम पवित्र वामनाश्रम पहुँचे। उसका परिचय स्वयं विश्वामित्र से मिल चुका था। वहाँ राम को अनमनेपन का अनुभव होने लगा, क्योंकि वह उनका स्वयं का पूर्व अवतार का स्थान था, यद्यपि वहाँ की लीला का उन्हें स्मरण आ नहीं रहा था। (२३) उसके आगे विश्वामित्र जी को अपना तपोवन मिला। वहाँ पहुँचते ही शिष्यों ने पूजा की, द्रुमों ने भी पल्लवपुट की अंजलि बनाई और मृग दर्शनोन्मुख दिखाई दिए। (२४) महर्षि विश्वामित्र से वहाँ ली यज्ञदीक्षा। रक्षा में लगे दशरथ जी के दोनों पुत्र। वे बाणों से कर रहे थे रक्षा। यह वैसे ही हुआ जैसे अन्धतमस से लोक को एक के बाद एक करके उदित होने वाले चन्द्र और सूर्य बचाते हैं। (२५) बीच में यज्ञवेदी दिखाई दी उड़हुल के पुष्प के बराबर बड़ी बड़ी रक्त बिन्दुओं से दूषित। उससे ऋत्विक् डर गए, उनके हाथ से विकङ्कत (वृक्ष) का बना स्रुवा छूट गया और उनका यज्ञकार्य खण्डित हो गया। (२६) राम का ध्यान उधर गया। उन्होंने तूणीर से बाण खींचने का यत्न किया और सामने उपस्थित देखी आकाश में राक्षसों की सेना, जिसके ध्वज गिद्धों के पंखों की हवा से डोल रहे थे।

---

२२. नं श्रुत=नाश्रुत। २३. लिद्रुमम्=लिर्द्रमम्, लिद्रमैः; नोन्मुख=नोत्सुक। २४. दशरथात्मजौ=नृपसुतौ शितैः व.हे.; दितौ=द्यतौ व.। २५. दपोढ=दुपोढ व.हे.; स्रुचाम्=श्रुवाम्। २६. आश्रय=आशय अ.ना.; पक्ष=पत्र, ध्वजं=ध्वजाम्।

तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत् स नेतरान् ।
किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्त्तते ।। २७।।
सोऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतम् ।
तेन शैलगुरुमप्यपातयत् पाण्डुपत्रमिव ताडकासुतम् ।। २८।।
यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया ।
तं क्षुरप्रशकलीकृतं कृती पत्रिणां व्यभजदाश्रमाद् बहिः ।। २९।।
इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्त्तयन् क्रियाः ।। ३०।।
तौ प्रणामचलकाकपक्षकौ भ्रातराववभृथाऽऽप्लुतो मुनिः ।
आशिषामनुपदं समस्पृशद् दर्भपाटिततलेन पाणिना ।। ३१।।
तन्न्यमन्त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन् वशी ।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ।। ३२।।

(२७) राम ने उनमें से केवल उन दो राक्षसों को बाण का लक्ष्य बनाया जो उस सेना के नायक थे, अन्य राक्षसों को नहीं। क्या गरुड जो पराक्रम दिखलाने का आदि होता है महोरगों पर, कभी क्षुद्र सर्प राजिलों पर भी आक्रमण करता है? (२८) अस्त्रविद् राम ने उन पर वायव्यास्त्र का सन्धान किया। उसका वेग अतीव उग्र था। उससे उसने ताड़का के पर्वत जैसे भारी पुत्र को पत्ते के समान धराशायी कर दिया। (२९) सुबाहु नाम का जो अन्य मायावी राक्षस यहाँ वहाँ भागता रहा उसे राम ने तीक्ष्ण अर्धचन्द्र बाण से टुकड़े टुकड़े कर आश्रम के बाहर पक्षियों को परोस दिया। (३०) इस प्रकार दोनों भाइयों ने यज्ञविघ्न समाप्त कर दिए। ऋषि ने उनके युद्धकौशल का अभिनन्दन किया और ऋत्विजों ने कुलपति विश्वामित्र का निश्चित क्रम से यज्ञपूर्ण करा दिया। वे मौन ही धारण किए रहे। (३१) दोनों भाइयों ने अपने चञ्चल केशों वाले सिर से अवभृथ स्नान से भींगे मुनि को प्रणाम किया। मुनि ने आशीष दिया और दर्भ से पाटित तल वाले हाथ से उनके सिर का स्पर्श किया। (३२) उसी समय मिथिला के राजा ने उन्हें निमन्त्रित किया। मिथिला जाते समय मुनि उन दोनों भाइयों को भी साथ ले गए। मिथिला नरेश के धनुष की कथा सुनने से उनमें भी कुतूहल था।

२८. सोऽस्त्र=अस्त्र अ.ना.; अपातयत्=अपाहरत्। २९. राक्षसोऽपरस्तत्र तत्र=राक्षसः परो यत्र तत्र; विससर्प=विससर्ज, विजहार; पत्रिणां=पक्षिणा। ३०. विक्रमम्=विक्रियाम्; वाग्यतस्य=वाग्जितस्य। ३१. थाप्लुतो=थप्लुतो, भृतप्लुतो। ३२. क्रतुः = क्रतुम्।

तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत ।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ।। ३३।।
प्रत्यपद्यत चिरस्य यत् पुनश्चारु गौतमवधूः शिलामयी ।
स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ।। ३४।।
राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः ।
अर्थकामसहितं सपर्यया देहबद्धमिव धर्म्मममभ्यगात् ।। ३५।।
तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू ।
मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां जनः ।। ३६।।
यूपवत्यवसिते क्रियाविधौ कालवित् कुशिकवंशवर्द्धनः ।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयाम्बभूव सः ।। ३७।।
तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ।। ३८।।

(३३) मार्ग कुछ दूर तक पार कर लेने पर इन सबने उस आश्रम के वृक्षों के नीचे सायंकाल विश्राम किया जिसमें दीर्घतपा ऋषि की स्त्री कुछ समय तक इन्द्र की स्त्री बना दी गई थी। **(३४)** गौतम की सुन्दर स्त्री चिरकाल तक शिला बनी रही और उसके बाद भी वह अपना सुन्दर शरीर प्राप्त कर सकी यह अनुग्रह राम के किल्विषच्छेदी पादरज का है। **(३५)** जनेश्वर जनक ने जब जाना कि महर्षि विश्वामित्र राघवों के साथ उपस्थित हुए हैं तो उन्होंने उनकी अगवानी यह सोचकर की, कि अर्थ और काम को साथ लिए धर्म ही स्वरूप धारण कर उपस्थित हुआ है। **(३६)** विदेहनगरी (मिथिला) के निवासी उन दोनों भाइयों को आकाश से भूमि पर उतर आए पुनर्वसू मान रहे थे और निश्चल नेत्रों से देखते हुए पलक झपने को भी हानि/वञ्चना समझ रहे थे। **(३७)** जब यज्ञकार्य पूरा हो गया तो कालवित् विश्वामित्र ने जनक को सूचित किया कि राम धनुष को देखने के लिए उत्सुक हैं। **(३८)** जनक ने देखी राम की सुन्दरता और उसके साथ उनके वंश की प्रतिष्ठा, किन्तु धनुष को देखा अतीव

३३. शिवेषु वसतिः = निवासवसति। ३४. चिरस्य=चिराय म.; **यत्=सा; शिलामयी= शिला सती** अ.ना.; **स किल=सकल; किल्बि=कल्म। ३५. मुनिं=ऋषिं; जनेश्वरः = जिनेश्वरः; सहितं सपर्यया=सहितः स पर्ययात्; बद्धम्=बन्धम्** अ.ना., **वन्तमिव; धर्मम्=इज्यया। ३६. नगरीनिवासिनाम्= पुटभेदनौकसाम्** अ.ना., तृतीयस्य पादस्य कृते पाठः **'पश्यतां नृपसुतौ स्म मन्यते'** हे., **पक्ष्म=पक्ष। ३७. वर्द्धनः= संभवः ; दर्शनो=कर्षणो। ३८. जन्मनः=वर्द्धनः, पार्थिवः; धनुर्दुरानमं=दुरानमं धनुः, धनुर्दुरासदम्।**

अब्रवीच्च भगवन्! मतङ्गजैर्यद् बृहद्भिरपि कर्म्म दुष्करम् ।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ।। ३९ ।।
ह्रेपिता हि बहवो नरेश्वरास्तेन तात! धनुषा धनुर्भृतः ।
ज्यानिघातकठिनत्वचो भुजान् स्वान् विधूय धिगिति प्रतस्थिरे ।। ४० ।।
प्रत्युवाच तमृषिर्निशाम्यतां सारतोऽयमथवा गिरा कृतम् ।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ।। ४१ ।।
एवमाप्तवचनात् स पौरुषं काकपक्षकधरेऽपि राघवे ।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ।। ४२ ।।
व्यादिदेश गणशोऽथ पार्श्वगान् कार्म्मुकाभिहरणाय मैथिलः ।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ।। ४३ ।।

कठोर तो उन्हें कन्यादान के लिए निश्चित शर्त्त से पीड़ा हुई। **(३९)** और कहा 'भगवन्! जो कर्म बड़े—बड़े मतङ्गजों के लिए भी दुष्कर है उसमें मैं नहीं चाहूँगा कि कोई कलभ (हाथी का बच्चा) हाथ लगाए और विफल हो। **(४०)** हे तात! इस धनुष पर बहुत सारे धनुर्धर मुँह की खा चुके हैं। अपनी प्रत्यञ्चा के घात से कठिन त्वचा वाली भुजाओं को 'धिक्' कहकर कँपाते हुए लौट गए हैं।' **(४१)** ऋषि ने उत्तर दिया 'यह बालक बल परीक्षा में देखा जाए, कहने से क्या? इस बालक की शक्ति धनुष पर ही व्यक्त होगी जैसी वज्र की पर्वत पर।' **(४२)** महामुनि का वचन आप्त वचन था। उसके आधार पर जनक ने काकपक्षधारी नन्हें से राम में भी शक्ति का अस्तित्व स्वीकार कर लिया, वैसे ही इन्द्रगोप के जैसे छोटे से वह्नि में दाहशक्ति का अस्तित्व स्वीकार कर लिया जाता है। **(४३)** जनक ने धनुष लाने का आदेश दिया और तदर्थ अपने पास के भृत्यों की टोलियाँ भेजीं, वैसे ही जैसे इन्द्रधनुष को उपस्थित करने हेतु मेघों को आदेश देता है इन्द्र।

३९. बृहद्भि=महद्भि, दुष्करम्=दुस्सहम्, चेष्टितम्=साहसम् अ.ना.। **४१. सारतो = वीर्यतो** हे.; **गिरा कृतम्=कृतं गिरा, गिरौ=तरौ** अ.ना.। द्र० रघुवंश ३.६३। **४२. एव=इत्थ** व.हे.; **धरेऽपि=धर एव** म.अ.ना.; **मात्रके=मात्रिके, लाञ्छने। ४३. व्यादि=आदि; काभिह=कस्य ह; मैथिलः = पार्थिवः; तैजस=तेजस।**
अतः परमिमे पङ्क्ती— **तेऽपि तूर्णमवगम्य शाम्भवं चाप/मासमाहरणकर्म्मतत्पराः ।**
स्वां स क्षिप्रमतिकर्कशं हि तच्चिक्षिपुर्दशरथात्मजाग्रतः ।।

तत् प्रसुप्तभुजगेन्द्रभीषणं प्रेक्ष्य दाशरथिराददे धनुः ।
विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद् वृषध्वजः ।।४४।।
आततज्यमकरोत् स संसदा विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः ।।४५।।
भज्यमानमतिमात्रकर्षणात् तेन वज्रपरुषस्वनं धनुः ।
भर्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत् ।।४६।।
दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः ।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत् ।।४७।।
प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम् ।
भृत्यभावि दुहितुः परिग्रहाद् दिश्यतां कुलमिदं निमेरिति ।।४८।।

(४४) वह धनुष सुप्त सर्प जैसा भीषण था। राम ने उसे देखा और उठा लिया। इसी से शिव जी ने बाण छोड़ा था, जब क्रतु भागा था मृग बनकर। (४५) और सारी संसद् विस्मित तथा निश्चल नेत्र होकर देख रही थी कि उस पर डोरी चढ़ा दी। यद्यपि था वह पत्थर जैसा कठोर, पर राम को लगा ऐसा जैसा कामदेव को लगता है अपना पुष्पधनुष। (४६) राम ने डोरी चढ़ाकर उसे जमकर खींचा तो वह टूट गया। हुई उससे बिजली जैसी कड़कड़ाहट। उससे परशुराम जी को सूचना मिल गई कि अब क्षत्रिय फिर से उठ खड़े हुए हैं। (४७) जनक जी ने शिवधनुष पर राम की शक्ति देख ली और अपनी पुत्री जानकी को वीर्यशुल्क के रूप में उन्हें अर्पित कर दिया। जानकी मूर्त्तिमती श्री ही थी। (४८) महाद्युति जनक ने कोसलराज दशरथ के पास पुरोहित को भेजा और निवेदन किया कि पुत्री स्वीकार कर आप निमिकुल को सेवा का अवसर दीजिए।

४४. प्रेक्ष्य=वीक्ष्य म.। **४५. आततज्यम्=आत्तसज्जम्; च=स; संसदा=संसदि; विस्मय=विस्मित; ईक्षितः = वीक्षितः ; पेशलं=पेलवं, कोमलं। ४६. तेन वज्रपरुषस्वनं=तत्स्वनेन गगनस्पृशा; मुद्यत=मुत्थित** अ.ना.; **इव=इति** अ.ना.। **४७. रुद्र=भग्न; र्यशुल्कम्=र्यमग्र्यम्; मैथिलः = तां सतीम् राघवाय** हे., **तनयामयोनिजाम्= राघवाय तंनयां स पार्थिवीम्; रूपिणीम्=पार्थिवः, स्वां ददौ, श्रियमिव=श्रियमिति; मिव न्यवेदयत्=मिवाऽमरद्युतिः, मिवार्जितां ददौ। दृष्टसार०** म.,

अत्र रूपभेदः(मल्लिनाथमतः)– **मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम् ।**
सन्निधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ।। म.हे.अ.ना.

४८. महाद्युतिः = महाद्युतिम्, महारथः, महीपतिः, महौजसः; धसम्=धसा; हितम्, तुः परि=तृप्रति हे.; **दिश्यतां=वीक्ष्यतां।** हे.

अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग् द्विजः ।
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम् ॥ ४९ ॥
तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान् वचनमग्रजन्मनः ।
उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ॥ ५० ॥
आससाद मिथिलां स वेष्टयन् पीडितोपवनपादपैर्बलैः ।
प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम् ॥ ५१ ॥
तौ समेत्य समयस्थितावुभौ भूपती वरुणवासवोपमौ ।
कन्यका–तनय–कौतुक–क्रियां स्वप्रभावसदृशीं वितेनतुः ॥ ५२ ॥
पार्थिवीमुदवहद् रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम् ।
यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ॥ ५३ ॥

(४९) दशरथ जी अनुरूप पुत्रवधू की खोज में थे कि अनुकूल समाचार के साथ जनक के पुरोहित पहुँचे। पुण्यात्मा लोगों की इच्छा कल्पवृक्ष फल जैसी होती है, वह इच्छा करते ही फल जाती। (५०) दशरथ जी ने जनक के पुरोहित की पुरस्कारक्रिया विधि पूरी की। तदनन्तर उनका संदेश सुना। वह वचन ब्राह्मण का वचन था। इन्द्र के मित्र दशरथ बड़े संयम के साथ सेना लेकर मिथिला चल पड़े। सेना की रेणु से सूर्य की किरण छिप गई थी। (५१) वे मिथिला जा पहुँचे। उनकी सेना ने मिथिला को चारों ओर से घेर लिया उससे उपवन पादपों को क्षति पहुँची, परन्तु उसे प्रीतिजन्य मानकर उसने सह लिया जैसे कान्त के परिभोग को स्त्री सह लेती है भले ही वह आयत हो। (५२) वे दोनों राजा अपनी मर्यादा में थे। मिले, जैसे वरुण और वासव मिलते हैं। उन्होंने पुत्र–पुत्री की कंकणक्रिया (विवाहक्रिया) अपने प्रभाव के अनुरूप पूरी की। (५३) पृथिवी से प्रकट पुत्री सीता का पाणिग्रहण किया राम ने, भरत ने उसकी छोटी बहिन ऊर्मिला का और इनके बड़े तेजस्वी जो छोटे भाई थे उन्होंने जनक के

४९. सद्यः = सत्यम्; हि पच्यते=विपच्यते, हि दृश्यते; फलधर्मि=फलधर्म्म, सत्यधर्मि, सत्यधर्म।

अत्र पद्यान्तरम्–

उत्सुकश्च सुतदारकर्म्मणा सोऽभवत् गुरुरुपागतश्च तम् ।
गौतमस्य तनयोऽनुकूलवाक् प्रार्थितं हि सुकृतामकालहृत् ॥ व. **प्रार्थितं=वाञ्छितं।**

५०. वशी=बली व.। श्रुतवचन एव क्षणमात्रमप्यविलम्ब्य उच्चचालेति यावत्। **५१. पादपैः=पादपां** म.; **प्रीतिरोध=तद्विमर्द्द। ५२. समयस्थिता=समये स्थिता** हे., **समुपस्थिता। ५३. पार्थिवीम्=मैथिलीम्; लक्ष्मणः=मध्यमः; तदनुजामथोर्मिलाम्=ललितवाचमूर्म्मिलाम्; यौ तयोरवरजौ वरौजसौ=यौ तयोरवरजावरौजसौ, तौ समावधिगतौ सुमित्रया।**

ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः ।
सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः ।। ५४।।
ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम् ।
सोऽभवद् वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ।। ५५।।
एवमात्तरतिरात्मसंभवान् तान् निवेश्य चतुरोऽपि तत्र सः ।
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्त्तत ।। ५६।।
तस्य जातु मरुतः प्रतीपगा वर्त्मनि ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम् ।। ५७।।
लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः ।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ।। ५८।।
श्येनपक्षपरिधूसरालकाः सान्ध्यमेघरुधिरार्द्रवाससः ।
अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ।। ५९।।

छोटे भाई कुशध्वज की सुन्दर कन्याओं का। (५४) दशरथ के चतुर्थ (शत्रुघ्न) सहित वे तीनों पुत्र (राम, भरत तथा लक्ष्मण) नववधू पाकर ऐसे, लगे जैसे उसी राजा के चारों उपाय (साम, दान, भेद और दण्ड) अपनी–अपनी सिद्धियों से आ जुड़े हों। (५५) वे राजकुमारियाँ उन राजकुमारों से और ये राजकुमार उन राजकुमारियों से मिलकर कृतार्थ (पूर्ण) हो गए। कैसे? जैसे प्रकृति, प्रत्यय और उनका योग। (५६) इस प्रकार रागयुक्त दशरथ अपने चारों ही पुत्रों का विवाह तीन पड़ावों के बाद जनक को विदाकर अपनी नगरी की ओर लौटे। (५७) बीच में उत्पात हुआ। सामने बवंडर उठा। अनेक ध्वज टूट गए और अनेक वृक्ष। पूरी सेना को अत्यधिक क्लेश हुआ। जैसे तट लाँघकर उठे नदीवेग से तटभूमि को होता है। (५८) बाद में दिखाई दिया कि सूर्यबिम्ब के आस–पास भयंकर परिवेश बन गया है। वह ऐसा लगा जैसे गरुड़ द्वारा मारे गए सर्प का कटकर गिरा मणियुक्त फण हो। (५९) दिशाएँ अङ्गना के ही समान रजस्वला हो गईं, उन्हें देखना अच्छा नहीं लग रहा था, सांध्य मेघ था उनका लाल वस्त्र, श्येन (बाझ) के पंख थे उनके अतीव धूसर अलक।

५४. परिग्रहाः = परिग्रहात् ना., समागमाः, समागमात्; निग्रहाः = विग्रहाः। ५५. ता नराधिपसुताः= ताश्च पार्थिवसुताः; च=ऽपि। ५६. आत्त=आत्म; तान् निवेश्य=तान् विवाह्य, सन्निवेश्य; तत्र सः = भूपतिः। ५७. वर्त्मनि=वर्त्मसु म.; तरु=तट, उत्तराः, उद्धता। ५८. वेष=वेश म.; वेष्टित=वेष्टन अ.ना.। ५९. सान्ध्य=सान्द्र; रजस्वला दिशः = दिशो रजस्वलाः।

भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे ।
क्षत्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ।। ६० ।।
तत् प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ।
अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्त इत्यलघयत् स तद्व्यथाम् ।। ६१ ।।
तेजसः सपदि राशिरुच्छ्रितः प्रादुरास किल वाहिनीमुखे ।
यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ।। ६२ ।।
पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् ।
यः ससोम इव घर्म्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ।। ६३ ।।
येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा ।
वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ।। ६४ ।।
अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः ।
क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्व्वगणनामिवाद्वहन् ।। ६५ ।।

(६०) लोमड़ियाँ सूर्य की ओर मुँख उठाकर भयावह हुँआ हुँआ करने लगीं। वे सूचना दे रही थीं क्षत्रियों के रक्त से पितरों को अञ्जलि देने वाले परशुराम जी के आने की। **(६१)** राजा को कृत्य का ज्ञान था। जब उन्होंने 'विपरीत वायु' आदि विकार देखे तो शान्ति का उपाय गुरुजी से पूछा। उन्होंने उसकी व्यथा यह कहकर कम कर दी कि अन्त में परिणाम अच्छा होने वाला है। **(६२)** इसी बीच सेना के सामने उठता दिखाई दिया विशाल तेजःपुञ्ज। उसे आँखें पोंछ–पोंछ कर देखा तो सैनिकों को लगी कोई पुरुषाकृति। **(६३)** दिखाई दिया कि वह पिता के वंश का लक्षण यज्ञोपवीत और माता के वंश का लक्षण सुदृढ़ धनु धारण किए है, इसलिए लग रहा है जैसे चन्द्रबिम्ब से युक्त सूर्यबिम्ब हो या सर्प से युक्त चन्दनवृक्ष। **(६४)** ये वे महर्षि थे जिन्होंने रोषपरुष उन्मर्याद पिता के आदेश का पालन करने हेतु काँप रही माता (रेणुका) का सिर काटने हेतु पहले जीती थी घृणा (दया) और उसके बाद मही। **(६५)** उनके दाहिने कान में लिपटा था २१ गुरियों का रुद्राक्षनिर्मित कण्ठा। वह मानों प्रतीक था पृथिवी को २१ बार क्षत्रिय–विहीन करने की घटना का।

६०. सिरे=शिरे; चोद=नोद, वेद, प्रेर, बोध, देश, देस। ६१. पवना=मरुता; प्रेक्ष्य शान्ति=प्रेक्ष्य शान्त, क्षिप्रशान्त, क्षिप्रशान्ति, क्षिप्रशान्त्य; कृत्य=गम्य; स्वन्त=स्वल्प। ६२. तेजसः = तेजसां अ.ना.; **उच्छ्रितः = उत्थितः** म.हे.अ.ना., **उच्छिखः।** लक्षितश्चेति तु युज्यते पठितुम्। **६३. मशं=वंश; द्रुमः = द्रुमः।** युग्मम्।। **६४. महीं=क्षितिः। ६५. संस्थिते=संश्रिते** ना., **संश्रये; यः = सः।**

तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् ।
बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ।। ६६।।
नाम राम इति तुल्यमात्मजे वर्त्तमानमहिते च दारुणम् ।
हृद्यमस्य भयदायि चाभवद् रत्नजातमिव हारसर्प्पयोः ।। ६७।।
अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्च्चिषं ततः संदधे दृशमुदग्रतारकाम् ।। ६८।।
तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः ।
अङ्गुलीविवरचारिणं शरं कुर्व्वता निजगदे युयुत्सुना ।। ६९।।
क्षत्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः ।
सुप्तसर्प्प इव दण्डघट्टनाद् रोषितोऽस्मि तव विक्रमश्रवात् ।। ७०।।

(६६) दशरथ विषाद में डूब गए, क्योंकि उन्होंने देखा पिता की हत्या के क्रोध से राजवंश का इतना भयंकर शत्रु सामने उपस्थित है। वे स्वयं वृद्ध हो चुके हैं और सूनु है बालक। **(६७)** 'राम' यह नाम पुत्र का भी और दारुण शत्रु का भी तो दशरथ को उससे प्रीति भी मिली और भय भी, जैसे एक ही मणि यदि वह हार में लगी हो या सर्प के सिर पर अवस्थित हो। **(६८)** राजा दशरथ जब तक अर्घ्य—अर्घ्य कहें तभी तक तो वे महर्षि उन्हें लाँघ कर वहाँ जा पहुँचे जहाँ राम थे। वहाँ उन्होनें दृष्टि डाली, वही दृष्टि जिसकी निकली अग्नि की ज्वाला क्षत्रियों को खा चुकी थी। **(६९)** परशुराम जी युद्ध की मुद्रा में थे। उन्होंने एक मुट्ठी में पकड़ा धनुष और अंगुली विवर के बीच बाण करते हुए राम से कहा। **(७०)** 'तुम क्षत्रिय लोगों ने मेरा अपकार किया है, अतः तुम हो मेरे शत्रु। उन्हें अनेक बार मारकर मैं शान्त था, किन्तु तुम्हारा पराक्रम कानों में पड़ा तो मैं सुप्त सर्प के समान जाग गया हूँ।

६६. तुरीयपादपाठः, 'विव्यथे दशरथो दशाच्युतः', र्थिवः = र्थिवः। कुलकम्, विशेषकम्। ६७. नाम राम=राम नाम; च=ऽपि। ६८. वेक्ष्य=पेक्ष्य; क्षत्र=क्षत्रि; कोप=वंश, लोक; ततः = पुनः। ६९. निषक्त= विषक्त अ.ना., निषिक्त, निविष्ट, नियुक्त; चारिणं=सारिणम्, वर्त्तिनं, चारिणीम्; शरम्=इषुम्। ७०. कार=कारि; शमं=श्रमं; रोषितः=उत्थितः, दुःखितः; विक्रमश्रवात्=धामविश्रवात्।

मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्व्वमक्षणोः ।
तन्निशम्य भवता समर्थये वीर्य्यशृङ्गमिव भग्नमात्मनः ।। ७१ ।।
अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगांत् ।
व्रीडमावहति मे स सम्प्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ।। ७२।।
बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ रिपू मम मतौ समागसौ ।
तातधेनुहरणाच्च हैहयस्त्वञ्च कीर्त्तिमपहर्त्तुमुद्यतः ।। ७३।।
क्षत्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि ।
पावकस्य महिमा स गण्यते कक्षवज् ज्वलति सागरेऽपि यः ।। ७४।।
विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत् त्वया ।
खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम् ।। ७५।।

(७१) मिथिला नरेश का धनुष अन्य राजाओं से झुका तक नहीं और तुमने दिया उसे तोड़, यह सुनकर मैं समझता हूँ मेरा बल का शृङ्ग एक प्रकार से टूट चुका है। (७२) और कभी तो जब भी 'राम' बोला जाता था तो वह मेरे पास आता था, आज वह तुम्हारे लिए भी चल पड़ा है और हो तुम उदयोन्मुख। यह मेरे लिए लज्जा की बात है। (७३) मेरा अस्त्र पर्वत पर भी अकुण्ठित रहा है। वह मेरे पास अभी भी है। अब मेरे लिए दो शत्रु समान अपराध के हैं एक तो पिता की गौ का हरण करने वाला हैहय और तुम, जो उद्यत हो करने के लिए हरण मेरी कीर्त्ति का। (७४) मैं अपने जिस पराक्रम से क्षत्रियों का अन्त करता रहा हूँ उससे मुझे संतोष नहीं जब तक तुमको न जीत लूँ। अग्नि की महिमा तो वह जो तृण समुदाय के समान ही सागर में भी धधकती मिलती है। (७५) तूने जो यह शिव जी का धनुष तोड़ दिया उसका बल तो भगवान् विष्णु के ओज ने पहले ही खींच रखा था। नदी वेगों से मूल खुद जाने पर तटवर्त्ती वृक्ष को तो साधारण हवा भी गिरा लेती है।

७१. क्षणोः = क्षिणोः अ.ना.; यत्=तत् अ.ना.। ७२. जगति=जयति; संप्रति = साम्प्रतं; वृत्ति=शक्ति। ७३. अचलेऽप्य= अवलेप; रिपू मम मतौ समागसौ=मतौ मम रिपू समागमौ,रिपू मम समागसौ मतौ; तातधेनु=धेनुवत्स म.हे.अ.ना., वत्सधेनु, कामधेनु, विप्रधेनु, होमधेनु। ७४. नाजिते=जीविते; यः = यत्। ७५. बलम्=रसम् हे.; हरेः = रवेः; भाजि=भञ्जि अ.ना.।

तन्मदीयमिदमायुधं ज्यया संगमय्य सशरं विकृष्यताम् ।
तिष्ठतु प्रधनमेवमप्यहं तुल्यवीर्य्यतरसा जितस्त्वया ।। ७६ ।।
कातरोऽसि यदि वोद्गतार्चिषा तर्ज्जितः परशुधारया मम ।
ज्यानिघातकठिनाङ्गुलिर्वृथा बध्यतामभययाचनाञ्जलिः ।। ७७ ।।
एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः ।
तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ।। ७८ ।।
पूर्व्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ।। ७९ ।।
तेन भूमिनिहितैककोटि तत् कार्मुकं च बलिनाऽधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ।। ८० ।।

(७६) तो मेरा जो यह धनुष है इस पर प्रत्यञ्चा चढ़ाकर बाण के साथ इसे खींचकर दिखाओ। यदि तुमने इसे खींच दिया तो मैं इसीसे तुम्हें समान बलशाली और स्वयं को हारा मान लूँगा। युद्ध की आवश्यकता नहीं। (७७) और यदि मेरे परशु की लपट उगलती धारा के भय से कातर हो गए तो ज्या की चोट से वृथा कठिन अँगुलियाँ मिलाकर अभययाचनाञ्जलि बाँध लो।' (७८) भयंकर दिखाई दे रहे परशुराम ने ऐसा कहा तो राम ने स्मित से अधर कँपाया और उनके धनुष का ग्रहण है सक्षम उत्तर समझा। (७९) वह धनुष तो उन्हीं के पूर्वजन्म का धनुष था। उसे लेते ही राम अतीव प्रिय लगने लगे। नया मेघ तो अकेला भी आकर्षक ही होता है, यदि उस पर इन्द्रधनुष की छटा और बिखर जाए तो क्या कहना। (८०) इधर तो बलवान् राम ने उस धनुष का एक किनारा जमीन पर रखा और उसे चढ़ाया और उधर क्षत्रियों के रिपु परशुराम निष्प्रभ पड़ गए, जैसे अग्नि का धूम ही शेष रह जाए।

७६. पूर्वार्द्धपाठः 'तन्मदीयमिदमाततज्यतां नीयतां विजयसाधनं धनुः' हे.। विजय=विषय। ७७. वो=चो अ.ना., हो; निघात=विमर्द्द अ.ना.; वृथा=तथा। ७८. ताधरः = तो हरिः। ७९. लघु=शुभ; लाञ्छितः = लाञ्छनः। ८०. निहितै=निमितै अ.ना., नमितै, निह/हितै; कोटि तत्=कोटिना व.हे.; भूभृतां=तत्क्षणं हे.। उत्तरार्धपाठः 'प्राप वर्णविकृतिं च भार्गवो वृष्टिधौत इव वासवध्वजः'।

तावुभावपि परस्परं स्थितौ वर्द्धमानपरिहीणतेजसौ ।
पश्यति स्म जनता दिनात्यये पार्व्वणौ शशिदिवाकराविव ।। ८१ ।।
तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्य्यमात्मनि ।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः ।। ८२ ।।
न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्रिणा हन्मि लोकमुत ते मखार्जितम् ।। ८३ ।।
प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम् ।
गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ।। ८४ ।।
भस्मसात् कृतवतः पितृद्विषो विप्रसाच्च वसुधां ससागराम् ।
आहितो जयविपर्य्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ।। ८५ ।।
तद् गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ।
पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम् ।। ८६ ।।

(८१) आमने सामने खड़े उन दोनों में से एक का तेज बढ़ रहा था और दूसरे का घट रहा था। जनता उनकी स्थिति वैसी ही देख रही थी जैसी पूर्णिमा के सायंकाल चन्द्र और सूर्य की होती है। (८२) कुमार कार्त्तिकेय तुल्य राम कृपामृदु थे । उन्होंने परशुराम को अपने भीतर सवलित शक्ति देखा और धनुष पर चढ़ा देखा बाण तो तो कहा। (८३) आप हैं विप्र। इसलिए, मैं आप पर तो प्रहार कर सकता नहीं, यद्यपि आपने मेरा अपमान किया है फिर बतलाइए इस चढ़े बाण से आपकी (तीर्थयात्रा आदि में उपयोगी) गति नष्ट करूँ या यज्ञार्जित परलोक। (८४) ऋषि ने उसे उत्तर दिया—'मैं आपको तात्त्विक रूप से पुरातन पुरुष नहीं जानता ऐसा नहीं। मैने तो पृथिवीलोक पर अवतीर्ण होने पर आपका वैष्णव तेज देखने के लिए आपको क्षुभित किया था। (८५) पिता के विद्वेषियों को भस्मसात् और सागरसमेत पृथिवी को विप्रसात् कर चुका मैं (क्या हूँ यह विदित ही है)। यदि हारा हूँ तो आप परमेष्ठी से तो मेरी यह हार भी श्लाघ्य है। (८६) हे मतिमतांवर! ऐसा कीजिए कि मेरी गति बचा दीजिए ताकि मैं पुण्यतीर्थों तक जा सकूँ। स्वर्ग का मार्ग यदि रोक भी देंगे तो मुझे पीड़ा नहीं

---

८१. रंस्थि=रस्थि=रास्थितौ; हीण=हीन। ८२. तं=ते, संहित=संश्रित; अमोघम्=अमोघ म.अ.ना.,अवन्ध्य हे.; आशुगम्=सायकम्, मार्गणम्। ८३. उत ते=अपि ते म.अ.ना., अथ ते, अथवा। ८५. विप्र=पात्र म.अ.ना.; ऽपि=हि। ८६. मति=गति; पद्धति=सङ्गति; लोलुपम्=लोलुभम् अ.ना.।

प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् ।
भार्गवस्य सुकृतोऽपि सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः ।। ८७।।
राघवोऽथ चरणौ तपोनिधेः क्षम्यतामिति वदन् समस्पृशत् ।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्त्तये ।। ८८।।
राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यतः ।
नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः ।। ८९।।
साधयाम्यहमविघ्नमस्तु ते देवकार्य्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ।। ९०।।

होगी, क्योंकि अब मैं भोगलोलुप नहीं रहा।' (८७) राम ने मुनि का अनुरोध 'तथा' कहकर मान लिया, और बाण को पूर्व की ओर छोड़ दिया, परिणामतः परशुराम जी ने पुण्य तो बहुत किए, परन्तु राम का छोड़ा वह बाण ऐसी अर्गला बना कि उसे लाँघना दुष्कर हो गया। (८८) इसके बाद राम ने तपोनिधि परशुराम के दोनों चरण छुए 'क्षमा कीजिए' कहते हुए। तरस्वी लोगों की जीत लिए गए शत्रुओं के समक्ष प्रणति ही होती है कीर्त्तिकर। (८९) भगवन्! आपने मुझे मेरी मातृकुल की राजसता हटाकर मुझे पितृकुल की सात्त्विकता यानी शम को पहुँचा दिया, फलतः आपके द्वारा किया गया मेरा यह निग्रह भी अनुग्रह सिद्ध हुआ, क्योंकि इसका फल स्पृहणीय है। (९०) और लक्ष्मणसहित राम से 'अब मैं चलता हूँ, आपकी योजनाएँ निर्विघ्न पूरी हों। देवकार्य ही है आपकी योजना' ऐसा कहकर मुनिवर परशुराम जी अलक्षित हो गए।

---

८७. तथेति=तथैव; मुखश्च=मुखञ्च व.। अत्र ञकारचकारयोस्तथैव भ्रमो यथा रघुवंशस्यैव १७.४७ पद्ये, **कृतोऽपि=कृतस्य; मार्ग=लोक; दुरत्ययः = दुरन्वयः**। ८८. **वोऽथ=वोऽपि** म.अ.ना.; **तरस्वि=तपस्वि;कीर्त्तये=शोभते**। ८९. **पित्र्य=पैत्र; शमं गत=शमं यदा, शमं यतः, यतः शमम्, पदं यतः** व., **पदं यदा; फलो=फले; मम=मयि** व.; **ग्रही=ग्रहः**। ९०. **साधया=साधुया, शाधि या** व.म.हे.अ.ना.; **वच=पुनः, ततः,दधे** ।। युग्मम्।।

तस्मिन् गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम् ।
तस्याभवत् क्षणशुचः परितोषलाभः
कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ।। ९१ ।।

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शिनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ।। ९२ ।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ कुमारनिवेशो नाम
एकादशः सर्गः।। ११ ।।

(९१) उनके चले जाने पर पिता दशरथ ने विजयी राम को छाती से लगाया और माना कि उसका पुनर्जन्म हुआ है। थोड़ी देर शोकमग्न दशरथ को जो परितोष मिला वह घाँस में लगी आग से झुलसे वृक्ष पर वृष्टिपात था। (९२) अब शंकर तुल्य दशरथ जी रास्ते में बने रम्य तम्बुओं में कुछ रात्रियाँ बिताकर अयोध्यापुरी में प्रविष्ट हुए तो उसके गवाक्ष सुन्दर स्त्रियों के नेत्रों से कुवलयित दिखाई दिए। वे सब मैथिली को देखने में लीन थीं।

इस प्रकार महाकवि कालिदास की कृति रघुवंशमहाकाव्य में कुमारनिवेश नामक
एकादश सर्ग पूर्ण हुआ।। ११ ।।

सनातनेन श्रीरेवाप्रसादेन द्विवेदिना ।
लिखितष्टङ्कितो भूयात् सर्ग एष मुदे सताम् ।।

---

९१. पातः=सेकः।
अतः परं पद्यम्– स्वं निवेश्य किल धाम राघवे वैष्णवं विदितविष्णुतेजसि ।
स्वस्तिदानमधिकृत्य चाक्षयं भार्गवोऽथ निजमाश्रमं ययौ ।। व.

९२. अथ=इति व.; क्लृप्तरम्यो=रम्यक्लृप्तो; क्वर्ये=पकर्ये अ.ना.; दर्शिनी=दर्शना; अङ्गनानां=उद्गतानां।

।। द्वादशः सर्गः।।

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्व्वाणः प्रदीपार्चिरिवोषसि ।।१।।
तं कर्णमूलमागत्य पलितच्छद्मना जरा ।
कैकेयीशङ्कयेवाह रामे श्रीर्न्यस्यतामिति ।।२।।
सा पौरान् पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयाञ्चक्रे कुल्येवोद्यानपादपान् ।।३।।
तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया ।
कैकेयी दूषयामास शोकोष्णैर्बाष्पबिन्दुभिः ।।४।।
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ।।५।।

(१) राजा दशरथ विषय (भोग्य तथा पात्र) का स्नेह (राग तथा तेल) समाप्त कर चुके थे और अब, जब दशा (अवस्था तथा बत्ती) के अन्त में पहुँच गए तो सबेरे के दीपक की लौ से लग रहे थे, अब बुझे तब बुझे। **(२)** बालों की सफेदी के बहाने जरा उनके कान के पास आकर बोली 'अब श्री को राम पर छोड़ दो,' कदाचित् उसे कैकेयी की शङ्का थी। **(३)** पुरवासियों के प्रिय राम के अभ्युदय की श्रुति से सभी पौरों में खुशी जागी जैसे कुल्या से उद्यान के प्रत्येक पादप में हरियाली। **(४)** राम के अभिषेक की तैयारी हुई, किन्तु उसे क्रूरनिश्चया कैकेयी ने शोकोष्ण आँसुओं से दूषित कर दिया। **(५)** उसे जब आश्वस्त किया गया तो उस चण्डी ने विलमग्न सर्पों जैसे वे दो वर उगले जिन्हें देने हेतु दशरथ पहले से ही वचनबद्ध थे।

१. अर्चिःशब्दः पुस्यपीति हेमाद्रिभट्टः। २. **मूलम्=जाहम्, गतम, 'रामे श्रीर्न्यस्यतामिति'= 'पलितच्छद्मना जरा'; 'पलितच्छद्मना जरा'='रामे श्रीर्न्यस्यतामिति'** द्वितीयचतुर्थयोः पादयो– र्व्यत्यासोऽपि क्वचिल्लक्ष्यते। ३. **श्रुतिः = च्छविः; ञ्चक्रे=मास** व.। ४. **कैकेयी दूषयामास=दूषयामास कैकेयी** म.अ.ना.; **शोकोष्णैः = कवोष्णैः; बाष्पबिन्दु=रश्रुबिन्दु, नयनाश्रु, नयनाम्बु, पार्थिवाश्रु।**
५. **चण्डी भर्त्रा=भर्त्रा चण्डी** व.म.हे.अ.ना., **पूर्व्वं भर्त्रा; तत्=प्राक्; श्रुतौ=श्रितौ; द्ववामे=ज्जगारे।**

तयोश्चतुर्दशैकेन रामं प्राव्राजयत् समाः ।
द्वितीयेन सुतस्यैच्छद् वैधव्यैकफलां श्रियम् ।। ६।।
पित्रा दत्तां रुदन् रामः प्राङ् महीं प्रत्यपद्यत ।
पश्चाद् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ।। ७।।
दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ।। ८।।
स सीतालक्ष्मणसखः सत्याद् गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ।। ९।।
राजाऽपि तद्वियोगार्त्तः स्मृत्वा शापं स्वकर्म्मजम् ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ।।१०।।
विप्रोषितकुमारं तद् राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ।।११।।
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ।।१२।।

(६) दो में से एक में तो राम के लिए चौदह वर्ष का वनवास माँगा और दूसरे से अपने पुत्र (भरत) के लिए राजलक्ष्मी माँगी जिसका फल हुआ केवल वैधव्य। (७) राम ने पहले पिता द्वारा दी पृथिवी तो स्वीकार की थी आँसू बहाते हुए, परन्तु पश्चात् 'वन जाओ' यह आज्ञा स्वीकार की मोद के साथ। (८) मङ्गल क्षौम को धारण करते हुए या वल्कल पहनते हुए लोगों ने बड़े विस्मय के साथ देखा कि राम का मुखराग जैसा का तैसा था। (९) वे सीता और लक्ष्मण के साथ पिता को सत्य से पृथक् न करते हुए दण्डकारण्य में तो प्रविष्ट हुए ही सत्पुरुषों में से प्रत्येक के मन में भी बस गये। (१०) उसके वियोग से आर्त्त राजा ने भी अपने कर्म से मिले शाप का स्मरण किया और शरीरत्यागमात्र से संभव देखी उससे मुक्ति। (११) अयोध्या का वह राज्य छिद्रान्वेषण में दक्ष शत्रुओं की दृष्टि में चढ़ने लगा, क्योंकि कुमार बाहर गए हुए थे और राजा दशरथ ने दिया शरीर छोड़। (१२) अब अनाथ अमात्यों ने ननिहाल गए भरत को कुलक्रमागत आप्त सचिवों से बुलवाया। वे अपने आँसू रोके हुए थे।

६. रामं प्राव्राजयत्=रामप्राव्राजन, रामं प्रावासयत् म.हे.अ.ना.;**फला=फलं। ८. दधतो=त्यजतो; वसानस्य च वल्कले=चीरे च परि/प्रति–गृह्णतः;मुखरागं सम जंनाः=मुखरागसमञ्जसम्। १०. पि=तु; स्मृत्वा शापं=शापं स्मृत्वा; शुद्धिलाभ=शुद्धि लाभ** अ.ना.। **१२. बन्धु=वंश,वर्ग** म.हे.अ.

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः ।।१३।।
ससैन्यश्चान्वगाद् रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ।।१४।।
चित्रकूटवनस्थं स कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसंपदा ।।१५।।
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद् भुवः ।।१६।।
तमशक्यमपाकर्त्तुं निदेशात् स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात् कर्त्तुं राज्याधिदेवते ।।१७।।
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत् पुरीम् ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ।।१८।।

(१३) कैकेयीपुत्र भरत ने जब पिता की वैसी मृत्यु का समाचार सुना तो वे माता कैकेयी से ही नहीं, राजलक्ष्मी से भी पराङ्मुख हो गए। (१४) भरत सेना के साथ राम के पास चले। बीच बीच में आश्रमवासियों द्वारा दिखलाए उन वृक्षों को देखते जाते जिनके नीचे राम, लक्ष्मण के साथ ठहरे थे। उनकी आँखों में आँसू थे। (१५) भरत राम से चित्रकूट के वन में मिले। उन्हें पिता के दिवंगत होने की सूचना दी और उन्हें स्वयं के द्वारा अनुच्छिष्टसंपत्ति वाली लक्ष्मी अर्पित करते हुए लौटने का निमन्त्रण दिया। (१६) भरत ने अपने से पहले उत्पन्न राम के द्वारा श्रीपरिग्रह न करने के कारण भूमि के ग्रहण में स्वयं को परिवेत्ता माना। (परिवेत्ता अग्रज के विवाह पहले विवाहित अनुज।) (१७) स्वर्ग सिधारे पिता के आदेश से राम को वनगमन से भरत रोक नहीं सके तब, राज्य का अधिदैवत बनाने हेतु उनकी पादुकाएँ माँगी। (१८) 'तथा' कहकर भरत को राम ने लौटा दिया, परन्तु भरत ने राजधानी में पैर नहीं रखा। वे नन्दिग्राम में ही रहते हुए उनके राज्य की रक्षा न्यास

ना.; मौलै=पौरै। १३. स्वस्याः = तस्याः व.। अत्र सपाठान्तरं पद्यान्तरम्—विहिते पितृसन्मार्गे भरतो राममन्वियात् । ऋषिभिर्दर्शिते मार्गे पौरजानपदैः सह ।।विहिते पितृ=गते पितरि; अन्वियात्=अभ्यगात्। १४. अन्वगात्=अन्वयात् अ.ना.; दर्शितान्=कथितान् हे.। १५. कूटवनस्थं स=कूटवनस्थ चं म.हे.अ.ना., कूटाचलस्थ च/सः; कथित=गदित व.; गुरोः = पितुः हे.; ञ्चक्रे=मास अ.ना.; च्छिष्ट=त्सिष्ट, सृष्ट। १७. देशात्=निर्देशात्, आदेशात्; पितुः = गुरोः; देवते=दैवते। १८. ग्रामगत=ग्रामं गत; तस्य=श्चास्य; वाभुनक्=अभवत्।

दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ।।१९।।
रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ।। २०।।
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् ।
कदाचिदङ्के सीतायाः शिश्ये किञ्चिदिव श्रमात् ।। २१ ।।
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ।। २२।।
तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
भ्रान्तश्च मुमुचे तस्मादेकनेत्रव्ययेन सः ।। २३।।

(धरोहर) के समान करते रहे। (१९) ज्येष्ठ भाई पर दृढ़भक्ति वाले भरत ने राज्यतृष्णा से पराङ्मुख हो माता के पाप का प्रायश्चित्त सा किया। (२०) राम भी सीता के साथ वन में वन्य कन्दमूल आदि से काम चलाते अनुज के साथ युवावस्था में ही शान्त होकर वृद्ध इक्ष्वाकुओं का व्रत पाल रहे थे। (२१) राम कभी किसी वृक्ष के नीचे कुछ कुछ थकावट का अनुभव कर सीता की गोद में सिर रखकर सो रहे थे। वृक्ष की छाया राम के प्रभाव से रुकी हुई थी। (२२) तब इन्द्र के पुत्र (पक्षी काक) ने सीता के वक्षःस्थल को नाखूनों से विदारित कर दिया, प्रियोपभोगचिन्हों पर ईर्ष्यालु सा होकर। (२३) सीता द्वारा जगाए जाने पर उस पर राम ने इषीकास्त्र छोड़ा, किन्तु, घूमकर लौटने पर एक नेत्र के व्यय से उसे छोड़ दिया।

१९. दृढ=दृष्ट; इति=असौ; भरतः हे.अ.ना.=शुद्ध्यर्थम्। दृढभक्तिपदाय द्र० काशिका ६.३.३४, वामनस्य काव्यालङ्कारसूत्रवृत्तिः ५.२.२१। २०. वने=वृत्तिम्; चचार=चकार; शान्तः = शान्तम्। २१. स्तम्भित=स्तिमित अ.ना.; आश्रित सः = आश्रिताया। २२. ददार=रराद म.हे.अ.ना.। अत्र पूर्व्वार्द्धे पाठान्तरद्वयम्— ऐन्द्रिः किल द्विजस्तस्य विददार नखैः स्तनौ — इति
अथैन्द्रिः किल वैदेह्या विददार स्तनौ द्विजः । इति च। चरन्=चरत्।

अत्र स्वतन्त्रं पद्यान्तरम्—

मृगमांसं ततः सीतां रक्षन्तीमातपे शठः ।
पक्षतुण्डनखाघातैर्बबाधे वायसो बलात् ।। शठः = खलः, धृतम्, शिवः।

रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः ।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ।। २४।।
प्रययावातिथेयेषु वसन्नृषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ।। २५।।
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ।। २६।।
अनसूयातिसृष्टेन पुण्यगन्धेन काननम् ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् ।। २७।।
सन्ध्याभ्रकपिशस्तत्र विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ।। २८।।
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर् वृष्टिमवग्रह इवान्तरे ।। २९।।

(२४) राम ने इस स्थान के आसन्न होने से सोचा कि कहीं भरत फिर से न आ जावे चित्रकूट को छोड़ दिया। उसके सभी सारङ्ग उत्सुक थे। (२५) चित्रकूट से वे दक्षिण दिशा में गए, अतिथिसत्कार में निपुण ऋषिकुलों में रहते रहते, जैसे वार्षिक नक्षत्रों से होते होते भगवान् भास्कर उधर जाते हैं। (२६) राम के पीछे चल रही विदेहाधिपति जनक की सुता ऐसी लगी जैसे कैकेयी के मना करने पर भी गुणोन्मुखी लक्ष्मी हो। (२७) सीता ने वह अंगराग लगाया जो माता अनुसूया से मिला था। उसकी गन्ध बड़ी ही पवित्र थी। पूरे कानन के भौंरे उसकी सुगन्ध पर आकृष्ट हो पुष्प छोड़ छोड़कर चल पड़े। (२८) वहाँ विराध नाम का राक्षस राम का मार्ग रोककर अड़ गया, जैसे राहु चन्द्र का मार्ग रोककर अड़ जाता है। वह रंग में संध्याकालीन मेघ जैसा कपिश था। (२९) लोक का शोषण करने वाले उसने उन दोनों भाईयों के बीच से सीता को हर लिया जैसे श्रावण और भाद्र के बीच की वृष्टि को अवग्रह (अकाल) हर लेता है।

२४. उत्तरार्द्धपाठान्तरम् 'आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ।' अपलेख एषः। रङ्गां=रङ्गम्। २५. दिशम्= दिशि; ऋक्षेषु=पक्षेषु। 'भास्करः युग्मम्'। २६. तुरीये चरणे पाठः 'श्रीरिव समुखी गुणान्'। २७. अनसू=अनुसू; तिसृष्टेन=विसृष्टेन; पोच्चलित=च्छलित, ल्लसित, ल्ललित। २८. कपिशः = कपिलः; तत्र=तस्य म.; राधो=रोधो। २९. स जहार=सञ्जहार; मध्ये=मध्यात् व.; अन्तरे=अम्बरे म.हे.अ.ना.।

तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाऽशुचिना चेति वसुधायां निचख्नतुः ।। ३० ।।
पञ्चवट्यामथो रामः शासनात् कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ।। ३१ ।।
रावणावरजा तत्र राघवे मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ।। ३२ ।।
सा सीतासन्निधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ।। ३३ ।।
कलत्रवानहं भद्रे! कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ।। ३४ ।।
ज्येष्ठाभिगमनात् पूर्व्वं तेनाऽप्यनभिनन्दिता ।
साऽभूद् रामाश्रया भूयो नदीवोभयकूलभाक् ।। ३५ ।।
संरम्भं मैथिलीहासः क्षणसौम्यान्निनाय ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ।। ३६ ।।

(३०) राम लक्ष्मण ने उसे पीसा। और अपनी अशुचि गन्ध से यह आगे पूरे क्षेत्र को दूषित करेगा ऐसा सोचकर उसे भूमि में गड़ा दिया। (३१) इसके पश्चात् अगस्त महर्षि के आदेश पर राम पञ्चवटी में रहने लगे, समस्त मर्यादाओं का पालन करते हुए, उसी प्रकार जिस प्रकार विन्ध्याद्रि अपनी प्रकृति में। (३२) वहाँ आ पहुँची काम से आतुर शूर्पणखा राम के पास, जैसे निदाघ से आर्त्त व्याली पहुँचती है चन्दन के पास। (३३) अपना वंश बतलाकर उसने सीता की सन्निधि में ही राम का वरण किया। नारियों पर अत्यारूढ़ काम समय नहीं जानता। (३४) उस वृषस्यन्ती (उठी) शूर्पणखा से वृषस्कन्ध राम ने कहा—'भद्रे! मैं तो कलत्र के साथ हूँ, मेरे छोटे भाई को अपना ले'। (३५) बड़े भाई के पास जाकर आने के कारण जब उस (लक्ष्मण) ने भी उसे नहीं अपनाया तो वह पुनः राम के पास लौटी, दोनों तटों में बहती नदी जैसी। (३६) इस बीच सीता को आ गई हँसी। फिर क्या था, क्षणभर के लिए सौम्य बनी वह आग बबूली हो उठी, जैसे हवा के अभाव में स्तब्ध समुद्रवेला

३०. ष्पिष्य=निष्पात्य अ.ना., **ईत्य; पुरा=पुरी; दूषयति=पूरयति। ३१. अथो=ततो** म.हे.; **जन्मनः = शासनः (शासितुः) विन्ध्याद्रि=वन्ध्याद्रिः** व.। **३२. अभिपेदे= प्रतिपेदे, आजगाम** हे.। **३३.अत्या= अध्या, इत्या। ३४. भद्रे=बाले** म.हे.अ.ना.;**कनी=यवी** अ.ना., **लघी। ३५. तेनाप्यनभिनन्दिता= न तेनाप्यभिनन्दिता। ३६. क्षणसौ=क्षणं सौ; निवात=निर्वात; स्तमिता=स्तम्भिता।**

फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् ।
मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृतः ।। ३७।।
इत्युक्त्वा मैथिलीं भर्त्तुरङ्कं निविशतीं भयात् ।
रूपं सूर्प्पणखा नाम्नः सदृशं प्रत्यपद्यत ।। ३८।।
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम् ।
शिवाघोरस्वरां पश्चाद् बुबुधे विकृतेति ताम् ।। ३९।।
पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ।। ४०।।
सा वक्रनखधारिण्या वेणुकर्कशपर्व्वया ।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरात् ।। ४१।।

चन्द्रोदय के समय। (३७) 'इस उपहास का फल अभी पा तू, 'तूने मृगी की भूल में व्याघ्री को चोट दी है, देख मुझे।' (३८) भय से प्रिय की गोद में समा रही सीता से ऐसा कहकर उसने 'शूर्पणखा' इस नाम के अनुरूप शरीर धारण कर लिया। (३९) लक्ष्मण ने 'पहले तो उसे सुना कोकिला, मञ्जु भाषण करती, फिर जब उसी को लोमड़ी सा घोर स्वर अपनाती सुना तो समझ लिया कि यह विकृत नारी है। (४०) वे पर्णशाला में जाकर तलवार खींचकर आए और उस भीषणा को द्विगुण विरूप बना दिया। (४१) सूर्पणखा आकाश में उड़ी और वहाँ से उन दोनों भाइयों की अँगुली से तर्जना शुरू की। उसके नाखून वक्र थे, उसके पर्व बाँस के पर्व जैसे थे, और अँगुली थी अंकुश के आकार की।

३७. प्राप्स्यसि=प्राप्तासि अ.ना.; पश्य मां=पश्यताम्; मृगीप=मृग्याः प म., मृग्या प; व्याघ्र्या:=मृग्या व्याघ्र्याम्, मृग्या; इत्यवेहि=इत्यवैहि, अवेहीति म.हे.अ.ना., मृत्यवे हि व.; त्वया कृतः = त्वया कृतम् म.। ३८. अङ्कं नि=अङ्कनि, ङ्गानि वि अ.ना., ङ्कं प्रवि हे.; निविशतीं= निर्विशन्तीम्, नाम्नः = नाम्ना, नाम्नी, नाम; नाम्नः। युग्मम्। ३९. किला=किलां; वादिनीम्=भाषिणीम्; शिवा=शिवां; राम्=स्वनाम् म. हे.। ४०. अथ=अथो; ष्टासिः = धृतासिः, वृतासिः, धृतापि; प्यपौन=प्यं पौन अ.ना., प्यपौनरुक्तेन, प्यपुनरुक्तेन व.; भीषणां तामयोजयत्=योजयामास राक्षसीम्। 'प्रविश्यासिं विकृष्ये'–ति तु विवक्षा।
अत्र पद्यान्तरम्–
रुधिरोत्सिक्तसर्वाङ्गी सा बभावञ्जनद्युतिः ।
सन्ध्यांशुभिन्नेवाम्भोदपटली गगनोपगा ।।

४१. वक्र=चक्र व.; पर्वया=पर्व्वणा अ.ना.; ताव=ताम, तान हे.अ.ना.; तर्जयद्=तर्जयत अ.ना.; म्बरात्=म्बरे म.हे.अ.ना.।

प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधा ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् ।। ४२ ।।
मुखावयवलूनां तां नैर्ऋता यत् पुरो दधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम् ।। ४३ ।।
उदायुधानापततस्तान् दृप्तान् प्रेक्ष्य राघवः ।
निदधे विजयाशंसां चापे सीताञ्च लक्ष्मणे ।। ४४ ।।
एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावद्धा ददृशे स तैः ।। ४५ ।।
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ।। ४६ ।।
तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात् सममिवोद्ययुः ।। ४७ ।।

(४२) वह उड़ी और उसी विकृत रूप में तत्काल पहुँची जनस्थान। वहाँ खर आदि राक्षसों से उसने कहा 'राक्षसों का नवीन पराभव उपस्थित है, राम से हो गया है वह आरम्भ।' (४३) राक्षस उसी सूर्पणखा को आगे करके राम की ओर युद्ध के लिए चले। वह थी कटे हुए नाक कान वाली। वही बनी उनका इस यात्रा में अमङ्गल। (४४) शस्त्र उठाए आ रहे उन दृप्त राक्षसों को देखा तो राम ने विजय की आशा तो रखी धनुष पर और सीता को छोड़ा लक्ष्मण के साथ। (४५) राम अकेले थे और राक्षस थे सहस्रों, किन्तु वे जितने थे उन्हें राम भी उतने ही दिखाई दे रहे थे। (४६) शुभ आचार वाले राम ने असत् जन (राक्षसों) द्वारा प्रयुक्त दूषण (नामक राक्षस) को नहीं सहा अपने दूषण के समान। (४७) दूषण का सामना राम ने बाण से किया और उसके पश्चात् खर तथा त्रिशिरा का भी, किन्तु उनके चाप से बाण साथ ही निकलते दिखाई दे रहे थे।

४२. विधा=विधम् म.हे.अ.ना., विधाम्; क्रमम्=द्रवम्; परिभवं नवम्=परिभवं वनम्, परि—भवागमम् व.। ४३. मुखाव=मुखे; यायि=गामि। ४४. प्रेक्ष्य=वीक्ष्य; निदधे=विदधे। ४५. कामम्=रामः; आजौ=आसन्; तावद्धा=तावांश्च म., तावन्तः (वतः), तावद्धा व.हे.अ.ना.। ४६. अथ=अपि; शुभाचारः = सदाचारः; स=सन्, ऽसद्; त्मनः = त्मनि म.हे.अ.ना.। ४७.तं=तौ।

तैस्त्रयाणां शितैर्बाणैर्यथापूर्व्वविशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ।।४८।।
तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम् ।
उत्थितं ददृशेऽन्यत्र कबन्धेभ्यो न किञ्चन ।।४९।।
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम् ।
अप्रबोधाय सुष्वाप गृद्धच्छाये वरूथिनी ।।५०।।
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां सूर्पणखैवैका दुष्प्रवृत्तिहराऽभवत् ।।५१।।
निग्रहात् स्वसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्द्धसु ।।५२।।
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्र–प्रयास–क्षण–विघ्नितः ।।५३।।
तौ सीतान्वेषिणौ गृद्धं लूनपक्षमपश्यताम् ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ।।५४।।

(४८) तीनों तीक्ष्ण बाणों ने तीनों राक्षसों के प्राण पी लिए और रक्त पी लिया पक्षियों ने। बाण देह छेद कर बाहर निकल गए और उनकी विशुद्धि पूर्ववत् ही बनी रही। (४९) राम के शरों से कटी राक्षसों की उस विशाल सेना में कबन्धों के अतिरिक्त कुछ भी उठा हुआ नहीं दिखाई दिया। (५०) राक्षसों की वह सेना बाणवर्षी राम से लड़कर न जागने के लिए सो गई गृध्रों की छाया में। (५१) वे सभी राक्षस राम के अस्त्रों से कट गए इसलिए राक्षसों की ओर से रावण को यह दुःखदायी सूचना देने वाला कोई बचा ही नहीं। यह सूचना स्वयं सूर्पणखा ने ही रावण को दी। (५२) बहिन के निग्रह और अपने मान्य लोगों के वध से कुबेर के अनुज रावण ने माना कि राम ने उसके दसों शिरों पर पैर रोप दिए हैं। (५३) मृगरूपधारी राक्षस से उन दोनों भाइयों को धोखा देकर रावण सीता को हर ले गया। उसके इस प्रयास में क्षणभर के लिए विघ्न बने गृध्रराज जटायु। (५४) सीता को खोजते–खोजते उन दोनों भाइयों, राम और लक्ष्मण ने देखा कि गृध्र (जटायु) के पंख कटे

४८. शितैः = शतैः; पूर्व्व=पूर्व्वं; तु=च; पतत्रिभिः = विहङ्गमैः। ४९. उत्थितं=उच्छ्रितं व.हे.अ.ना., उद्धतं; न्यत्र= न्यच्च हे.अ.ना., न्यत्तु, चान्यत् व.। ५०. बाणवर्षिणं=बाणवर्षिणी। ५१. वास्त्रविदीर्णा=वास्त्रविशीर्णा हे.अ.ना., वास्त्रारिन्दमा; सूर्प=शूर्प। ५२.त=निहत व.हे.अ.ना., विहित। ५३. विघ्नितः = विघ्नतः। ५४. अनृणं=आनृण्यं।

स रावणहृतां ताभ्यां वचसाख्याय मैथिलीम् ।
आत्मनः सुमहत् कर्म्म व्रणैरावेद्य संस्थितः ।।५५।।
तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात् परा ववृतिरे क्रियाः ।।५६।।
वधनिर्धूतपापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ।।५७।।
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत् ।।५८।।
इतस्ततोऽथ वैदेहीमन्वेष्टुं भर्त्तृचोदिताः ।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ।।५९।।
प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ।।६०।।

हुए हैं, दशरथ की प्रीति से वह कण्ठगत प्राणों से उऋण होने जा रहा था। (५५) उसने वाणी से कहा कि सीता को रावण उठा ले गया है और अपने व्रणों से कहा अपने स्वयं के महान् पराक्रम को, और वह चल बसा। (५६) उसके न रहने से उनके पिता की मृत्यु का शोक नया हो गया था। उन्होंने उसका अग्निसंस्कार किया और उसके बाद की भी क्रिया की, वैसे ही जैसे पिता के निमित्त किया जा सकता है। (५७) कबन्ध का पाप धुल गया राम के हाथों वध होने से। उसके उपदेश से राम का वानर सुग्रीव के साथ सख्य हुआ। सुग्रीव का भी व्यसन समान था। (५८) उन्होंने वीर बाली को मारा और उसके स्थान पर सुग्रीव को स्थापित कर दिया, धातु के स्थान पर आदेश के समान। सुग्रीव उस पद को बहुत दिनों से चाहता था। (५९) इसके बाद सुग्रीव के आदेश से वानर यहाँ वहाँ सीता की खोज में घूमें, आर्त्त राम के विकल्पों के समान। (६०) बीच में भेंट हो गई संपाति से। उसने देखकर बतला दिया कि सीता वह बैठी है, तो हनुमान् जी समुद्र पार कर गए वैसे ही जैसे निर्मम विरक्त संसार को पार कर जाता है।

५५. आख्याय=आचष्ट म.हे.; आत्मनः सु=आत्मनस्तु व.म.हे.अ.ना.। ५६. शोक=दुःख व.; रात् परा ववृतिरे क्रियाः=राः परा ववृतिरे क्रियाः, रात् परा निर्ववृते क्रिया, रात् पुनराववृते क्रिया व.हे.अ.ना. ,रानन्तरा ववृते क्रिया। ५७. निर्धूत=निर्धौत; पापस्य म.हे.अ.ना.=शापस्य। ५८. स=तं; वीरः=वीरम् हे.; तत्पदे=स्वपदे; सन्न्य=स न्य। ५९. इतस्ततः=इतश्चेतश्च; ऽथ=च; वैदेहीम्=आक्रम्य; चोदिताः= नोदिताः; प्रेषिताः; चेरु=चेलु; रार्त्तस्य =रुत्कस्य; स्येव=स्यैव।

दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ।। ६१ ।।
तस्यै भर्त्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ।। ६२ ।।
निर्वाप्य प्रियसन्देशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ।। ६३ ।।
प्रत्यभिज्ञानरत्नं च रामायादर्शयत् कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ।। ६४ ।।
स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम् ।। ६५ ।।
श्रुत्वा रामः प्रियोदन्तं मेने तत्संगमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिघालघुम् ।। ६६ ।।

(६१) लंका में उन्होंने खोजते खोजते सीता के दर्शन किए। विषलताओं से महौषधि के समान वे राक्षसियों से घेरी हुई थीं। **(६२)** उन्हें हनुमान् जी ने प्रिय की पँहचान अँगूठी दी। सीता के शीतल आनन्दाश्रुओं ने उसकी अगवानी सी की। **(६३)** सीता को प्रिय सन्देश से ठण्डा कर पहले तो 'अक्ष'— का वध किया फिर थोड़ी देर शत्रुओं का निग्रह सहकर पूरी लङ्का जला डाली हनुमान् जी ने। **(६४)** कृती हनुमान् ने सीता का प्रत्यभिज्ञान—रत्न राम को दिखलाया। वह सीता का शरीर धारण कर दृश्य होकर आया हृदय ही था। **(६५)** राम ने उस मणि को हृदय से लगाया। उसके स्पर्श से उनकी आँखें निमीलित हो गईं। उन्हें प्रिया के आलिङ्गन की तृप्ति सी मिली केवल उसमें स्तनों की छूट थी। **(६६)** राम ने प्रिया का समाचार सुना तो उन्हें उससे मिलने की उत्सुकता में महार्णव के घेरे को परिखा जैसा छोटा सा लगा।

६२. कपिः=हरिः हे.अ.ना.; **बिन्दु=वारि। ६३. अक्षवधोद्धतः=अक्षवधोद्धुरः, अक्षवधोद्धताम्, अक्षवधोत्कटः, रक्षोवधोद्ध/द्धुतः, रक्षोवधोद्धुरः, रक्षोवधोद्धताम्, रक्षोवधोत्कटः, रक्षोवधूवृताम्** हे.; **पुरीं=विभीः** म.हे.अ.ना.; अत्रेमे द्वादश पाठाः— **अक्ष/रक्षो वधो+द्धतः/द्धताम्/द्धुरः/त्कटः; क्षण=क्षणं; निग्रहः= विक्रमः** हे.; **'क्षण००ग्रहः'=क्षणेनाहितविक्रमः** हे.। **६४. च=तत्। ६५. संसर्गाम् = संसर्ग, संसर्ग।**

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे खेऽपि संबाधवर्त्मभिः ।। ६७।।
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद् राक्षसलक्ष्म्येव बुद्धिमाविश्य चोदितः ।। ६८।।
तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ।। ६९।।
स सेतुं बन्धयामास यो बभौ लवणोदधौ ।
रसातलादिवोन्मग्नः शेषः स्वस्यैव शार्ङ्गिणः ।। ७०।।
तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयहेम–प्राकारां कुर्वद्भिरिव वानरैः ।। ७१।।
रणः प्रववृते तत्र भीमः प्लवगरक्षसाम् ।
दिग्विजृम्भित–काकुत्स्थ–पौलस्त्य–जयघोषणः ।। ७२।।

(६७) राम शत्रुनाश के लिए चले। उनके साथ थी वानरी सेना। उसने भूमिपृष्ठ को ही नहीं अपितु आकाश के मार्ग को भर रखा था। (६८) राम ने वानरसेना का पड़ाव समुद्र के तट पर डाल रखा था। वहाँ राम के पास विभीषण प्रपन्न होकर आए। यह प्रेरणा बुद्धि में बैठकर मानों राक्षस लक्ष्मी ने ही उन्हें दी। (६९) राम ने उन्हें राक्षसी ऐश्वर्य देने का वचन दे दिया। समय से शुरू की जाए तो नीतियाँ सफल होती हैं। (७०) राम ने जो सेतु बँधवाया। वह खारे समुद्र पर ऐसा लगा जैसे पृथिवी के नीचे (रसातल) से ऊपर शेषनाग ही आ लेटा हो शार्ङ्गी (राम के) रूप में उपस्थित भगवान् विष्णु के शयनार्थ। (७१) उस (सेतु से बने) मार्ग से उस पार जा पीले–पीले वानरों से राम ने लङ्का को घिरवा लिया, वे मानों वहाँ सोने का दूसरा प्राचीर बना रहे थे। (७२) अब शुरू हुआ भयंकर युद्ध, वानर और राक्षसों के बीच, दिशाओं में। एक ओर फैल रहे थे आकाश में जयघोष राम के तो दूसरी ओर रावण के।

६७. सैन्यैरनुद्रुतः = सैन्यसमर्थितः; भुवः = धरा; खेऽपि=व्योम्नि म.हे.; वर्त्मभिः = वर्त्मनि, वृत्तिभिः। ६८. निविष्ट=निर्विष्ट; आविश्य=आवेश्य; चोदितः=नोदितः। ६९. शुश्राव राघवः=जज्ञे रघूद्वहः। ७०. यो बभौ हामा. काग्र.–२ = प्लवगैः म.हे.अ.ना., प्लवङ्गैः व.; णाम्बुधौ=णोदधौ व.हे., णाम्भसि म.अ.ना.; उन्मग्नः= उत्तीर्णः, उदीर्णः, उन्मग्नम् म.हे.अ.ना., उत्तीर्णम् म.अ.ना.; शेषः=शेषम् म.हे.अ.ना.; स्वस्यैव=स्वप्नाय, स्वापाय व., स्तस्यैव। ७१. उत्तीर्य=उत्तीर्णः हे.; रोध=वेष्ट; द्वितीयहेम=द्वितीयं हेम अ.ना.। हन्तोन्मृष्टमयशः सुकवेः। ७२. युग्मम्। रणः प्रववृते=रणः प्रववृधे, प्रववृते/धे रणः; भीमः = घोरः; काकुत्स्थपौलस्त्य=पौलस्त्यकाकुत्स्थ; षणः=षिणः, षिणाम्।

पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनखन्यासः शैलरुग्णमतङ्गजः ।। ७३ ।।
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनाम् ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ।। ७४ ।।
कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ् मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ।। ७५ ।।
गरुडापातविश्लेषि मेघनादास्त्रबन्धनम् ।
दाशरथ्योः क्षणक्लेशि स्वप्नवृत्तमिवाऽभवत् ।। ७६ ।।
ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
रामस्त्वनाहतोऽप्यासीद् विदीर्णहृदयः शुचा ।। ७७ ।।
स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां ततश्चक्रे विलापाचार्यकं शरैः ।। ७८ ।।

(७३) पेड़ों से टूट रहे थे परिघ, शिला पर पिसते जा रहे थे मुद्गर और शस्त्रों से अधिक घातक थी नाखूनों की खरौंच। हाथी घायल हो रहे थे पर्वतों से। **(७४)** उधर सीता को दिखलाया गया राम क कटा सिर। उनकी चेतना जाने लगी, तो त्रिजटा ने उन्हें जिलाया, उसे छल/माया बतलाया। **(७५)** तब भी सीता को लज्जा आई कि भले ही मेरे प्रिय राम जीवित हैं, किन्तु जब उनके अन्त को सत्य मान लिया था तब भी मैं जीवित रही। **(७६)** मेघनाद के सर्पास्त्र का बन्धन गरुड के आ कूदने से ढीला पड़ गया। उन्हें ऐसा लगा कि कदाचित् क्षणभर का क्लेशदायी स्वप्न था वह सब। **(७७)** तत्पश्चात् पौलस्त्य ने शक्ति के प्रहार से लक्ष्मण का वक्षःस्थल विदीर्ण कर दिया। किन्तु राम का हृदय बिना प्रहार के ही शोक से विदीर्ण हो गया। **(७८)** लक्ष्मण की व्यथा हनुमान् द्वारा लाई महौषधि से हट गई। उन्होंने बाणों से लङ्कास्त्रियों के लिए विलाप में आचार्यत्व किया।

७३. रुग्ण = भग्न, रुद्ध। ७४. शिरश्छेद = शिरोच्छेद, शरच्छेद; नोद्भ्रान्त = नभ्रान्त, ने भ्रान्त; चेतनाम्=चेतसम्, मानसाम् हे.।
अत्र पद्यान्तरम्– **अथ रामशिरश्छेदं मायेत्याशु विवृण्वती ।**
सीतायाः कालरात्र्या भाकौमुदी त्रिजटाऽभवत् ।। पाठान्तरम्।
७५. मे नाथः = काकुत्स्थः; सा = सो; मत्वा = ज्ञात्वा। ७६. विश्लेषि = विश्लिष्ट म./**ष्टः/ष्टं; बन्धनम्=बन्धनः** म.व.हे., **बन्धयोः** अ.ना.; **क्लेशि = क्लेशः** व.हे.; **वृत्तमि = वृत्त इ** अ.ना., **वृत्तिः, वृत्तिं, दृष्टः। ७७. विदीर्ण = विशीर्ण । ७८. मारुतिसमा = मारुतसुता** हे.; **हृता = हत, गत।**

स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किञ्चित् पर्यशेषयत् ॥ ७९॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८०॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवाऽसौ दीर्घनिद्रां प्रवेशितः ॥ ८१॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२॥
निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३॥

(७९) लक्ष्मण ने मेघनाद के नाद और इन्द्रायुध से चमकता धनुष दोनों में से कुछ भी शेष नहीं रहने दिया, ठीक वैसे ही जैसे मेघ का शरत्काल। (८०) कुम्भकर्ण को कपीन्द्र (सुग्रीव) ने उसकी बहिन (सूर्पणखा) की अवस्था में पहुँचा दिया। उसने राम को रोका। वह लग रहा था उस पर्वत के समान जिसकी मनःशिलाएँ टङ्क (अस्त्रविशेष) से टूट गयी हों। (८१) कुम्भकर्ण को नींद बहुत प्रिय थी और रावण ने उसे पहले ही जगा दिया था कदाचित् यह सोचकर कि राम के बाणों ने उसे दीर्घनिद्रा में सुला दिया। (दीर्घनिद्रा=मृत्यु।) (८२) दूसरे भी कई राक्षस वानरों के दलों में धराशायी हुए। उनके रथों से उठे धूलीकण भी गिरते गए उनके ही रक्त की नदियों में। (८३) अब विवश हो गया रावण स्वयं युद्ध में उपस्थित होने हेतु। वह भवन से इस निश्चय के साथ निकला कि आज संसार में रावण नहीं रहेगा या राम।

७९. स नादं=नादं स, नादं च; पर्यशेष=अवशेष। अतः परं पद्यद्वयम्—

क्लेशेन महतीं/ता निद्रां त्याजितं रणदुर्जयम् ।
रावणः प्रेषयामास युद्धायानुजमात्मनः ॥ ८०॥
स जघान/जघान स, तदादेशात् कपीनुग्राननेकशः ।
विवेश च पुरीं लङ्कां समादाय हरीश्वरम् ॥ ८१॥

८१. वृथा भवान्=वृथानुजः, नुजो वृथा, व्यथानुगः, वृथा भवत्, निशाचरः, नोऽपि राक्षसः।
८२. तच्छोणित= तच्छ्रोणित; इव=अपि। ८३. निश्चितम्=निश्चितः।

रामं पदातिमालोक्य लङ्केशं च वरूथिनम् ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरन्दरः ।। ८४।।
तमाधूतध्वजपटं व्योमगङ्गोर्म्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ।। ८५।।
मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् ।। ८६।।
अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्वैरं चरितार्थमिवाभवत् ।। ८७।।
भुजोत्तमाङ्गबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे स यथापूर्व मातृवंश इव स्थितः ।। ८८।।
जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलाशमरातिं बह्वमन्यत ।। ८९।।

(८४) राम पैदल थे और रावण रथी ही नहीं वरूथी यानी रथ के लावलश्कर से भी युक्त। यह देखा तो इन्द्र ने हरे (ज़र्द) घोड़ों वाला रथ उनके लिए भेजा। **(८५)** वह रथ जैत्र (जीत ही दिलाने वाला) था। राम उस पर आरूढ़ हो गए। देवसूत मातलि ने उन्हें हाथ का सहारा दिया। उसका ध्वजपट आकाशगङ्गा की तरङ्गों की हवाओं से काँप रहा था। **(८६)** मातलि ने राम के वक्षःस्थल पर इन्द्र का कवच पँहनाया। उस पर राक्षसों के अस्त्र उत्पल की पँखुड़ी से निर्वीर्य हो जाते थे। **(८७)** बहुत समय के बाद आज राम और रावण आमने सामने थे। उन्हें अपना पराक्रम दिखलाने का अवसर मिला था। हुआ भी वैसा ही। राम–रावण युद्ध मानों चरितार्थ हुआ। **(८८)** भुजाओं और सिरों की अधिक संख्या से रावण अकेला होते हुए भी मातृवंश (राक्षसवंश) से घिरा हुआ लग रहा था। **(८९)** राम ने भी माना कि आज अच्छा शत्रु मिला है। रावण का अवदान कम नहीं था। उसने सभी लोकपालों को जीत लिया था। अपने सिर

८५. तमा=मना;वायु=वारि। ८६. अस्त्राण्य=शस्त्राण्य।'यत्रोत्पलानां वैक्लव्यमि'—त्युत्प्रेक्षन्तेऽत्र पाठं त्रिपुणिथुरापण्डिताः। ८७. प्राप्त=प्राप्तं; चिरात्=चिरम्; वैरम्=युद्धम् म.; इवा=तदा। ८८. भुजोत्तमाङ्ग=भुजमूर्धोरु म.अ.ना.; स यथापूर्वं=हि यथापूर्वम्; सोऽयथापूर्वः, ह्ययथापूर्वः = ह्ययथापूर्वम्, चानुपूर्वेण; वंशे=वंशः;इव स्थि=वास्थि। ८९. लोकपाला=सर्वलोका हे.,सर्वसैन्यानाम् म.अ.ना.; स्वमुखैरर्चितेश्वरम्=मुखैरभ्यर्चितेश्वरम् व.म.हे., तं मुखैरर्चितेश्वरम्, शिरोभिर(स्त्व)र्चितेश्वरम्; अरातिम्=तमरिं, सपत्नम्, रिपुं बहु हे., समरे बह्व, रावणम्।

तस्य स्फुरति पौलस्त्य: सीतासङ्गमशंसिनि ।
निचखानाधिकक्रोध: शरं सव्येतरे भुजे ।। ९० ।।
रावणस्यापि रामास्तो भित्वा हृदयमाशुग: ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ।। ९१ ।।
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतो: ।
अन्योन्यजयसंरम्भो ववृधे वादिनोरिव ।। ९२ ।।
विक्रमव्यतिहारेण सामान्याऽभूद् द्वयोरपि ।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ।। ९३ ।।
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरै: ।
परस्परशरव्राता: पुष्पवृष्टिं न सेहिरे ।। ९४ ।।
अय:शङ्कुचितां रक्ष: शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ।। ९५ ।।

चढ़ा—चढ़ाकर करता रहा था वह अर्चा भगवान् शिव की और अपनी भुजाओं पर झुला दिया था कैलाश। (९०) पहला वार रावण ने किया और सीता संगम की सूचना देते हुए फड़क रहे दाहिने हाथ पर उसने क्रोध में भरकर बाण गँपा दिया। (९१) अब छोड़ा बाण राम ने। वह रावण का हृदय वेधकर भूमितल में समा गया, मानों पातालवासी सर्पों को खुशखबरी सुनाने हेतु। (९२) वे दोनों पहले तो लड़े उक्ति—प्रत्युक्तियों से फिर लड़े अस्त्रों पर अस्त्र छोड़कर। उनका एक दूसरे को जीतने का प्रयास पहले तो लगा जैसे वादियों का (शास्त्रार्थ) युद्ध हो रहा है। (९३) दोनों का पराक्रम बराबर था। तब तक जयश्री उनके बीच डाँवाडोल दिखी, जैसे मदमस्त दो हाथियों की लड़ाई में बीच की वेदी। (९४) एक दूसरे का जबाब देख प्रसन्न हो उठे देव और दानव दोनों और उन्होंने उन दोनों पर पुष्पवृष्टि की, जिसे परस्पर पर छोड़े बाण सह नहीं सके। (९५) रावण ने लोहे के काँटों से भरी शतघ्नी फेंकी अपने शत्रु राम पर, वह ऐसी लग रही थी जैसे यमराज से छीनकर फेंकी गई कूटशाल्मलि हो। ('कूटशाल्मलि' यम की गदा का लाक्षणिक नाम।)

९०. कक्रोध: = कक्रोधात्, कक्रुद्ध:, कं क्रुद्ध। ९१. रामास्त: = रामास्त्रम्; आशुग: = आशुगम्; उरगेभ्य: = भुजगेभ्य:। ९२. सैव=सेव; अस्त्रमस्त्रेण=शस्त्रं शस्त्रेण; संरम्भो=संरम्भे। ९३. सामान्या= समाना। ९४. परस्पर= परस्परं म.अ.ना.। ९५. हृतां=शक्तिं, गदां म.; तस्येव=तात् पूर्व्वं।

राघवो रथमप्राप्तां तामाशां च सुरद्विषः ।
अर्द्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम् ।। ९६ ।।
अमोघं संदधे चासौ धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ।। ९७ ।।
तद् व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम् ।। ९८ ।।
तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम् ।। ९९ ।।
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ।।१००।।
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनःसन्धानशङ्किनाम् ।।१०१।।

(९६) राम ने रथ तक पहुँचने के पहले ही उसे और उसके साथ राक्षस की आशा को अर्धचन्द्र बाणों से कदली के समान सुख से काट डाला। (९७) अब प्रधान धनुर्धर राम ने अमोघ ब्राह्म अस्त्र धनुष पर चढ़ाया। वही था प्रियाशोकरूपी शल्य के उद्धार की औषधि। (९८) वह चमचमाता बाण आकाश में सैंकड़ों की संख्या में फैल गया और ऐसा लगा कि महोरग का कराल फणामण्डल हो। (९९) राम ने उसे मन्त्रपूर्वक छोड़ा था। उसने रावण के सिरों की पूरी पंक्ति, निमेषार्ध मात्र में कण्ठनाल से ऐसे गिरा दी कि व्रणवेदना तक का ज्ञान नहीं हो सका। (१००) राक्षसराज के सिरों की वह पंक्ति जब गिर रही थी तब लग रहा था कि पानी में बालसूर्य की परछाईयाँ तरङ्गों पर तैर रही हैं। (१०१) रावण के सिर देवताओं की आँखों के सामने गिरे तो, किन्तु उनके मन को अधिक विश्वास नहीं हुआ। उन्हें शंका थी उनके फिर से जुड़ जाने की।

९६. द्विषः = द्विषाम् म.अ.ना.; **सुखम्=मिव। ९७. चासौ=चास्मै** म.हे., **तस्मै, रामः। ९८. शतधा=दशधा। ९९. अपातयत्=अशातयत्** हे.अ.ना., **अपाहरत्** व.; **स रावणशिरः=रामो रिपुशिरः** अ.ना., **रावणस्य शिरः** म.हे.; **पङ्क्तिम्=श्रेणीम्; अज्ञात=अजात। १००. मेवाप्सु=मेयाः स्युः। १०१. मरुतां=देवानां** म.हे.अ.ना.।

अथ मदगुरुपक्षैर्लोकपालद्विपानामनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्पवर्षं पपात।।१०२।।
यन्ता हरेः सपदि संहृतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवकार्यम् ।
नामाङ्करावणशराङ्कितकेतुयष्टिमूर्ध्वं रथं हरिसहस्रयुजं निनाय।।१०३।।

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संक्रमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ।।१०४।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ रावणवधो नाम
द्वादशः सर्गः ।।१२।।

(१०२) अब राम के मणिबँधे सिर पर देवताओं द्वारा की गई सुगन्धित पुष्पवृष्टि बरसी। भौंरे उन पर लोकपाल–गजों की मदमत्त गण्डभित्तियाँ छोड़–छोड़ कर टूटे, यद्यपि उनके पंख गजमदों से भारी थे। **(१०३)** देवकार्य पूर्ण करके राम ने अपने धनुष की प्रत्यञ्चा बटोरी तो इन्द्र का सारथि मातलि उनसे आज्ञा लेकर हरे (ज़र्द हरे रंग के) सहस्र अश्वों से युक्त अपना रथ ऊपर लेकर चला गया। रथ की केतुयष्टि पर रावण के नामाङ्कित बाणों के चिह्न बने हुए थे। **(१०४)** राम ने ली सीता की अग्निपरीक्षा। उसमें विशुद्ध सिद्ध होने पर सीता को राम ने स्वीकार किया। अपने वैरी रावण की श्री प्रिय सुहृद् विभीषण को सम्हलाई और रविसुत(सुग्रीव) सहित विभीषण और लक्ष्मण के साथ भुजविजित विमानरत्न पुष्पक पर आरूढ़ हो चले पुरी अयोध्या को।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में रावणवध नामक
बारहवाँ सर्ग पूर्ण हुआ।।१२।।

१०२. मदगुरु = गुरुमद; गण्ड=गल्ल व.; उपनतमणिबन्धे=अपगतमणिबन्धे, अपि नियमितरत्ने, अविनियमितरत्ने। १०३. संहृत=संहत, संनत, संवृत; कार्यम्=कार्यः; शराङ्कित= शिराङ्कित, शराचित; युजम्=युतम् व., **युगम्** म.हे.अ.ना.। **१०४. संक्रमय्य=संगमय्य** म.अ.ना.।

इति रेवाप्रसादेन काश्यपेन द्विवेदिना ।
द्वादशो रघुवंशस्य सर्ग एषोऽभ्यलेखि यत् ।।
विश्वात्मा प्रीयतां तेन विश्वनाथः कृपाम्बुधिः।
पीत्वा विषं स्वयं देवः सुधां योऽन्यत्र सिञ्चति।।

।। त्रयोदशः सर्गः ।।

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ।।१।।
वैदेहि पश्यामलयाद् विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ।। २ ।।
गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे ।
तदर्थमुर्व्वीमवदारयद्भिः पूर्व्वैः किलायं परिवर्द्धितो नः ।। ३ ।।
गर्भं दधत्यर्क्कमरीचयोऽस्माद् विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ बिभर्त्ति प्रह्लादनं ज्योतिरजन्यनेन ।। ४ ।।
तान्तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ।। ५ ।।

(१) पुष्पकारूढ़ राम अयोध्या के लिए उड़े तो पहले पहुँचे अपने उस पद में जिसका गुण है शब्द (आकाश)। वहाँ दिखाई दिया रत्नाकर। उसे देखा तो एकान्त में एक वर्ष के बाद मिली अपनी जाया (सीता) से राम नामक उन श्रीहरि ने यह कहना शुरू किया। (त्रिविक्रम की दूसरी डग आकाश में पड़ी थी।) (२) वैदेहि! देखो समुद्र की छवि। यह मेरे सेतु से मलय तक बँट गया है और इसमें फैन छाया हुआ है। यह ऐसा लग रहा है जैसा छायापथ (आकाशगङ्गा) से बँटा हुआ और तारों से भरा शरद् का प्रसन्न समुद्र लगता है। (दोनों ही प्रस्तुत ऊपर शरत् का आकाश और नीचे वैसा ही समुद्र)। (३) इसे हमारे ही पूर्वजों ने फैलाया है। जब सागर के यज्ञाश्व को कपिल (राक्षस) ने रसातल पहुँचा दिया था तब उसकी खोज में पृथिवी को खोदा गया था। (४) इससे सूर्य की किरणें गर्भ धारण करती हैं, इसके भीतर रत्न वृद्धि को प्राप्त करते हैं। स्वयं तो धारण करता है यह पानी को इन्धन बनाने वाली अग्नि (वाडवाग्नि), किन्तु उत्पन्न करता है संसार को ह्लादमग्न करने वाली ज्योति (चन्द्र)। (५) विष्णु के समान इसका रूप भी 'ऐसा है' इस प्रकार निश्चित नहीं किया जा सकता और परिमाण भी 'इतना बड़ा है' इस प्रकार।

२. विष्कृत=पूरित हे.; **चारुतारम्=तारतारम्** म.अ.ना., **शुद्धतारम्** हे., **चारुशोभम्** म.हे.। **३. मेध्ये रसा=मध्येरसा** हे., **पूर्वं रसा। ४. वह्नि=ज्योति।**



रघुवंशे

अयोध्या-प्रत्यावर्तन

(व्योममार्ग)

सर्गः 13

सिन्धु
गंगा
यमुना
सरयू
अयोध्या (साकेत)
उत्तर कोसल
मन्दाकिनी
श्यामवट
चित्रकूट
पञ्चाप्सर
गोदावरी
पञ्चवटी
पम्पासर
जनस्थान
दक्षिणापथ
महोदधिः
रत्नाकर
लंका

नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥ ६॥
पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो धर्म्मोत्तरं मध्यममाश्रयन्ते ॥ ७॥
रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ।
अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्त्तवक्त्रावरणं बभूव ॥ ८॥
मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षाः ।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ॥ ९॥
ससत्त्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वम् ।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥ १०॥

(६) सारे संसार को अपने भीतर समेट कर युगान्त काल आते ही आने वाली योगनिद्रा में भगवान् पुरुषोत्तम इसी के भीतर सोया करते हैं और उनकी नाभि में ऊगे कमल पर बैठे ब्रह्मदेव करते रहते हैं उनकी स्तुति। (उचित=अभ्यस्त।) (७) इन्द्र जब पंख काटने को उद्यत होते हैं तब सैंकड़ों पर्वत इसी का आश्रय लेते हैं, जैसे शत्रुओं से उपद्रुत राजा राजमण्डल के मध्यवर्त्ती राजा का। शरण देने में है भी यह दक्ष। (८) रसातल से प्रकट आदिपुरुष (भगवान् =वराह) पृथिवी के साथ जब विवाह करने लगे थे तब वधूमुखपट का काम थोड़ी देर के लिए इसी के प्रलयप्रवृद्ध जल ने किया था। (९) नदियाँ इसकी प्रेयसी हैं। वे इसका भोग करती रहती हैं और यह उनका। वे दक्ष हैं मुखार्पण में (मुख=चेहरा, संगमस्थान) और यह भी तरङ्गाधर का दान करने में कुशल है। इस प्रकार इसके जैसी कलत्रवृत्ति अन्यत्र सुलभ नहीं। (१०) नदीमुख का जन्तुयुक्त पानी लेकर फैले मुखों को बन्द कर रहे ये तिमि मत्स्य अपने सच्छिद्र शिरों से जल के प्रवाह ऊपर फेंक रहे हैं।

६. प्ररूढा=प्रविष्टा, प्रभिन्ना। ७. च्छिदा गोत्रभिदा=च्छिदो गोत्रभिदो म.हे.अ.ना.; आत्तगन्धाः, आत्तगर्वाः, अनुरुद्धाः, भयार्त्ताः, ऽतिभीताः; एनम्=एतम्; त्तरं = त्तमं; यन्ते=यन्ति। ८. अस्य=यस्य; रणं=भरणं व.; बभूव=प्रपेदे। १०. नदीमु=सरिन्मु; यन्तः=यन्त्यो; ननत्वम्=ननत्वात् म.अ.ना., नानि, ननं स्वम्, स्वमास्यम्; वितन्वन्ति= विचिन्वन्ति, प्रतन्वन्ति; जलप्र/सरित्प्र।

मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान् द्विधा पश्य समुद्रफेनान् ।
कपोलसंसर्पितया य एषां व्रजन्ति कर्णे क्षणचामरत्वम् ॥११॥
वेलानिलाय प्रसृता भुजङ्गा महोर्म्मिविस्फूर्जितनिर्विशेषाः ।
सूर्य्यांशुसम्पर्कसमिद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ॥१२॥
तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत् सहसोर्म्मिवेगात् ।
ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित् क्लेशादपक्रामति शङ्खयूथम् ॥१३॥
प्रवृत्तमात्रेण पयांसि पातुमावर्त्तवेगाद् भ्रमता घनेन ।
आभाति भूयिष्ठमितः समुद्रः प्रमथ्यमानो गिरिणेव भूयः ॥१४॥
दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ॥१५॥

(११) जलहाथी एकाएक निकल पड़ते हैं तो उनसे समुद्र का फेन दो भागों में बँट जाता है। वह इनके कपोल पर लग भी जाता है तो उससे काम बन जाता है कान और आँख दोनों के चामर का। (१२) तटवायु के लिए सर्प पसंरे हुए हैं। बड़ी बड़ी तरङ्गों से वे एक हो गए हैं। वे समझ में तब आते हैं जब सूर्यरश्मि से उनकी फणस्थ मणियाँ चमकती हैं। (१३) देखो तो ये शङ्ख तुम्हारे अधर से होड़ ले रहें मूँगों के अंकुर में फँस फँस जा रहे हैं, क्योंकि एकाएक लहर आ रही है और इन्हें फेंक दे रही है। इनका निकलना कठिनाई से हो पा रहा है। (१४) देखो, यह मेघ। इसने ज्योंही पानी पीना आरम्भ किया त्योंही भँवर में पड़ गया और उसके वेग से घूमने लगा। इससे बिलकुल ऐसा लग रहा है जैसे इसको पर्वत द्वारा फिर से मथा जा रहा है। (१५) यह क्षारसमुद्र दूर से लौहचक्र जैसा लग रहा है। इसके तट पर लगे मालिन्य हैं तमाल और ताली के वन। उनसे इसकी तटभूमि ऐसी लग रही है जैसे

११. समुद्र=तरङ्ग; 'कर्णे क्षण' त'कर्णेक्षण'—तयापि ग्रहीतुं शक्यम्। तथा सति कर्णौ च ईक्षणे चेति भाव्येत। १२. वेला=शैला; विस्फूर्जित=विस्फूर्जथु म.अ.ना., समिद्ध = समृद्ध व.म.हे., विवृद्ध अ.ना.। १३. क्लेशात्= कष्टात्, कृच्छ्रात्; अपक्रामति=अपाक्रामति। १४. इतः = अयं म., तरम् अ. ना., असौ। १५. 'दूरा००तन्वी'= 'दूरादरालभ्रु विभाति तन्वी'; 'निस्त्रिंशकल्पस्य निधेर्जलानाम्'; 'तमाल० ०नीला' ='एषा तमालद्रुमराजिनीला'; 'आभाति००राशेः'='दूरादरालभ्रु विभाति वेला','आरादरालभ्रु विभाति वेला'; 'धारानिबद्धेव हि खड्गरेखा' म., 'कलङ्करे/लेखामलिनेव धारा' व.हे.। वल्लभपाठत्वेनारुणगिरिनाथदर्शितः पाठः —

निस्त्रिंशकल्पस्य निधेर्जलानामेषा तमालद्रुमराजिनीला ।
दूरा/आरादरालभ्रु विभाति वेला कलङ्करे/लेखामलिनेव धारा ॥

वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि ।
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥१६॥
एते वयं सैकतभिन्नशुक्तिपर्य्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्त्तेन विमानवेगात् कूलं फलावर्जितपूगमालम् ॥१७॥
कुरुष्व तावत् करभोरु! पश्चान्मार्गे मृगप्रेक्षिणि! दृष्टिपातम् ।
एषा विदूरीभवतः समुद्रात् सकानना निष्पततीव भूमिः ॥१८॥
क्वचित् पथा सञ्चरते सुराणां क्वचित् खगानां मरुतां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः प्रवर्त्तते पश्य तथा विमानम् ॥१९॥
असौ महेन्द्रद्विपदानगन्धी त्रिमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान् मुखे ते ॥२०॥

कलंकरेखा धारा से जुट गई हो। (चक्र की धार काली मानी गई है।) (१६) तट की हवा हे आयताक्षि! (चौड़े नेत्रों वाली) केवड़े के परागकणों से तेरा मुख सँवार रही है। यह (कदाचित्) जानती है कि तेरे मण्डन में होने वाली देर मुझे सह्य नहीं है, तेरे बिम्बाधर की पिपासा मुझ में तीव्र होती जा रही है। (१७) देखो, विमान का वेग इतना था कि हम मुहूर्त्तमात्र मे समुद्र के तट पर आ पहुँचे। यहाँ बालू पर मोती बिखरे पड़े हैं। उनकी सीप खुल जो गई है। तटभूमि पर सुपारी के वृक्ष कतार में लगे हैं जो फल से झुके हुए हैं। (१८) हे करभोरु और मृगाक्षि! पीछे दृष्टि डालो। ज्यों ज्यों विमान दूर हो रहा है त्यों त्यों ऐसा लग रहा है कि वनों सहित भूमि समुद्र से बाहर आ रही है। (१९) यह विमान, मेरी जैसी इच्छा होती है वैसी ही गति में चल रहा है। कभी यह चलता है देवताओं के पथ से, कभी मेघों के और कभी पक्षियों के। (२०) देखो, यह आया आकाशवायु, सुगन्धित इन्द्रगज के मदजल की गन्ध से और शीतल गङ्गा (आकाशगङ्गा) की तरङ्गों की टक्कर से। मध्याह्न के कारण तुम्हारे मुख पर उभरी पसीने की बूँदों को सुखा रहा है यह।

१६. संभावयत्या=संभावयन्ना अ.ना.; आयताक्षि=आयताक्षम् व., अम्बुजाक्षम् म.हे.अ.ना.; बद्धतृ=वृद्धतृ। १७. पटलं= भरवः। भरुपदमत्रोत्प्रेक्ष्यम्। १८. तावत् पश्चान्मृ=पश्चात्तावन्मृ; प्रेक्षिणि=प्रेक्षणि; पातम्=पातान्; एषा विदूरी=एषा हि दूरी, पुरो हि दूरी; निष्पततीव=निस्सरतीव व.म. हे.अ.ना.। १९. सुराणाम्=घनानाम्; घनानां=सुराणाम्; पततां=मरुतां व.। २०. महेन्द्र=सुरेन्द्र व.; गन्धी=गन्धिः; शीतः = शीतिः; मुखे=मुखात्।

करेण वातायनलम्बितेन स्पृष्टस्त्वया तन्वि! कुतूहलिन्या ।
आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ।। २१।।
अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।
अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ।। २२।।
सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।। २३।।
त्वं रक्षसा भीरु! यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ।। २४।।
मृगयश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवाऽगतिज्ञं समबोधयन् माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ।। २५।।
एतद् गिरेर् माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर् मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ।। २६।।

(२१) हे चण्डि! तुमने वातायन से हाथ लटकाया और कुतूहलवश ज्योंही छुआ तो देखो इस मेघ ने हाथ में एक दूसरा कंगन पहँना दिया। (२२) ये देखो, चीरधारी तपस्वी जनस्थान को विघ्नशून्य समझकर नई नई कुटिया बनाकर चिरकाल से छूटे अपने अपने आश्रममण्डलों में आकर बस रहे हैं। (२३) यह वह स्थली है जहाँ तुम्हारी खोज में भटक रहे मुझे मिला था भूमि पर पड़ा तुम्हारा एक नूपुर, जो चुप था मानों तुम्हारे चरणारविन्द से बिछुड़ने के दुःख से। (२४) हे भीरु! राक्षस तुम्हें जिस मार्ग से ले गया था, ये लताएँ उस मार्ग को कृपापूर्वक मुझे बतला रही थीं, उसी ओर अपनी शाखाएँ और उनकी पत्तियाँ घुमा घुमाकर। (२५) और ये मृगियाँ, इन्होनें मुख में रखा दर्भाङ्कुर छोड़ दिया था और दक्षिण दिशा में उठी बरौनी वाली आँखें घुमा–घुमाकर तुम्हारे पथ से अनभिज्ञ मुझे संकेत दिये थे। (२६) देखो, यह सामने दिखाई दे रहा है माल्यवान् गिरि का गगनचुम्बी शिखर। यहीं मेघों ने नया जल और मैंने तुम्हारे विप्रयोगाश्रु साथ–साथ छोड़े थे।

२१. लम्बितेन= निस्सृतेन, संसृतेन; तन्वि=चण्डि म.हे.अ.ना.। २२. मत्वा=दृष्ट्वा। २३. द्रष्टव्याऽत्र रसगङ्गाधरे पण्डितराजकृता मीमांसा उत्प्रेक्षालङ्कारप्रकरणे। २४. तं मार्गम्=मार्गं तम्; मे=ते; वत्यः = वन्त्यः; वर्जित=नर्त्तित। २५. राजीनि=पङ्क्तीनि। २६. लेखि=लेढि हे., लेहि अ.ना.; नवम्=घनम् व.; विसृष्टम्=प्रवृष्टम् अ.ना., विमुक्तम्।

गन्धश्च धाराहतपल्वलानां कादम्बमर्धोद्गतकेसरं च ।
स्निग्धाश्च केकाः शिखिनां बभूवुर् यस्मिन्नसह्यानि विना त्वया मे ॥ २७॥
पूर्वानुभूतं स्मरता च रात्रौ कम्पोत्तरं भीरु तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि मया कथञ्चिद् घनगर्जितानि ॥ २८॥
आसारसिक्तक्षितिबाष्पयोगान्मामक्षणोद् यत्र विभिन्नकोशैः ।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः ॥ २९॥
उपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ॥ ३०॥
अत्रावियुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।
द्वन्द्वानि दूरान्तरवर्त्तिना ते मया प्रिये! सस्पृहमीक्षितानि ॥ ३१॥

(२७) तुम्हारे बिना यहीं मुझसे सहते नहीं बन रहे थे– 'जलधारा से आहत गड्ढ़ों की गन्ध, कदम्ब के अधखिले पुष्प और मयूरों की स्निग्ध केका। (२८) हे भीरु! यहीं मैंने जिस किसी प्रकार बिताई थी मेघों की गुफाओं में और अधिक फैली गड़गड़ाहटें। मुझे स्मरण आने लगते थे रात को तुम्हारे पूर्वानुभूत आलिंगन। (२९) यहीं पानी की झड़ लगने पर भूमि से उठी भाप से खिली कन्दली मुझे घायल कर देती थी, विवाहधूम से अरुण हुए तुम्हारे नेत्रों की श्री उपस्थित कर। (३०) मेरी दृष्टि नीचे बहुत दूर उतर कर खेद के साथ पम्पासरोवर के जल पी सी रही है। जल में तट के पास वेंत ऊगे हुए हैं और पानी में सारस पक्षी घूम रहे हैं। (३१) प्रिये! इस सरोवर में तुमसे बहुत दूरी पर स्थित मैं बड़ी ललक के साथ देखा करता था चक्रवाक–चक्रवाकी की अवियुक्त जोड़ियाँ। उनमें होता रहता था कमलकेसरों का विनिमय।

२७. गन्धश्च=गन्धाम्बु; पल्लवा=पल्वला म.हे.अ.ना.; कादम्ब=कदम्ब; अर्धोद्गत=र्धोदित, ऊर्ध्वोद्गतः; च=वा; बभूवः =न्नभूवन्; यस्मिन्=अस्मिन्। उत्तरार्धेऽत्र पाठाः –

१. स्निग्धाश्च केकाः शिखिनां त्वया मे यस्मिन् विना दुष्प्रसहान्यभूवन्।
२. विनैतान्यसहान्यभूवन्।
३. हि यस्मिन् त्वया विना दुष्प्रसहान्यभूवन्।

२८. रात्रौ=यत्र म.; कम्पोत्तरं भीरु तवोपगूढम्=कम्पोपगूढं तव भीरु सङ्गम्। २९. अक्षणोद्=अक्षिणोद् अ.ना.; विभिन्न=च भिन्न; डम्ब्य=डम्ब हे.; नवकन्दलै=नवकन्दली, स्थलपङ्कजै; रुण=कुल ॥२९॥ कुलकम्। ३०. वनो=गृहो; लक्ष्य=लीढ,लक्ष।

इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा सास्रमहं निषिद्धः ।। ३२।।
अमूर्विमानान्तरलम्बिनीनां श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।
प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो गोदावरीसारसपङ्क्तयस्त्वाम् ।। ३३।।
एषा त्वया पेशलमध्ययाऽपि घटाम्बुसंवर्धितबालचूता ।
आह्लादयत्युन्मदकृष्णशारा दृष्टा चिरात् पञ्चवटी मनो मे ।। ३४।।
अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तम् ।। ३५।।
भ्रूभङ्गमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भः—परिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ।। ३६।।

(३२) देखो! यह रही तट पर लगी तन्वी अशोक लता। इसमें जब आ जाते थे स्तनों से सुन्दर स्तबक(पुष्पगुच्छ) और उनसे जाती थी यह झुक, तो मुझे लगता था कि तुम आ गई और चलता था आलिङ्गन करने तो लक्ष्मण मुझे आँखों में आँसू लेकर रोकता था। **(३३)** ये देखो, गोदावरी की सारस—पंक्तियाँ विमान के भीतर लटकी काञ्चनकिङ्किणी की धुन सुनकर आकाश में उछल कर तुम्हारी अगवानी सी कर रही हैं। **(३४)** यह रही पञ्चवटी। बहुत दिनों के बाद देखने को मिली है यह। इसमें कोमल मध्यभाग वाली तुमने घड़ों से पानी दे—देकर बढ़ाए थे आम्र के पौधे। इसमें कृष्णशार मृग उन्मद हो गए हैं। कितनी अच्छी लग रही है मुझे यह। **(३५)** यहीं, याद आ रहा है कि गोदावरी के तट पर मृगया कर लौटा तरंगवात से थकावट दूरकर एकान्त में सोया था मैं, सिर तुम्हारी गोद में रखकर। **(३६)** यह है उन **महर्षि (अगस्त्य)** का भूमिलोक में स्थित स्थान, जिन्होंने अपने भ्रूभङ्ग मात्र से नहुष को इन्द्रपद से गिरा दिया था और जो मटमैले पानी में निर्मलता ला देते हैं।

३२. तटा=तटे; काभि=काव व.हे.अ.ना., **रब्धुकामः, रिप्समानः** व.म.हे.अ.ना.; **सास्रम्=साश्रु। ३३. अमूः =अमुम्; न्तरलम्बि=न्तविलम्बि** हे.अ.ना.। **३४. पेशल=पेलव** अ.ना., **कोमल** व.; **चूता=चूतान्; आह्लाद=आनन्द, आक्लेद** अ.ना., **आक्लेश, प्रह्लाद, उत्कण्ठ, उन्मुख** म.हे.अ.ना.; **कृष्णशारा=कृष्णसारा, नीलकण्ठा** व.म.हे.अ.ना.। **३५. निवृत्तः=नुवृत्तः, निमित्तं, विनीत; निषण्ण= निषङ्ग, निषक्त; सुप्तम्=सुप्तिम्** अ.ना., **सुप्तः** म.। **३६. भङ्ग=भेद** व.म.अ.ना.; **प्रभ्रंश००चकार= प्राभ्रंशयद् यो नहु/धुषं प्रमत्तम्; तस्या=वर्षा; भौमो=भूमौ।**

त्रेताग्निधूमाग्रमुदग्रकीर्त्तेस्तस्येदमाक्रान्तविमानमार्गम् ।
घ्रात्वा हविर्गन्धि रजोविमुक्त: समश्नुते मे लघिमानमात्मा ।। ३७।।
एतन्मुनेर्मानिनि! माण्डकर्णे: पञ्चाप्सरो नाम विहारवारि ।
आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ।। ३८।।
पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन् मृगै: सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीत: पञ्चाप्सरोयौवनकूटबन्धम् ।। ३९।।
तस्यायमन्तर्हितसौधभाज: प्रसक्तसङ्गीतमृदङ्गघोष: ।
वियद्गत: पुष्पकचन्द्रशाला: क्षणं प्रतिश्रुन्मुखरा: करोति ।। ४०।।
हविर्भुजामेधवतां चतुर्णां मध्ये ललाटन्तपसप्तसप्ति: ।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्त: ।। ४१।।

(३७) इन महर्षि अगस्त्य की कीर्त्ति बहुत बड़ी है। इनके द्वारा तीनों प्रकार की अग्नि में जो आहुति दी गई है उससे उठा धूम हमारे विमान मार्ग में आ छाया है। हविष्य की गन्ध से युक्त उसे सूँघने से मेरी आत्मा रजोमुक्त होकर हलकेपन (सत्त्वगुण का परिणाम) का अनुभव कर रही है। (३८) और यह रहा मुनिवर **माण्डकर्णि/शातकर्णि** का 'पञ्चाप्सर'– नामक वारिविहारकेन्द्र। इसके चहुँओर खड़ा हुआ है वन। दूर से यह ऐसा लग रहा है जैसे मेघ के बीच से दिखाई पड़ रहा चन्द्रबिम्ब हो। (३९) यह पञ्चाप्सर इसलिए कहलाता है कि इन्द्र ने इस महर्षि की समाधि से डरकर इसके पास पाँच अप्सराएँ भेजी थी जिनके यौवनपाश में यह फँस गया था। तपश्चर्या भी इसकी इतनी घोर थी कि यह मृगों के साथ केवल कुश के अङ्कुर खाकर मृगों के ही साथ रहा करता था। (४०) देखो उसका यहाँ इस सरोवर के जल में छिपा है सौध। उसके संगीत का है यह मृदङ्गघोष जो आकाश में उठकर 'पुष्पक'–विमान की चन्द्रशाला में प्रतिध्वनित हो रहा है। (४१) ये एक दूसरे तपस्वी हैं, जो पञ्चाग्नि तप करने में लगे हैं, जिनके चारों ओर प्रज्वलित यज्ञाग्नि है और ऊपर ललाटंतप प्रखर सूर्य। नाम से ये जाने जाते हैं **सुतीक्ष्ण**, परन्तु चरित से हैं अत्यन्त संयमी।

३७. धूमाग्रमुदार=धूमप्रभमुग्र; उदग्र=मनिन्द्य; लघिमा=महिमा। ३८. मानिनि=भामिनि; माण्डकर्णे: = मान्दकर्णे:, माण्डुकर्णे:, शातकीर्णे: व.म., शातकर्णे:। ३९. पुरा स=अयं च; भीतेना=भेदेन; किलोपनीत: = किलोभिनीत: व.; कूटबन्धम्=यन्त्रबन्धम्। ४०. तस्या=अस्या; प्रसक्त=प्रयुक्त व.; घोष: =शब्द:, नाद: व.; श्रुन्मुखरा: = स्वन्मुखरा। ४१. सप्ति: =वाह:।

अमुं सहासप्रहितेक्षणानि व्याजार्धसन्दर्शितमेखलानि ।
नालं विकर्त्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥ ४२॥
एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्रांशुमितः प्रयुङ्क्ते ॥ ४३॥
वाचंयमत्वात् प्रणतिं ममैष कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः ।
दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते ॥ ४४॥
अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय सन्तर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५॥
छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६॥
धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि! चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ॥ ४७॥

(४२) इन्हें देखकर इन्द्र को शंका होने लगी थी। उसके द्वारा प्रेषित सुरबालाओं की विभ्रमचेष्टाएँ इन्हें बिगाड़ नहीं सकीं। उन्होंने मुसकुरा–मुसकुरा कर किया कटाक्षपात और बहाना बना– बनाकर मेखला का स्थान भी आधी दूरी तक दिखला दिया। (४३) देखो! ये महर्षि मेरे स्वागत में अपना दाहिना हाथ ऊपर उठाए हुए हैं। इसमें रुद्राक्ष की माला का वलय है। इससे ये मृगों को खुजलाया करते हैं और इसमें कुश की नोंक का घाव है। (४४) मैंने प्रणाम किया और देखो, इन्होनें मौनव्रत में होने से, सिर हिलाकर उसे स्वीकार किया। विमान का व्यवधान हट जाने पर ये पुनः सूर्य पर लगा रहे हैं दृष्टि। (४५) यह है शरण देने में उदार और पावन तपोवन आहिताग्नि महर्षि **शरभङ्ग** का, उन्होंने समिधाओं से चिरकाल तक संतृप्त कर अग्नि में अपना मन्त्रपूत शरीर भी होम दिया था। (४६) महर्षि शरभङ्ग के आश्रम में अब अतिथिपूजा सुपुत्रों जैसे वृक्षों में निहित है। वे छाया से मार्ग का परिश्रम दूर करते रहते हैं और उनसे बड़ी मात्रा में फल भी सुलभ होते रहते हैं। (४७) हे बन्धुर (नीचे ऊँचे सुन्दर) गात्रि! यह चित्रकूट पर्वत दृप्त बैल जैसा आँखों को

४२. सहास=सहासं, प्रहास हे.। ४३. वलयं=वलयी; सभाजने=सभाजयन्, सम्भावयन्; ऊर्ध्वबाहुः =उग्रतेजाः म.हे.अ.ना.; सव्येतरं=वामेतरं; प्रांशुम्=प्राध्वम् म.हे.अ.ना.; इतः=अतः,इति; प्रयुङ्क्ते=करोति। ४४. प्रति=परि हे.अ.ना.; मूर्ध्नः=मूर्ध्नि; मुक्ताम्=मुक्तेः व.; पुनः=स च। ४६. तस्य=अस्या, यस्या। ४७. पङ्कः=कम्पः; दृप्तः = दृष्टः।

एषा प्रसन्नस्तिमितप्रवाहा सरिद् विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ।।४८।।
अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुकपोलशोभी मयाऽवतंसः परिकल्पितस्ते ।।४९।।
अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात् फलबन्धिवृक्षम् ।
वनं तपः–साधनमेतदत्रे–राविष्कृतोदग्रतर–प्रभावम् ।।५०।।
अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृत–हेमपद्माम् ।
प्रवर्त्तयामास किलानसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ।।५१।।

बाँध रहा है। इसकी गुफाओं के मुख से धारा का स्वन निकल रहा है, और शृङ्ग के अगले भाग पर लगा है मेघरूप पङ्क। (४८) इस पर्वत के पास देखो यह मन्दाकिनी नदी ऐसी लग रही है जैसे भूमि के कण्ठ की मुक्तावली हो। इसका जल प्रसन्न भी है और स्थिर प्रवाह भी। (चित्रकूट की मन्दाकिनी आज भी ऐसी ही है।) (४९) पहाड़ से लगा यह है वह सुडौल तमाल जिसका सुगन्धित प्रवाल लेकर मैंने यवाङ्कुर से पीले तुम्हारे कपोल पर शोभित होने वाला अवतंस बनाया था। (५०) यहाँ यह है **अत्रिमहर्षि** का तपोवन, जिसमें सभी प्राणी निग्रह के त्रास के विना ही विनीत हैं।, सभी वृक्ष विना पुष्प के ही फल देते रहते हैं, इस प्रकार भारी प्रभाव दिखाई देता है यहाँ प्रकाश में आया। (५१) यहाँ सती अनसूया ने भगवान् शिव की मौलिमाला त्रिमार्गगा गङ्गा को तपस्वियों के स्नानकार्य के लिए प्रवाहित कर दिया था, आकाश में जिसके हेमपद्म सप्तर्षि के हाथों से चुने जाते थे।

४८. भाव=भावि, एव अ.ना.। ४९. अयं=सोऽयं, असौ, प्रियम्; सुजातो=सुरूढः, प्रवृद्धः, सजातः, सरूढः; गिरं=गिरि; 'प्रवाल००यस्य'='त/न–व प्रवालोपचयेन यस्य' 'नव/तव–प्रवालावचयेन यस्य'; 'यवा००शोभी'='कर्णार्पितेनाकरवं कपोलं'; 'मया००तस्ते'=अप्रार्थ्य/प्य–कालागरुपत्रलेखम्, शोभी= लम्बी। पाठान्तरनिस्सृतस्वरूपमत्र पद्यान्तरमेवम्–

प्रियं सुरूढोऽनुगिरं तमालस्तव प्रवालोपचयेन यस्य ।
कर्णार्पितेनाकरवं कपोलमप्रार्थ्यकालागरुपत्रलेखम् ।।

५०. अपुष्पलिङ्गात् फल=न पुष्पलिङ्गात् फल हे., अपुष्पहिंसाफल, अपुण्यलिङ्गाल्प/प्तमपुण्य/ष्प बन्धम्; तर=तपः; प्रभावम्=प्रवाहम्।

वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ।। ५२।।
त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ।। ५३।।

त्रिवेणीवर्णनम्

क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ।। ५४।।
क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गमयीव पङ्क्तिः ।
अन्यत्र कालागरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ।। ५५।।
क्वचित् प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः–प्रदेशा ।। ५६।।

(५२) इधर देखो, यहाँ के ये वृक्ष भी निवातनिष्कम्प हैं, अतः लगता है ये भी योगाधिरूढ़ हैं। ये वीरासन लगाकर ध्यान में निरत ऋषियों की वेदी के मध्य में आरूढ़ हैं ही। **(५३)** तुमने पहले जिससे प्रार्थना की थी वह 'श्याम'—नामक वट है यहाँ। इसमें फल लग चुके हैं। उनमें यह गारुत्मत मणियों की राशि से भरा लगता है। (यही है— संगम गङ्गा में मिली यमुना का। गङ्गा का वर्ण गौर और यमुना का श्याम। कई छवियाँ उभरती हैं इस सितासित संगम में।) **(५४)** कहीं लगता है (१) जैसे मोती की माला में चमकीले इन्द्रनील पिरो दिए गए हों, (२) अन्यत्र ऐसा लगता है जैसे उज्ज्वल कमल की माला में इन्दीवर (नीलकमल) लगा दिए गए हों। **(५५)** (३) कहीं यह छवि धवल हंसों में आ मिले श्याम हंसो (कादम्बों) की पंक्ति प्रतीत होती है। (४) कहीं भूमि (रूपी सुन्दरी) पर चन्दन लीपकर बीच–बीच में कालागुरु के पत्र बनाए से लग रहे हैं। **(५६)** (५) कहीं की छवि ऐसी लग रही है जैसे चाँदनी में अँधियारी आ मिली हो, (६) कहीं शरत् की शुभ्र मेघरेखा के बीच से झाँकता आकाश हो।

५२. वी=धी; सनै=सन हे.; **जुषाम्=भृताम्; मृषीणां=मुनीनाम्; सम=समा** व.; **मध्याः=बन्धाः** हे.अ.ना.; **निवात=निर्वात; निष्कम्प=निष्कम्पि, निष्पन्द। ५३. याचितो=चायितो, पोषितो; प्रतीतः=प्रसिद्धः** हे.,। **चतुर्भिः कुलकम्। ५४. लेपि=लोपि, सेवि; खचिता=कचिता** अ.ना., **दुग्रथिता।** ५५. पाठान्तरस्यात्राभावः
५६. विलीनै=निलीनैः अ.ना., **भिलीनैः, विमानैः।**

क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गै: ।।५७।।
कुलकम् समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्ध: ।।५८।।
पुरं निषादाधिपतेरिदं तद् यस्मिन् मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत् सुमन्त्र: कैकेयि! कामा: फलितास्तवेति ।।५९।।
पयोधरै: पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्या: ।
ब्राह्मं सर: कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।।६०।।

(५७) (६) कहीं यह छवि ऐसी लग रही है जैसे भगवान् शंकर के भस्म रमाए शरीर पर काले सर्प का आभूषण लिपटा हो। (ऐसे ही चित्र प्रक्षिप्त पद्यों में भी मिलते हैं)। **(५८)** समुद्र की इन दो पत्नियों के संगम में स्नान करने से आत्मा पवित्र हो जाती है और शरीर छूटने के बाद पुन: शरीर में नहीं बंधना पड़ता, भले ही तत्त्वज्ञान न हो। ('ऋते ज्ञानान्न मुक्ति:' इस बन्धन से भी छुट्टी।) **(५९)** देखो यहाँ यह दिखाई दे रहा है नगर निषादराज का। यहीं मैंने मौलिमणि छोड़ी और जब जटाएँ बाँधी थी तो सुमन्त्र यह कहते हुए रो पड़े थे कि 'कैकेयि! तेरी कामनाएँ फल गईं'। **(६०)** इसमें खिलते हैं कनककमल। उनकी रेणु का उपभोग करती हैं गन्धर्वों की सुन्दरियाँ अपने पयोधरों पर लगा लगाकर, इसका उद्गम है ब्राह्म (मानस) सर वैसे ही जैसे बुद्धि का अव्यक्त (प्रकृति)।

५७. भूष=भीष; तरङ्गै: =जलौघै:। कुलकम्, चतुर्भि: कुलकम्, कलापकम्। इत: परमयं प्रक्षेप:–

तमिस्रया शुक्लनिशेव भिन्ना कुन्दस्रगिन्दीवरमालयेव ।
कृत्तिर्हरे: कृष्णमृगत्वचेव भूति: स्मरारेरिव कण्ठभासा ।। ५८।।
दृश्यार्धया शारदमेघलेखा निर्धौतनिस्त्रिंशरुचा दिशेव ।
गवाक्षकालागरुधूपराज्या हर्म्यस्थली लिप्तसुधाजलेव ।। ५९।।
तुषारसंघातशिला हिमाद्रेर्जात्यञ्जनप्रस्तरशोभयेव ।
पतत्रिणां मानसगोचराणां श्रेणीव कादम्बविहङ्गपङ्क्त्या ।।६०।।
नितान्तशुद्धस्फटिकाक्षयोगाद् वैदूर्यकान्त्या रसनावलीव ।
गङ्गा रवेरात्मजया समेत्य पुष्यत्युदारं परभागमेषा ।।६१।। कुलकम्।

प्रक्षेपेऽपि पाठान्तराणि– ५८. तमिस्र=तमिश्र, शुक्ल; भिन्ना=रात्र्या। ५९. धौंत=धूंत; दिशेव=दिवेव; लिप्त=लेप; जलेव=नवेव। ६०. मानसगोच=मानसरोव। ६१. स्फ=स्फु; काक्ष=काख्य; समेत्य=समेता; पुष्यत्य=पुष्णा; मेषा=लेखा। ५८. तनुत्यजाम्=शरीरिणाम्। ५९. इदं तद्=पुरस्तात्; मणिं=मणीन्; सुमन्त्र: =सुमन्तु:। ६०. निर्विष्ट = विविष्ट, निर्घृष्ट; ब्राह्मं = ब्राह्म्यं; मुदाहरन्ति=मथामनन्ति।

जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।
तुरङ्गमेधाऽवभृथाऽवतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ।। ६१ ।।
यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् ।
सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम् ।। ६२ ।।
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ।। ६३ ।।
विरक्तसन्ध्याकपिशं पुरस्ताद् यथा रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ।। ६४ ।।
अद्य श्रियं पालितसङ्गराय प्रत्यर्पयिष्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां त्वामिव लक्ष्मणो मे ।। ६५ ।।
असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।
वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ।। ६६ ।।

(६१) इसके तीर पर यज्ञयूप गड़े हुए हैं। उसकी जलधारा अयोध्या से लगकर बह रही है। ये जल इक्ष्वाकुवंशियों ने अश्वमेध के अवभृथ स्नानों से और अधिक पवित्र कर रखे हैं। **(६२)** पूरे उत्तरकोसल जनपद की यह सामान्य धाई सी है। इस पूरे उत्तरकोसल के लोग इसी की बांलू का सुख लेकर पलते हैं, इसी के पुष्कल जल से पुसते हैं। यह मेरे मन को प्रसन्न और तृप्त कर रही है। **(६३)** आगे ये आई सरयूमाता। मैं दूर हूँ तब भी यह मुझे छाती से चिपका रही है तरङ्ग के हाथों से शिशिर पवन फैला फैलाकर। यह भी मेरी मैया कौसल्या के समान मान्य महाराज से बिछुड़ी दिख रही है। **(६४)** इधर देखो भूमि की सन्ध्याराग सी कपिश धूल उठ रही है। लगता है हनुमान् ने सूचना दे दी और यह भरत आ रहा है सेना लेकर मेरी अगवानी में। **(६५)** भरत साधु है। वह प्रतिज्ञा पूरी करने के बाद लौटे मुझको आज ही राजलक्ष्मी सौंप देगा। वैसे ही जैसे युद्ध में खर आदि को मार कर लौटने पर तुम (सीता) को लक्ष्मण ने सौंप दिया था। **(६६)** देखो! ये गुरु वसिष्ठ को आगे कर हाथ में अर्घ्य लिए आ रहा है भैया भरत। सेना इसके पीछे है और सभी वृद्ध अमात्य साथ हैं। देखो इसका

६१. यूपा=यूपैः व.हे.। ६२. याम्=या; सुखोचि=सुखोषि; प्राज्यैः पयोभिः =पुण्यैःपयोभिः, प्रभूतपुष्पैः। ६३. मान्येन=जन्येन; युक्ता = मुक्ता; दूरे वस=दूरेऽपि स व.अ.ना.।।६४।। कुलकम्, कलापकम्, चतुर्भिः कलापकम्। ६४. कपिशं=कपिलं, परुषं हे.अ.ना.; यथा=यत म., यस्मात्, एतत्; हनूमत्क= हनूमान् क। ६५. अद्य=अद्धा म.हे.अ.ना.,ऋद्धां,अत्र;मृधे=रणे। ६६.अर्घ्यपाणिः=अर्घपाणिः, अर्चयिष्यन्।

पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता ।
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ।। ६७।।
एतावदुक्तवति दाशरथौ तदीयामिच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः।। ६८।।
तस्मात् पुरःसरविभीषणदर्शितेन सेवाविचक्षणहरीश्वरदत्तहस्तः ।
यानादवातरददूरमहीतलेन मार्गेण भङ्गिरचितस्फटिकेन रामः ।। ६९।।
इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके।। ७०।।
श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान्।
अन्वग्रहीत् प्रणमतः शुभदृष्टिपातैर्वार्त्तानुयोगमधुराक्षरया च वाचा।। ७१।।

वेष। यह चीर धारण किए हैं और देखो तो यह पैदल पैदल आ रहा है। (६७) अरे यह वह भाई है जिसने पिता द्वारा प्रदत्त राज्यश्री को मेरे लिए छोड़ दिया, जैसे युवा पुरुष गोद में आ पड़ी सुन्दरी को छोड़ दे। उसका भोग न करे। वह भी इतने वर्षों तक। यह है इसका उग्र आसिधारव्रत। इसे यह इस क्षण तक पाल रहा है। (६८) राम ने इतना कहा और इसके पश्चात् विमान नीचे उतर आया। उसे राम की वैसी इच्छा विमान की अधिदेवता से विदित हो गई। विमान जब ज्योतिष्पथ आकाश से नीचे उतर रहा था तो उसे भरत के पीछे आ रहे सभी अमात्य तथा प्रजाजन ऊँची दृष्टि कर विस्मय के साथ देख रहे थे। (६९) राम विमान से उतरे। उन्हें आगे बढ़कर मार्ग दिखलाया विभीषण ने और सेवाकुशल सुग्रीव ने दिया हाथ। उतरने का मार्ग था स्फटिकमणि की भङ्गिमापूर्ण सीढ़ी। भूमि बहुत दूर नहीं थी। (७०) राम ने भरत का अर्घ्य स्वीकार किया, फिर सबसे पहले प्रणाम किया इक्ष्वाकुवंश के गुरु महर्षि वसिष्ठ को बड़ी ही नम्रता के साथ। तब भरत को आँखों में आँसू लेकर गले लगाया, सिर सूँघा। भरत का सिर जिसने राम के प्रेम में पिता के राज्य का महान् अभिषेक छोड़ दिया था। (७१) वृद्ध मन्त्री लोग आए, राम ने उन पर शुभ दृष्टि डालने का अनुग्रह किया और उनसे कुशल समाचार मीठी वाणी में पूछने का भी। मन्त्रियों ने दाढ़ी—मूँछ

६७. विसृष्टां=ऽतिसृष्टां हे., ऽपि सृष्टां, निसृष्टाम् अ.ना., तया सहोग्र=नितान्तकष्टम् व.। ६८. ज्योति=द्योति ७०. अर्घ्य=अर्घ; पर्यश्रु=पर्यश्रुम्; भिषेके=षेकम् अ.ना.। ७१. प्रवृद्धि=प्रकृति; तानन=ताकृति; च=तान्; प्लक्षान्=प्रक्षान्, वृक्षान्; वृद्धान्=पुत्रान् हे.; अन्वग्र=प्रत्यग्र; पातैः=दानैः।

दुःखैकबन्धुरयमृक्षहरीश्वरो मे पौलस्त्य एष समरेषु पुरःप्रहर्त्ता।
इत्यादृतेन कथितौ रघुनन्दनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ।। ७२।।
सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन क्लिश्नन्निवास्य भुजमध्यमुरःस्थलेन।। ७३।।
रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान्।
येषु क्षरत्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते।। ७४।।
सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे रथान् दशरथप्रभवानुशिष्टः।
मायाविकल्परचितैरपि ये तदीयैर्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः।। ७५।।
भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति सावरजो विमानम् ।
दोषातनं बुधबृहस्पतियोगदृश्यस्तारापतिस्तरलविद्युदिवाभ्रकूटम्।। ७६।।

नहीं बनवाई थीं, अतः वे पाकड़ वृक्ष से लग रहे थे जिन पर वरोह निंकल आई हो। **(७२)** भरत से राम ने सुग्रीव और विभीषण का परिचय कराया – 'ये हैं ऋक्ष और वानरों के राजा सुग्रीव और युद्धों में आगे होकर प्रहार करने वाले ये हैं पौलस्त्य (विभीषण)। राम परिचय आदरपूर्वक दे रहे थे। भरत ने भी क्रम प्राप्त लक्ष्मण को छोड़कर उन्हें प्रणाम किया। **(७३)** लक्ष्मण से भरत अब मिले। सिर झुकाए लक्ष्मण को उन्होंने उठाया और छाती से कसकर चिपटा लिया। (लक्ष्मण के) वक्षःस्थल पर इन्द्रजित् मेघनाद के अस्त्र का जो घाव भर गया था उससे भरत के वक्षःस्थल को रगड़ते हुए। **(७४)** राम ने आज्ञा दी तो सभी वानर सेनापति मनुष्य शरीर में आ गए और हाथियों के ऊपर सवार हो गए। वहाँ भी उन्हें शैलाधिरोहण का सुख मिला, क्योंकि हाथियों के सिर से भी मद के अनेक स्रोत फूट रहे थे। **(७५)** राम ने आज्ञा दी तो विभीषण अपने पीछे आ रहे अनुचरों के साथ बैठे रथों पर। ये रथ अलङ्करण की रचना से सुशोभित थे। इनकी होड़ उनके रथ नहीं कर पा रहे थे, क्योंकि उन पर आभूषण की योजना माया से की गई होती है। **(७६)** इसके बाद राम दोनों छोटे भाइयों (भरत तथा लक्ष्मण) के साथ पताका उड़ाते कामगति विमान पर आरूढ़ हुए। इस समय की छटा वैसी ही थी जैसी रात्रि के समय चन्द्रमा की रहती है जब वह बिजली चमकाते

७२. दुःखैक=दुर्जात व.म.हे.अ.ना., **अज्ञात; समरेषु=समरे च; आदृतेन=आदरेण; व्युत्क्रम्य=व्युत्क्रान्त। ७३. लिङ्ग=लिङ्गे; क्लिश्नन्=क्लिश्यन्; उरःस्थ = उरुस्थ। ७४. येषु=तेषु; मद=मधु; सुखा=मुखा। ७५. रथान्=रथम्; शिष्टः=शिष्टम्, शिष्टान्,तिसृष्टम्, नुसृष्टम्, नुदिष्टम्;विकल्प=विभङ्ग;रचितै=रचनैः; विकल्परचितैः = विकल्पितविधेः; न स्यन्द=निष्पन्द; शोभाः=शोभः, शोभिः। ७६. तारापतिः=ताराधिपः** व.अ.ना.; **कूटम्=वृन्दम्** म.अ.ना.।

तत्रेश्वरेण जगतां प्रलयादिवोर्वीं वर्षात्ययेन रुचमभ्रघनादिवेन्दोः।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रादभ्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ ७७॥

लङ्केश्वरप्रणयभङ्गदृढव्रतं तद्
वन्द्यं युगं चरणयोर्जनकात्मजायाः ।
ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधो–
रन्योन्यपावनमभूदुभयं समेत्य ॥ ७८॥

क्रोशार्धं प्रकृतिपुरस्सरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्यमार्य्यः
साकेतोपवनमुदारमध्युवास ॥ ७९॥

इति रघुवंशे महाकाव्ये कालिदासविरचिते रामप्रत्यागमनो नाम त्रयोदशः सर्गः॥ १३॥

मेघ पर बुध और बृहस्पति के साथ आरूढ़ रहता है। (७७) वहाँ भरत ने प्रणाम किया धृतिशालिनी मैथिल सुता (सीता) को, जिन्हें राम ने रावण के संकट से छुड़ाया था उसी प्रकार जिस प्रकार पृथिवी को प्रलय के जल से भगवान् वराह अथवा चन्द्रकान्ति को मेघाम्बर (वर्षा की मेघघटा) से शरत्काल छुड़वाता है। (७८) दोनों ही दोनों से पावन हुए यहाँ। जानकी के चरण भरत की जटा से और भरत की जटा जानकी के चरण से। चरण ऐसे जिन्होंने लङ्केश्वर के प्रणययाचना में झुके सिर को ठुकरा दिया था। भरत की जटा ऐसी जो बनी थीं बड़े भाई के प्रेम से। (७९) राम आधे कोस तो प्रकृति सहित गए पुष्पक से, फिर वहाँ निश्चल वेग वाले पुष्पक से उतर कर साकेत के उपवन में ठहरे। उपवन विशाल भी था और उसमें शत्रुघ्न ने टैण्ट बनवा रखे थे।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में रामप्रत्यागमन नामक त्रयोदश सर्ग पूरा हुआ॥ १३॥

सनातनेन श्रीरेवाप्रसादेन द्विवेदिना ।
स्वहस्तलिखितो भूयात् सर्ग एष मुदे सताम् ॥

७७. रुचम्=रुचि हे.; **अभ्यु = प्रत्यु** व.अ.ना.। **७८. प्रणय=प्रणति** म.हे.अ.ना.; **जटिलं च=जटिलेन।**
७९. पुरःसरेण=पुरस्सरोऽपि; जवेन=गतेन।

।। चतुर्दशः सर्गः ।।

भर्त्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने ।
अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ।।१।।
उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ ।
विस्पष्टमस्त्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात् ।।२।।
आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिःष्यन्द इवावतीर्णः ।।३।।
ते पुत्रयोर्नैर्ऋतशस्त्रमार्गानार्द्रानिवाङ्गे सदयं स्पृशन्त्यौ ।
अपीप्सितं क्षत्रकुलाङ्गनानां न वीरसूशब्दमकामयेताम् ।।४।।
क्लेशावहा भर्तुरलक्षणाऽहं सीतेति नाम स्वमुदीरयन्ती ।
स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववन्दे ।।५।।

(१) अयोध्या पहुँचने पर राम तथा लक्ष्मण ने दोनों माताओं (कौसल्या तथा सुमित्रा) के दर्शन किए। वे दोनों दूसरी ही स्थिति में पहुँची हुई थीं, क्योंकि महाराज दशरथ संसार से जा चुके थे। आश्रयवृक्ष के कट जाने पर लताओं की भी दशा ऐसी ही होती है। (२) शत्रु को मारकर आए और पराक्रम से शोभित दोनों पुत्र जब प्रणाम के लिए झुके तो माताओं की आँखों में आँसू के कारण वे उन्हें देखकर तो पहचान नहीं सकीं। उन्हें उन्होंने पहँचाना सुतस्पर्शसुख से। (३) उनके आनन्द से उत्पन्न शीतल आँसू शोक से उत्पन्न उष्ण आँसुओं में आ मिले, वैसे ही जैसे गङ्गा और सरयू के ग्रीष्म से तप्त जल में आकर मिल जाता है हिमालय का निष्यन्द। (४) उन दोनों माताओं ने दोनों पुत्रों के शरीर पर बने राक्षसों के अस्त्रों के चिह्नों को ताजे घावों के समान दया से छुआ और क्षत्रिय कुल की अङ्गनाओं को प्रिय 'वीरसू' शब्द को काम्य नहीं माना। (५) सीता ने स्वर्ग गए श्वशुर की दोनों रानियों को समान भक्ति से

---

१. भर्तुः = अथ, अनु। द्र. कु.सं. ४.३१, ८.४३ पद्यान्तरम्—

प्रत्यागतौ तत्र चिरप्रवासादपश्यतां दाशरथी जनन्यौ ।
कुमुद्वतीशीतमरीचिलेखे दिवेव रूपान्तरदुर्विभाव्ये ।।

२. हतारी=नतारी अ.ना.; अस्त्रान्ध=अश्रान्त; सुत=सुप्त; सुतस्पर्शसुखो=सुतस्पर्शरसो, सु/मुखस्पर्शसु/मुखो। ३. अशीतं=अशिते; निःष्यन्द=निष्पन्द। ४. मार्गान्=घातान्; आर्द्रानिवाङ्गे सदयं स्पृशन्त्यौ'='स्थिर चिरप्ररूढानपि वत्सलत्वात्'; 'न वीरसूशब्दमकामयेताम्; 'भूयस्तयोर्जन्म समर्थयेताम्; अकामेताम्, अकारयेताम्, अपाकरोति व.म.हे.अ.ना.। ५. उदीरयन्ती=उदाहरन्ती; स्वर्गप्रति=स्वर्गप्रवि।

उत्तिष्ठ वत्से! ननु सानुजोऽसौ वृत्तेन भर्ता शुचिना तवैव ।
कृच्छ्रं महत् तीर्ण इति प्रियार्हां तामूचतुस्ते प्रियमप्यमिथ्या ।। ६।।
अथाभिषेकं रघुवंशकेतोः प्रारब्धमानन्दजलैर्जनन्योः ।
निर्वर्त्तयामासुरमात्यवृद्धास्तीर्थाहृतैः काञ्चनकुम्भतोयैः ।। ७।।
सरित्समुद्रान् सरसीश्च गत्वा रक्षःकपीन्द्रैरुपपादितानि ।
तस्यापतन् मूर्ध्नि जलानि जिष्णोर्विन्ध्यस्य मेघप्रभवा इवाऽऽपः ।। ८।।
तपस्विवेषक्रिययापि तावद् यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदितासीत्' पुनरुक्तदोषा ।। ९।।
सौमित्रिणा सावरजेन मन्दमाधूतवालव्यजनो रथस्थः ।
धृतातपत्रो भरतेन साक्षादुपायसङ्घात इव प्रसिद्धः ।।१०।।

यह कहते हुए प्रणाम किया— 'पति को क्लेश देने वाली मैं अलक्षणा सीता हूँ'। (६) दोनों सासों ने सीता से यह मीठा सत्य कहा— 'वत्से! उठ! तेरे ही शुचि वृत्त का यह फल है कि तेरा भर्त्ता (राम) छोटे भाई (लक्ष्मण) के साथ महान् संकट से पार हो सका। सीता प्रियार्ह थी ही। (७) इसके बाद दोनों माताओं के आनन्दाश्रुओं से शुरू हुआ राम का राज्याभिषेक, अमात्यों द्वारा पूरा कराया गया तीर्थों से मँगाए गए काञ्चनकुम्भतोयों से। (८) राक्षस और कपीन्द्रों द्वारा नदियों, समुद्रों और ताल–तलैयों तक जाकर जो पवित्र जल इकट्ठे किए थे वे उस विष्णु राम पर उड़ेले गए तो ऐसे लगे जैसे मेघ से उत्पन्न जल विन्ध्य के शिखर पर बरसते हुए लगते हैं। (९) जो राम तपस्वी के वेष में भी काफी प्रेक्षणीय लगते थे उनके पहँनाये गए राजकीय वेष की शोभा में पुनरुक्तदोष दिखाई दे रहा था। (१०) रथ पर बैठे राम पर लक्ष्मण तथा शत्रुघ्न डुला रहे थे चँवर और भरत लिए खड़े थे छत्र। ऐसे लग रहे थे चारों भाई जैसे साम, दान, भेद और दंण्ड ये चारों उपाय अलंकृत शरीर धारण कर प्रत्यक्ष उपस्थित हों।

६. एव=एवम्; कृच्छ्रं=कष्टं व.। ७. निर्वर्त्त=विवर्त्त; प्रवर्त्त; हृतैः=भृतैः। ८. प्रथमं पादं 'गत्वा समुद्रान् सरितश्चे'त्यन्यथयन्तोऽपि दृश्यन्ते कतिपये हस्तलेखाः। ९. अपि=एव; राजेन्द्र=नरेन्द्र; पुनरुक्तदोषा=पुनरुक्तिदोषा, पुनरुक्तदोषः। १०. प्रसिद्धः=प्रवृत्तः व., प्रवृद्ध। प्रसिद्धपदाय द्र. कुसं.५.९, रघु. १८.४१; युग्मम्। १०–११ पद्ययोः क्रमविपर्ययः मल्लिनाथे।

स मौलरक्षोहरिमिश्रसैन्यस्तूर्य्यस्वनानन्दितपौरवर्ग्गः ।
विवेश सौधोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीम् ॥११॥
प्रासादकालागरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना ।
वनान्निवृत्तेन रघूद्वहेन मुक्ता स्वयं वेणिरिवाऽऽबभासे ॥१२॥
श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीम् ।
प्रासादवातायनदृश्यबन्धैः साकेतनार्योऽञ्जलिभिः प्रणेमुः ॥१३॥
स्फुरत्प्रभामण्डलमानसूयं सा बिभ्रती काञ्चनमङ्गरागम् ।
रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता वह्निगतेव भर्त्रा ॥१४॥
वेश्मानि रामः परिवर्हवन्ति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः ।
बाष्पायमाणो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश ॥१५॥

(११) अब राम ने प्रवेश किया कुलराजधानी अयोध्या में जिसमें तोरण बने हुए थे, सौधों से लाजवर्षा हो रही थी, तूर्य की ध्वनि से पौर वर्ग प्रसन्न दिखाई दे रहा था। राम के साथ सेना भी थी, जिसमें कुलक्रमागत मन्त्री भी थे, राक्षस भी और वानर भी। (१२) प्रासादों से निकली कालागुरु की धूमराजि हवा चलने से लम्बी हो गई तो ऐसा लगा जैसे वन से लौटने पर स्वयं राम ने उसकी वेणी खोल दी हो। (१३) रघुवीर राम की पत्नी सीता भी कर्णीरथ पर निकलीं तो उन्हें साकेत की नारियों ने प्रासादवातायन से दिखलाई दे रही अंजलि बाँध बाँधकर प्रणाम किया। उन्हें सासों ने सुन्दर वेष पहँना रखा था। (१४) सीता लगाए हुए थी अनसूया माता से प्राप्त वह शाश्वत अंगराग जिससे प्रकट हो रहा था 'चमचमाता प्रभामण्डल। इस स्थिति में ऐसा लग रहा था जैसे भर्त्ता राम ने नगरवासियों को यह बतलाने हेतु कि यह शुद्ध है उसे पुनः वह्नि में प्रविष्ट करा रखा हो। (१५) सौहार्द को ही निधि मानने वाले राम ने सभी उपकरणों से युक्त भवन अपने सुहृदों को प्रदान किए और स्वयं आँख में आँसू लिए चित्ररूप में शेष पिता दशरथ के पूजा सामग्री से युक्त भवन पहुँचे।

११. स मौल=समौल व.म.हे.अ.ना., समौलि, समूल, सपौर, सभ्रातृ; हरिमिश्रसैन्यः = हरिभिः ससैन्यः म., हरिभिः सुंसैन्यः व.हे.अ.ना., हरिसैन्यमिश्रः, कपिभिः ससैन्यः; पौरवर्गः = पौरवर्गाम्, पौरवर्गम्, पौरवर्गा, राजमार्गम्। १२. प्रासाद=प्रमोद अ.ना.; गरु=गुरु; धूम=धूप; वशेन=वशाद् हे., वशाच्च; च भिन्ना=च नुन्ना, विभिन्ना हे., विदीर्णा, विनुन्ना; रघूद्वहेन=रघूत्तमेन। १३. जनानुष्ठित=जनैः कल्पित; प्रासाद=विमान व., विशाल; दृश्य=लक्ष्य। १४. आनसू=आनुसू; रागम्=रङ्गम्; पुर्यै=पुर्य्याः। १५. वर्ह=बर्ह; बलि=मणि।

कृताञ्जलिश्चात्र यदम्ब सत्यान्नाभ्रश्यत स्वर्गफलाद् गुरुर्नः ।
तच्चिन्त्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः ॥१६॥
तथा स सुग्रीवविभीषणादीनुपाचरत् कृत्रिमसंविधाभिः ।
संकल्पमात्रोदितसिद्धयस्ते क्रान्ता यथा चेतसि विस्मयेन ॥१७॥
सभाजनायोपगतान् स दिव्यान् मुनीन् पुरस्कृत्य हतस्य शत्रोः ।
शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानम् ॥१८॥
प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञातगतार्धमासान् ।
सीतास्वहस्तोपहृताग्र्यपूजान् रक्षःकपीन्द्रान् विससर्ज रामः ॥१९॥
तच्चात्मचिन्तासुलभं विमानं हृतं सुरारेः सह जीवितेन ।
कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त ॥२०॥

(१६) यहाँ मिली माता कैकेयी। श्रीराम ने उनकी लज्जा यह कहकर हटाई कि हे अम्ब! हमारे पिताजी स्वर्गप्रद सत्य से नहीं डिगे यह सोचने से सिद्ध होता है कि आपका ही सुकृत है। (१७) राम ने सुग्रीव विभीषण आदि का सत्कार नई नई सामग्री से इस प्रकार किया कि उनके चित्त विस्मय से भर गए। उन्हें संकल्प करते ही अभीष्ट वस्तु सुलभ रहती। (१८) राम का अभिनन्दन करने हेतु उपस्थित दिव्य मुनियों को राम ने पुरस्कृत किया और उनसे नष्ट शत्रु की उत्पत्ति आदि के वृत्तान्त सुने। उनसे राम के पराक्रम में गौरव आ रहा था। (१९) सभी तपोधन अयोध्या में आधे महिने रहे। इतने सुख से रहे कि उन्हें पता ही नहीं चला कि वे दिन कब बीत गए। विदाई के समय स्वयं सीताजी ने ऊँचे ऊँचे उपहार सभी राक्षसों और कपीन्द्रों को भेंट किए और राम ने उन्हें विदा कर दिया। (२०) राम ने पुष्पक विमान को भी कुबेर की सेवा में भेज दिया, आवश्यकता पड़ने पर स्मरण करते ही वह राम को सुलभ रहेगा। यह पुष्पक द्युलोक का अलंकार ही था और रावण से उसके प्राणों के साथ छीना था श्रीराम ने।

१६. श्चात्र=स्तत्र; नः=मे। १७. तथा स=तथा च हे.अ.ना., **तथैव, तत्रैव** व.; **मात्रोदित=मात्रोदय** हे., **मात्रोचित। १८. स दिव्यान्=सदिव्यान्, सुदिव्यान्; सहिष्णुः, स जिष्णुः; पुरस्कृत्य=नमस्कृत्य; दि वृत्तम्=दिवृत्तम्; धानम्=धानः** व.हे.। **१९. प्रति=इति; स्तोपहृताग्र्यपूजान्=स्तोपकृ/वृताग्र्यपूजान्/जाः। २०. तच्चात्म=तदात्म, अथात्म** म.हे.अ.ना., **तथात्म; हृतं=हतं; अन्वमस्त=अन्वयुङ्क्त** म.हे.अ.ना.।

पितुर्नियोगाद् वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः ।
धर्म्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम् ।। २१।।
सर्वासु मातृष्वपि वत्सलत्वात् स निर्विशेषप्रतिपत्तिरासीत् ।
षडाननापीतपयोधरासु नेता चमूनामिव कृत्तिकासु ।। २२।।
तेनार्थवांल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् ।
तेनास लोकः पितृमान् विनेत्रा तेनैव शोकापनुदेन पुत्री ।। २३।।
स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा ।
उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या ।। २४।।
तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु ।
प्राप्तानि दुःखान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन् ।। २५।।

(२१) इस प्रकार राम ने पिता की आज्ञा का पालन किया, वनवास की अवधि पूरी की, लौटकर राज्य प्राप्त किया और 'धर्म, अर्थ, काम' इस त्रिवर्ग में जिस प्रकार समानता बरती उसी प्रकार तीनों अनुजों में। (२२) सभी माताओं के साथ भी राम की ममता समान थी। वे सभी के वात्सल्यपात्र थे और माताओं से पुत्रवत् व्यवहार करते थे, ठीक उसी प्रकार जिस प्रकार कुमार कार्त्तिकेय कृत्तिकाओं के साथ जिनका दूध उन्होंने छहों मुखों से पी रखा था। (२३) राज्यवासी लोग स्वयं को अर्थवान् मानते थे राम से, क्योंकि वे लोभपराङ्मुख थे, उन्हीं से मानते थे क्रियावान्, क्योंकि वे विघ्नभय के निवारक थे, उन्हीं से थे पितृमान्, क्योंकि वे ही थे विनय (शिक्षा) दाता और उन्हीं से थे पुत्रवान्, क्योंकि वे ही दूर करते रहते थे शोक। (२४) कभी पौरों के कार्य देखकर राम ने सीताजी के साथ विहार किया। सीता लगती थीं जैसे राम के उपभोग के लिए लक्ष्मी ही सुन्दर शरीर में उपस्थित हो गई हो। (२५) राम–सीता मनचाहे इन्द्रियों के भोग लेते रहे विभिन्न चित्रशालाओं में। चित्रों में दण्डका आदि के दृश्य थे। वे वहाँ दुःखदायी थे, परन्तु यहाँ, उन्हें सोच–सोच कर सुख ही मिल रहा था।

---

२१. एवम्=इत्यम्, दुःखं; समाम्=समं अ.ना.; यथा तथैव=तथा यथैव अ.ना.। २२. अपि=अति। २३. पितृमान्=पितृवान्। २४. समीक्ष्य=निरीक्ष्य, विलोक्य, समाप्य; उपस्थितः=उपस्थितम्; चारु वपु=चारुवपु। २५. यार्थाना=यार्थमा; दण्डकेषु=दण्डकायाम्; सुखान्यभूवन्=सुखीबभूवुः व.म.हे.अ.ना।

अथादिकस्निग्धविलोचनेन मुखेन सीता शरपाण्डरेण ।
आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन ।। २६।।
तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्राम् ।
विलज्जमानां रहसि प्रतीतः पप्रच्छ रामां रमणोऽभिलाषम् ।। २७।।
सा दष्टनीवारफलानि हंसैः सम्बद्धवैखानसकन्यकानि ।
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ।। २८।।
तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः ।
आलोकयिष्यन् मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह ।। २९।।
ऋद्धापणं राजपथं स पश्यन् विगाह्यमानां सरयूं च नौभिः ।
विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे ।। ३०।।
स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।
सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ।। ३१।।

(२६) सीता की दशा बदली। आँखों में अधिक स्निग्धता आ गई, चेहरा शरकाण्ड सा पाण्डुर वर्ण का हो गया। पति के लिए वे आनन्द दे रही थीं, उनके इन लक्षणों से व्यक्त था कि वे माता बनने वाली थीं। कहने की आवश्यकता नही थी। (२७) सीता दुबली हो गईं। उनके आँचरों के मुख पर दूसरा रंग छा गया। लज्जा में डूबी रहतीं वे। कभी एकान्त में उनसे रमण राम ने उनकी इच्छा पूछी। (२८) उन्होंने एक बार पुनः भागीरथी तीर के तपोवन जाने की इच्छा व्यक्त की, जहाँ हंस चुगते रहते हैं नीवार की फली, वैखानसों की रहती हैं कन्याएँ और जमें रहते हैं कुश। (२९) राम ने सीता को उनकी इच्छा पूर्ण करने का वचन दिया और वे पार्श्ववर्त्ती अनुचरों के साथ मुदिता अयोध्या की खुशी देखने अभ्रंलिह प्रसाद पर चढ़े। (३०) उन्हें अच्छा लगा जब उन्हें देखने को मिला कि अयोध्या के राजपथों पर बड़ी ही समृद्ध दुकानें हैं, सरयू में नौकाएँ चल रही हैं और नगर के पास के उपवनों में विलासी जन जमे हुए हैं। (३१) वहीं पहुँचा गुप्तचर। उससे राजा राम ने उनके चरित्र के विषय में चलती किंवदन्ती का प्रश्न किया। वे वाग्व्यहार में प्रथम और चरित्र से विशुद्ध थे। उनकी भुजाएँ सर्पाधिराज जैसी पुष्ट और दीर्घ थीं। उन्होंने जानना चाहा कि सब

२६. स्निग्ध=स्नेह व.; शर=परि; पाण्डरे=पाण्डुरेण; दोहदेन=दौहृदेन व.म., दौर्हृदेन। २८. दष्ट=दृष्ट; बलीनि= फलानि व.हे.; हंसैः=हिंस्रै म.; संबद्ध=संवृद्ध, संबन्धि हे.। २९. आलोक=विलोक; मुदितां=ध्युषिता। ३०. विगाह्य= विपाद्य। ३१. पुरोगः = पुरागम् हे.; विजिता=विहता, निहता।

निर्बन्धपृष्टः स जगाद सर्व्वं स्तुवन्ति पौराश्चरितं त्वदीयम् ।
अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव! देव्याः ।। ३२।।
कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्त्तिविपर्य्ययेण ।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर् हृदयं विदद्रे ।। ३३।।
किमात्मनिर्व्वादकथामुपेक्षै जायामदोषामुत संत्यजानि ।
इत्येकपक्षाश्रयविक्लवत्वादासीत् स दोलाचलचित्तवृत्तिः ।। ३४।।
निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् ।
अपि स्वदेहात् किमुतेन्द्रियार्थाद् यशोधनानां हि यशो गरीयः ।। ३५।।
स संनिपात्यावरजान् हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् ।
कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यम् ।। ३६।।
राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ।। ३७।।

कुछ ठीक तो है, शत्रुओं के कुशल मंगल को वे जीतकर स्वस्थ थे। (३२) बार बार पूछने पर गुप्तचर ने सूचना दे दी– 'मानवदेव! सभी पुरवासी आपके सभी क्रियाकलापों की प्रशंसा करते हैं केवल राक्षसभवन में रही सीता को अपना लेने को छोड़कर। (३३) परिणाम अत्यन्त विषम हुआ– वैदेही के पति का हृदय विदीर्ण हो गया, जैसे परितप्त लोहा लोहे के घन से मार खाकर। यह अपयश छोटा नहीं था। इसमें थी निन्दा कलत्र (राजमहिषी) की। (३४) राम किंकर्त्तव्यविमूढ थे। उनकी चित्तवृत्ति दोलाचल थी। वे नहीं सोच पा रहे थे कि 'अपनी अफवाह की उपेक्षा करूँ कि जाया को छोड़ूँ जो निर्दोष है' इनमें से कौन सा पक्ष लूँ। (३५) अन्त में 'अपकीर्त्ति का परिमार्जन अन्य किसी भी उपाय से न देख उसे पत्नी के परित्याग से मिटाना चाहा। यश ही जिनका धन होता है वे तो इन्द्रियार्थ (स्त्री आदि) की तो बात क्या अपने देह से भी अधिक यश को ही मानते हैं। (३६) म्लानमुख राम ने सभी भाईयों को इकट्ठा किया। वे आए। देखी राम में विक्रिया तो उनकी खुशी उड़ गई। राम ने अपने विषय के जनापवाद से उन्हें अवगत कराया और फिर कहा। (३७) 'सूर्य के इस वंश में सभी राजर्षि हुए हैं। देखो, सदाचार से शुचि इस वंश पर मेरे कारण कैसा कलंक आया है, बरसाती हवा से दर्पण के समान।

३२. सर्व=वृत्तं; पौराः = लोकाः; भवनो=भुवनो। ३३. अभ्या=अत्या। ३४. उपेक्षे=उपेक्षै म.हे.अ.; **अपेक्षे; त्यजानि=त्यजामि; उत=अथ। ३५. पत्न्याः=देव्याः** अ.। **३६. हतौजाः=महौजाः** म.अ., **क्षतौजा** हे.; **पुनः = पुरः। ३७. रविप्रसूतेः=रविप्रवेशे, मनुप्रसूतेः** हे.।

पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्व्वमवर्णमीश आलानिकं स्थाणुमिव द्विपेन्द्रः ॥ ३८॥
तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः ।
त्यजामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव ॥ ३९॥
अवैमि चैनामनघेति किन्तु लोकापवादो बलवान् मतो मे ।
छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ॥ ४०॥
रक्षोवधान्तो न च मे प्रयत्नो व्यर्थः स वैरप्रतिमोचनाय ।
अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ॥ ४१॥
तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः ।
यद्यर्थिता निर्हृतवाच्यशल्यान् प्राणान् मया धारयितुं चिरं वः ॥ ४२॥

(३८) मैं जलतरंगों में तैलबिन्दु जैसे पुरवासी जनों में फैल रहे इस प्रथम अवर्ण (अपयश) को सहने में असमर्थ हूँ, बन्धनस्थाणु (खूँटे) को गजराज के समान। (३९) उसका निवारण करना ही है, अतः माना कि फलप्राप्ति (सन्तान प्राप्ति) आसन्न है तब भी उसे भुलाकर वैदेहसुता को छोड़ रहा हूँ, पहले पिता की आज्ञा से छोड़ी थी समुद्रनेमि (समुद्रपर्यन्त फैली पृथिवी।) (४०) यह तो मैं जानता हूँ कि सीता विशुद्ध, निष्कलंक और निष्पाप है, किन्तु मेरे लिए लोकापवाद बड़ा है। चन्द्र है तो शुद्ध ही परन्तु भूमि की छाया को लोक ने उसमें कलङ्क घोषित कर ही रखा है। (४१) राक्षसों का जो संहार किया और उसके लिए महान् प्रयास किया वह भी निरर्थक नहीं रहेगा। अरे क्रोधी सर्प क्या पैर से ठुकराने वाले को डँसता है खून की लालसा से। (४२) तो मेरा यह निश्चय, निश्चय ही है। इसका करुणार्द्रचित्त होकर आप सब निषेध न करें, यदि चाहते हैं कि मैं चिरकाल तक अपयश का शल्य हटे प्राणों को धारण करूँ।

३८. बहुली=बहली, विपुली हे.; **सोढुं न=सोढुं हि** हे.; **ईश आ=ईशे ह्या, ईशे चा; लानिकम्=लानकम्, स्तालातिगम् तालमतिक्रम्य गच्छन्तम्; स्थाणु=स्तम्भ। ३९. तस्य=अस्य; पेक्षः=पेक्ष्यः; त्यजामि=त्यक्ष्यामि** म.अ.; **समुद्रनेमिम्=साम्राज्यराज्यम्। ४०. किन्तु=किञ्चित्; लोकाप=लोकप, जनाप; नारोपिता=निरूपिता** व.म.हे.अ.। **४१. वधान्तो=वधार्थो** व.; **मोच=पाद; काङ्क्षया=वाञ्छया। ४२. निर्हृत=निर्गत; धारयितुं=धारयता।**

इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम् ।
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा ।। ४३।।
स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्त्तिः ।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ।। ४४।।
प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ।। ४५।।
स शुश्रुवान् मातरि भार्गवेन पितुर्निदेशात् प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ।। ४६।।
अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तरथं तुरङ्गैः ।
रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे ।। ४७।।
सा नीयमाना रुचिरान् प्रदेशान् प्रियङ्करो मे प्रिय इत्यनन्दत् ।
नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ।। ४८।।

(४३) राम राजा ठहरे। उन्होंने सीता के प्रति नितान्त रूक्ष अभिनिवेश व्यक्त किया तो भाइयों में से कोई भी न उसका निषेध कर सका और न कोई अनुमोदन। (४४) तीनों लोकों में गीतकीर्त्ति और लक्ष्मण के अग्रज राम ने लक्ष्मण को अलग बुलाया और सौम्य कहकर आदेश दिया। राम यथार्थभाषी थे और लक्ष्मण उनकी आज्ञा का पालन ही करते। (४५) लक्ष्मण! तुम्हारी भौजाई तपोवनों में जाना ही चाहती है। तुम उसी के बहाने रथ पर उसे वाल्मीकि–आश्रम के पास पहुँचाकर छोड़ दो। (४६) लक्ष्मण ने सुन रखा था कि 'परशुराम जी ने पिता की आज्ञा से माता पर शत्रु जैसा प्रहार कर दिया था' तो उन्होंने अग्रज का वह शासन स्वीकार कर लिया। बात यह है कि 'जो आज्ञा बड़े दें उस पर विचार नहीं किया जाता'। (४७) सीता को खुशी थी कि उनकी इच्छा पूरी की जा रही है। लक्ष्मण ने रथ में न बिचकने वाले घोड़े जोते, सीता को बिठाया और लगाम सुमन्त्र को सम्हला कर प्रस्थान किया। (४८) सीता को रुचिर प्रदेशों को ले जाया जा रहा था तो वे यह सोचकर प्रसन्न थीं कि मेरा प्रिय मेरा प्रियकार्य कर रहा है। वह यह नहीं जानती थीं कि वह अब

४३. निषेद्धुमा=निषेध आ; मोदितुं=वर्तितुं अ., नोदितुं व.। ४४. भाषी=भाषः व., भाष्यः; निदेशे=निवेशे। ४५. दोहद=दौर्हृद व.अ.; वनेषु=वनेभ्यः, धनेभ्यः; एव=एषा। ४६. निदेशा=नियोगा; द्विषद्वत्=विशङ्कम् हे.; ह्यविचारणीया=मविचारणीया, न विचारणीया हे., व्यभिचारणीया। ४७. श्रवण=श्रवणे; प्रतीतां=प्रहृष्टां हे.; सुमन्त्रप्रति=सुमन्त्रेण गृहीत; सुमन्तु, समन्त। ४८. रुचिरान् प्र=रुचिरप्र;

जुगूह तस्याः पथि लक्ष्मणो यत् सव्येतरेण स्फुरता तदक्ष्णा ।
आख्यातमस्यै गुरु भावि दुःखमत्यन्तलुप्तप्रियदर्शनेन ।। ४९ ।।
सा दुर्निमित्तोपगताद् विषादात् सद्यः परिम्लानमुखारविन्दा ।
राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः ।। ५० ।।
गुरोर्नियोगाद् वनितां वनान्ते साध्वीं सुमित्रातनयो विहास्यन् ।
अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात् ।। ५१ ।।
रथात् स यन्त्रा निगृहीतवाहात् तां भ्रातृजायां पुलिनेऽवतार्य ।
गङ्गां निषादाहृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ।। ५२ ।।
अथ व्यवस्थापितवाक् कथञ्चित् सौमित्रिरन्तर्गतबाष्पकण्ठः ।
औत्पातिको मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ।। ५३ ।।

कल्पद्रुमता छोड़कर उसके लिए असिपत्र वृक्ष हो चुका है। (४९) लक्ष्मण ने मार्ग में छिपा रखा था जिस भावी और गुरु दुःख की सूचना को, दाहिने नेत्र ने फड़क कर उसे देना चाहा। इस अपशकुन से सूचना दी गई थी प्रियदर्शन के सदा के लिए होने वाले लोप की। (५०) अपशकुन से सीता को विषाद हुआ। उसका मुखारविन्द तुरन्त परिम्लान हो उठा। उन्होंने मन ही मन कामना की कि अनुजों सहित राम का शुभ हो। (५१) लक्ष्मण सीता को बड़े भाई की आज्ञा से जा रहे थे छोड़ने। बीच में मिली गंगा जी ने भी उनको उठ रही तरङ्गों से मानो हाथ हिलाकर वैसा करने से रोका। (५२) गंगाजी की बालू में सारथि द्वारा घोड़े रोक दिए गए। लक्ष्मण ने भौजाई को उतारा। निषाद एक विशेष नाव ले आया। उससे भौजाई को गङ्गा वैसे ही पार कराई जैसे सत्यसन्ध (राम) ने अपनी प्रतिज्ञा पार की थी। (सत्यसन्ध लक्ष्मण भी।) (५३) इसके पश्चात् वह क्रूर क्षण आ पहुँचा जब अपनी वाणी को व्यवस्थित कर आँसुओं को गले में लिए हुए लक्ष्मण ने राजा का आदेश उगल दिया, उत्पातकारी मेघ जैसे ओला बरसा देता है।

नाबुद्ध=माबुद्ध। ४९. जुगूह=जुगोप व.हे.; तदक्ष्णा=तदक्ष्णोः; अस्यै=अस्याः; गुरुभावि दुःखम्=गुरु भावि दुःखम्; दर्शनेन= चुम्बनेन, चन्दनेन। ५०. गताद्=गमाद् व.अ., विन्दा=विन्दम्; शिवम्=शुभम्; आशशंसे=आशशङ्के, आविशङ्के अबाह्यैः=विशङ्कैः। ५१. गुरोः=भ्रातुः व.; नियोगात् म.अ., निदेशात् व.हे.; वनितां=दयितां, अपि तां व.हे.। ५२. स यन्त्रा=सुमन्त्र, सुयन्त्रा; सुयन्तृनिगृहीत=सुयन्तृप्रगृहीत, निगृहीत=प्रतिपन्न; विशेषः=विशेषाम्। ५३. अथ=चिरं; बाष्पकण्ठः=मश्रुकण्ठः; औत्पातिको= औत्पातिकं व.अ.।

ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्त्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ।।५४।।
इक्ष्वाकुवंशप्रभवः कथं तां त्यजेदकस्मात् पतिरार्य्यवृत्तः ।
इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत् ।।५५।।
सा लुप्तसंज्ञा न विवेद दुखं प्रत्यागतासुः समतप्यतान्तः ।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत् कष्टतरः प्रबोधः ।।५६।।
न चावदद् भर्त्तुरवर्णमार्य्या निराकरिष्णोर्वृजिनादृतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द ।।५७।।
आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि! क्षमस्वेति बभूव नम्रः ।।५८।।

(५४) सुनते ही सीता जमीन पर गिर पड़ी लता के समान, वह (भूमि) ही देने वाली थी उन्हें (सीता और लता को) उनका शरीर। गिराने वाला था अभिषङ्ग, बहुत भारी हानि रूपी हवा का आघात। **(५५)** माँ पृथिवी ने पहले तो सीता को अपने भीतर विलीन नहीं किया कि उसे कदाचित् यह संशय था कि इसका पति इक्ष्वाकु वंश का है और स्वयं भी चरित्र से आर्य है। वह एकाएक उसे छोड़ नहीं सकता। **(५६)** मूर्च्छा में तो सीता को दुःख का अनुभव नहीं हुआ, किन्तु जब प्राण लौट आए तो वह मन ही मन अतीव सन्तप्त हुई। लक्ष्मण के यत्न से प्राप्त होश उसे मूर्च्छा से अधिक कष्टकर लगा। **(५७)** सीता आर्य महिला थी। उसने पति के लिए एक भी शब्द ऐसा नहीं कहा जो आपत्तिजनक हो, यद्यपि, पति ने उसे बिना अपराध के ही छोड़ा था। उसने अपने आपको ही दुष्कृत करने वाली माना जिससे स्थिर दुःख में पड़ी हुई थी वह और अपनी ही निन्दा की। **(५८)** राम के अनुज लक्ष्मण ने उसे समझाया और वाल्मीकि आश्रम का मार्ग बतलाकर 'देवि! मैं पराधीन हूँ, मैंने स्वामी की आज्ञा के पालन का जो रूखा व्यवहार किया उसे क्षमा करें और वे उनके सामने झुक गए।

५४. ङ्गानिल=ङ्गानल; विद्धा=वृद्धा, वुद्धा, बद्धा, बद्धा; प्रभ्र=विभ्र; मूर्त्ति=देह; जगाम=पपात। ५५. ताम्=त्वाम्; पतिरार्यवृत्तः=प्रथितार्यवृत्तिः/त्तः, इति=इत्थं; संशयिते=संशयिनी। ५६. सा लुप्त=सुलुप्त, ववेद=विदेह; समतप्यत=समदह्यत; लब्धः=लभ्यः। ५७. पुनः पुनः=पदे पदे। ५८. सतीं तां=स सीतां, समीपम् व.हे., **स चैनाम्** म.अ.; **भर्तृ=भ्रातृ** व.; **रौक्ष्यम्** म.हे.अ., **रूक्षम्** व., **रौद्रम्; देवि=मातः।**

सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य! चिराय जीव ।
विडोजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वम् ।। ५९।।
श्वश्रूजनं सर्व्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः ।
प्रजानिषेकं मयि विद्यमानं सूनोरनुध्यायत चेतसेति ।। ६०।।
वाच्यस्त्वया मद्वचनात् स राजा वह्नौ विशुद्धामपि यत् समक्षम् ।
मां लोकवादश्रवणादहासीः श्रुतस्य तत् किं सदृशं कुलस्य ।। ६१।।
कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः ।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ।। ६२।।
उपस्थितां पूर्व्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः ।
त्वय्यास्पदं प्राप्य तयाऽद्य रोषात् सोढास्मि न त्वद्भवने वसन्ती ।। ६३।।
निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ।। ६४।।

(५९) सीता ने लक्ष्मण को उठाया और कहा 'हे वत्स! मैं प्रसन्न हूँ, चिरकाल तक जिओ, जो तुम इन्द्र के प्रति विष्णु के समान अपने बड़े भाई के प्रति इतने समर्पित हो। **(६०)** सभी सासों को मेरा क्रम से प्रणाम निवेदित कर कहना 'पुत्र का जो अंश मेरे भीतर विद्यमान है उसकी चिन्ता मन से करती रहें।' **(६१)** उस राजा से मेरे शब्दों में कहना कि 'उस प्रकार सबके समक्ष अग्नि में विशुद्ध ठहरी मुझे लोकवाद सुनकर ही जो छोड़ दिया यह क्या तुम्हारे विख्यात कुल के अनुरूप किया?' **(६२)** अथवा तुम तो कल्याणबुद्धि हो। मेरे साथ तुमने मनमानी की वह शंका नहीं की जा सकती। मेरे ही दूसरे जन्मों के पातकों का है विपाक यह वज्रपात। **(६३)** पहले उपस्थित लक्ष्मी को छोड़कर मेरे साथ वन में रहना पसंद किया था तुमने। अब तुम्हारे भीतर स्थान पाकर तुम्हारे घर में रहती नहीं सह सकी वह मुझे। **(६४)** तुम्हारी कृपा से मैं देती थी शरण उन तपस्विनियों को जिनके पति निशाचरों द्वारा नष्ट कर दिए जाते थे। अब मैं किस अन्य से शरण की याचना करूँ जबकि तुम प्रदीप्त हो।

५९. सौम्य=वत्स व., पुत्र। ६०. विज्ञापय=विज्ञापये:; निषेकं=भिषेकं। ६१. अहासीः = अहासीत्; तत् सदृशं ते सदृशं। ६२. तवायं=तवैव। ६३. मया=यया; प्रपन्नः = प्रयातः; त्वय्यास्प=तदास्प म.अ., त्वयास्पदं, त्वामास्पदं; तयाऽद्य=तया तु, तयाऽपि, तयानु। ६४. अन्यम्=अन्याम् हे.अ.; प्रपत्स्ये= प्रवत्स्ये, प्रपद्ये; दीप्यमाने=जीव्यमाने, वत्तमाने।

किं वा तवात्यन्तवियोगमोघे कुर्य्यामुपेक्षां हतजीवितेऽस्मिन् ।
स्याद् रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ।। ६५।।
साऽहं तपः सूर्य्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूया यथा मे जननान्तरेऽपि त्वमेव भर्त्ता न च विप्रयोगः ।। ६६।।
नृपस्य वर्णाश्रमपालनं यत् स एव धर्म्मो मनुना प्रणीतः ।
निर्वासिताप्येवमतस्त्वयाऽहं तपस्विसामान्यमवेक्षणीया ।। ६७।।
तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ।। ६८।।
नृत्तं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि ।। ६९।।

(६५) या तो मैं तुमसे सदा के लिए बिछुड़े मेरे इन अभागे प्राणों पर उपेक्षा कर दूँ, यदि न बनता विघ्न मेरे भीतर विद्यमान तुम्हारा रक्षणीय अंश। **(६६)** मैं प्रसूति के पश्चात् सूर्य में दृष्टि लगाकर करूँगी यत्न तप करने का, जिससे दूसरे जन्म में भर्त्ता तो मेरे तुम्हीं रहो, पर विप्रयोग न हो। **(६७)** राजा के लिए 'वर्ण और आश्रम' का पालन ही निश्चित किया गया है धर्म मनु महाराज के द्वारा। अतः इस प्रकार निकाल दिए जाने पर भी सभी तपस्वियों के समान अभी भी मेरी चिन्ता करते रहना।' **(६८)** लक्ष्मण ने 'तथा' कह सीता की आज्ञा शिरोधार्य की ओर चल पड़े। उनके ओझल होते ही सीता चिल्ला कर पुनः रो पड़ीं, घायल कुररी के समान। **(६९)** उसके दुःख से दुःखी उस पूरे वन में रोदन ही रोदन दिखाई दे रहा था। मयूरों ने नाँचना छोड़ दिया था, वृक्ष पुष्प छोड़ रहे थे और मुख में रखे दर्भों को हिरनियाँ छोड़ती दिखाई दे रही थीं।

६५. उपेक्षाम्=अपेक्षाम् व.; **गत=र्हित; रायः = रायम्, रायात्** अ.। **६६. निविष्ट=निबद्ध** व.हे.; **भूयाः =भूयो** म.हे., **भूयात्** व.; **जननान्तरेऽपि=जननान्तरेषु; त्वमेव=भवान् हि; च=तु। ६७. पालनं=रक्षणं; एव=एष। ६८. वाचम् = वाच्यम्; पथं = पथात्; सा मुक्त=समुक्त; विग्ना=सीता, भीता, व्यग्रा। ६९. नृत्तं=नृत्यं** म.; **वृक्षाः = भृङ्गाः** हे.; **अत्यन्तम् = अत्यर्थम्** हे.अ.।

तामभ्यगच्छत् रुदितानुसारी कविः कुशेध्माऽऽहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ।। ७० ।।
तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद् विरता ववन्दे ।
तस्यै मुनिर् दोहदलिङ्गदर्शी दाश्वान् सुपुत्राशिषमित्युवाच ।। ७१ ।।
जाने विसृष्टां प्रणिधानतस्त्वां मिथ्याऽपवादक्षुभितेन भर्त्रा ।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि! पितुर्निकेतम् ।। ७२ ।।
उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।
त्वां प्रत्यकस्मात् कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ।। ७३ ।।
तवोरुकीर्तिः श्वशुरः सखा मे सतां भयच्छेदकरः पिता ते ।
धुरि स्थिता त्वं पतिदेवतानां किं तन्न येनासि ममानुकम्प्या ।। ७४ ।।

(७०) सीता की ही ओर चले कुश और इध्मा (हवन की लकड़ी) लेने के निकले वे महर्षि जिनका निषादबिद्ध पक्षी के दर्शन से उत्पन्न शोक बन बैठा था श्लोक (अर्थात् आदिकवि वाल्मीकि)। **(७१)** सीता ने दृष्टि–रोधी, आँसू पोंछे, विलाप छोड़ा और उन मुनि वाल्मीकि को प्रणाम किया। मुनि ने गर्भचिह्न देखा तो 'सुपुत्र' का आशीर्वाद दिया और कहा– **(७२)** 'ध्यान लगाकर जान गया मैं कि मिथ्यापवाद से क्षुभित पति (राम) ने तुम्हें छोड़ दिया है। पर व्यथित मत होओ वैदेहि! तुम पिता के ही दूसरे घर आ गई हो। **(७३)** भरत के अग्रज (राम) पर मुझे क्षोभ है– तुम्हारे लिए इस प्रकार की कलुषित प्रवृत्ति के कारण, भले ही उन्होंने तीनों लोकों का कण्टक (रावण) उखाड़ फेंका है, वे सत्यप्रतिज्ञ भी हैं और आत्मश्लाघी नहीं हैं। **(७४)** तुम्हारे यशस्वी श्वशुर मेरे मित्र थे, तुम्हारे पिता हैं सत्पुरुषों के भय को उच्छिन्न करने वाले और तुम स्वयं ही पतिव्रताओं में प्रथमस्थानीय। तुम्हारे पास क्या नहीं जिससे तुम पर मैं अनुकम्पा न करूँ।

७०. अभ्यगच्छत्=अभ्यगच्छद्, अभ्यगात् तद् हे., अन्वगच्छत्; कविः = मुनिः; दर्शनोत्थः = दर्शनेन।
पद्यान्तरमत्र– 'केयं वने लक्ष्मण लक्ष्मणेति दीनाक्षरं रोदिति योषिदुच्चैः ।
आ ज्ञातमेषा जनकात्मजेति कविर्निवृत्त्यान्तिकमाजगाम ।।'
आ=आं; विवृत्य=विचिन्त्य; आगतोऽस्याः=आजगाम। ७१. विलापाद्=प्रलापाद्; दोहद=दौर्हृद अ.; लिङ्ग=लक्ष्य, लक्ष्म; दाश्वान्=दत्वा व.। ७२. जाने=वने; रस्थं= रस्थाम्। ७३. अविकत्थनेऽपि= अविकत्थमाने; कलुषप्र=कलुषात्म, प्रतिकूल। ७४. तवोरु=तवेन्दु व.; भय/वच्छेद/वोच्छेदकरः= भवोच्छेदगुरुः म.; पिता=गुरुः।

तपस्विसंसर्गविनीतसत्त्वे तपोवने वीतभया वसास्मिन् ।
इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते ।। ७५।।
अशून्यतीरां मुनिसन्निवेशैस्तमोऽपहन्त्रीं तमसां वगाह्य ।
तत्सैकतोत्सङ्गबलिक्रियाभिः संपत्स्यते ते मनसः प्रसादः ।। ७६।।
पुष्पं फलं चार्त्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो मुनिकन्यकास्त्वाम् ।। ७७।।
पयोघटैराश्रमबालवृक्षान् संवर्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक् तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम् ।। ७८।।
अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः ।
सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय ।। ७९।।

(७५) तुम इस आश्रम में निर्भीक होकर रहो, इसके सत्त्व तपस्विजनों के संसर्ग से विनीत हैं। यहाँ तुम्हे स्वस्थ और सुरक्षित प्रसव होगा और अपत्यसंस्कार–विधि भी पूर्ण होगीं। (७६) तुम्हारा यहाँ मन भी प्रसन्न रहेगा, यहाँ है तमसा। इसके तीर मुनियों के आवासों से अशून्य हैं, इसमें स्नान से तम (थकावट, ग्लानि, पाप) दूर हो जाते हैं। तुम इसके सैकत में बलि (पूजा) करती रहना। (७७) यहाँ हैं बातचीत में उदार मुनि कन्यकाएँ। वे तुम्हें ऋतुजन्य पुष्प और फल ला–लाकर देती रहेंगीं, बिना बोए उत्पन्न पूजोपयोगी बीज (जौ, चावल आदि) भी सुलभ कराती रहेंगीं। उनसे तुम्हारा विनोद होता रहेगा। (७८) आश्रम के बालवृक्षों को अपनी शक्ति के अनुरूप पयोघटों से सींच–सींच कर बढ़ाती रहोगी तुम और प्राप्त कर सकोगी पुत्रवात्सल्य पुत्रप्राप्ति के पहले ही। (७९) सीता ने वाल्मीकि के अनुग्रह का प्रत्यभिनन्दन किया। दयार्द्रचित्त वाल्मीकि सीता को लेकर सायंकाल आश्रम पहुँचे, तब तक मृग आकर वेदी के पास बैठ चुके थे। वहाँ के मुनिजन भी शान्त थे।

७६. **वगाह्य=विगाह्य** म.हे.; **प्रसादः=प्रमोदः, भिलाषः।** ७७. **बालेयम=कालेयद** व.म.हे.अ.; **रोहि=पच्यम्।** ७८. **घटै=धरैः** हे.; **स्वबलानुरूपै, सुतनिर्विशेषम्; प्रीतिमवा=प्रीतिमिवा, स्फीतिमिवा** हे.। ७९. **ग्रहप्र=ग्रहं प्र** हे.; **न्दिनीं=न्दितां; आदाय=आश्वास्य; शान्त=शान्ति** हे.; **मृगं=मुनिं, सुखम्** अ., **मुखम्** हे., **मुखीम्।**

तामर्पयामास स शोकदीनां तदागमप्रीतिषु तापसीषु ।
निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु ॥ ८० ॥
ता इङ्गुदीतैलकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः ।
तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ॥ ८१ ॥
तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा विधिनाऽतिथिभ्यः ।
वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासन्ततये बभार ॥ ८२ ॥
अपि प्रभुः सानुशयोऽधुना स्यादित्युत्सुकः शक्रजितोऽपि हन्ता ।
शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ॥ ८३ ॥
बभूव रामः सपदि प्रबाष्पस्तुषारवर्षीव सहस्रचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥ ८४ ॥

(८०) सीता के आगमन से आश्रम की तपस्विनियाँ प्रसन्न थीं। शोकदीन सीता को महर्षि वाल्मीकि ने उन्हीं तपस्विनियों को सौंप दिया, वैसे ही जैसे पितरों के द्वारा जिसका सार पी लिया गया ऐसी चन्द्रकला को दर्श (चतुर्द्दशी और अमावस्या का सन्धिकाल) औषधियों को सौंप देता है। (८१) तपस्विनियों ने उस (राजरानी सीता) के लिए एक उटज निश्चित कर दिया। इसके पहले उसकी पूजा की। उसमें दीपक इङ्गुदी के तैल का था तथा बिछौना पवित्र मृगचर्म का। (८२) सीता उस उटज में वन्य आहार से शरीर धारण करने लगी, वही पति की प्रजा के सन्तान (नैरन्तर्य) के लिए अनिवार्य जो था। वहाँ सीता की चर्या थी नियमित स्नान और अतिथियों की विधिवत् पूजा। (८३) उधर लक्ष्मण पहुँचे अयोध्या और सीता के विलाप तक ही घटना राम को सुना दी जैसा राम का आदेश था। लक्ष्मण के मन में उत्सुकता थी कि प्रभु राम पश्चात्ताप में पड़े होंगे। (८४) राम की आँखों से आँसू की धार लग गई। वे ऐसे लगे जैसे लगता है पौषमास का तुषारवर्षी चन्द्र। लोकापवाद के भय से उन्होंने सीता को घर से निकाला था, मन से नहीं।

८०. तामर्प=तामर्च, समर्प अ., स=च म.अ.; तदागम=समागम; सारां अन्त्यां कलां=साराः अन्त्याः कलाः। ८१. स्नेह=तैल; वितेरु = वितेनुः, विभेजुः। ८२. पूजा विधि=पूजाविधि हे.; पूजा विविधा, पूजाविबुधा म.अ.। ८३. अपि=अथ; धुना=यथा; इत्युत्सुकः=किमुत्सुकः म.हे.अ.; शक्र=शत्रु; ऽपि हन्ता =निहन्ता, भिहन्ता, ऽपि जेता; वितान्त=देवनान्त। ८४. सपदि=सहसा;, प्रबाष्पः=सबाष्पः म.अ.।

निगृह्य शोकं स्वयमेव धीमान् वर्णाश्रमावेक्षणजागरूकः ।
स भृत्यसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास ।। ८५।।
तस्यैकभार्या परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य ।
वक्षस्यसंघट्टसुखं वसन्ती रेजे सपत्नीरहितेव लक्ष्मीः ।। ८६।।

सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत् क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्त्तुः
सा दुर्वारव्यथमपि परित्यागदुःखं विसेहे ।। ८७।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ सीतापरित्यागो नाम
चतुर्दशः सर्गः ।। १४।।

(८५) राम ने अपना शोक स्वयं रोका और बुद्धिमत्ता के साथ वर्णाश्रम के अवेक्षण में जागरूक रहे आए। उन्होंने अपने समृद्ध राज्य का शासन, भोग में सभी भाइयों को समान और स्वयं के मन को रजोगुण से रिक्त रखते हुए किया। (८६) राम की एक ही थी पत्नी। वह भी साध्वी थी। उसे भी लोकपरिवाद के डर से छोड़ दिया। तब राम के वक्षःस्थल पर लक्ष्मी टकराव रहित और सुख से रहती दिखाई दी सपत्नीरहित सी। (८७) सीता को छोड़कर रावणारि राम ने अन्य स्त्री के साथ विवाह नहीं किया, उन्होंने यज्ञों में यजमान पत्नी के रूप में सीता की ही सुवर्णप्रतिमा को स्थान दिया। यह वृत्तान्त सुन–सुनकर सीता ने दुर्वारव्यथा वाले परित्याग के दुःख को किसी प्रकार सहा।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में सीतापरित्याग नामक
चतुर्दश सर्ग पूर्ण हुआ ।। १४।।

८५. धीमान्=धीरः; मावेक्षण=मान्वेषण; भोगम्=मेकम्; राज्यं=राजा । ८६. तस्यैक=तामेक व.हे.अ.; **भार्याम् = पत्नीम्** अ.; **संघट्ट = संबाध** व.म.हे.अ.; **रेजे = रेमे** व.हे.अ.; **रहितेव = सहितेव। ८७. सीतां हित्वा = हित्वा सीतां; कृति = निधि; आजहार = आजुहाव; यप्रापिणा = यव्यापिना, यं/ये प्रापिणा; रव्यथ= रं कथ; परि=पति।**

।। पञ्चदशः सर्गः।।

कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ।।१।।
लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः ।।२।।
अवेक्ष्य रामं ते तस्मिन् न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम् ।।३।।
प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् ।
धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः ।।४।।
ते रामाय वधोपायमाचख्युर्विबुधद्विषः ।
दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति ।।५।।
आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः ।
करिष्यन्निव नामास्य यथार्थमरिनिग्रहात् ।।६।।

(१) राम ने सीता का तो कर दिया परित्याग। अब समुद्रमेखला पृथिवी का ही वे भोग करते रहे। (२) किसी समय यमुना तट के मुनिजन शरण्य राम की शरण में पहुँचे। उनके यज्ञकार्य 'लवण' नामक काली करतूतों वाले राक्षस ने विलुप्त कर रखे थे। (३) मुनियों ने स्वयं अपने तेज से उस पर प्रहार नहीं किया, क्योंकि राम उनको उसके लिए प्राप्त थे। रक्षक न रहने पर ही शापास्त्र मुनिजन तप का व्यय करते हैं। (४) राम ने वचन दे दिया विघ्न की प्रतिक्रिया का उन्हें। धर्मसंरक्षण के लिए ही तो शार्ङ्गी भगवान् विष्णु भूमि पर आते हैं। (५) मुनियों ने लवण के वध का उपाय भी बतलाया – 'लवण पर तब प्रहार सफल होगा जब उसके पास शूल न हो। शूल के साथ वह दुर्जेय है।' (६) राम ने उन मुनियों के क्षेम के लिए शत्रुघ्न को आदेश दिया। कदाचित् उनकी इच्छा थी शत्रुघ्न के नाम को 'शत्रु–निग्रह' से सार्थक करने की।

१. त्यागः=त्यागी; पालः=नाथः; केवलाम्=केवलम्। २. अभ्ययुः=अभ्यगुः, अन्वयुः; णार्थिनः= णार्थिनम्। ३. प्रजह्रुः=प्रजघ्नुः। ४. रक्षणार्थैव=रक्षणायैव, रक्षणार्थाय; प्रवृत्तिः=विवृत्तिः, प्रस्थानम्। ५. चख्युः=चक्षुः; विबुध=भुवन; दुर्जयः=दुर्जेयः; र्थ्यतामिति=प्रार्थि।

यः कश्चन रघूणां हि परमेकः परन्तपः ।
अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः ॥७॥
अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी ।
ययौ वनस्थलीः पश्यन् पुष्पिताः सुरभीरभीः ॥८॥
रामादेशादनु गता सेना तस्याऽर्थसिद्धये ।
पश्चादध्ययनार्थस्य धातोरधिरिवाऽभवत् ॥९॥
आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर् बालखिल्यैरिवांशुमान् ॥१०॥
तस्य मार्गवशादेका बभूव वसतिः सतः ।
रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने ॥११॥
तमृषिः पूजयामास कुमारं क्लान्तवाहनम् ।
तपःप्रभावसिद्धाभिर् विशेषप्रतिपत्तिभिः ॥१२॥

(७) रघुवंश का कोई भी एक वीर शत्रु को पृथक् कर सकता है, उत्सर्ग को अपवाद के समान। (उत्सर्ग सामान्यशास्त्र, अपवाद विशेषशास्त्र। यथा 'अदेङ् गुणः' के लिए 'वृद्धिरादैच्'।) (८) अग्रज राम ने आशीर्वाद दिया और रथ पर आरूढ़ हो शत्रुघ्न चल पड़े। वे फूली और सुरभित वनस्थलियों को निर्भीक होकर देखते जा रहे थे। (९) उसकी सहायता में सेना भी चली, राम के आदेश से। वह उसके पीछे वैसे ही लगी जैसे अध्ययनार्थ 'इङ्' धातु में 'अधि' उपसर्ग लगता है। (धातु पहले, उपसर्ग बाद में, किन्तु उपसर्ग आगे और धातु पीछे। यही क्रम प्रस्तुत में।) (१०) प्रतापी शत्रुघ्न चल रहे थे और उन्हें मार्ग बतला रहे थे रथ के आगे स्थित मुनिजन, वैसे ही जैसे सूर्य भगवान् को मार्ग दिखलाते रहते हैं बालखिल्य ऋषि। (बालखिल्य भी सूर्य के रथ के आगे स्थित रहते हैं।) (११) मार्ग में पड़ा वाल्मीकि तपोवन। उसमें शत्रुघ्न ने एक पड़ाव डाला। शत्रुघ्न स्वभाव से सत्पुरुष थे। उनके रथ की ध्वनि से तपोवन के मृग उत्कण्ठ थे। (१२) ऋषि ने शत्रुघ्न की पूजा की। उनके घोड़े थक चुके थे। इसके लिए

७. व्यावर्त=निवर्त, विवर्त। ८. ततः = तदा। ९. दनु गता=दनुगता म.हे.अ.ना., अनुपदम्, अनुगतम्, अनुप्राप्तः व.; सेना तस्या=सेना तत्कार्य, सेनांशस्तस्य व., सेनाङ्गं तस्य, या सेना तस्य। १०. स गच्छँस्तपतां=स गच्छँस्तपसां, स गन्ता तपतां अ.ना., गच्छन् मतिमतां, स गच्छन् वदतां म.हे.; वरः=वरैः; प्रष्ठैः=प्रस्थैः; अंशुमान्=अर्यमा। ११. सतः=यतः हे.अ.; स्वनोत्कण्ठ=स्वनोत्कीर्ण व., स्वरोत्कर्ण। १२. कुमारं=शत्रुघ्नं; क्लान्त=श्रान्त अ.ना.; विशेष=विषय व.।

तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती ।
सुतावसूत संपन्ना कोषदण्डाविव क्षितिः ॥१३॥
सन्तानश्रवणाद् भ्रातुः सौमित्रिः सौमनस्यवान् ।
प्राञ्जलिर् मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ ॥१४॥
स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः ।
वनात् करमिवादाय सत्त्वराशिमुपस्थितः ॥१५॥
धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ।
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ॥१६॥ युग्मम्
अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।
रुरोध, साम्मुखीनो हि जयो रन्ध्रप्रहारिणाम् ॥१७॥
नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य वेतनम् ।
दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः ॥१८॥

विशेष व्यवस्था की गई तप के प्रभाव से उपस्थित विशिष्ट सामग्री की। (१३) उसी रात शत्रुघ्न की भौजाई ने, जो गर्भवती थी, दो पुत्रों को जन्म दिया जैसे संपन्न भूमि जन्म देती है कोष और दण्ड को। (१४) भाई के यहाँ सन्तान होने की बात सुनी तो शत्रुघ्न प्रसन्न हुए। हाथ जोड़कर मुनि से आज्ञा लेकर सबेरे घोड़े जोते और लक्ष्य की ओर बढ़ गए। (१५) शत्रुघ्न लवणासुर के नगर 'मधूपघ्न' पहुँचे और उसी समय कुम्भीनसी की कूँख से उत्पन्न लवण जंगल से कर के समान प्राणियों की राशि लेकर लौटा। (१६) धूम से धूमिल, चर्बी की दुर्गन्ध से सना, ज्वाला से धूसर केश वाला, और मांसभोजी (कौए, कुत्ते, राक्षस) प्राणियों से घिरा हुआ वह ऐसा लग रहा था जैसे जङ्गम चिताग्नि हो। (१७) उस समय उसके पास शूल नहीं था। लक्ष्मणानुज शत्रुघ्न ने उसी समय उसे रोक लिया। नीति भी कहती है कि रन्ध्रप्रहारी वीर के सामने हाजिर रहती है जीत। (१८) उस राक्षस ने पहले तो ललकारते हुए कहा — 'मेरी कुक्षि के लिए आज पर्याप्त वेतन नहीं था, यह देखकर विधाता ने डरकर, भाग्य से तुझे भेज दिया है'।

१३. संपन्ना=संपन्नौ म.अ.ना.। **१५. इवा=उपा**। **१६. गन्धी= गन्धिः**। द्र.रघु १३.२० **गण=पक्षि** हे.। **१७. तमासाद्य= समासाद्य/ध्य; लवणम्=राक्षसम्; संमुखीनो=साम्मुखीनो** हे., **सांयुगीनो** म.अ.ना.। **१८. नाति=नाभि; मालक्ष्य= मालोच्य/क्य; वेतनम्=भोजनम्। १९. संतर्ज्य=सन्त्यज्य; स्तम्ब=स्तम्भ;** युग्मम्।

इति सन्तर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया ।
प्रांशुमुत्पाटयामास मुस्तास्तम्बमिव द्रुमम् ।। १९ ।।
सौमित्रेर् निशितैर्बाणैरन्तरा शकलीकृतः ।
गात्रं पुष्परजः प्राप न शाखी नैर्ऋतेरितः ।। २० ।।
निशानं स्वस्य शूलस्य रक्षस्तस्मै महोपलम् ।
प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ।। २१ ।।
ऐन्द्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः ।
सिकताभ्योऽपि हि परां प्रपेदे परमाणुताम् ।। २२ ।।
तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः ।
एकताल इवोत्पातपवनप्रेरितो गिरिः ।। २३ ।।
कार्ष्णेन पत्रिणा शत्रोः स भिन्नहृदयः पतन् ।
आनिनाय भुवः कम्पं जहाराऽऽश्रमवासिनाम् ।। २४ ।।

(१९) इस प्रकार तर्जना करके शत्रुघ्न को मारने की इच्छा से राक्षस ने एक विशाल पेड़ उखाड़ा, उतनी ही सरलता से जितनी सरलता से मोथा उखाड़ लिया जाता है। **(२०)** राक्षस ने वृक्ष शत्रुघ्न पर फेंका। शत्रुघ्न ने तीक्ष्ण बाणों से बीच में ही उस वृक्ष को टुकड़े टुकड़े कर दिया। फलतः शत्रुघ्न के पास वृक्ष के पुष्पों का पराग ही पहुँचा वृक्ष नहीं। **(२१)** लवण ने अब एक विशाल पत्थर फेंका, जिसको वह अपने बाणों का शाण बनाया करता था। वह पत्थर ऐसा लग रहा था जैसे यमराज की मुट्ठी हो, हाथ से अलग हुई। **(२२)** शत्रुघ्न ने ऐन्द्र अस्त्र चलाया तो उसकी चोट से वह पत्थर बालू से भी छोटे लगभग परमाणु बन गया। **(२३)** अब निशाचर लवण दाहिना हाथ उठाकर दौड़ा। वह ऐसा लग रहा था जैसे उत्पात पवन से खिसका एक ताल से युक्त कोई पहाड़ हो। **(२४)** शत्रुघ्न ने उस पर चलाया कार्ष्ण (कृष्ण यानी विष्णु से संबन्धित वैष्णव) अस्त्र। उससे उसका हृदय भिद गया और वह गिरा तो भूमि को हिला डाला, परन्तु आश्रमवासियों का कम्प हटा दिया।

२०. **सौमित्रेर् नि=स सौमित्रेः** म.हे.अ.ना.; **कृतः = कृताम्**। २१. **निशानम्=विनाशात्** म.हे.अ.ना.; **स्वस्य=तस्य; शूलस्य=वृक्षस्य** म.; **तस्मै=तं च** व.। २२. **शत्रुघ्नेन स=स शत्रुघ्नेन; सिकताभ्योऽपि हि=सिकतात्वादपि** व.म.हे.अ.ना., **सिकताया अपि, सिकतार्धादपि; पि पराम्=प्यपरमां, पि परमाम्**। २३. **पूर्वार्धे** पाठान्तराणि:**'दक्षिणं दोषमुद्यम्य राक्षसस्तमुपाद्रवत्, तमु/मपाद्रवदुद्यम्य राक्षसो दक्षिणं करम्, दक्षिणं दोषमुद्धृत्य लवणस्तमुपाद्रवत्'** व.। २४. **शत्रोः = शत्रुः** म.अ.ना.; **राश्रम=र वन** हे.।

वयसां पङ्क्तयः पेतुर्हतस्योपरि रक्षसः ।
तत्प्रतिद्वन्द्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः ।। २५।।
स हत्वा लवणं वीरस्तदा मेने महौजसः ।
भ्रातुः सोदर्यमात्मानमिन्द्रजिद्वधशोभिनः ।। २६।।
तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः ।
शुशुभे विक्रमोदग्रं व्रीडयाऽवनतं शिरः ।। २७।।
उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः ।
निर्ममे निर्ममोऽर्थेषु मधुरां मधुराकृतिः ।। २८।।
या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता ।। २९।।
तत्र सौधगतः पश्यन् यमुनां चक्रवाकिनीम् ।
हेमभक्तिमतीं भूमेः स वेणीमिव पिप्रिये ।। ३०।।

(२५) उस मरे राक्षस पर पक्षियों की पङ्क्तियाँ टूटीं और उसके प्रतिद्वन्द्वी शत्रुघ्न के सिर पर दिव्य कुसुमवृष्टियाँ। (२६) वीर शत्रुघ्न ने इस राक्षस को मार लेने पर स्वयं को इन्द्रजित् के हन्ता महान् ओजस्वी लक्ष्मण का सगा भाई माना। (२७) तपस्वियों का प्रयोजन पूरा हुआ। उन्होंने तदर्थ स्तुति की तो शत्रुघ्न का विक्रम से उन्नत सिर लज्जा से अवनत हो शोभा पा रहा था। (२८) शत्रुघ्न ने यमुना के तट पर 'मधुरा'– नामक पुरी बसाई। मधुर आकृति के और पौरुष को भूषण बनाए शत्रुघ्न ने पुरी के बसाने में पैसा नहीं देखा। (२९) उस नगरी में सौराज्य का प्रकाश और उससे प्रकाशित पुरवासियों की विभूतियाँ। ऐसा लगता था कि स्वर्ग की जनता को बुलाकर बसाई गई थी वह। (३०) शत्रुघ्न मधुरापुरी में बने सौध (सुधाधवल अटारी) पर बैठकर छवि निहारते यमुना की, उसमें भरे हुए दिखाई देते चक्रवाक दम्पती के सुनहले जोड़े। बड़ी ही प्रीति का अनुभव करते वे। उन्हें लगता कि भूमिरूपी पुरन्ध्री की चोटी में सोने का सिंगार कर दिया गया है।

२५. **रक्षसः=विद्विषः** म.अ.ना.। २६. **वीरः=वीरम्; महौजसः=महौजसम्, महामनाः, महात्मनः; सोदर्यम्=सोदरम्** हे., **सौदर्यम्** म.अ.ना.। २८. **पुरीं=पुरम्** व.हे.; **मधुरां=मथुरां** म.। २९. **या=सा; विभूतिभिः= समृद्धिभिः; ष्यन्द=ष्पन्द, स्यन्द; स्वर्गाभिष्यन्दवमनं कृत्वा=स्वर्गसारोच्चयं यत्नात्; वोपनिवेशिताव विनिवेशिता** व.म.हे.अ.ना.। ३०. **यमुनाम्=कालिन्दीम्** म.हे.अ.ना.; **हेम=हैम; भक्तिमतीम्=भक्तिमयीम्** व.हे., **भक्तिवतीम्, पङ्क्तिमतीम् पङ्क्तिमयीम्; स वेणी=सुवेणी** व.हे., **प्रवेणी** म.अ.ना.

सखा दशरथस्यापि जनकस्य च मन्त्रकृत् ।
संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधि ।। ३१ ।।
स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ।
कविः कुशलवावेव चकार किल नामतः ।। ३२ ।।
साङ्गं च वेदमध्याप्य किञ्चिदुत्क्रान्तशैशवौ ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम् ।। ३३ ।।
रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ।। ३४ ।।
इतरेऽपि रघोर् वंश्यास् त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ।। ३५ ।।
शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते ।
मधुराविदिशे सून्वोर् निदधे पूर्व्वजोत्सुकः ।। ३६ ।।

(३१) उधर वाल्मीकि जी ने मैथिली के दोनों बालकों के संस्कार दशरथ और जनक की प्रीति के अनुरूप विधिविधान से संपन्न किए। वे इन दोनों के ही सखा जो थे। **(३२)** वाल्मीकि जी ने उन बालकों को नाम दिए 'कुश' और 'लव'। कारण कि कुशलवों से ही हटाया गया था उनके गर्भ का विकार। **(३३)** उन्हें साङ्ग वेद पढ़ाया।। तब तक वे कुछ बड़े हो गए। तब उन्हें अपनी कृति का संगीतमय अभ्यास कराया। उनकी कृति (रामायण) थी कविप्रथमपद्धति। **(३४)** राम की अतीव मधुर कथा को माता के सामने वे दोनों शिशु गा—गाकर सुनावें तो उनकी वियोगव्यथा कुछ शिथिल हो जाती थी। **(३५)** रघुवंश के तीनों अग्नि से तेजस्वी अन्य कर्णधार (भरत, लक्ष्मण तथा शत्रुघ्न) के यहाँ भी राम के सहयोग से पतिव्रता पत्नियों से दो—दो पुत्र हुए। **(३६)** शत्रुघ्न स्वयं तो थे पूर्वज (राम) के लिए उत्सुक, अतः उन्होंने मधुरा और विदिशा का शासन 'शत्रुघाती' और 'सुबाहु' नामक दोनों पुत्रों को सम्हला दिया।

३१. अपि=अथ व.हे.; **च=स; मन्त्रकृत्=मन्त्रवित्; उभयप्रीत्या=उभयप्रीत्यै** हे.। **३२. स तौ=सुतौ** व.; **न्मृष्ट=द्धृष्ट। ३३. कविप्रथम=कविः प्रथम** व.। **३४. मधुरं वृत्तं गायन्तौ = वृत्तं गायन्तौ मधुरं। ३५. तद्योगात् = संयोगात्** म.हे.अ.ना.। रामकृतमनुध्यानमत्र योग इति विवक्षायां तद्योगादिति न विरुद्धमतिकृत्त्वम्। **३६. मधुरा=मथुरा** अ.ना.; **निदधे=निदधात्, निदधत्**। उभयत्र 'न्य' इत्यडागमस्य विस्मरणम्।

भूयस्तपोव्ययो मा भूद् वाल्मीकेरिति सोऽत्यगात् ।
मैथिलीतनयोद्गीत—निःस्पन्द—मृगमाश्रमम् ।। ३७।।
वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीम् ।
लवणस्य वधात् पौरैरधिगौरवमीक्षितः ।। ३८।।
स ददर्श सभामध्ये सभासद्भिरुपस्थितम् ।
रामं सीतापरित्यागादसामान्यपतिं भुवः ।। ३९।।
तमभ्यनन्दत् प्रणतं लवणान्तकमग्रजः ।
कालनेमिवधात् प्रीतस्तुषाराडिव शार्ङ्गिणम् ।। ४०।।
स पृष्टः सर्व्वतो वार्त्तमाख्यद् राज्ञे न सन्ततिम् ।
प्रख्यापयिष्यतः काले कवेराद्यस्य शासनात् ।। ४१।।
अथ कश्चिन्मृतं विप्रः पुत्रमप्राप्तयौवनम् ।
अवतार्याङ्कशय्यायां द्वारि चक्रन्द भूपतेः ।। ४२।।

(३७) वाल्मीकि जी के तप का और अधिक व्यय न हो यह सोचकर शत्रुघ्न महर्षि के आश्रम से चल दिए। उसके मृग मैथिली के बालकों के गीत से स्तब्ध दिखाई दे रहे थे। (३८) वशी शत्रुघ्न अयोध्या पहुँचे। उनके लिए सड़कों का संस्कार कर दिया गया था। उससे उसकी शोभा बढ़ी हुई थी। पुरवासी उन्हें लवण के वध के कारण और अधिक गौरव के साथ देख रहे थे। (३९) वहाँ उन्होंने दर्शन किए राम के। वे सभा में सभासदों के साथ उपस्थित थे। सीता को छोड़कर वे अकेली पृथिवी के असामान्य पति थे। (४०) बड़े भाई राम ने लवण का अन्त करके आए उस (शत्रुघ्न नामक अनुज) का अभिनन्दन किया, उसी प्रकार जिस प्रकार प्रसन्न इन्द्र ने किया था अभिनन्दन विष्णु का जब उन्होंने कालनेमि का वध किया था। (४१) राजा राम ने पूछा तो शत्रुघ्न ने प्रत्येक क्षेत्र में कुशल मंगल की सूचना दी, केवल नहीं दी सूचना तो सन्तति की। इस कारण कि महर्षि वाल्मीकि की वैसी ही आज्ञा थी। वे उचित अवसर पर उसकी घोषणा करना चाहते थे। (४२) इसके अनन्तर कोई ब्राह्मण अपना यौवन के पहले ही मरा पुत्र लेकर राम के दरवाजे पहुँचा। पुत्र को गोद में रखकर लगा करने क्रन्दन।

३७. गीत= गीति; माश्रमम्=मास्पदम्। ३८. वशी=कृती, बली, ततो अ.ना.; **अधि/ति/ इति—गौरवमीक्षितः, वीक्षितोऽत्यन्तगौरवम्** म.। **३९. उपस्थितम्=उपस्थितः, उपास्थित। ४०. प्रणतम्=प्रथमम्; वधात् प्रीतः=वधप्रीतः। ४१. वार्त्तम्=वार्त्ताम्** व.; **आख्यत्=आख्यात्, आचख्यौ** अ.ना.; **प्रख्याप=आख्याप** व.हे.अ.ना.; **यिष्यतः = यिक्षत। ४२. कश्चिन्मृतं=जानपदः** म.हे.अ.ना.; **पुत्रं=शिशुम्**

शोचनीयासि वसुधे! या त्वं दशरथाच्च्युता ।
रामहस्तमनुप्राप्ता कष्टात् कष्टतरं गता ।। ४३ ।।
श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः ।
न ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत् ।। ४४ ।।
स मुहूर्त्तं क्षमस्वेति द्विजमाश्वास्य दुःखितम् ।
यानं सस्मार कौबेरं वैवस्वतजिगीषया ।। ४५ ।।
आत्तशस्त्रस्तदध्यास्य प्रस्थितश्च रघूद्वहः ।
उच्चचार पुरश्चास्य गूढरूपा सरस्वती ।। ४६ ।।
राजन्! प्रजासु ते कश्चिदपचारः प्रवर्त्तते ।
तमन्विष्य प्रशमयेर्भवितासि ततः कृती ।। ४७ ।।
इत्याप्तवचनाद् रामो विचेष्यन् वर्णविक्रियाम् ।
दिशः पपात पत्रेण वेगनिष्कम्पकेतुना ।। ४८ ।।

(४३) 'हे वसुधे! तू बड़ी ही शोचनीय है जो दशरथ से गिरी और राम के हाथ में आकर और अधिक कष्टपूर्ण हो उठी।' (४४) राम ने उसके शोक का हेतु सुना और लज्जित हुए। रक्षा का अधिकार उनका जो था। इक्ष्वाकुओं के राज्य में अकाल मृत्यु ने कभी पैर नहीं रखा। (४५) राम ने अनुरोध किया कि एक क्षण शान्त रहें और उन्होंने कुबेर के यान पुष्पक का स्मरण किया। उन्होंने यम को जीतने का संकल्प किया। (४६) राम ने शस्त्र लेकर उससे प्रस्थान किया कि उनके सामने गूढरूपा सरस्वती सुनाई दी। (४७) 'राजन्! तुम्हारी प्रजा में कोई अपचार हो रहा है। उसे खोजो और उसकी शान्ति करो तो तुम सफल हो सकोगे।' (४८) यह था आप्तवचन। इसके अनुसार राम ने वर्णधर्म में आ रहे दोष को खोजना चाहा और तदर्थ वे उसी पुष्पक से दिशाओं में घूमें। वेग से उसका केतु निष्कम्प दिखाई दे रहा था।

म.अ.; शय्यायां हे.=शय्यायाः, शय्यास्थम् म.अ.ना.; द्वारि=प्रेतम्। ४३. थाच्च्युता=थादनु, थोद्धता म.हे.अ.ना.; हस्तम्=भद्रम्; प्राप्ता=प्राप्य; कष्टतरं=कष्टत्वमा। ४४. शुचो=वचः; गोप्ता=ज्ञात्वा; पद=कुल। ४५. क्षम=सह, जिगीष=जिघांस। ४६. प्रस्थितश्च=प्रस्थितः स म., प्रस्थितस्तु, प्रस्थिते च अ.ना., रघूद्वहः=रघूत्तमः, पुरश्चास्य= पुरस्तस्य म.। ४७. अप=अभि म.हे.अ.ना., व्यभि, अन्विष्य=अन्विष्यन्, ततः कृती=कृती ततः। ४८. आप्त=आत्म, विचेष्यन् हे.अ.ना.= विमृश्यन्।

अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम् ।
ददर्श कञ्चिदैक्ष्वाकस्तपस्यन्तमधोमुखम् ।।४९।।
पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः ।
आत्मानं शम्बुकं नाम शूद्रं सुरपदार्थिनम् ।।५०।।
तपस्यनधिकारित्वात् प्रजानां तमघावहम् ।
शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रमाददे ।।५१।।
स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतश्मश्रु कण्ठनालादपाहरत् ।।५२।।
कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम् ।
तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना ।।५३।।
रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ।।५४।।

(४९) उन्होंने देखा कि एक व्यक्ति वृक्ष की शाखा पर अधोमुख लटका है, धूम से उसकी आँखे लाल हो गई हैं, वह तप करने में निरत है। (५०) राजा ने उससे नाम–गोत्र पूछे तो उस धूमपायी ने स्वयं का नाम बतलाया 'शम्बूक' और स्वयं को शूद्र बतलाते हुए तप का प्रयोजन बतलाया स्वर्ग की प्राप्ति। (५१) उसे तप का अधिकार नहीं था, अतः उसके तप से प्रजा पर विपत्ति आई थी। उसे राम ने शीर्षच्छेद दण्ड का पात्र माना और तदर्थ शस्त्र उठाया। (५२) उन्होंने उसका सिर गरदन से उसी प्रकार सरलता के साथ अलग कर दिया जिस प्रकार ओस से गली पँखुड़ियों वाले कमल को नाल से अलग किया जा सकता है। उसके चेहरे पर जो दाढ़ी थी वह भी अग्निकणों से अधजली थी ही। (५३) स्वयं राजा से दण्ड पाकर वह शूद्र, सत्पुरुषों की गति पा गया, जो उसे दुश्चर तप से भी न मिलती, क्योंकि तप उसके लिए निर्धारित मार्ग का लंघन था। (५४) बीच में प्रकट हो गए महर्षि अगस्त्य। राम उन महान् ओजस्वी महर्षि से मिले जैसे शरत्काल चन्द्रमा से मिलता है।

४९. धूमाभि=धूमाति, धूमाभि, वलम्बि=विलम्बि; ऐक्ष्वाकः= ऐक्ष्वाकिः, ऐक्ष्वाकुः व., इक्ष्वाकुः, काकुत्स्थः। ५०. 'पृष्टानामन्वयो राज्ञा स किलाचष्ट'=नामकर्मान्वयान् पृष्टः स राज्ञाचष्ट', धूमपः=शम्बुकः, भूमिपम्, शम्बुकं नाम=शम्बुनामानम्। ५१. शीर्ष=शीघ्र, परि=पति/च्छिद्य=च्छेद्य, ज्ञाय, मत्वा। ५२. अपाहरत्=अपातयत्। ५३. सताम्=स तां हे.; स्वमार्ग=स्वर्गमार्ग, मार्गातिल। ५४. रघुनाथः=रघूद्वहः; मार्ग=मार्गो हे.; संयुयुजे=संससृजे; वेन्दुना=वामलः अ.ना.।

कुम्भयोनिरलङ्कारं तस्मै दिव्यपरिग्रहम् ।
ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ।।५५।।
तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना ।
पश्चान्निववृते रामः प्राक् परासुर्द्विजात्मजः ।।५६।।
तस्य पूर्व्वोदितां निन्दां द्विजः पुत्रसमागतः ।
स्तुत्या निवर्त्तयामास त्रातुर्वैवस्वतादपि ।।५७।।
तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः ।
मेघाः सस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ।।५८।।
दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः ।
न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि ।।५९।।
उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ ।
अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ।।६०।।

(५५) कुम्भयोनि महर्षि अगस्त्य ने राम को भेंट किया वह अलंकार जो दिव्य था और समुद्र ने उन्हें भेंट किया था। समुद्र पी लिया गया था, वह मानो उसकी एवज में दिया गया हरजाना था। (५६) यह अलंकार अंगद था। राम ने उसे बाहु में धारण किया जो बाहु अब मैथिली के कण्ठ से रहित था। राम बाद में लौटे, मृत ब्राह्मणपुत्र पहले ही जीवित हो गया। (५७) पुत्र पाकर, ब्राह्मण ने राम की जो निन्दा की थी उसे स्तुति से लौटा लिया। राम ने तो रक्षाकर दी मृत्यु से भी। (५८) राम ने यज्ञ के लिए अश्व छोड़ा तो राक्षसों, कपियों और राजा लोगों ने उन पर उपहारों की वर्षा कर दी, फसल पर जैसे मेघ करते हैं जलवर्षा। (५९) निमन्त्रित महर्षिगण दिग्दिगन्तरालों से वहाँ जा पहुँचे। वे केवल भूमिलोक के ही नहीं थे, दिव्य ज्योतिर्मय स्थानों के भी थे। (६०) अयोध्या के आस–पास ठहर गए वे सब। चार दरवाजे की अयोध्या उस समय ऐसी लग रही थी जैसे वह चार मुख वाले ब्रह्मा की काया हो जिसने अभी–अभी की हो लोकों की सृष्टि।

५५. पीतेन=भीतेन म.हे.अ.ना.। ५६. दधत्=दध्यात्; पश्चान्निववृते रामः = रामो निववृते पश्चात् म.हे.अ.ना.; प्राक् परासुः = प्राप चायुः ; जात्मजः = जन्मनः। ५७. र्वोदितां=र्वकृतां अ.ना.; पुत्रसमागतः= पुत्रसमागतेः पुत्रसमन्वितः, पुत्रेण सङ्गतः; मास=श्चक्रे। ५९. अभि=उप; ज्योतिर्मयान्यपि= ज्योतिष्पथादपि; न्यपि=ण्यपि। ६०. मुखी=वती।

श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः ।
अनन्यजानेः सैवासीद् यस्माज्जाया हिरण्मयी ।। ६१ ।।
विधेरधिकसम्भारस्ततः प्रववृते मखः ।
आसन् यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ।। ६२ ।।
अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ।। ६३ ।।
वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वरौ ।
किं तद् येन मनो हर्त्तुमलं स्यातां न शृण्वताम् ।। ६४ ।।
रूपे गीते च माधुर्यं तयोस्तज्ज्ञनिवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ।। ६५ ।।
तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ।। ६६ ।।

(६१) वैदेही के पति के द्वारा किया गया वैदेही का त्याग भी गौरवपूर्ण और श्लाघ्य था क्योंकि यज्ञशाला में वह वैदेही ही दाहिने दिखाई दी सुवर्ण की प्रतिमा के रूप में जाया के स्थान पर प्रतिष्ठित, राम की अन्य कोई जाया तो थी नहीं। **(६२)** अब हुआ भारी विधिविधान के साथ आरम्भ मख (यज्ञ) जिसमें यज्ञक्रिया के विघ्न राक्षस ही थे रक्षक। **(६३)** उधर गुरु (वाल्मीकि) की आज्ञा से सीता के पुत्र कुश—लव वाल्मीकि की प्रतिभा में स्फुरित रामायण का गान जहाँ तहाँ करते रहे। **(६४)** वृत्त राम का, कृति वाल्मीकि की और प्रस्तुति उन किन्नरकण्ठ बालकों की। क्या बचा कि वे दोनों श्रोताओं का मन न हर सकें?। **(६५)** दोनों बालकों का माधुर्य रूप में भी और गीत में भी। विशेषज्ञों द्वारा राम को सूचित किया गया तो राम ने भी अनुजों के साथ देखा भी और कुतूहल के साथ उसे सुना भी। **(६६)** उनके उस गीत के श्रवण में एकाग्र सभी की आँखों में आँसू थे। ऐसा लग रहा था कि प्रात:काल की हिमनिष्यन्द वाली निर्वात वनस्थली हो।

६१. वासिनः=जन्मनः; सैवासीद् यस्माज्जाया=यस्यासीत् सैव जाया, आसीद् यत् सैव जाया। ६२. ततः=तत्र; यत्र=तत्र; विघ्नाः=रम्भे। ६३. कुशलवौ=कलगिरौ, कलगिरैः; चोदितौ=णोदितौ, नोदितौ। ६४. स्वरौ=स्वनौ। ६५. माधुर्य=सौन्दर्य; तज्ज्ञ=तज्ज्ञैः; निवेदितम्=निवेदितः। ६६. काग्रा=काव्या/काम्यात्; अश्रु=आस्त्र; निर्वाता=निवाता।

वयोवेषविसंवादि रामस्य च तयोश्च सा ।
जनता प्रेक्ष्य सादृश्यं वीक्षापन्ना व्यतिष्ठत ।। ६७।।
उभयोर्न यथा लोकः प्रावीण्येन विसिष्मिये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ।। ६८।।
गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ।। ६९।।
अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ।। ७०।।
स तावाख्याय रामस्य मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम् ।। ७१।।

(६७) जनता की हालत यह थी कि दोनों बालकों में राम का सादृश्य देखकर वह देखती ही जा रही थी। केवल नहीं मिलते थे तो वय और वेष। (६८) उन दोनों की प्रवीणता से लोग उतने विस्मित नहीं थे जितने राजा के प्रीतिदान से। उसमें राजा ने कुछ बचा नहीं रखा था। (६९) राजा राम ने स्वयं पूछा 'गीति में आपके गुरु कौन हैं और यह कृति किस कवि की है?' तो बालकों ने दोनों के उत्तर में 'वाल्मीकि' कहा। (७०) अब राम अनुजों के साथ वाल्मीकि जी के पास पहुँचे और अपने शरीर को रखकर राज्य उन्हें निवेदित कर दिया। (७१) वाल्मीकि ने (क्या किया सोचिए और ठहरिए फिर कालिदास का उत्तर देखिए) राम को बतलाया कि ये दोनों बालक तुम्हारें पुत्र हैं इनकी माता है मैथिली सीता। और कारुणिक कवि ने माँगा सीता का संपरिग्रह।

६७. रामस्य च तयोश्च सा=रामस्य च तयोस्तदा व.म.हे.अ.; प्रेक्ष्य=वेक्ष्य; वीक्षापन्ना=व्रीडापन्ना, व्यक्षिकम्पं, नाक्षिकम्पं म.हे., निर्निमेषा/षं, विस्मयेन। ६८. दानेषु=दायेषु, दानेन व.म.हे.अ.ना.। ६९. को नु=केन व.म.हे.अ.ना., कोऽत्र; विनेता= विनीतौ हे.अ.ना., विनीतिः, विनीतं; कृतिः कवेः=कवेः कृतिः व.हे.; तौ वाल्मीकिमशंसताम्=वाल्मीकिं तावशंसताम्।

अत्र पद्यान्तरम्– एतदाकर्ण्य कर्णाभ्यां रामो राजीवलोचनः ।
समं हर्षविषादाभ्यां युयुजे नीतिकोविदः ।।

अत्रापि पाठान्तरम्– एतदा=तदा; कर्णाभ्यां=वचस्तस्य; युक्तस्तं प्रोक्तवान् मुनिम्। ७०. ऊरी=दूरी व.हे.अ.ना.; आत्मानमुररीकृत्य; अस्मै=तस्मै। ७१. स ता=सुता; रामस्य=रामाय म.हे.; तदात्मजौ=त्वदात्मजौ, संपरि=तं परि, च परि, च परिग्रहः, परिसंग्र।

तात! शुद्धा समक्षं नः सुता ते जातवेदसि ।
दौरात्म्याद् रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ।। ७२ ।।
ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ।। ७३ ।।
इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ।। ७४ ।।
अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः ।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ।। ७५ ।।
स्वरसंस्कारवत्याऽथ पुत्राभ्यां सह सीतया ।
ऋचेवोदर्चिषं वह्निं रामं मुनिरुपस्थितः ।। ७६ ।।
काषायपरिवीतेन स्वपदार्पितचक्षुषा ।
अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ।। ७७ ।।

(७२) (राम की विवशता स्वयं राम ने व्यक्त की और कहा) 'तात! आपकी स्नुषा (सीता) सबके समक्ष अग्नि में शुद्ध सिद्ध हुई थी, किन्तु राक्षस के दौरात्म्य को देखकर उसे यहाँ की प्रजा ने विश्वसनीय नहीं माना। (७३) यहाँ के ये सबलोग उपस्थित हैं। इन्हें सीता अपने चरित्र पर आश्वस्त कर दे तो आपकी आज्ञा मानकर उसे और उसके पुत्रों को स्वीकार करने में मुझे कोई आपत्ति नहीं है।' (७४) राजा राम ने इस प्रकार की प्रतिज्ञा की तो महर्षि वाल्मीकि ने शिष्यों को आश्रम भेजा और उनसे सीता को बुलवाया, नियमों से स्वसिद्धि की नाईं। (७५) दूसरे दिन राम ने सभी पुरवासियों को इकट्ठा किया और कवि का आवाहन किया प्रस्तुत कार्य करने के लिए। (७६) मुनि ने उपस्थान किया राम का पुत्रों सहित सीता के द्वारा, वैसे ही जैसे ऋचा के द्वारा प्रज्वलित वह्नि का उपस्थान किया जाता है। ऋचा जैसे स्वर और संस्कार से शुद्ध वैसे सीता थीं युक्त पुत्रों से। (७७) सीता की शुद्धि का अनुमान उसके शरीर से ही हो रहा था, वे काषाय वर्ण का वस्त्रधारण किए थीं और उनकी आँखे थीं अपने पैरों पर।

७२. नः = मे। ७३. ताः=सा; प्रत्याययतु=प्रत्यापयतु; त्वदा=तवा। ७४. आनायया=आह्वायया। ७५. सन्निपात्य=संनिधात्य, सन्निमन्त्य। ७६. अथ=ऽसौ म., इव च व.अ.ना.; सह सीतया=अथ सीतया म., सह सा तथा व.हे.अ.ना.; वह्निम्= सूर्य्यम् व.म.हे.अ.ना.; उपस्थितः=उपास्थित। ७७. पदा=पादा, पाद्या; अन्वमीयत=समपद्यत; शान्तेन=शान्तेति।

जनास्तदालोकपथात् प्रतिसंहृतचक्षुषः ।
तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः ।। ७८ ।।
तां दृष्टिविषये भर्त्तुर्मुनिरास्थितविष्टरः ।
कुरु निःसंशयं वत्से! स्ववृत्ते लोकमित्यशात् ।। ७९ ।।
अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः ।
आचम्योदीरयामास सीता सत्यां सरस्वतीम् ।। ८० ।।
वाङ्मनःकर्म्मजं पत्यौ व्यभिचारो यथा न मे ।
तथा विश्वम्भरे! देवि! मामन्तर्धातुमर्हसि ।। ८१ ।।
एवमुक्ते तया साध्वा रन्ध्रात् सद्योभवाद् भुवः ।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ।। ८२ ।।
तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी ।
समुद्ररसना साक्षात् प्रादुरासीद् वसुन्धरा ।। ८३ ।।

(७८) जनता की स्थिति यह थी कि उसने सीता पर से दृष्टि हटा ली थी और मुँह झुका लिया था। वह ऐसी लग रही थी जैसी पकी बाल वाली धान लगती है। (७९) राम के सामने आसन पर स्थित मुनि वाल्मीकि ने सीता से कहा 'वत्से! लोक को अपने चरित्र पर संदेहमुक्त कर'। (८०) इसके बाद वाल्मीकि जी के शिष्य के द्वारा लाकर दिए पवित्र जल से आचमन कर सीता ने सत्य सरस्वती का उच्चारण किया। (८१) 'माता विश्वम्भरे! मुझे अपने भीतर अन्तर्हित कर ले यदि मैं अपने पति से 'वाणी, मन और कर्म' — से हटी न होऊँ तो।' (८२) साध्वी सीता के ऐसा कहते ही तत्काल भूमि में दरार पड़ी और उससे बिजली जैसा प्रभामण्डल प्रकट हुआ। (८३) उस दरार से प्रकट हुई आँसू लिए साक्षात् पृथिवी, समुद्र उनकी करधनी थी और सिंहासन पर विराजमान थीं, जो नागफणा पर रखा हुआ था।

७८. ते=तु; अवाङ्मुखा=ऽधोमुखाः, उर्व्वीमुखाः व.; सर्व्वे=सद्य; शालयः = सालयः। ७९. ये भर्तुः= ये हेतुर्भर्तुः; स्ववृत्ते=स्वे वृत्ते; इत्यशात्=अन्वशात्। ८१. यथा न मे=न मे यथा; रे देवि=रे मातः, रा देवी म.हे.अ.ना.। ८२. रन्ध्रात् सद्योभवात्=रन्ध्र सद्योऽभवत् म.हे.अ.ना.; भुवः = ततः; शात=शान्त; ज्योतिः = जातिः, द्योतिः। ८३. क्षिप्त=क्षिप्ता; निषेदुषी=निषादिनी व.; रसना=वसना व.हे.अ.ना.; सास्रा=साक्षात्, देवी। सास्रेति युक्तम्।

सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् ।
मा मेति व्याहरत्येव तस्मिन् पातालमभ्यगात् ।। ८४।।
धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिण: ।
गुरुर्विधिबलापेक्षी शमयामास धन्विन: ।। ८५।।
ऋषीन् विसृज्य यज्ञान्ते सुहृदश्रुपुरस्कृतान् ।
राम: सीतागतं स्नेहं निदधे तदपत्ययो: ।। ८६।।
युधाजितश्च संदेशात् स देशं सिन्धुनामकम् ।
ददौ दत्तप्रभावाय भरताय भृतप्रज: ।। ८७।।
भरतस्तत्र गन्धर्व्वान् युधि निर्जित्य केवलम् ।
आतोद्यं ग्राहयामास समत्याजयदायुधम् ।। ८८।।
स तक्षपुष्करौ पुत्रौ राजधान्योस्तदाख्ययो: ।
अभिषेच्याभिषेकार्हौ रामान्तिकमगात् पुन: ।। ८९।।

(८४) पृथिवी माता ने पुत्री सीता को गोद में बिठाया और पाताल चली गई। सीता के नेत्र थे राम के चरणों पर और राम कह-रहे थे 'नहीं, नहीं'। (८५) राम को पृथिवी पर क्रोध आया और चाहा कि सीता लौटा दी जाए। उनके हाथ में धनुष था। परन्तु गुरु (वसिष्ठ) ने उन्हें शान्त कर दिया यह कहकर कि विधाता की इच्छा का कोई प्रतिविधान है ही नहीं। (८६) यज्ञ पूरा हुआ। राम ने सुहृदों के आँसुओं से पुरस्कृत ऋषियों को विदा किया और सीता का स्नेह निहित कर दिया उसके पुत्रों पर। (८७) राम ने प्रजा का भरण ठीक से किया और युधाजित् के संदेश पर 'सिन्धु' नामक क्षेत्र दत्त(आत्रेय) से प्रभावशाली या प्रभाव देकर, भरत को दे दिया। (८८) वहाँ गन्धर्व प्रबल थे। भरत ने उन्हें आतोद्य धरवा दिये, आयुध छुड़वा दिए। (८९) भरत ने 'तक्ष' और 'पुष्कर' नामक पुत्रों को उन्हीं के नाम की राजधानियों में अभिषिक्त कर दिया। वे अभिषेक के योग्य थे भी। स्वयं भरत वापस राम के पास चले आए।

८४. भर्तरि प्रहिते=भर्तृप्रणिहिते, स्वभर्तृप्रहिते, भर्तु: प्रणिहिते, पत्यु: पादार्पिते म.हे.अ.ना.; मेति=मैवम्।
अत्र पद्यान्तरम् – अथ कोपान्महीपालो महीनिर्दारणक्षमम् ।
धिग्धिगित्यालपन् वाचं बाणं धनुषि सन्दधे ।।'

८५. धराया=रसाया व.; प्रत्यर्पणैषिण: = भ्युद्धरणैषिण:, प्रत्यर्पणेक्षिण:; गुरु=मुनि:। ८६. निदधे= विदधे व.अ.ना.। ८७. जितश्च=जितस्य, युतस्य; स=स्व; नामकम्=कूलजम्; ददौ दत्तप्रभावाय=ददौ दृष्टप्रभावाय, ददौ दृष्टप्रभावस्य, ददौ दिष्टप्रभावस्य, ददौ जेतु प्रयातस्य, जेतु स/सु–पुत्राय ददौ म.हे.अ.ना.; भृत=धृत अ.ना.। ८८. धम्=धान्। ८९. पुष्करौ=पुष्कलौ म.अ.ना.।

अङ्गदं चन्द्रकेतुं च लक्ष्मणोऽप्यात्मसंभवौ ।
शासनाद् रघुनाथस्य चक्रे कारापथेश्वरौ ।। ९० ।।
इत्यारोपितपुत्रास्ते जननीनां जनेश्वराः ।
भर्तृलोकप्रपन्नानां निवापान् विदधुः क्रमात् ।। ९१ ।।
उपेत्य मुनिवेषोऽथ कालः प्रोवाच राघवम् ।
रहःसंवादिनावावां पश्येद् यस्तं त्यजेरिति ।। ९२ ।।
तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः ।
आचख्यौ दिवमध्यास्व शासनात् परमेष्ठिनः ।। ९३ ।।
विद्वानपि तयोर्द्वाःस्थः समयं लक्ष्मणोऽभिनत् ।
भीतो दुर्वाससः शापाद् रामसंदर्शनार्थिनः ।। ९४ ।।
स गत्वा सरयूतीरं देहत्यागेन योगवित् ।
चकारावितथां भ्रातुः प्रतिज्ञां पूर्व्वजन्मनः ।। ९५ ।।

(९०) लक्ष्मण ने अपने पुत्र 'अङ्गद' और 'चन्द्रकेतु' को राम की आज्ञा से 'कारापथ' का शासन दे दिया। (९१) इस प्रकार उन चारों जनेश्वरों ने अपने पुत्रों को स्थापित कर दिया। फिर क्रम से भर्तृलोक सिधारी माताओं को निवापाञ्जलि दी। (९२) अब 'काल' मुनि वेष में राम के पास आया और बोला 'एकान्त में बात कर रहे हमारे पास जो पहुँचे उसे परित्याग का दण्ड दिया जाए।' (९३) राजा राम ने ऐसा करना स्वीकार कर लिया तो मुनि 'काल' के रूप में प्रकट हुआ और राजा से उसने कहा—'स्वर्ग चलो ऐसा शासन है परमेष्ठी (विष्णु भगवान्) का'। (९४) गोष्ठीगृह के द्वारपाल थे लक्ष्मण। गोष्ठी के ही समय आ पहुँचे महर्षि दुर्वासा और चाहा तत्काल राम से मिलना। शाप के भय से लक्ष्मण को, जानते हुए भी नियम का उल्लंघन कर राम के पास जाना पड़ा। (कदाचित् दुर्वासा जी अयोध्या को ही भस्म कर देते।) (९५) लक्ष्मण सरयूतीर पहुँचे और उन्होंने योग से शरीर छोड़ कर बड़े भाई की (काल से की गयी) प्रतिज्ञा का पालन किया।

९०. चन्द्रकेतुं=चित्रकेतुं; रघुनाथस्य=रामचन्द्रस्य; कारा=कारु, कारुरु, तारा, तार, उत्तरा व.म.हे.अ.ना.। ९१. इत्यारोपित=इति रोपित अ.ना., समारोपित म.हे.; भर्तृ=स्वर्ग, पर; लोकप्र=लोकं प्र, मार्ग। ९२. वेषोऽथ= वेषेण, रूपेण; यस्तं=यस्त्वं, यः सं। ९३. विवृता=निवृता; दिवमध्यास्व=दिवमारोढुं। ९४. भिनत्= च्छिनत्; र्शनार्थिन:=र्शितात्मनः। ९५. तीरं=तीरे; पूर्वजन्मनः=अग्रजन्मनः, पूर्वजन्मनि।

तस्मिन्नात्मचतुर्भागे प्राङ् नाकमधितस्थुषि ।
राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ।। ९६ ।।
स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् ।
शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम् ।। ९७ ।।
उदक् प्रतस्थे स्थिरधीः सानुजोऽग्निपुरस्सरः ।
अन्वितः पतिवात्सल्याद् गृहवर्ज्जमयोध्यया ।। ९८ ।। युग्मम्
जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ।
कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ।। ९९ ।।
उपस्थितविमानेन तेन भक्तानुकम्पिना ।
चक्रे त्रिदिवनिःश्रेणी सरयूरनुयायिनाम् ।। १०० ।।
यद् गोप्रतारकल्पोऽभूत् सम्मर्दस्तत्र मज्जताम् ।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ।। १०१ ।।

(९६) अपने उस एक चतुर्थांश के पहले ही स्वर्ग चले जाने से राम कुछ शिथिल दिखाई दिए, लगा कि धर्म के अब तीन ही पाद रह गए। (धर्म के चार पाद— दर्शन, आचार, प्रायश्चित्त और ईश्वरभक्ति।) **(९७)** राम ने भी शत्रुरूपी हाथियों के लिए अङ्कुश बने कुश को 'कुशावती' का शासक बनाया और 'शरावती' में लव को। सत्पुरुषों की सूक्तियों से गद्‌गद होकर अश्रुलव धारण करने वाले सहृदय थे लव। **(९८)** राम स्वयं स्थिरधी थे (गीता के द्वितीय अध्याय के अन्तिम श्लोकों में लक्षित आत्मयोगी)। उन्होंने दोनों भाईयों के साथ उत्तर की ओर प्रस्थान किया हाथों में अग्नि लिए हुए। उनके प्रेम से अयोध्या भी उनके पीछे चल पड़ी घरों को छोड़कर। **(९९)** वानर और राक्षस भी राम का चित्त जानते थे। वे भी राम के मार्ग पर हो लिए। मार्ग कैसा? जिस पर जनता के कदम्बकली जैसे स्थूल अश्रुओं की वर्षा हो चुकी थी। **(१००)** उस समय उपस्थित हुए अनेक विमान। राम (भाइयों के साथ) विमान पर आरूढ़ हुए। उनके अनुरोध पर उनके सभी अनुयायियों के लिए सरयू बन गई स्वर्ग की नसेनी (सीढ़ी)। **(१०१)** सभी ने सरयू में स्नान किया और उपस्थित विमानों से सभी स्वर्ग जा पहुँचे। (वाल्मीकिरामायण उत्तरकाण्ड सर्ग १०८–११०) सरयू का वह स्थान आज भी गोप्रतार नाम से

९६. शिथिलं=शिथिलः। ९७. स निवे=सन्निवे अ.ना.; शरावत्यां, सरावत्यां, श्रावस्त्यां च व., स्रावत्यं च, अवन्त्यां च म.हे.अ.ना.। ९८. उदक्=ततः; स्थिर=स्थित। ९९. चित्त=वृत्त हे.अ.ना.; वर्म/मर्म; हरि=कपि; मुकुल=कुसुम। १००.तविमानेन=तं विमानेन; श्रेणिः=श्रेणी। १०१. प्रतार=प्रतर, प्रसर;

स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्त्तिषु ।
त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ।।१०२।।
निर्वर्त्यैवं दशमुखभयच्छेदकार्यं सुराणां
विष्वक्सेनः स्वतनुमविशत् सर्वलोकप्रतिष्ठाम् ।
लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्त्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च ।।१०३।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ स्वर्गारोहणो नाम पञ्चदशः सर्गः।।१५।।

प्रसिद्ध पावन तीर्थ है जहाँ स्नान के लिए उपस्थित जनों की भीड़ गायबैलों के समान हुई। ('गोप्तार'–तीर्थ आज का।) (१०२) विभु राम के साथ अवतीर्ण देव लोग तो उनके अपने अपने रूप में समा गए, अतः, पुरवासी आदि जो स्वर्ग में नए पहुँचे देवता थे, उनके लिए राम ने एक नया स्वर्ग बनाया। (१०३) इस प्रकार देवताओं का रावणभयशमन रूपी कार्य संपन्न कर विष्णु भगवान् अपने शरीर में समा गए, जो है आधार सभी लोकों का। इसके पूर्व उन्होंने विभीषण और पवनतनय (हनुमान्) को स्थापित कर दिया क्रमशः दक्षिण और उत्तर के पर्वतों पर अपने दो कीर्त्तिस्तम्भों के समान।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में पूरा हुआ स्वर्गारोहण नामक पन्द्रहवाँ सर्ग।। १५।।

सम्मर्दः=विमर्दः; भुवि=तत्र, तद्धि। १०२. स विभुर्विबुधांशेषु=स नृषु प्रेरितसंख्याते; पौराणां=पौरार्थ; प्रतिपत्रपदाय द्रष्टव्यं वामनस्य काव्यालङ्कारसूत्रम् ५.२.४३। **१०३. भयच्छेद=शिरश्छेद व., भुजच्छेदि अ.ना., भुजोच्छेदि व., भुजच्छेद; स्व=स; सर्व=सप्त; चोभयं=चोभयौ; तनयं चोभयं स्थापयित्वा=तनयं स्थापयित्वा सुरेशः।**

।।षोडशः सर्गः।।

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च ।
चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां स्वकुलानुसारि ।।१।।
ते सेतुवार्त्तागजबन्धमुख्यैरभ्युच्छ्रिताः कर्म्मभिरप्यबन्ध्यैः ।
अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः ।। २।।
चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम् ।
सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः ।। ३।।
अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्व्वां वनितामपश्यत् ।। ४।।

(१) रघु के वंश में जो आठ वंशधर थे उनमें से सात ने कुश को प्रधान बना लिया, क्योंकि वह वय में भी ज्येष्ठ था और गुणों में भी और उसी को केन्द्रीय संपदा के रूप वंशानुगत विशिष्ट रत्न सम्हला दिए। क्यों न हो इनमें जो सौभ्रात्र है वह तो इनके कुल से ही चला आ रहा है। (२) वे सभी भाई सेतु, वार्त्ता, गजबन्ध आदि सफल उपायों से काफी समृद्धिमान् हो गए थे, किन्तु उन्होंने एक दूसरे के राज्य की विभाग रेखा को लाँघा नहीं। (सेतु = जलबन्ध, वार्त्ता = कृषि–वाणिज्य, गजबन्ध = गजसेना की समृद्धि।) (३) उन सभी भाइयों का विष्णु अंश से उत्पन्न वंश आठ शाखाओं में फैला, वैसे ही जैसे साम से उत्पन्न गजवंश सुरद्विपों की शाखाओं में। दान (मद तथा दान) की प्रवृत्ति से उनमें से कोई भी विरत नहीं था। (४) अब हुआ यह कि कुशावती में कुश आधी रात को शयनागार में जाग रहे थे। अन्य सब सो रहे थे। दीपक की लौ स्थिर थी। कुश को एक अदृष्टपूर्व वनिता दिखाई दी। वेष से लगता था कि वह कोई ऐसी महिला है जिसका पति प्रवास में गया हुआ है।

---

१. सप्त रघु=सप्तरघु। २. भ्युच्छ्रिता=अभ्युच्चिता अ., अत्युच्छ्रिता, भ्युत्थिता, समुच्छ्रिता; प्रविभाग=प्रतिभाग। द्र० कामन्दक–नीतिसारे ५.७७–७८। **३. प्रभवः स=प्रभवस्य। ४. स्तिमित=स्तिमिते; प्रबुद्धः=विबुद्धः।**

सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात् पुरुहूतभासः ।
जेतुः परेषां जयशब्दपूर्व्वं तस्याञ्जलिं बन्धुमतो बबन्ध ।।५।।
अथाऽनपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्व्वार्धविसृष्टतल्पः ।।६।।
लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते ।
बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ।।७।।
का त्वं शुभे! कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ।।८।।
तमब्रवीत् सा गुरुणा तव द्यां या नीतपौरा स्वपदोन्मुखेन ।
तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ।।९।।
वस्वौकसारामभिभूय साऽहं सौराज्यबद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्य्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ।।१०।।

(५) कुश ने अपनी ऋद्धि पर साधुजनों को समान अधिकार दे रखा था और वह ऐसा लगता था जैसे इन्द्र हो, अत्यन्त तेजस्वी। बन्धुओं और पत्नी से युक्त तथा शत्रुओं के जेता उस कुश की 'जय' कहकर उस वनिता ने हाथ जोड़े। (६) कुश को उसके प्रवेश पर विस्मय हुआ। उसे, बन्द भवन में उस महिला का प्रवेश वैसा ही लगा जैसे आदर्श (दर्पण) तल में प्रतिबिम्ब का। कुश ने बिस्तर से पूर्वार्ध उठाया और कहा— (७) 'महाशये! तुम इस बन्द भवन के भीतर यहाँ तक आ पहुँची, जबकि तुम्हारे भीतर योग का प्रभाव दिखाई नहीं देता, प्रत्युत तुम्हें कोई कामना सता रही है। तुम्हारी दशा तुषार से झुलसी मृणालिनी जैसी दीख रही है। (८) तुम कौन हो, किसकी पत्नी हो, मेरे पास आने का क्या कारण आ पड़ा तुम्हारे ऊपर? बतलाएँ, यह ध्यान में रखते हुए कि रघुवंशी वशी होते हैं, उनका मन परस्त्री की ओर बढ़ता ही नहीं।' (९) उस महिला ने कुश से कहा – 'राजन्! तुम्हारे पिता जब अपने पद को जाने लगे, तो जिसके सभी निवासियों को भी अपने साथ ले गए उस नगरी (अयोध्या) की अधिदेवता हूँ मैं। (१०) कहाँ तो मैं सौराज्य में इतनी समृद्ध थी कि कुबेर की नगरी वस्वौकसारा को नीचा दिखलाया करती थी और कहाँ मैं आज करुण अवस्था में पहुँची हुई हूँ, वह भी तुम जैसे समग्रशक्ति स्वामी के प्रदीप्त रहते हुए।

६. अथाऽनपोढा=तां सो/साऽनपोढा, अथानुपोढा। ७. प्रभावः = प्रवेशः, प्रवाहः; लक्ष्यते=दृश्यते। ९. तव द्यां=ऽनघा द्यां व.हे., **ऽनवद्यां, ऽनवद्या** म.अ.ना.; **अधिदेवतां=पुरदेवतां। १०. बद्धोत्स=रम्योत्स।**

विशीर्णतल्पो गृहसन्निवेशः पर्यस्तसालः प्रभुणा विना मे ।
विडम्बयत्यस्तनिमग्नसूर्य्यं दिनान्तमुग्रानिलभिन्नमेघम् ।।११।।
निशासु भास्वत्कलनूपुराणां यः सञ्चरोऽभूदभिसारिकाणाम् ।
नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः ।।१२।।
आस्फालितं यत् प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत् ।
वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकासु ।।१३।।
वृक्षेशया यष्टिनिवासभङ्गान्मृदङ्गशब्दापगमादलास्याः ।
प्राप्ता दवोल्काहतशेषबर्हा क्रीडामयूरा वनबर्हिणत्वम् ।।१४।।
सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान् सरागान् ।
सद्योहतन्यङ्कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे ।।१५।।

(११) देखो मेरी दशा—'इस समय मेरा कोई प्रभु नहीं है। इस कारण मेरे बड़े—बड़े गृहसन्निवेशों के तल्प विशीर्ण हो गए हैं, परकोटा खण्डित होकर ढह गया है। वह ऐसा लगने लगा है जैसे वह सायंकाल का समय हो जिसमें सूर्य अस्त हो गया हो और उग्र वायु से मेघ तितर—बितर हो गए हों। (१२) मेरे उस राजपथ की दशा यह है कि कहाँ तो वह मार्ग बनता था भास्वर और सुन्दर नूपुर पहने निकली अभिसारिकाओं का और कहाँ आज उस पर घूमती हैं रोते मुखों से आग उगलती और मांस खोजती लोमड़ियाँ। (१३) मेरी बावलियों के जल की दशा यह है कि कभी उनमें प्रमदाएँ हाथ से आस्फालन करती थीं तो मृदङ्ग की धीर ध्वनि निकलती थी, और आज जंगली भैंसे उनमें लोरते, अपने शृङ्गों से उसे पीटा करते हैं वही जल (किसी को) चिल्लाता सुनाई देता है। (१४) मयूरों की तो ऐसी दुर्दशा है कि उनकी वासयष्टियाँ टूट गई तो बेचारों को वृक्षों का आश्रय लेना पड़ता है, मृदङ्गध्वनि रही नहीं, अतः वे लास्य से वंचित हैं, ऊपर से जंगली आग से उनके बचे खुचे बर्ह (मोरंगे) भी झुलस चुके हैं, इस कारण अब वे जंगली मोर दिख रहे हैं। (१५) जिन सीढ़ियों पर प्रमदाओं के आलक्तरञ्जित पैर रखाते थे उन पर अब रखे जा रहे हैं रक्तरञ्जित पैर, तत्काल हरिण को मार कर चढ़ते व्याघ्रों द्वारा।

११. विशीर्ण=विस्तीर्ण; तल्पो गृहसन्निवेशः=तल्पो वसतेर्निवासः, तल्पाट्टशतो निवेशः व.म.हे.अ.ना., **कल्पाट्टशतो; अस्त=अर्ध। १२. सञ्चरो=संवरो; सारिका=कारिका; नदन्मुखो=ज्वलन्मुखो; विचितामिषा=वचिता—मिषा, विदिता, ल्कोपचिता** ।द्र. रघुवंश १६.७५।**१३. निमन्वग=नितामग; दीर्घिकासु=दीर्घिकाणाम्** म.हे.अ.ना.।**१४. निवास=निवेश ।१५. चरणान् सरागान्=चरणाङ्गरागान्; अस्र=आस्र** अ.ना., **ते मे=तेऽद्य।**

चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः ।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ।।१६।।
स्तम्भेषु योषित्प्रतियातनानामुत्क्रान्तवर्णक्रमधूसराणाम् ।
स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोकपट्टाः फणिभिर्विमुक्ताः ।।१७।।
कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु ।
त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्छन्ति न चन्द्रपादाः ।।१८।।
आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः ।
वन्यैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः ।।१९।।
रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवापि ।
तिरस्क्रियन्ते क्रिमितन्तुजालैर्विच्छिन्नधूपप्रसरा गवाक्षाः ।। २०।।

(१६) हाथी के जो पद्मवन में अवतीर्ण स्थिति के चित्र (मूर्त्तियाँ) बने हैं, जिनमें बनी हैं हथनियाँ भी मृणाल के खण्ड देती हुई, उनके कुम्भों पर सिंह क्रोध में आकर प्रहार करते रहते हैं, उनके कुम्भ विदीर्ण हो गए हैं। (१७) स्तम्भों पर नारीमूर्त्तियाँ बनी थीं। उनका वर्ण उड़ गया और अब वे सब भद्दी पड़ गई हैं। उनके स्तनों पर उत्तरीय बन रही हैं सापों द्वारा छोड़ी केंचुली (स्तनों में लिपट और रगड़–रगड़ कर)। (१८) समय बीत गया तो अटारियों की सफेदी काली पड़ गई और उनपर घाँस उग आई। उन पर अब मोती की माला सी उज्ज्वल वही चाँदनी चमकती नहीं है। (शुद्धि = सफेदी, शुद्ध = सफेद।) (१९) मेरी उद्यानलताओं की दुर्गति यह है कि जिनके पुष्प विलासिनी सुन्दरियाँ भी तोड़ती थीं, तो शाखा को बड़ी दया के साथ झुका कर। अब उन्हीं लताओं को जङ्गली भील और उनके ही जंगली वानर तोड़ मरोड़ रहे हैं। (२०) मेरे सभी गवाक्षों में मकड़ी के जाले लग गए हैं। इतने घने हैं वे कि रात को दीपक की किरणें भासित नहीं हो पातीं और उनमें सुन्दरियों के सुन्दर मुख तो दिन में भी देखने को नहीं मिलते।

---

१६. विभिन्न=विदीर्ण; संरब्ध=सरोष। १७. उत्क्रान्त=आक्रान्त; स्तनोत्त=तनूत्त; पट्टाः=पट्ट्यः। १८. गुण=मणि; पादाः=पाद्यः। २०. विच्छिन्न=विभिन्न; धूप=धूम म.हे.।

बलिक्रियावर्जितसैकतानि स्नानानीयसंसर्गमनाप्नुवन्ति ।
उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि ।। २१ ।।
तहर्सीमां वसतिं विसृज्य मामभ्युपैतुं कुलराजधानीम् ।
हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्त्तिम् ।। २२ ।।
तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत् प्राग्रहरो रघूणाम् ।
पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ।। २३ ।।
तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस ।
श्रुत्वा त एनं कुलराजधान्या साक्षात् पतित्वे वृतमभ्यनन्दन् ।। २४ ।।
कुशावतीं श्रोत्रियसात् स कृत्वा यात्रानुकूलेऽहनि सावरोधः ।
अनुद्रुतो वायुरिवाभ्रवृन्दैः सैन्यैरयोध्याभिमुखः प्रतस्थे ।। २५ ।।
स केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः ।
सेना रथोदारगृहा प्रयाणे तस्याभवज्जङ्गमराजधानी ।। २६ ।।

(२१) सरयू के जंल की बालू पर पूजाद्रव्य पड़े नहीं दिखाई देते, न दिखाई देते स्नानोपयोगी चूर्ण आदि और उनके किनारे के वेंतसकुञ्ज भी शून्य। कितना दुःख नहीं होता इस सबसे। **(२२)** तो तुमको चाहिए इस नगरी को छोड़कर, मुझ कुलराजधानी में रहना, उस प्रकार जिस प्रकार तुम्हारे पिता ने कारणवश गृहीत मानव शरीर छोड़कर ग्रहण किया अपना परमात्मरूप मूलशरीर।' (द्र.वाल्मीकि रामायण उत्तरकाण्ड का अन्त।) **(२३)** कुश ने अनुरोध 'तथा' कहकर स्वीकार कर लिया, उसे उस नारी का वचन विश्वसनीय लगा। नगरी भी चेहरे पर खुशी लिए शरीर से अलक्षित हो गई। **(२४)** सबेरे रात्रि के इस अद्‌भुत वृत्त को राजा कुश ने द्विजों की सभा में सुनाया, तो उन्होंने कहा कि कुल राजधानी ने आपको स्वयं अपने पति के रूप में वरण किया है। उन्होंने कुश को बधाई दी और उसका अभिनन्दन किया। **(२५)** कुश ने कुशावती को वेदपाठी ब्राह्मणों को दान कर दिया और यात्रा के अनुकूल मुहूर्त्त में रनिवास के साथ अयोध्या की ओर चल पड़ा। पीछे चले सैनिक। उस समय वह ऐसा लगा जैसे मेघों से अनुद्रुत वायु हो। **२६)** वह सेना रास्ते भर उसकी जङ्गम राजधानी बनी रही। ध्वजपंक्ति उसका उपवन बनी, विशालकाय हाथी बने विहारशैल और रथ बने विशालाकार भवन।

२१. अनाप्नुवन्ति=अवाप्नुवन्ति, विवर्जितानि; गृहाणि, वनानि, गृहेषु; जलानि=तटानि। २२. विसृज्य=विहाय; पैतुम्=पेतुम्। २३. हरः = सरः। प्रणयार्थं द्र. रघु २.५८, १३.७८, १९.२१; मेघ. ५.२८; विक्रमो. ४.१३; माल. ३.३.२४. **धान्या=धान्याः। २५. कुशावतीं=कुलावतीं; प्रतस्थे=बभूव।**

तेनातपत्रामलमण्डलेन प्रस्थापितः पूर्व्वनिवासभूमिम् ।
बभौ बलौघः शशिनोद्गतेन वेलामुदन्वानिव नीयमानः ।। २७।।
तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सोढुम् ।
वसुन्धरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन ।। २८।।
उद्यच्छमाना गमनाय पश्चात् पुरो निवेशे पथि वा व्रजन्ती ।
सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार ।। २९।।
तस्य द्विपानां मदवारिसेकात् खुराभिघाताच्च तुरङ्गमाणाम् ।
रेणुः प्रपेदे पथि पङ्कभावं पङ्कोऽपि रेणुत्वमियाय भूयः ।। ३०।।
मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना ।
चकार रेवेव महाविरावा बद्धप्रतिश्रुन्ति गुहामुखानि ।। ३१।।
स धातुभेदारुणयाननेमिः प्रभुः प्रपातध्वनिमिश्रतूर्य्यः ।
व्यलङ्घयद् विन्ध्यमुपायनानि पश्यन् पुलिन्दैरुपपादितानि ।। ३२।।

(२७) सिर पर श्वेत आतपत्र का गोल मण्डल धारण किए कुश पूर्वनिवासभूमि की ओर जा रहा था। उसके पीछे चल रहा सैन्यसमुदाय ऐसा लगा जैसे लगता है उदित चन्द्र के द्वारा वेला की ओर ले जाया जा रहा समुद्र। **(२८)** कुश की सेनाएँ चलीं तो उनकी पीड़ा सहने में असमर्थ सी भूमि धूली के बहाने आकाश में आरुढ़ हो गई। **(२९)** राजा कुश की वह सेना सर्वत्र समग्र लग रही थी, आगे बढ़ते समय अगले पड़ाव में या रास्ते में चलते समय। **(३०)** रेणु बना दी गई पङ्क हाथियों के मदजल के सिँचाव से और पङ्क बना दिया गया रेणु घोड़ो की टाप के आघात से। **(३१)** विन्ध्याचल क्षेत्र में तो वह उसके कटकों में बँट गई। उसी प्रकार की शोभा उसमें उभरी जैसी वही नर्मदा जी में दिखाई देती है। उन दोनों की ध्वनि गुफाओं में प्रतिध्वनित हो रही थी। **(३२)** कुश राजा था, उसे भीलों ने नाना प्रकार के उपहार दिए। उन्हें देखते–देखते कुश विन्ध्य पार कर गए। उस समय विन्ध्यगिरि की गैरिक आदि धातुओं से उसके रथों की चक्रनेमि रंगा गई थी और उस (विन्ध्य) के प्रपातों की ध्वनि नगाड़ों की धुन में मिल गई थी।

२७. द्गतेन=दितेन म.। **२८. तीव सोढुम्=ती विसोढुम्।** **२९. यच्छ=गच्छ;निवेशे पथि वा=निवेशाय पथि; मतिम्=पतिम्, पदम्, मलं।** **३०. वारिसेकात्=वारिसेकैः,वारिसेकात्,रागसेकात्;भूयः=नेतुः** म.। **३१. वैन्ध्येषु=वन्ध्येषु** म.हे.अ.ना.,**विन्ध्यस्य, वन्ध्यस्य; भिन्ना=भक्ता।** **३२. भेदारुण=रागारुण; प्रपात=प्रयाण** म.हे.अ.ना., **प्रताप, प्रयातः।** प्रपातेति अरुणगिरिनाथः, प्रयाणेति च मल्लिनाथः। प्रपातानामधः पततां निर्झराणां धवनिना मिश्राः मिश्रिता तूर्य्यास्तूर्य्यध्वनयो यस्येत्यर्थः। **विन्ध्य=वन्ध्यम्।**

तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नवालव्यजनीबभूवुर् हंसा नभोलङ्घनलोलपक्षाः ।। ३३।।
स पूर्व्वजानां कपिलेन रोषाद् भस्मावशेषीकृतविग्रहाणाम् ।
सुरालयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे ।। ३४।।
इत्यध्वनः कैश्चिदहोभिरन्ते कूलं समासाद्य कुशः सरय्वाः ।
वेदिप्रतिष्ठान् विताध्वराणां यूपानपश्यच्छतशो रघूणाम् ।। ३५।।
आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान् सरयूतरङ्गान् ।
तं क्लान्तसैन्यं कुलराजधान्याः प्रत्युज्जगामोपवनान्तवायुः ।। ३६।।
अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा ।
कुलध्वजस्तानि चलध्वजानि निवेशयामास बली बलानि ।। ३७।।
तां शिल्पिसङ्घाः प्रभुणा नियुक्तास्तथागतां संभृतसाधनत्वात् ।
पुरं नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्व्वीम् ।। ३८।।

(३३) विन्ध्य के उतार (तीर्थ) में मिली प्रतीपगा गंगा। कुश ने उसे पार किया गजों का पुल बाँधकर। उस समय उसके ऊपर आकाश में उड़ रहे धवल हंस चँवर से डुला रहे थे। **(३४)** कुश ने गंगाजी के जल को प्रणाम किया, जिसमें नौकाएँ चल रही थीं। इसी पवित्र जल का माहात्म्य था कि कपिलमुनि के रोष से भस्म कुश के पूर्वज स्वर्ग चले गए थे। **(३५)** इस प्रकार कुछ दिनों का मार्ग पारकर कुश सरयू तट पर जा पहुँचा। वहाँ उसने देखा कि रघुवंशियों ने जो सैकड़ों यज्ञ किए थे उनके यूप अपनी–अपनी वेदी पर खड़े हैं। **(३६)** कुल राजधानी ने अपने उपवनों के पवन से कुश की अगवानी की। वह सुगन्धित था और सरयूतरङ्गों का स्पर्श करता आ रहा था। कुश के सैनिक थक गए थे। उन्हें इस सेवा की अपेक्षा भी थी। **(३७)** उस बली राजा कुश ने अपनी सेनाओं को अयोध्या के पास ठहरा दिया। कुश रिपुमग्नशल्य, कुलध्वज और पौरसखा भी था। **(३८)** अयोध्या, जिसकी दशा उपर्युक्त थी, उसको कुश ने फिर से नया करा दिया। वह राजा था, अतः उसने चुने–चुने शिल्पियों को इस कार्य में लगाया और उन्हें सारी सामग्री पुष्कल मात्रा में सुलभ

---

३३. **बन्धात्=बन्धाम्**। व्यक्तिविवेके पृ. ३२३, १९६४ चौखंबासं.। ३४. **नौलुलितं=नौचलितं, सोल्कलितं** अ.ना., **सोल्लसितं, मौलिगतं** म.हे.अ.ना.। ३५. **कूलं=तीरम्** व.हे.। ३६. अत्र पद्यान्तरम्

आधूय शाखाः कुसुमद्रुमाणामादाय गन्धं च सरोरुहाणाम् ।
स्पृशन् मुहुस्तान् सरयूतरङ्गानादाय गन्धं च सरोरुहाणाम् ।। म.हे.अ.ना. **वायुः = वातः** व.। ३८. **नियुक्ताः = प्रयुक्ताः; गताम्=विधाम्** व.हे.अ.ना.; **पुरं=पुनः; विसर्गात्=वि/नि सर्गैः;**

ततः सपर्य्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ।
उपोषितैर्वास्तुविधानविद्भिर्निर्वर्त्तयामास रघुप्रवीरः ।। ३९ ।।
तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य ।
यथार्हमन्यैरनुजीविलोकं संभावयामास गृहैस्तदीयैः ।। ४० ।।
सा मन्दुरासंश्रयिभिस्तुरङ्गैः शालागृहस्तम्भगतैश्च नागैः ।
पूराबभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी ।। ४१ ।।
वसन् स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायाम् ।
न मैथिलेयः स्पृहयाम्बभूव भर्त्रे दिवो नाप्यलकेश्वराय ।। ४२ ।।
अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम् ।
निःश्वासहार्यांशुक आजगाम घर्म्मः प्रियावेषमिवोपदेष्टुम् ।। ४३ ।।

करा दी। ग्रीष्म से झुलसी उर्वी को मेघों के समान नई कर दी गई वह पुरी कुश के द्वारा। **(३९)** अब रघुवंश के प्रवीर उस (कुश) ने उस पुरी की पूजा पशूपहार के साथ की। उसके साथ जो वास्तुविधानविद् थे वे सब उपवास किए हुए थे। पुरी में बड़ा मूल्यवान् प्रतिमागृह भी था। **(४०)** कुश ने नई बसाई उस पुरी के राजभवन में प्रवेश किया और उसने अन्य भवनों द्वारा पद के अनुसार अनुजीवियों का सम्मान किया। **(४१)** वह नगरी सर्वाङ्ग में आभूषण पॅहनी नारी सी लगी। उसकी मन्दुरा (वाजिशाला) तुरङ्गों से भरी थी, हाथी गजशाला के स्तम्भों से बँधे थे और दुकानों में पण्य वस्तु बिखरी थी। **(४२)** रघुवंशियों की पुरानी शोभा को प्राप्त उस निवासभूमि में रह रहा कुश न तो इच्छुक हुआ इन्द्र के द्युलोक के लिए और न कुबेर की अलका के लिए (द्युलोक के स्वामी (इन्द्र) के लिए और न अलका के स्वामी (कुबेर) के लिए' यह है मूलवाक्य का अनुवाद)। **(४३)** अब आया ग्रीष्म। मानों उसने उपदेश दिया प्रिय वेश पहनने का। फलतः रत्न केवल उत्तरीय में ग्रथित रहने लगे, हार केवल शुभ्र वर्ण के और वे भी स्तनों पर लटकते और अंशुक इतने पतले कि निःश्वास से उड़ जाएँ।

गलपिता=प्लविता। ३९. पुरः = पुनः; गृहायाः = गतायाः। ४०. लोकम् = लोकान् हे.; **संभाव = संप्रेष; गृहैस्तदीयैः = यथाप्रधानम्** व.हे.अ.ना.। **४१. गृहस्तम्भ=गृहं स्तम्भ,वधिस्तम्भ** म., **विधिस्तम्भ; पण्या=पण्यैः। ४२. रोपिता=रोहिता; याम्बभूव=याञ्चकार। ४३. प्रियावेषम् = प्रिया वेषम्** अ.ना., **प्रिया वेशम्।**

अगस्त्यचिह्नादयनात् समीपं दिगुत्तरा भास्वति सन्निवृत्ते ।
आनन्दशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ।।४४।।
प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी ।
उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्ताम् ।।४५।।
दिने दिने शैवलवन्त्यधस्तात् सोपानपर्वाणि विमुञ्चदम्भः ।
उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं बभूव ।।४६।।
नवेषु सायन्तनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु ।
प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ।।४७।।
स्वेदानुविद्धार्द्रनखक्षताङ्के भूयिष्ठसंदष्टशिखं कपोले ।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ।।४८।।
यन्त्रप्रवाहैः शिशिरैः परीतान् रसेन धौतान् मलयोद्भवस्य ।
शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमन्तः ।।४९।।

(४४) दक्षिण से सूर्य के पास आते ही उत्तर दिशा ने हिमालय से आनन्द–शीतल आँसुओं की वृष्टि सी हिमकी स्रुति शुरूकर दी। (४५) दिन में ताप बहुत अधिक बढ़ गया और रात हो गई बहुत अधिक दुबली। ऐसा लगा जैसे विरुद्ध होकर दो प्रिय, चित्त में अनुशय लेकर दूर बैठे हों। (४६) पानी बावड़ियों की सीढ़ियों से रोज रोज उतरने लगा। सीढ़ियों पर अब काई दिखाई देती। कमल की नालें ऊपर निकल आईं। घर की बावड़ियों में जल अब नारी नितम्ब के ही बराबर गहरा रह गया। (४७) मल्लिका की नई नई कलियाँ शाम आते ही खिलकर खूबसारी सुगन्ध बिखेरने लगीं। एक एक पर पैर रखता और गुंजार करता भौंरा ऐसा लगा जैसे गिनती कर रहा है। (४८) कपोल पर बने ताजे और स्वेद से अनुविद्ध नक्षक्षत में चिपका शिरीष पुष्प गिरकर भी सहसा गिर नहीं रहा था। (४९) सम्पन्न लोग इस ग्रीष्म की तपन बिताने लगे धारागृहों में, ऐसी शिलाओं पर सोकर जो शीतल कर दी जाती थीं चारों ओर के यन्त्रप्रवाहों से और धुली हुई होती थीं चन्दन रस से ।

४४. अगस्त्य=अगस्ति; वृष्टिम्=वृद्धिम्। ४५. प्रवृद्ध=विवृद्ध ; विरोध=विरुद्ध म.हे.अ.ना.; **भिन्नौ=भक्तौ। ४६. विमुञ्चद=व्यमुञ्चद। ४७. नवेषु=वनेषु; मल्लिकानाम्=मल्लिकायाः; जृम्भणो=जृम्भितो; कुड्मलेषु=कुट्मलेषु; सशब्दं=सशब्दः; संख्यां=शय्यां। ४८. विद्धार्द्र=विद्धं सु; भूयिष्ठसंदष्ट=भूयिष्ठसंदृष्ट, भूयिष्ठसंसृष्ट, भूयिष्ठसम्बद्ध, भूयिष्ठसंलग्न, भूयिष्ठसंदिष्ट, भूयिष्ठसंस्पृष्ट, संबद्धभूयिष्ठ, संसक्तभूयिष्ठ, संदष्टभूयिष्ठ, संदिष्टभूयिष्ठ** व.म.हे.अ.ना., **संसृष्टभूयिष्ठ; कामिनी=मानिनी। ४९. धौतान्=सिक्तान्।**

स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम् ॥५०॥
आपिञ्जरा बद्धरजःकणत्वान्मञ्जर्युदारा शुशुभेऽर्जुनस्य ।
दग्ध्वापि देहं गिरिशेन रोषात् भस्मीकृता ज्येव मनोभवस्य ॥५१॥
मनोज्ञगन्धं सहकारभङ्गं पुराणशीधुं नवपाटलं च ।
संबध्नता कामिजने स्वदोषाः सर्वे निदाघावधिना प्रमृष्टाः ॥५२॥
जनस्य तस्मिन् समये विगाढे बभूवतुर्द्वौ सविशेषकान्तौ ।
तापाऽपनोदक्षमपादसेवः स चोदयस्थो नृपतिः शशी च ॥५३॥
अथोर्म्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ।
विहर्त्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव ॥५४॥

(५०) वसन्त बीत गया तो काम का बल मन्द हो गया । ग्रीष्म में उसे कुछ बल मिला तो सुन्दरियों के केशों में जो स्नान से भीगने पर धूप से वासित हो जाते और जिनमें शाम को खिली मल्लिका खोंस दी जाती। (५१) अर्जुन की मञ्जरी रजःकण आ जाने पर कुछ पिञ्जर हो गई तो ऐसी सुशोभित हुई जैसे काम को जलाकर काम की प्रत्यञ्चा को भी शिव ने खंडित कर दिया हो। (५२) सहकार का मनोज्ञ सुगन्ध वाला भङ्ग (खण्ड), 'पुरानी मदिरा, और नवीन पाटल' इन सबको कामिजनों में ग्रीष्मकाल ने अतीव जोड़ दिया है और अपने सभी दोष भुलवा दिए हैं। (पाटल (गुलाब) की पँखुड़ी और आम्रमञ्जरी का टिकोरा मदिरा के प्याले में डालने की प्रथा रही है। मदिरा की मस्ती में ग्रीष्म का परिताप विस्मृत)। (५३) ग्रीष्म के उस कठिन समय में उदयस्थ दो वस्तुएँ प्रत्येक जन को अधिक आकृष्ट करतीं, क्यों? दोनों की पादसेवा तापापनोद कर पाती थीं, एक राजा कुश और दूसरा चन्द्र। (५४) अब कुश की इच्छा हुई रानियों के साथ सरयू के जल में विहार करने की। सरयू का जल ग्रीष्म में अधिक सुखकारी, फिर नयनसुभग भी, क्योंकि, तरङ्गों में उन्मद राजहंसों की केलि और तट की लताओं के पुष्पों की झड़ी।

५०. धूप=धूम; वासं=वासात्; बलम्=पदम् हे.। **५१. शुशुभे=रुरुचे** म.हे.अ.ना.; **रोषात्=कोपात्; ता ज्येव=कृतज्येव। ५२. शीधुं=सीधुं; च=वा; संबध्नता कामिजने स्वदोषाः स्वदोषाः=संबध्नता कामिजनेषु दोषाः, संबध्य कामीव जनेषु दोषाः** म.हे.। **५३. विगाढे=ऽपि गाढे; द्वौ=तौ; सेवः = सेवौ** म.हे.अ.ना.; **स चोदयस्थः=सदोनुपस्थो, सदोदयस्थो, नवोदयस्थः, नवोदयस्थौ** म.हे.। **५४. र्म्मिलोलो=र्म्मिमालो।**

स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्राम् ।
विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ।।५५।।
सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः ।
सनूपुरक्षोभपदाभिरासीदुद्‌विग्नहंसा सरिदङ्गनाभिः ।।५६।।
परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी ।
नौसंश्रयः पार्श्वगतां किरातीमुपात्तवालव्यजनां बभाषे ।।५७।।
पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलिताङ्गरागैः ।
सन्ध्योदयः साभ्र इवैष वर्ण्णं पुष्यत्यनेकं सरयूप्रवाहः ।।५८।।
विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः ।
तद् बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासाम् ।।५९।।

(५५) तीरभूमि पर तम्बू बनाए गए, जालिकों ने जल के नक्र (मगर आदि हिंसक जन्तु) हटा दिए। तब विष्णुतुल्य कुश ने जल में अवगाहन करना आरम्भ किया। अवगाहन का स्तर राजोचित था। (५६) सरयू के हंस उद्विग्न हो उठे, क्योंकि कुश की रानियाँ तीर की सीढ़ियों से ही एक दूसरे के बाजूबंद रगड़ने लगीं और उनके पैरों के नूपुर झनकने लगे। (क्षोभ का अर्थ मल्लिनाथ ने किया 'स्खलन' अर्थात् उनके नूपुर निकल गए।) (५७) कुश नौका पर ही बैठा था और रानियों का जल विहार देख रहा था। देख रहा था कि रानियाँ एक दूसरी पर पानी उछाल रहीं हैं तो उसने पास में उपस्थित चामरग्राहिणी किराती से कहा। (५८) 'देख! मेरे रनिवास की ये सैंकड़ों सुन्दरियाँ सरयूजल का अवगाहन कर रही हैं। इनके अंगों का अङ्गराग छूटकर जल में मिल गया है। ऐसा लग रहा है यह सरयू प्रवाह जैसे मेघयुक्त सन्ध्याकाल हो बहुरंगी। (५९) मेरे अन्तःपुर की सुन्दरियों के नेत्रों का काजल तो नौलुलित (नौकाओं से चंचल व स्पृष्ट) जलतरङ्गों से धुल गया है, परन्तु उसके स्थान पर मदराग जैसी शोभा इन नेत्रों में डाल दी गई है।

५५. विहितो=विहतो; ऽपकृष्ट = ऽवकृष्ट। ५६. सा तीर=सतीर; घट्टिनीनां=घर्षिणीनां; दुद्विग्न=विवग्न, विलग्न, विविग्न अ.ना.। **५७. भ्युक्षण=क्षेपण** व.हे.अ.ना.; **पार्श्वगतां=पार्श्वचरीं** अ.ना., **पार्श्वगतम्, पार्श्वगतान्; किरातीम्=किरातम्, किरातान्; जनां=जनान्, जनं।** अत्र पाठद्वयमेवं कल्पनीयम् **'गतां/गतान्, किरातीम्/किरातान्, व्यजनां/व्यजनान्'। ५८. विगाह्यमानः = वगाह्यमानः; गलिता=लुलिता, पुष्यत्यनेकं=पुष्यन्त्यनेकान्। ५९. नौ=मे; तद् बध्नती=संबध्नती; आसाम्=आसीत्।**

एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवत्यः ।
गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात् प्लवन्ते ।। ६० ।।
अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनाम् ।
पारिप्लवाः स्त्रोतसि निम्नगायाः शैवाललोलांश्छलयन्ति मीनान् ।। ६१ ।।
आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु सीकरेषु ।
पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न च्छिदुरोऽपि हारः ।। ६२ ।।
आवर्त्तशोभा नतनाभिकान्तेर्भङ्गा भ्रुवोर्द्वन्द्वचराः स्तनानाम् ।
जातानि रूपावयवोपमानान्यदूरवर्त्तीनि विलासिनीनाम् ।। ६३ ।।
तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम् ।
श्रोत्रेषु संमूर्छति रक्तमासां गीतानुगं वारिमृदङ्गवाद्यम् ।। ६४ ।।
संदष्टवस्त्रेष्वबला–नितम्बेष्विन्दुप्रकाशाऽन्तरितोडुकल्पाः ।
अमी जलापूरितसूत्रमार्गा मौनं भजन्ते रसनाकलापाः ।। ६५ ।।

(६०) इन बालाओं को देखो। इनके नितम्ब और इनके स्तन दोनों ही बड़े और भारी हैं, यहाँ तक खुद का बोझ उठाने में ये अक्षम हैं, किन्तु बाहें फैला फैलाकर तैरना चाह रही हैं, जबकि इन्होंने बाजूबन्द भी मजे में डटा रखे हैं। (६१) ये देखो, इनके कान के शिरीषपुष्पों के अवतंस (कर्णफूल) वारिविहार में गिर गए हैं। नदी जल में तैर रहे ये मछलियों को शैवाल का भ्रम करा रहे हैं। (६२) मोती का हार पहनकर कर रही हैं ये जलास्फालन। पानी की बड़ी बड़ी बूँदों के बीच देखो, इनका हार टूट गया, पर इन्हें समझ में नहीं आ रहा। ये बूँदों को मोती समझ रही हैं। (६३) इनमें कुछ विलासिनियों के अंगों के उपमान, उपमेयों के पास गए हैं, भँवर आ गई हैं गम्भीर नाभि के पास, तरंगें भौंहों के पास और चक्रवाक–मिथुन स्तनों के पास। (६४) ये रानियाँ गा भी रही हैं और इनकी गीति के अनुरूप आकर्षक वारिमृदङ्ग भी बज रहा है। इसे सुनकर तीरस्थली के मयूर पिच्छ उठाकर नाचने को तैयार हैं। (वारिमृदङ्ग = वारि ही मृदङ्ग– मल्लिनाथ।) (६५) इन महिलाओं के नितम्बों पर साड़ियाँ चिपक गई और उनमें ढँकी मोती की मालाओं के सूत्रमार्गो में जल भरा गया है, अतः वे मौन हैं। साड़ी में ढँके ये निःशब्द मोती ऐसे लग रहे हैं जैसे चाँदनी में छिपे तारे।

६०. वत्यः=वन्त्यः; प्लवन्ते=प्लुवन्ते। ६१. भ्रंशिनः = ध्वंसिनः; छलयन्ति=जनयन्ति अ.ना.; मीनान्=हंसान्। ६२. जला=करा; स्पर्धिषु=स्पर्शिषु। ६३. कान्तेः=रन्ध्रे; भङ्गाः=भङ्गः, भङ्ग्यः; चराः = चरः; स्तनानाम् = ङ्गनानाम्। ६४. नन्द्य=नद्य; संमूर्छति रक्तमासाम्=मूर्छत्यनुरक्तमासाम्, मूर्छत्यतिरक्तमासाम्, संमूर्छति रिक्तमासाम्। ६५. कल्पाः=काल्याः, तुल्याः; अमी=अमूः; आसाम्=सूत्राः, रन्ध्राः, मार्गाः,

एताः करोत्पीडितवारिधारं हर्षात् सखीभिर्वदनेषु सिक्ताः ।
वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान् वारिलवान् वमन्ति ।। ६६।।
उद्‌बन्धकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफलसूत्रशेषः ।
मनोज्ञ एव प्रमदामुखानामम्भोविहाराकुलितोऽपि वेषः ।। ६७।।
स नौविमानादवतीर्य्य रेमे विलोलहारः सह ताभिरप्सु ।
स्कन्धावलग्नोद्‌धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः ।। ६८।।
ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुना सातिशयं विरेजुः ।
प्रागेव मुक्ता नयनाभिरामाः प्राप्येन्द्रनीलं किमुतोन्मयूखम् ।। ६९।।
वर्णोदकैः काञ्चनशृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन् ।
तथागतः सोऽतितरां बभासे सधातुनिःस्यन्द इवाद्रिराजः ।। ७०।।

(६६) इन सुन्दरियों को देखो। इन्होंने बहते पानी को हाथ से उछाला और खुशी-के साथ सखियों के चेहरों पर डाला, तो इनके अलक सीधे हो गए और सिन्दूर से रञ्जित जललव बिखेर रहे हैं। (६७) जूड़ा खुल गया, उसमें लगा पत्रलेख टपक गया, खुले मौक्तिकहार में केवल धागा ही बच रहा है। इस प्रकार इनका वेष अम्भोविहार से आकुलित हो गया है, तब भी है यह मनोज्ञ ही।' (६८) अब कुश भी नौविमान से जल में उतरा और उन रानियों के साथ जलकेलि करने लगा। हार उसके वक्ष पर हिल ही रहे थे। इस स्थिति में वह ऐसा लगा जैसे कन्धे पर कमल का पौधा उठाए कोई वन्य गजराज लग सकता है जिसे हथिनियों ने घेर रखा हो। (६९) चमचमाते साँवले कुश से युक्त रानियों की वह गोरी टोली और अधिक शोभा पा गई। मुक्ता तो पहले ही नयनाभिराम होती है, चमकता नील जुड़ जाए तो क्या कहना। (७०) आयताक्षी रानियों ने बड़े ही प्रेम से काञ्चन की पिचकारियाँ चला चलाकर रंग से कुश को रंग दिया। उस स्थिति में वह ऐसा लगा जैसे धातु का स्राव करता कोई पर्वत लग सकता है।

मार्गम्, भागाः। ६६. करोत्पीडित=करास्फालित; वारिधाराः=वारिदण्डाः, वारिगन्धाः, वारियन्त्राः, वारिधारम्, वारिधाराः म.अ.ना.; **हर्षात्=आरात्, दर्पात्** म.अ.ना.; **वमन्ति=वमन्ते, वहन्ति। ६७. उद्‌बन्ध=उद्‌बद्ध,उद्‌बुद्ध; श्च्युत=च्युत; लेखः=रेखः; विश्लेषि=विश्लिष्ट; सूत्रशेषः=सूत्रवेष्टः; पत्रवेष्टः/ष्टम्; जालशोभः/वेष्टः; कर्णवेष्टः** व.; **दन्तपत्रः** हे.; **सूत्रबन्धः।** विश्लेषपदाय द्र. १२.७६। **६८. हारः=माल्यः** व.हे.अ.ना., **माला, मालः; लग्नोद्धृत=लग्नोन्नत** म.हे., **लम्बोद्धृत। ६९. अनुगता=अधिगता, अभिगता; प्राप्येन्द्रनीलं किमुतोन्मयूखम् = प्राप्योन्मयूखं किमुतेन्द्रनीलम्। ७०. मुक्तैः=संस्थैः** व.हे.अ.ना.; **तमायताक्ष्य=समायताक्ष्य।**

तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां ताम् ।
आकाशगङ्गा—रतिरप्सरोभिर्वृतो मरुत्वाननुयात—लीलः ।। ७१ ।।
यत् कुम्भयोनेरधिगम्य रामः कुशाय राज्येन समं दिदेश ।
तदस्य जैत्राभरणं विहर्त्तुरज्ञातपातं सलिले ममज्ज ।। ७२ ।।
स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव ।
दिव्येन शून्यं वलयेन बाहुमुपोढनेपथ्यविधिर्ददर्श ।। ७३ ।।
जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् ।
सेहेऽस्य न भ्रंशमतो न लोभात् स तुल्यपुष्पाभरणो हि धीरः ।। ७४ ।।
ततः समाज्ञापयदाशु सर्व्वानानायिनस्तद्विचये नदीष्णान् ।
वन्ध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादाः ।। ७५ ।।

(७१) रनिवास की उन प्रमदाओं के साथ उस उत्कृष्ट सरिता (सरयू) में जलविहार कर रहा कुश ऐसा लगा जैसे इन्द्र अप्सराओं के साथ आकाशगङ्गा में विहार करते समय लगा करता है। ('जलविहार कर रहे कुश से अप्सराओं के साथ आकाशगङ्गा में रत इन्द्र अनुयातलील कर दिया गया'— कवि के सदोष वाक्य का सदोष अनुवाद।) **(७२)** इसी बीच दुर्घटना घट गई। वह जो कड़ा राम को महर्षि अगस्त्य से मिला था, उत्तराधिकारी कुश की भुजा से वह सरयू में गिर गया और पता चला नहीं। वह कड़ा 'जैत्र' था अर्थात् उसे धारण करने वाला सदा विजयी ही होता था। **(७३)** कुश रानियों सहित जब जी भरकर स्नान कर चुका और तीर के तम्बू में पहुँचा, तो उसे अपना हाथ उस दिव्य वलय से रहित दिखाई दिया, जब वह कपड़े पँहन रहा था। **(७४)** कुश को कड़े का गुमना असह्य हो गया लोभ के कारण नहीं, अपितु दो कारणों से मुख्यतः, एक तो इसलिए कि वह जयश्री का खूँटा था और दूसरे इसलिए कि उसे उसके पिता (श्री राम) धारण पर चुके थे। वह इतना धीर था कि पुष्प और आभरण को तुल्य ही मानता था। **(७५)** कुश ने कुशल सभी जालिकों को आज्ञा दी, जो डूबी वस्तु की खोज में दक्ष थे। उनका प्रयत्न व्यर्थ हुआ और सरयू को छान कर उन्होंने आत्मविश्वास के कारण अम्लान मुखप्रसाद के साथ कहा।

७१. वृतो=जितो। ७३. सदारः = कुमारः; उपोढ=अपोढ म., **उदार; विधिः = विधिं। ७४. संवननं=संजननं, संजवनम्** म.हे.अ.ना.; **आमुक्तपूर्व्वं=आभुक्तमुक्तं** म.हे.अ.ना.; **णा च=णाऽपि; यस्मात्=पश्चात्; तुल्यपुष्पा=पुष्पतुल्या** हे.; **धीर=वीर** व.हे.। **७५. ततः समाज्ञा=स तानथाज्ञा; अम्लान=आम्लान** हे.; **प्रसादा=प्रसादम्, खावभास, रविन्दा** हे.; **रविन्दम्।**

कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते ।
नागेन नूनं कुमुदेन लौल्यादुपात्तमन्तर्ह्रदवासिना तत् ।। ७६ ।।
ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः ।
गारुत्मतं तीरगतस्तरस्वी भुजङ्गनाशाय समाददेऽस्त्रम् ।। ७७ ।।
तस्मिन् ह्रदः संहितमात्र एव क्षोभात् समाविद्धतरङ्गहस्तः ।
रोधांस्यभिघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास ।। ७८ ।।
तस्मात् समुद्रादिव मथ्यमानादुद्वृत्तनक्रात् सहसोन्ममज्ज ।
लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजङ्गराजः ।। ७९ ।।
विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ।। ८० ।।
त्रैलोक्यनाथप्रभवं प्रभावात् कुशं द्विषामङ्कुशमस्त्रविद्वान् ।
मानोन्नतेनाप्यभिवन्द्य मूर्ध्ना मूर्द्धाभिषिक्तं कुमुदो बभाषे ।। ८१ ।।

(७६) देव! हमने पूरा यत्न कर लियां, किन्तु जल में आपका उत्तम आभरण मिला नहीं। निश्चित ही उसे ले लिया है 'कुमुद' नाम के नाग ने। वह इसी कुण्ड में रहता है। निश्चित ही उसकी नियत डोल गई। (७७) कोप से लाल आँखों वाले तरस्वी धनुर्धर कुश ने धनुष खींचा, प्रत्यञ्चा चढ़ाई और भुजङ्गनाश के लिए तीर पर से, गारुत्मत अस्त्र का सन्धान किया। (७८) संधान करते ही सरयू जल के उस कुण्ड में हलचल मच गई और भीषण तरङ्ग उठी। लगा कि इसमें कोई हाथी डूबा हुआ था, वह निकल रहा है। उसने तटों को तो तोड़ ही डाला था। भयंकर स्वर में वह गरज भी रहा था। (७९) इस उपद्रव से नक्र तो हो गए नष्ट और मथ्यमान समुद्र के जैसे उस कुण्ड से लक्ष्मी को साथ लिए पारिजात के समान प्रकट हुआ अपनी बहिन के साथ भुजङ्गराज कुमुद। (८०) कुमुद के हाथ में रखा था वही विभूषण जो सरयू में गिर गया था। वह उसे लौटाने के लिए उपस्थित था। राजा कुश ने उस स्थिति में उसे देखा तो सौपर्ण अस्त्र लौटा लिया। सत्पुरुषों का यह स्वभाव ही है कि वे नम्र पर रोष बनाए रखना नहीं चाहते। (८१) कुमुद को अस्त्र का ज्ञान था। वह जानता था कि सौपर्ण अस्त्र नागजाति के लिए कितना घातक है। उसने कुश से कहा — 'आप त्रैलोक्यनाथ

---

७६. नूनं कुमुदेन लौल्यात्=लौल्यात् कुमुदेन नूनम् म.हे.अ.ना.। **७७. तरस्वी=तपस्वी; समाददे=समादधे** व.हे.। **७८. एव=एवं; क्षोभात्=क्रोधात्** हे.; **अभिघ्नन्=अभिन्दन्** अ.ना., **धेन भिन्दन्=निघ्नन्; अवपात=पिपात; वन्यः= मत्तः**। **७९. वृत्त=विग्न**। **८१. कुशमस्त्रविद्वान्=कुशवस्तुविद्वान्, कुशमाशुविद्वान्** व., **कुशवद् विदित्वा, कुशमाविदित्वा** म.हे.अ.ना.; **वन्द्य=नन्द्य; मूर्धाभिषि=मूर्ध्नाभि, सुधावसिक्तो** अ.ना., **कुशाभिषिक्तो**

अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वाम् ।
सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातम् ॥८२॥
कराभिघातोत्थितकन्दुकेयमालोक्य बालाऽतिकुतूहलत्वात् ।
ह्रदात् पतज्ज्योतिरिवान्तरिक्षादादत्त जैत्राभरणं त्वदीयम् ॥८३॥
तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन ॥८४॥
इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नाऽनुमन्तुम् ।
आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव! पदयोस्ते ॥८५॥

इत्यूचिवानुपहृताभरणः क्षितीशं
श्लाघ्यो भवान् स्वजन इत्यभिभाषितारम् ।
संयोजयां विधिवदास समेतबन्धुः
कन्यामयेन कुमुदः कुलभूषणेन ॥८६॥

पुरुषोत्तम भगवान् राम के पुत्र हैं, प्रभाव में आप शत्रुओं के अंकुश हैं' इतना कहकर मानोन्नत सिर झुकाकर मूर्धाभिषिक्त कुश से कुमुद बोला– (८२) 'मुझे विदित है कि आप प्रयोजनवशात् मनुष्य शरीर में आए विष्णु भगवान् के द्वितीय रूप हैं, पुत्र के रूप में। मैं आपको आराधनीय मानता हूँ, आपको क्षुभित मैं कैसे कर सकता हूँ। (८३) हुआ यह कि मेरी छोटी बहन गेंद उछाल उछालकर खेल रही थी। इसे दिखाई दी इस कुण्ड में गिरती हुई यह ज्योति, अन्तरिक्ष से तारे की नाँई। इससे कुतूहलवश इसने पकड़ लिया आपका यह 'जैत्र' आभरण। (८४) यह आपकी ही भुजा में शोभा दे। आपकी भुजा जानु तक लम्बी है। इसमें प्रत्यञ्चा के आघात का किण (चिह्न) है, यह भूमि की रक्षा का परिघ है, अंसल तो यह है ही। (८५) साथ ही मेरी इस छोटी बहन कुमुद्वती को भी अस्वीकार न करें। यह आपके चरणों की निरन्तर सेवाकर अपने अपराध का मार्जन चाहती है। (८६) यह कहकर कुमुद ने जैत्र आभरण कुश को भेंट किया। कुश ने कहा 'आप श्लाघनीय स्वजन हैं'–

म.हे.। ८२. त्वां=ताम्। ८३. त्थित=च्छ्रित व.; ति=तु; हलेन=हलात्; ह्रदात् पतत्=जवात् पतत् अ.ना., लजात् पतत्, ओघात् पतत्, पदात् पतत्, बाहो पतत्; औत्पातिकं=उत्पातित; रिक्षात्=रीक्षात्। ८४. रेखाकिण=लेखाकिण व.हे., लेखास्थिर लेखास्थित। ८५. आत्मापराधं = आत्मोपरोधं, निजापराधं म.हे.अ.ना.। ८६. ऊचिवान्=उक्तवान्; उपहृता=उपहिता, उपचिता; भरणः = भरणं हे.; अभिभाषितारम्=इति भाषितारम्, अनुभाषितारम् म., अनुभाषितः सन्; संयोजया=तं योजया अ.ना., आसञ्जया; समेतबन्धुः = समग्रबन्धुः, तमेकबन्धुम्।

तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते
माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य ।
दिव्यस्तूर्यध्वनिरुदचरद् व्यश्नुवानो दिगन्तान्
गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः ।। ८७।।

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं
लब्ध्वा बन्धुं तमपि च कुशः पञ्चमं तक्षकस्य ।
एकः शङ्कां पितृवधरिपोरत्यजद् वैनतेया–
च्छान्तव्यालामवनिमपरः पौरकान्तः शशास ।। ८८।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ कुमुद्वतीलाभो नाम
षोडशः सर्गः ।।१६।।

तो बन्धुबान्धवों सहित कुमुद ने कुलभूषण कन्या कुमुद्वती से कुश को विधिवत् मिला दिया। (८७) राजा ने जब सहधर्माचरण के लिए माङ्गल्य ऊर्णालय डला हाथ प्रज्वलित अग्नि के सामने ग्रहण किया तो आकाश में दिव्य तूर्य बज उठे, जिसकी ध्वनि चहुँओर आकाश में फैल गई और तीव्र गन्धवाले पुष्पों की वर्षा हुई आश्चर्य मेघों से। (८८) इस प्रकार त्रिभुवनगुरु परमात्मा (राम) के औरस पुत्र मैथिलेय कुश को बन्धु के रूप में पाकर तो नाग मुक्ति पा गया पिता के हन्ता गरुड के भय से और कुश भी तक्षक के पञ्चम वंशधर कुमुद को संबन्धी पाकर मुक्ति पा गया पृथिवी पर नागों के भय से।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में कुमुद्वतीलाभ नामक षोडश सर्ग पूर्ण हुआ।। १६।।

---

८८. **पितृवध=विषधर** व.हे., **अहिकुल, अहिवर; शान्त=भद्र।**

।। सप्तदशः सर्गः ।।

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ।।१।।
स पितुः पितृमान् वशं मातुश्चानुपमद्युतिः ।
अपुनात् सवितेवोभौ मार्गावुत्तरदक्षिणौ ।।२।।
तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता ।।३।।
जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः ।
अमन्यतैकमात्मानमनेकं वशिना वशी ।।४।।
स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ।
जघान समरे दैत्यं दुर्जयं तेन चावधि ।।५।।
तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी ।।६।।

(१) यामिनी के अन्तिम याम से जैसे चेतना प्रसाद को प्राप्त करती है वैसे ही कुश से कुमुद्वती ने प्राप्त किया 'अतिथि' नामक पुत्र। (२) वह पुत्र ऐसा था जिसकी द्युति की तुलना नहीं। उसने पिता और माता दोनों के वंशों को पवित्र कर दिया जैसे सूर्य कर देता है पवित्र उत्तर और दक्षिण के दोनों मार्गों को। (३) अर्थ (शब्दार्थ तथा दान, संग्रहादि प्रयोजन) के उत्तम वेत्ता उस कुश ने अतिथि को पहले तो कुलविद्याओं (आन्वीक्षिकी, त्रयी, वार्त्ता, दण्डनीति) का अर्थ ग्रहण कराया पश्चात् ग्रहण कराए राजकन्याओं के पाणि। (४) एक कुश ने अतिथि से स्वयं को अनेक समझा। क्यो नहीं? कुश जात्य (कुलीन) था तो अतिथि भी अभिजात था, कुश शूर था तो अतिथि भी शौर्यवान् था और कुश वशी था तो अतिथि भी वशी। (५) कुश अपने कुल की परम्परा के अनुसार इन्द्र की सहायता में युद्धार्थ स्वर्ग गया। उसने 'दुर्जय' नामक दैत्य को मारा, किन्तु उसके हाथ से स्वयं भी मारा गया। (६) नागराज कुमुद की बहिर्न कुमुद्वती भी उसी कुमुदानन्द के पीछे चली, जैसे कुमुदानन्द शशांक के पीछे

१. आप=प्राप म.; चेतना=चेतनाम्। ३. वरः=पुरः ४. जात्यः=जन्यः, जातः, अथ; वता=वतां।
५. साहायकम्=साहायिक व.; दुर्जयं=अजय्यम्, दुर्गमे, महीशः; चावधि=सोऽवधि।

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी ।। ७।।
तदात्मसंभवं राज्ये मन्त्रिवृद्धा समादधुः ।
स्मरन्तः पश्चिमामाज्ञां भर्तुः संग्रामयायिनः ।। ८।।
ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः ।
विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठतम् ।। ९।।
तत्रैनं हेमकुम्भेषु संभृतैस्तीर्थवारिभिः ।
उपतस्थुः प्रकृतयो भद्रपीठोपवेशितम् ।।१०।।
नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः ।
अन्वमीयत कल्याणं तस्याविच्छिन्नसन्तति ।।११।।
दूर्वा—यवाङ्कुर—प्लक्ष—त्वगभिन्न—पुटोत्तरान् ।
ज्ञातिवृद्धैः प्रयुक्तान् स भेजे नीराजनाविधीन् ।। १२।।

कौमुदी चली जाती है। (कुमुद नागराज तथा कुमुद रात्रिकमल।) (७) उन दोनों में से एक ने तो प्राप्त किया दिवस्पति इन्द्र का आधा आसन और दूसरी बनी शची की सखी तथा पारिजात के अंश की भागिनी। (८) कुश के आत्मज अतिथि को वृद्ध मन्त्रियों ने राज्य में अभिषिक्त कर दिया। कुश संग्राम में जाते समय यही अन्तिम आदेश दे गया था, उसी को याद किया गया। (९) उन मन्त्रियों ने शिल्पियों द्वारा ऊँची कुर्सी के ऊपर चार स्तम्भों पर प्रतिष्ठित एक नवीन विमान बनवाया। (१०) उस पर प्रतिष्ठित जो भद्रपीठ था उस पर अतिथि को बिठलाया गया और जनता के समक्ष मन्त्रियों ने सुवर्णघटों मे सञ्चित तीर्थजलों से किया उसका अभिषेक। (११) तुरही और मृदङ्ग बजने लगे। उनके स्वर स्निग्ध भी थे और गम्भीर भी। उनसे अनुमान लग गया कि अतिथि का कल्याण ही कल्याण होगा और होता ही रहेगा। (१२) अतिथि की नीराजनाविधियाँ संपन्न कीं अपने कुल के वृद्धों ने। उन विधियों में दूर्वाङ्कुर, यवाङ्कुर और पाकड़ की छाल के छिद्ररहित दोने थे।

७. द्वितीया=अपरा; ऽपि=च; भागिनी=भाजिनी व.। ८. मन्त्रि=मन्त्र। ९. शिल्पिभिः=शालि/त्रिभिः; विमानं= वितानं; नवमुद्वेदि=रत्नमुद्वेदि। १०. उपतस्थुः=अभितस्थुः; भद्रपी=भर्त्तृपी, पितृपी; ठोपवेशितम् = ठे निवेशितम् व.हे., पीठनिवेशितम्, ठ/ठै प्रतिष्ठितम्, ठोपवेशितम्, पितृसिंहासन—स्थितम्, ठोपवेशिनम्। ११. आहत=प्रहत, प्रहत; विच्छिन्न, व्युच्छिन्न; सन्तति=सन्ततेः व.अ.ना.। १२. 'त्तरान्—क्तान्—विधीन्'='त्तरम्—क्तम् हे.अ.ना., विधिम्' हे.अ.ना.; त्तरान्=त्तमान्; पुटो=पटो; टोत्तरम्=टोदरम्; ज्ञाति=जाति, प्रजा, मन्त्रि, वृद्धैः=वृद्ध; स=च।

पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ।
उपचक्रमिरे पूर्वमभिषेक्तुं द्विजोत्तमाः ।।१३।।
तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत ।
सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ।।१४।।
स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वन्दिभिः ।
प्रवृष्ट इव पर्जन्यः सारङ्गैरभिनन्दितः ।।१५।।
तस्य सन्मन्त्रपूताभिः स्नानमद्भिः प्रतीच्छतः ।
ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ।।१६।।
स तावदभिषेकान्ते स्नातकेभ्यो ददौ वसु ।
यावतैषां समाप्येरन् यज्ञाः पर्याप्तदक्षिणाः ।।१७।।
ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् ।
सा तस्य कर्म्मनिर्वृत्तैर्दूरं पश्चात् कृता फलैः ।।१८।।
बन्धच्छेदं स बद्धानां बधार्हाणामवध्यताम् ।
धुर्याणां च धुरो मोक्षमदोहं चादिशद् गवाम् ।।१९।।

(१३) पुरोहित को आगे कर उत्तम ब्राह्मणों ने उस जिष्णु (अतिथि) का अभिषेक जैत्र अथर्वमन्त्रों से आरम्भ किया। **(१४)** उसके सिर पर अभिषेकश्री मोटी मोटी धाराओं में गिरने लगी। उसमें शब्द वेदमन्त्रों का ही था। वह ऐसी लगी जैसी कभी शंकर के सिर पर गिरती गंगा लगी थीं। **(१५)** इसी समय वन्दियों ने की उसकी स्तुति। तब वह ऐसा लगा जैसे बरस रहा पर्जन्य लगता है सारङ्गों द्वारा जिसकी स्तुति हो रही हो। **(१६)** सन्मन्त्रों से पवित्र जलों से स्नान कर रहे उसकी कान्ति और बढ़ी जैसे बिजली की अग्नि की द्युति वृष्टिसेक से और और बढ़ती जाती है। **(१७)** अभिषेक के अन्त में उसने स्नातकों को उसका धन दिया, जितना उन्हें पर्याप्त दक्षिणा के यज्ञों की पूर्ति में अपेक्षित था। **(१८)** स्नातकों ने प्रसन्नचित्त से अतिथि को जो आशीर्वाद दिया उसे कर्म से अर्जित फलों ने बहुत पीछे छोड़ दिया। **(१९)** उस अवसर पर अतिथि ने बन्दी बने अभियुक्तों के बन्धन काटने का आदेश दिया, वध्यों को अवध घोषित किया, बैलों को जुए से मुक्त कर दिया और आदेश कर दिया गौओं

१३. जैत्रै=मन्त्रै; षेक्तुं=षेकं; द्विजोत्तमाः = द्विजातयः म.अ.ना.। **१४. व्यरोचत=व्यराजत** हे.; **गङ्गेव त्रिपुरद्विषः = गङ्गेवाद्रेरघापहा। १५. स्तूयमानः = स्तूयमाने; प्रवृष्ट= प्रवृद्ध; सारङ्गैः = चातकै** हे.अ.ना. **; नन्दितः = नन्द्यते। १६. सन्मन्त्र=तन्मन्त्र; पूता=पूजा। १७. वसु=धनम्; यावतैषां=यावदेषां** व.म.हे. अ.ना., **यावत् तेषां। १८. निर्वृत्तै=निर्वृत्त्यै, निर्बन्धैः; दूरं पश्चात्=पश्चाद् दूरं। १९. दिशद्=शिषद्** हे.।

क्रीडापतत्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः।
लब्धमोक्षास्तदादेशाद् यथेष्टगतयोऽभवन्।।२०।।
ततः कक्ष्यान्तरन्यस्तं गजदन्तासनं शुचि।
सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः।। २१।।
तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः।
आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः।। २२।।
तेऽस्य मुक्तागुणाऽऽनद्धं मौलिमभ्यन्तरस्त्रजम्।
प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना।। २३।।
चन्दनेनाङ्गरागं च मृगनाभिसुगन्धिना।
समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम्।। २४।।
आमुक्ताभरणः स्त्रग्वी हंसचिह्नदुकूलवान्।
आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः।। २५।।

को न दुहने का। (२०) यहाँ तक कि जो क्रीडापक्षी थे शुक आदि पिजरों मे बद्ध, वे भी मोक्ष को प्राप्त कर यथेष्टगति हो गए। (२१) इसके पश्चात् दूसरे कक्ष में रखे एक पवित्र और चद्दर से ढँके गजदन्तासन पर बिठलाया गया अलंकरण के लिए। (२२) प्रसाधनकला में निपुण गुणीजनों ने जल से भलीभाँती हाथ धोये, सुगन्धित धूप से केश सुखाए और अंलकरण के विभिन्न साधनों के साथ वे अतिथि के पास पहुँचे। (२३) उन्होंने अतिथि की मौलि मे मोती लगाए, मालाएँ बाँधी और प्रभामण्डल से शोभित पद्मराग उसमें पिरो दिया। (२४) कस्तूरी से सुगन्धित चन्दन से अङ्गराग पूरा लगा लेने पर उस पर रोचनों के पत्र बनाए। (२५) राज्यश्रीरूपी वधू का वर वह अतिथि और सुन्दर लगा जब उसे आभरण पहना दिए गए, मालाएँ भी पँहना दी गईं और हंसचिह्नित दुकूल उढ़ा दिया गया।

२०. पञ्जर=बन्धन अ.ना.। **२१. कक्ष्यान्तर=कक्षान्तर** व.हे.; **न्तरन्यस्त=रे न्यस्तं; शुचि=शुचिः; नेपथ्य=नैपथ्य। २२. धूपा=धूमा; निर्णिक्त=निर्धूत; प्रसाधकाः=प्रसाधिकाः** व.अ.ना.। **नाट्यशास्त्रकादम्बर्योः साक्ष्येण प्रसाधिकापाठ साधीयानपि ‘त’ इत्यग्रिमेण सर्वनाम्ना नास्य समर्थनम्। २३. तेऽस्य=तस्य** व.हे.अ.ना.; **गुणाऽऽन=गुणोन्न** म.अ.ना., **गुणैर्न; अभ्यन्तरस्त्र=अन्तर्गतस्त्र** व.हे.अ.ना.; **प्रत्यूपुः=प्रत्यूहुः; शोभिना=बन्धिना** अ.ना., **वर्त्तिना** हे., **वर्द्धिना, वर्षिणा। २४. समापय्य=समापा/पद्य, विरचय्य। २५. भरणः=भरणं; चिह्न=चित्र; वान्=भृत्, भाक्** म.हे.अ.ना.।

नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये ।
विरराज नवे सूर्ये मेरौ कल्पतरोरिव ।। २६ ।।
स राजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः ।
ययावुदीरितालोकः सुधर्म्माऽनवमां पुरीम् ।। २७ ।।
वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ।। २८ ।।
शुशुभे तेन चाक्रान्तं मङ्गलायतनं महत् ।
श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव कैशवम् ।। २९ ।।
बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः ।
रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः ।। ३० ।।

(२६) उसने अपना अलंकरण सोने के आदमकद शीशे (आदर्श) में देखा तो उसकी छाया वैसी लगी जैसी उषःकाल मे सुमेरु पर कल्पतरु की लग सकती है। (२७) अलंकरण धारण कर अतिथि अब संसद में पहुँचा जो देवसभा सुधर्मा से छोटी नहीं थी। उसके पास में थे राजचिह्न (छत्र चँवर आदि) धारण किए हुए आसन्न परिचारक। वे जय–जयकार के नारे लगाते जा रहे थे। (२८) वहाँ वह बैठा वितानयुक्त पैतृक आसन पर, जिसके सामने रखा पादपीठ राजाओं की चूडामणियों से घिसा हुआ था। (२९) उसके बैठने से वह अत्युकृष्ट माङ्गलिक महान् पीठ उसी प्रकार सुशोभित हुआ जिस प्रकार भगवान् विष्णु का श्रीवत्स–अंकित वक्षःस्थल कौस्तुभ से सुशोभित लगता है। (३०) अतिथि अभी कुमार ही था कि अधिराज बन गया। यह क्रान्ति वैसी ही थी कि प्रतिपद् का रेखात्मक चन्द्र पूर्णिमा का चन्द्र बना दिया जाए। (हमारी दृष्टि से यह अभिप्राय इस प्रकार व्यक्त किया जाना चाहिए)

बभौ पूर्णं कुमारत्वादेव राज्यमवाप्य सः ।
बालः प्रतिपदश्चन्द्रः शिरः पशुपतं यथा ।।

२६. रराज नवे=रराजोदिते; मेरौ कल्प=मेरुकल्प। २८. क्षिताम्=भुजाम् व., भृताम् हे.। २९. मङ्गला=मण्डला; लक्षणं= लाञ्छनं। ३०. रेखा=लेखा अ.ना.; भावा=मात्रा; रूढः = वृत्तः। अस्मदुपकल्पितस्तु पाठः —

बभौ पूर्णं कुमारत्वादेव राज्यमवाप्य सः ।
बालः प्रतिपदश्चन्द्रः शिरः पाशुपतं यथा ।।

प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम् ।
मूर्त्तिमन्तममन्यन्त विश्वासमनुजीविनः ।। ३१ ।।
स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्वजाम् ।
क्रममाणश्चकार द्यां नागेनैरावतौजसा ।। ३२ ।।
तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामलत्विषा ।
पूर्व्वराजवियोगौष्म्यं कृत्स्नस्य जगतो हृतम् ।। ३३ ।।
धूमादग्नेः शिखा पश्चादुदयादंशवो रवेः ।
सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ।। ३४ ।।
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ।
शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य्य इव ध्रुवम् ।। ३५ ।।
अयोध्यादेवताश्चैनं प्रशस्तायतनार्च्चिताः ।
अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैः ।। ३६ ।।

(३१) अतिथि का मुखराग सदा प्रसन्न रहता। जब बोलता तब स्मितपूर्वक। अतः अनुयायी जन उसे मूर्त्रिमान् विश्वास मानने लगे। (३२) अब अतिथि की नगरयात्रा निकली। हाथी पर बैठा अतिथि ऐरावत जैसे ओजस्वी हाथी पर अयोध्या नगरी में घूम रहा है। लग रहा था जैसे वह नगरी स्वर्ग बन गई थी, उसमें जगह जगह ध्वज लगे हुए थे जो स्वर्ग के कल्पवृक्षों पर लगे दिखाई देते हैं। (३३) धवल छत्र तो फैला उस एक अतिथि के सिर पर किन्तु अमलकान्ति वाले उसने पूर्वराजवियोगोष्मा हटा दी सारे संसार की। (३४) अग्नि से धुआँ पहले उठता है अग्निशिखा उसके पश्चात् इसी प्रकार सूर्य का उदय पहले होता है, किरणें निकलती हैं तदनन्तर किन्तु अतिथि ने अपनी तेजस्विता में क्रम की यह प्रतिबद्धता हटा दी और सभी गणो के साथ वह साथ साथ उठा। (३५) पुरभ्रमण में नगर की महिलाएँ अतिथि को प्रीतिविशद नेत्रों से देखती रहीं, उसी प्रकार जिस प्रकार शरत् की प्रसन्न तारिकाओं से रात्रियाँ देखती हैं, ध्रुव को (द्र. रघु.४.२७)। (३६) प्रशस्त आयतनों मे पूजे जा रहे अयोध्या के देवताजन अतिथि पर दृष्टिपात कर रहे थे प्रतिमाओं में आविष्ट हो होकर।

३१. भाषिणम्=भाषणम् व.; अनु=उप। **३२.** ध्वजाम्=ध्वजम् म.हे.अ.ना.; नैरावतौजसा=नैरावतौजसा, नैरावणौजसा, नैरावतौजसाम्, नामिततेजसा म.हे.अ.ना.। **३३.** उच्छ्रितं=उद्धृतं; छत्रं मूर्ध्नि=मूर्ध्निच्छत्रं; गौष्म्यं म.= गोष्णं, गोस्मं, गोष्मा हे., गोष्णः। **३४.** धूमाद=धूमस्या अ.ना.; शिखा=शिखाः म.; उदयादं=उदयस्यां; तेजसां=तेजसा व., तेजसां। **३५.** विशदैः = विशदं; ध्रुवम्=उडुपम् अ.ना.। **३६.** प्रशस्ता=प्रशस्या; ध्येयं=ग्राह्यम्।

यावन्नाश्यायते वेदिरभिषेकजलाप्लुता ।
तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः ।। ३७।।
वसिष्ठस्य गुरोर्मन्त्राः सायकाश्चास्य धन्विनः ।
किं तत् साध्यं यदुभये साधयेयुर्न संगताः ।। ३८।।
स धर्म्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान् व्यवहारानतन्द्रितः ।। ३९।।
ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः ।। ४०।।
प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः ।
तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः ।। ४१।।
यदुवाच न तन्मिथ्या यद् ददौ न जहार तत् ।
सोऽभूद् भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ।। ४२।।
वयो–रूप–विभूतीनामेकैकं मदकारणम् ।
तानि तस्मिन् समस्तानि न चास्योत्सिषिचे मनः ।। ४३।।

(३७) अभिषेक जल से भीगी वेदी भी जब तक नहीं सूखी थी तभी तक उसका दुःसह प्रताप समुद्रतट तक फैल गया। (३८) गुरु वसिष्ठ के मंत्र और उस धनुर्धर के बाण। वह कौन सा साध्य है, ये दोनों मिल जाएँ तो, जो सिद्ध न हो जाए। (३९) वह धर्मस्थ अधिकारियों के साथ अर्थिप्रत्यार्थियों के बाद सदा स्वयं सुनता और संशय के कारण अवश्य निर्णयों पर निर्णय लेता। (४०) उसके बाद वह जो सूचनाएँ पाता उनके भावी परिणामों के अनुरूप फलों से भृत्यों को समृद्ध कर देता। उसके सौमनस्य से उनकी सूचना पहले ही मिल जाती। (४१) अतिथि के पिता कुश ने प्रजा की जो वृद्धि की थी वह श्रावण की नदियों जैसी थी, अतिथि ने उसकी वृद्धि वैसी की जैसी नदियों की भाद्रमास में होती है। (४२) उसने जो कहा वह मिथ्या नहीं हुआ, जो दे दिया उसे वापस हरण नहीं किया किन्तु उसका यह व्रत टूट गया जब उसने शत्रुओं को उखाड़ कर वापिस प्रतिरोपित कर दिया। (४३) वय, रूप और विभूति इनमें से एक एक भी मद उत्पन्न करते देखे गए हैं। अतिथि में ये तीनों ही थे, किन्तु

३७. वेदिः = भूमिः; जलाप्लुता=जलप्लुता व.हे., **परिप्लुता, जले प्लुता; दुःसहः = दुःसहम्। ३८. चास्य=तस्य** म.हे.अ.ना.; **संगताः = संहताः। ३९. धर्मस्थ=धर्मार्थ, धर्मज्ञ** म.हे.अ.ना., **धर्मस्थः; छेद्यान्=छेदी, छेदान्, छेदात्, छेत्ता, छेदि। ४०. व्यक्त=व्यक्तैः। ४१. तु=च; नभस्ये ता इवाययुः = नभस्य इव तां ययुः। ४२. उद्धृत्य=उत्खाय** व.। द्र. अत्रैव ४.३६–३७। **४३. रूप=वेष/श** ना.;

इत्थं जनितरागासु प्रकृतिष्वनुवासरम् ।
अक्षोभ्यः स नवोऽप्यासीद् रूढमूल इव द्रुमः ।।४४।।
अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते सदा ।
अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद् रिपून् ।।४५।।
प्रमादविमुखे तस्मिंश्चपलापि स्वभावतः ।
निकषे हेमलेखेव श्रीरासीदनपायिनी ।।४६।।
कातर्यं केवला नीतिः शौर्यञ्चाऽपदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ।।४७।।
न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत् किञ्चिद् व्यभ्रस्येव विवस्वतः ।।४८।।

उसके मन में उत्सेक नहीं उपजा। (४४) इस प्रकार अतिथि का प्रकृति (अमात्य, जनता) मण्डल रोज रोज उसके प्रति अनुरक्त होता गया, फलतः वह नया होने पर भी अक्षोभ्य था, कँपाया नहीं जा सकता था, खूब जमीं जड़ के वृक्ष के समान। (४५) जो शत्रु बाहर के होते हैं एक तो वे होते हैं अनित्य और दूसरे रहते हैं दूर। इस कारण अतिथि ने पहले जीते भीतर छिपे छः नित्य शत्रु (काम, क्रोध, लोभ, मोह, मद और मत्सर)। (४६) अतिथि प्रमाद से विमुख रहता था, अतः स्वभाव से चपल लक्ष्मी भी उसमें निष्कण्टक बनी रही, कसौटी पर सुवर्ण रेखा के समान। (४७) केवल नीति तो कातरता होती है, केवल शौर्य है चपलता। अतः अतिथि ने दोनों को मिलाकर प्राप्त की सिद्धि। (ब्राह्मी में 'श्चा' तथा 'श्वा' की लिपि में भ्रम सम्भव।) (४८) अतिथि के गुप्तचर सर्वत्र व्याप्त थे, अतः उस अतिथि के राजमण्डल में कुछ भी अदृष्ट नहीं था, उसी प्रकार जिस प्रकार निरभ्र सूर्यमण्डल में।

तानि तस्मिन्=तस्मिंस्तानि;समस्तानि=समेतानि;चास्य=तस्य म.; **उत्सिषिचे=उपाहरन्। ४. रूढ=बद्ध** हे., **दृढ** म.। ४५. **ते=मे; सदा=यतः** म.हे.अ.ना.; **अभ्यन्तरान्=अन्तर्गतान्। ४६. प्रमादविमुखे=प्रसादसुमुखे** व.हे., **प्रसादाभिमुखे** म, **प्रसादसन्मुखे, प्रसाद्मुखेन, प्रमदाक्षादिविमुखे; चपला=चटुला, चञ्चला; लेखेव= रेखेव।** द्र. रघुवंश ४.१८, ९.७; कुसं. २.१६। **४७. र्यञ्चापद = र्यं श्वापद** म.हे.अ.ना., **र्यञ्चापल, र्यं साहसचे।** द्र. रघु. ११.८७। अत्र ब्रूमः –

समुच्चायकलाभश्च क्रमनिर्वाह एव च। अर्थव्यक्तौ दृढत्वञ्च पाठे नः साधका गुणाः।।

१. चस्य लाभः, २. नीताविव शौर्येऽप्युपमानस्यापादनात्, ३. अवश्यवक्तव्यस्यौचित्याभावस्याऽपद–पदद्वाराऽभिधयैव साक्षादुपस्थापनात् काप्र.–२। ४८. **राज्ञो= राज्ञां; अदृष्ट=अदृश्य; व्यभ्रस्ये=नभस्ये।**

रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ।।४९।।
मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः ।
न जातु सेव्यमानोऽपि गुप्तद्वारः स्म भिद्यते ।।५०।।
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ।।५१।।
भव्यमुख्याः समारम्भाः प्रत्यवेक्ष्या निरत्ययाः ।
गर्भशालिसधर्म्माणस्तस्य गूढं विपेचिरे ।।५२।।
अपथेन प्रववृते न जातूपचितोऽपि सः ।
वृद्धौ नदीमुखेनैव प्रस्थानं हि सरित्पतेः ।।५३।।

(४९) राजाओं के लिए रात्रि और दिन के जो विभाग जिस कार्य के लिए निश्चित किए गए हैं, उनका पालन वह उसी दृढ़ता के साथ करता था। उनमें कभी विकल्प न आने देता। (५०) मन्त्रियों के साथ उसकी मन्त्रणा तो प्रतिदिन होती थी, किन्तु उसके द्वार छिपे रहते और उसका उपयोग होते रहने पर भी उसकी भनक किसी को न मिलती। (५१) अन्य लोगों में भी और अपने लोगों में भी लगे गुप्तचर परस्पर में अपरिचित रहते और वे अतिथि को यथाकाल सोने पर जगा लिया करते थे। (५२) उस राजा के सभी कार्य कल्याण प्रधान होते, वह यह देखता रहता कि कितना कार्य हो चुका है और कितना होना शेष है। उसके कार्यों में विघ्न नहीं आते थे, अतः वे सफल ही होते थे 'गर्भशाली' के समान। (गर्भशाली जो गर्भ में पक जाते हैं– मल्लिनाथ।) (५३) उन्नति होने पर भी वह अपथ में प्रवृत्त न होता। समुद्र में ज्वार भी आता है तब भी वह नदीमार्ग से ही ऊपर उठता है।

४९. गेषु=गेन व.; क्षिताम् म.हे.अ.ना., भृताम्, भुजाम्; नियोगेन=भियोगेन, भियोगेषु। ५०. न=स हे.अ.ना.; गुप्तद्वारः, गूढद्वाः, गुप्ताचारः म.हे.अ.ना.; स्म=न, हि; भिद्यते=सूच्यते म.हे.अ.ना.। ५१. च क्षिप्तैः = निक्षिप्तैः, संक्षिप्तैः, विक्षिप्तैः; कालं स्व=कालस्व। ५२. वेक्ष्या निर=वेक्षानिर; गर्भशालि=शालिगर्भ; विपेचिरे=विफेलिरे। ५३. अपथेन=अपथे न म.हे.अ.ना.; प्रववृते=प्रवृत्तेन, प्रवृत्तोऽभूत्; न=सः; सः = सन्; मुखेनैव=मुखेनेव; हि सरित्पतेः = लवणाम्भसः म.अ.ना.। द्र. रघुवंश १२.७०।

दुर्गाणि दुर्ग्रहाण्यासंस्तस्य रोद्धुरपि द्विषाम् ।
न हि सिंहो गजास्कन्दी भयाद् गिरिगुहाशयः ।।५४।।
कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः ।
यस्य कार्यः प्रतीकारः स तन्नैवोदपादयत् ।।५५।।
शक्येष्वेवाभवद् यात्रा तस्य शक्तिमतः सतः ।
समीरणसहायोऽपि नाम्भःप्रार्थी दवानलः ।।५६।।
न धर्म्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ।।५७।।
हीनान्यनुपकर्त्तॄणि प्रवृद्धानि विकुर्व्वते ।
तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः ।।५८।।
परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम् ।
ययावेभिर्बलिष्ठश्चेत् परस्मादास्त सोऽन्यथा ।।५९।।

(५४) वह शत्रुओं को स्वयं भी रोक लेता था, तब भी उसने कठिन दुर्ग बनवा रखे थे। (गज को आक्रान्त कर देने वाला) सिंह गिरिगुहा में इसलिए थोड़े ही सोता है कि उसे किसी से भय होता है। **(५५)** जनता का वैराग्य माना कि शीघ्र ही शान्त किया जा सकता है, किन्तु उसने ऐसा कोई कार्य ही नहीं किया जिसका प्रतीकार करना पड़े। **(५६)** वह था तो शक्तिशाली किन्तु वह चढ़ाई योग्य शत्रु पर ही करता था। दवानल के साथ वायु भी रहे तब भी वह पानी से संघर्ष नहीं लेता। **(५७)** उसने अर्थ और काम से धर्म में बाधा नहीं पहुँचाई और न उन (अर्थ—कामों) को उस (धर्म से) न अर्थ को काम से और काम को अर्थ से। वह तीनों में समान रहता। **(५८)** उसने उन्हें मित्र बनाया जो मध्यमशक्ति के थे। जो हीनशक्ति उनसे कोई लाभ नहीं होता और जो प्रवृद्ध होते हैं वे हानि भी कर सकते हैं। **(५९)** शत्रु और अपनी शक्ति आदि का बलाबल समझ कर बलिष्ठ होता, तो करता चढ़ाई, अन्यथा बैठा रहता।

५४. **दुर्ग्रहाण्या=दुर्गमाण्या** हे.; **रोद्धु=योद्धु** हे., **जेतु; न हि सिंहो=सिंहो हि न।** ५५. **सद्यः=सत्यम्; उदपादयत्=उपपादयेत्** अ.ना.। ५६. **दवानलः=दवोनलः।** ५७. **अर्थेन=अर्थेषु।** ५८. **हीनानि= क्षीणानि, दीनानि; कर्त्तॄणि=काराणि, कारीणि; प्रवृद्धानि=विवृद्धानि।** ५९. **परिच्छिद्य=व्यतिच्छिद्य; एभिर्बलिष्ठः=एभिर्विशिष्ट, अतिविशिष्ट, अधिविशिष्ट, अरि/रीन् विशिष्ट/बलिष्ठ; परस्मात्= परस्तात्।**

कोशादाश्रयणीयत्वमिति तस्यार्थसंग्रहः ।
अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते ।। ६० ।।
परकर्म्मापहः सोऽभूदुद्यतः स्वेषु कर्म्मसु ।
आवृणोदात्मनो रन्ध्रं रन्ध्रे च प्राहरद् द्विषः ।। ६१ ।।
पित्रा संवर्धितो नित्यं कृतास्त्रः साम्परायिकः ।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ।। ६२ ।।
सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः ।
स चकर्ष परस्मात् तदयस्कान्त इवायसम् ।। ६३ ।।
वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव ।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ।। ६४ ।।
तपो रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च संपदः ।
यथास्वमाश्रमैश्चक्रे वर्णैरिव षडंशभाक् ।। ६५ ।।

(६०) वह अर्थ का संग्रह भी करता था, क्योंकि कोष से आश्रयणीयता आती है। देखा ही जाता है कि चातक उसी मेघ का अभिनन्दन करते जिसमें पानी रहता है। (६१) दूसरे की योजना को वह बिगाड़ता रहता अपनी योजनाओं में ज़ागरूक रहते हुए, अपने रन्ध्रों को छिपाए रहता, दूसरे के रन्ध्रों पर प्रहार करते हुए भी। (६२) उसका दण्ड उसके देह के जैसा ही था, जिसे पिता ने बढ़ाया, अस्त्रशिक्षा दी और युद्ध का अभ्यास कराया। (६३) अतिथि की तीनों शक्तियाँ सर्प की फणामणि थीं, जिन्हें कोई खींच नहीं सकता था। किन्तु अतिथि चुम्बक था शत्रुओं के तीन शक्ति रूपी लोह के लिए। (६४) उसके राज्य मे सार्थवाह लोग नदियों में भी वापियों के समान सुख से घूमते थे, वनों में भी उपवनों के समान पर्वतों पर घरों के समान। डकैती का तनिक भय नहीं था। (६५) वह तप की रक्षा करता था विघ्नों से और संपदाओं की डकैतों से। सभी आश्रमों और सभी वर्णो ने उसे उसके षष्ठांश से समृद्ध किया।

६०. कोशात्=कोशेन; इति=अतः; अभिनन्द्यते=अभिनिन्द्यते, अभिरम्यते म.हे.अ.ना., अभिगम्यते, अनुगम्यते। ६१. आवृणो=व्यावृणो; रन्ध्रे च=रन्ध्रेषु म.हे.अ.ना.; प्राहरद्=प्रहरन्; द्विषः = द्विषाम् व., द्विषम्, रिपून् म.। ६२. पित्रा संव=पितृसंव; साम्परायिकः म. = सांपरायणः; न व्य=नाव। ६३. परस्मात्=परस्थं। ६४. वापीष्विव=वापीषु च; सार्थाःस्वैरं=स्वैरं सार्थाः, प्रजाः स्वैरं म.हे.अ.ना.; स्वकीयेषु=तदीयेषु व.म.हे.अ.ना.।

खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् ।
दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ।। ६६ ।।
स गुणानां बलानां च षण्णां षण्मुखविक्रमः ।
बभूव विनियोगज्ञः साधनीयेषु वस्तुषु ।। ६७ ।।
इति क्रमात् प्रयुञ्जानो राजनीतिं चतुर्विधाम् ।
आ तीर्थादप्रतीघातं स तस्याः फलमानशे ।। ६८ ।।
कूटयुद्धविधिज्ञेऽपि तस्मिन् सन्मार्गयोधिनि ।
भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरगामिनी ।। ६९ ।।
प्रायः प्रतापभग्नत्वादरीणां तस्य दुर्लभः ।
रणो गन्धद्विपस्येव गन्धभग्नान्यदन्तिनः ।। ७० ।।
प्रवृद्धो हीयते चन्द्रः समुद्रोऽपि तथाविधः ।
स च तत्समवृद्धिश्च न चाभूत् ताविव क्षयी ।। ७१ ।।

(६६) भूमि ने उसे उसकी रक्षा के अनुरूप ही वेतन दिया। खदानों ने उत्पन्न किए रत्न, खेतों ने धान्य और वनों ने हाथी। (६७) कार्त्तिकेय जैसे पराक्रम वाले अतिथि ने छहों गुणों (सन्धि, विग्रह, यान, आसन, संश्रय, द्वैधीभाव) और छः प्रकार की सेना (मूल, भृत्य, सुहृत्, श्रेणी, द्विषत्, आटविक) का भलीभाँति जानता था विनियोग साधनीय कार्यों में। (६८) इस प्रकार चारों प्रकार की दण्डनीति को प्रयोग में लाता हुआ अतिथि १८ प्रकार के तीर्थों (मन्त्रि आदि) तक सफल रहा और उसका पूरा फल बिना रुकावट के पाता रहा। (६९) जानता तो था वह कूटयुद्ध की भी विधि, किन्तु करता था युद्ध वह सन्मार्ग से ही तब भी वीरों को चाहने वाली जयश्री अतिथि के लिए अभिसारिका बनी रहती थी। (७०) प्रायः अतिथि को शत्रुओं से युद्ध करने का अवसर मिलता ही नहीं था, क्योंकि शत्रु अतिथि के प्रताप से ही टूट जाया करते थे। (७१) बढ़ा चन्द्रमा घटा करता है और समुद्र की भी वही स्थिति है। अतिथि की विशेषता यह कि वह वृद्धि तो उन्हीं जैसी करता गया, परन्तु क्षीण नहीं हुआ।

६६. खनिभिः = खनिभ्यः; गजान्=गजाः; वेतनं=चेतनं। ६७. स गुणानां बलानां च=स बलानां गुणानां च, गुणानां च बलानां च; वस्तुषु=कर्म्मसु। ६८.राजनीतिं=दण्डनीतिं व.हे.अ.ना.; **घातं=घाताम्। ६९. विधिज्ञे= विकल्पे** म.हे.अ.ना.; **गामिनी=कामिणी** हे., **गामिणी; काङ्क्षिणी। ७०. प्रायः = आसीत्** म.हे.अ.ना.; **दुर्लभः = दुःसहः; रणो=रणम्; भग्ना=भिन्ना** म.। **७१. प्रवृद्धो=प्रवृदधौ** म.; **च=तु; वृद्धि=वृत्ति** व.हे.; **चाभूत्००क्षयी=ययौ००क्षयम्** हे.; **क्षयी नाभूच्च ताविव** म.अ.ना.।

सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः ।
उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिनः ।। ७२ ।।
स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन् ।
तथापि पप्रथे तस्य तत्कारिद्वेषिणो यशः ।। ७३ ।।
दुरितं दर्शनेन घ्नंस्तत्त्वार्थेन नुदंस्तमः ।
प्रजाः स तन्त्रयाञ्चक्रे शश्वत् सूर्य्य इवोदितः ।। ७४ ।।
इन्दोरगतयः पद्मे सूर्य्यस्य कुमुदेंऽशवः ।
गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम् ।। ७५ ।।
पराभिसन्धानपरं यदप्यस्य विचेष्टितम् ।
जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत् ।। ७६ ।।
एवमुद्यन् प्रभावेण शास्त्रनिर्दिष्टवर्त्मना ।
वृषेव देवो देवानां राज्ञां राजा बभूव सः ।। ७७ ।।

(७२) अत्यन्त निर्धन विद्वानों में जिसने उस अत्यन्त समृद्ध अतिथि के सामने मुँह खोला वह खुद याचकों के लिए दाता बन गया। (७३) कार्य तो ऐसे ही करता था जो स्तुत्य होते, किन्तु स्तुति करने पर वह लज्जा का अनुभव करता और स्तुति करने वालों से करता द्वेष, तथापि उसकी कीर्ति बढ़ती ही गई। (७४) अतिथि प्रजा का नियन्त्रण उदित सूर्य के समान करता रहा। वह दर्शन देकर पाप का नाश करता और तत्त्वार्थ से दूर करता रहा तम। (तत्त्वार्थ = वस्तुस्थिति। तमः= आसक्ति जनित विषाद भी।) (७५) चन्द्र की किरणें कमल में प्रवेश नहीं पातीं और सूर्य की कुमुद में, किन्तु अतिथि ऐसा गुणी था कि उसके गुणों को स्थान मिलता विपक्ष में भी। (७६) शत्रु पर चढ़ाई जैसी चेष्टा भी वह करता था, परन्तु वह भी धर्मोपयोगी ही होती थी, क्योंकि वह होती थी अश्वमेध के लिए अपेक्षित दिग्विजय में। (७७) शास्त्र द्वारा निर्दिष्ट मार्ग से प्रभाव बढ़ाते—बढ़ाते वह राजाओं का राजा हो गया, जैसे देवों का देव इन्द्र।

७२. सन्तः = जनाः; अत्यर्थं महतः = अत्यर्थं महिताः, अत्यर्थमहतः, म.अ.ना., **अत्यन्तं महिताः; अर्थिनः=अर्थिषु, अर्थिनाम्** व.हे.। **७३. पप्रथे=ववृधे** म.अ.ना.; **तत्कारि=तत्कार्य। ७४. स तन्त्र=स्वतन्त्र** म.अ.ना., **स पाल, स रञ्ज, स्वं/स्वाः रञ्ज, संवर्ध वितमसश्च। ७५. रगतयः=र्गभस्तयः। ७६. भिसं=तिसं** अ.ना.; **यदप्य=यद्यप्य** म.; **मेधाय=मेधार्थं, धर्म्यम्=धर्माय, धर्म** व.अ.ना.। **७७. शास्त्रनि=शास्त्रे नि; राज्ञां राजा=राजा राज्ञां।**

पञ्चमं लोकपालानामूचुस्तं साम्ययोगतः ।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम् ।। ७८ ।।
दूरापवर्जितैश्छत्रैस्तस्याज्ञां शासनार्पिताम् ।
दधुः शिरोभिर्भूपाला शेषां पौरन्दरीमिव ।। ७९ ।।
ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ ।
यथा साधारणीभूतं नामास्य धनदस्य च ।। ८० ।।
इन्द्राद् वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूद्
यादोनाथः शिवजलपथः कर्म्मणे नौचराणाम् ।
पूर्वापेक्षी तदनु विदधे कोषवृद्धिं कुबेर—
स्तस्मिन् दण्डोपनतचरितं भेजिरे लोकपालाः ।। ८१ ।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ अतिथिवर्णनो नाम सप्तदशः सर्गः ।। १७ ।।

(७८) लोकपालों (इन्द्र, वरुण, यम, कुबेर) में वह पञ्चम लोकपाल माना गया, महाभूतों (पृथ्वी, जल, अग्नि, वायु, आकाश) में षष्ठ महाभूत और कुलपर्वतों (महेन्द्र, मलय, सह्य, शुक्तिमान्, ऋक्ष, विन्ध्य तथा पारियात्र) में अष्टम कुलपर्वत। **(७९)** सभी राजा शासनपत्र में लिखी गई उसकी आज्ञा को छत्र हटाकर शिर पर धारण करते थे वैसे ही जैसे इन्द्र (पुरन्दर) की शेषा (प्रसन्न होकर दी माला) को देवता लोग। **(८०)** अतिथि ने जो महाक्रतु किए उनमें ऋत्विकों की पूजा इतनी बड़ी द्रव्यराशि से की, कि इस (अतिथि) को और कुबेर को समानरूप से 'धनद' संज्ञा मिल गई।('कुबेर इव नाम्नाऽभूद् धनदोऽयमपि श्रुतः' ऐसा कुछ लिखा जाना चाहिए था।) **(८१)** लोकपाल भी अतिथि की सेवा में विजित सामन्तों जैसे निरत दिखाई दिए। इन्द्र से वृष्टि नियमित रूप से होती रही, यम से रोगनियन्त्रण रहा, नौ व्यवसायियों के लिए समुद्र मार्ग निष्कण्टक रहा, कुबेर ने पहले से अधिक कोषवृद्धि की।

इस प्रकार कालिदास की कृति रघुवंश महाकाव्य में अतिथिवर्णन नामक
सत्रहवाँ सर्ग पूर्ण हुआ।। १७।।

७८. ऊचुस्तं साम्य = ऊचुः साधर्म्य हे.अ.ना., **तमूचुः साम्य, तमूचुर्धर्म्म; भूभृताम् = पर्वतम्। ७९. दूराप = दूराय; छत्रैः = छात्रैः; शेषां = देवाः** म.अ.ना., **लेखाः।** द्र. कुसं. ३.२२; शाकु. 3-11-1]7-1A **८०. तथा = यथा; यथा = तथा। ८१. नियमित = प्रशमित; पूर्व्वापेक्षी = पूर्वापेक्षम्; विदधे = ववृधे; कोष=कोश** व.हे.अ.ना.।

रघुवंशं महाकाव्येष्विव काव्येऽत्र भाति यः। सर्गः सनातनेनासौ भूयः संपाद्य कीलितः ।।

।। अष्टादशः सर्गः।।

स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ।
अनूनसारं निषधान्नगेन्द्रात् पुत्रं यमाहुर्निषधाख्ययैव ।। १ ।।
तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननन्द यूना ।
सुवृष्टियोगादिव जीवलोकः सस्येन संपत्तिफलात्मकेन ।। २ ।।
शब्दादि निर्विश्य सुखं चिराय तस्मिन् प्रतिष्ठापितराजशब्दः ।
कौमुद्वतेयः कुमुदावदातैर् द्यामर्ज्जितां कर्म्मभिरारुरोह ।। ३ ।।
पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः ।
एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ।। ४ ।।

(१) निषिद्धशत्रु अतिथि को 'नैषध' नामक राजा की पुत्री से जो पुत्र प्राप्त हुआ वह सार में निषध पर्वत से कम नहीं था, अतः उसे **निषध** नाम से ही पुकारा गया। (२) निषध में पर्याप्त बल था। वह जब युवा हुआ और प्रजा (सन्तति तथा जनता) के लिए योग्य हो गया तो पिता अतिथि को तोष का अनुभव हुआ, जैसे सुवृष्टि योग से परिपाकोन्मुख खेती से होता है जीवलोक को। (३) कुमुद्वती का पुत्र अतिथि शब्दादि का सुख छककर भोग चुका तो निषध को राजा घोषित कर कुमुदावदात (उज्ज्वल) कर्मों से अर्जित स्वर्ग में आरूढ़ हो गया। (४) कुश का पौत्र (निषध का पुत्र) **कुशेशयाक्ष** सागर के समान धीर चित्त का था। उसकी भुजाएँ नगर की अर्गला सी पुष्ट और लम्बी थीं। उस एक वीर ने सागर सहित भूमि की रक्षा की (बुभोज)।

१. निषधः अर्थपतेः = अधिपतेः, सुतायाम् = सुताया, नगेन्द्रात् = नरेन्द्रात् म.हे.अ.ना., **धाख्ययैव = धाख्यमेव** म.हे.ना.,**धाक्षमेव**। **२. वीर्येण=कार्येण** व.म.हे.अ.ना., **कल्पिष्य=करिष्य** व., **ननन्द=रराज, तुतोष, सुवृष्टि=सद्वृष्टि** व., **संपति=संपन्न** हे., **संपक्ति,फलोन्मुखेन=फलात्मकेन** व.हे.अ.ना.। अत्र पद्यान्तरम् –

स तेन पुत्रेण पिता ननन्द करि ष्यमाणेन सुखं प्रजायै ।
सस्येन संपत्तिफलात्मकेन सुवृष्टियोगादिव जीवलोकः ।।

४. कुशेशयाक्षः = याख्यः।

तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः ।
यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ।।५।।
नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजम् ।
ख्यातं नभःशब्दमयेन नाम्ना कान्तं नभोमासमिव प्रजानाम् ।।६।।
तस्मिन्नियुज्योत्तरकोसलानां धर्मोत्तरः स्वप्रभवे प्रभुत्वम् ।
मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ।।७।।
तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्याहितपुण्डरीका यं पुण्डरीकाक्षमिव श्रिता श्रीः ।।८।।
स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षम् ।
क्ष्मां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षामतनुश्चचार ।।९।।

(५) कुशेशयाक्ष का पुत्र हुआ **नल**। कुशेशयाक्ष के बाद अग्नितुल्य तेजस्वी नल को प्राप्त हुई वंशश्री। कमल जैसा था उसका मुख। उसने उसी प्रकार शत्रुओं की सेनाओं को रौंदा जैसे गज रौंद डालता है बरू (सरकण्डा) को। (६) नल की कीर्त्ति आकाशचारी भी गाते थे। उसका पुत्र नभस्तल सा श्याम था, अतः उसे नाम दिया गया **नभस्**, वह प्रजाओं में नभोमास (श्रावण) के ही समान प्रिय था। (७) अपने पुत्र नभस् को उत्तरकोसल जनपद का प्रभुत्व सौंपकर धर्मप्रधान नल मृगों के साथ रहने लगा, जिससे पुनः देहबन्ध में न आना पड़े। उसे जरावस्था ने यही उपदेश दिया था। (८) नभस् से उत्पन्न हुआ **पुण्डरीक** वैसा ही जैसा दिग्गजों में पुण्डरीक। वह राजाओं के लिए अजेय था। पिता (नभस्) के शान्त हो जाने पर पुण्डरीक (कमल) लिए राजलक्ष्मी पुण्डरीक को ही प्राप्त हुई उसी प्रकार जिस प्रकार लक्ष्मी प्राप्त हुई थी पुण्डरीकाक्ष (विष्णु) को। (९) अमोघधन्वा पुण्डरीक को प्राप्त हुआ प्रजाक्षेम–विधान दक्ष पुत्र **क्षेमधन्वा**। पुण्डरीक ने क्षमा से युक्त पुत्र को भूमि दी और वह वन में तप करने चला गया। वैसे ही वह शरीर से दुर्बल था।

५. अमृद्नात्=अमृन्नन्, असूदन्। ६. स=न, नभस्तल=नभःस्थल। ७. तस्मिन्=तस्मै म.अ.ना., **नियुज्य=विसृज्य, निसृज्य** अ.ना., **नियोज्य** हे., **धर्मोत्तरः** म.हे., **धर्मोत्तरं** अ.ना., **धर्मोत्तमः, स्वप्रभवे=तत्प्रभवे** म., **सप्रभवे, तत्प्रभवः, तत्प्रसवः, तत्प्रभवः** व.अ.ना.,**अजर्यें=अजर्यं, पुनः = मनो। ८. पुण्डरीकः अजय्यः =अजेयः, आहित=आहृत** म.अ.ना., **आस्तृत** हे., **आक्षत, पुण्डरीका=पुण्डरीके, पुण्डरीकाक्षम्, व श्रिता=वाश्रिता** व.। **९.धन्वानम्=धन्वीनम्, दक्षम्=दत्तम्, लम्भ=प्राप, जरसोपपन्नं/न्नः, क्षमातनुः = क्षान्ततनुः** व.हे.अ.ना., **क्षान्ततरः, चचार=चकार, ततान।**

अनीकिनीनां समरेऽग्रयायी तस्यापि देवप्रतिमः सुतोऽभूत् ।
व्यश्रूयतानीकपदावसानं देवादि नाम त्रिदिवेऽपि यस्य ॥१०॥
पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन ।
पुत्रस्तथैवात्मजवत्सलेन स तेन पित्रा पितृमान् बभूव ॥११॥
पूर्वस्तयोरात्मसमे चिरोढामात्मोद्‌भवे वर्णचतुष्टयस्य ।
धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकम् ॥१२॥
वशी सुतोऽन्यस्य वशम्वदत्वात् स्वेषामिवासीद् द्विषतामपीष्टः ।
सकृद् विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान् ग्रहीतुम् ॥१३॥
अहीनगुर्नाम स गां समग्रामहीनबाहुद्रविणः शशास ।
यो हीनसंसर्गपराङ्मुखत्वाद् युवाप्यनर्थैर्व्यसनैर्विहीनः ॥१४॥
गुरोः स चानन्तरमन्तरज्ञः पुंसां पुमानाद्य इवावतीर्णः ।
उपक्रमैरस्खलितोपचारैश्चतुर्दिगीशः सुतरां बभूव ॥१५॥

(१०) उसे भी युद्ध में सेनाओं के आगे चलने वाला पुत्र प्राप्त हुआ जिसके नाम का पूर्वपद देव था और उत्तर पद अनीक अर्थात् **देवानीक**। उसका नाम स्वर्गलोक तक सुनाई पड़ता था। **(११)** उस समाराधन–तत्पर पुत्र से पिता जिस प्रकार पुत्री था, उसी प्रकार अधिक वत्सल पिता से वह पुत्र पितृमान् था। **(१२)** इन दोनों में से प्रथम (पुण्डरीक) ने लम्बे समय तक धारण की चारों वर्णों की धुरा को अपने पुत्र पर डाला और यज्ञ करते करते यजमान लोक (स्वर्ग) सिधार गया। वह गुणों की प्रमुख निधि था। **(१३)** अन्य (द्वितीय देवानीक) का वशी पुत्र अपनों के ही समान पराए लोगों को भी प्रिय था, क्योंकि वह वशंवद था। 'माधुर्य में इतनी शक्ति है कि वह एक बार बिगड़े हरिणों को भी निगृहीत कर सकता है।' **(१४)** उस देवानीक के पुत्र का नाम था **अहीनगु**। उसकी भुजाओं की शक्ति परिपूर्ण थी। उसने पूरी पृथिवी पर शासन किया। वह हीन लोगों से संसर्ग नहीं रखता था, अतः युवा होते हुए भी अनर्थकारी व्यसनों से दूर था। **(१५)** मनुष्यों के मन का ज्ञाता अहीनगु अपने पिता के बाद साम, दान आदि चारों उपक्रमों की सफलता के कारण चारों दिशाओं का अधीश्वर

१०.देवानीकः व्यश्रूयत=व्यजायत। ११.यथैव=तथैव,अधिक=आत्मज व.म.हे.अ.ना.। **१२. लोकम्=लोकान्। १३. सुतोऽन्यस्य=सुतस्तस्य, हि=यत्। १४. स गां=महीं** हे., **यो हीन=योऽहीन, विहीनं** अ. ना., **अनर्थै** म.हे., **अनार्य, अनर्थ , अनर्हैः**।। युग्मम्।। **१५. सुतरां=चतुरः** म.हे.अ.ना.।

तस्मिन् प्रयाते परलोकयात्रमेकान्तरीणं तनयं तदीयम्।
उच्चैश्शिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रम् ।।१६।।
तस्याभवत् सूनुरुदारशीलः शीलः शिलापट्टविशालवक्षाः ।
जितारिपक्षोऽपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमानः ।।१७।।
तमात्मसंपन्नमनिन्दितात्मा कृत्वा युवानं युवराजमेव ।
सुखानि सोऽभुङ्क्त सुखोपरोधि वृत्तं हि राज्ञामपरुद्धवृतम् ।।१८।।

हो गया, वैसा ही अधीश्वर जैसा अवतार ग्रहण करके उतरा आदिपुमान् (विष्णु)। (१६) शत्रुओं के विजेता उस अहीनगु के परलोकयात्रा पर चले जाने पर लक्ष्मी ने उसके पुत्र **पारियात्र** को वरण किया, जो उच्चशिरा होने में पारियात्र गिरि को भी जीत चुका था। (१७) पारियात्र का पुत्र हुआ उदारशील **शील**, जिसका वक्ष शिलापट्ट जैसा विशाल था। उसने बाणों से शत्रुपक्ष को जीत लिया था, किन्तु जब उसकी स्तुति की जाती थी तो वह अतीव शालीन हो जाता था। (१८) शील का शरीर जब भर गया तब उसे युवराज बनाकर पारियात्र लग गया सुखोपभोग में। राजा बनने से सुख में रुकावट आती है।

१६. एकान्तरीणं=जेतर्यरीणाम् म.हे.अ.ना., यातर्यरीणाम् व., येतर्यर्जरीणाम्; उच्चैश्शिरस्त्वात् =उच्चैस्तरत्वात्; यात्रं= जातं म.हे.अ.ना.।
अतः परं पद्यम्—

तस्माद् बभूवाथ दलाभिधानो दया/मान्वितः पद्मदलायताक्षः ।
कुन्दाभदन्तो रिपुदन्तिसिंहः पतिः पृथिव्याः कुलकैरवेन्दुः ।।

अत्रापि पाठाः—दमा=दया दयाचितः, दलाभदृष्टिः = दलाक्षदृष्टि, दलाभनेत्रः कुन्दाभदन्तः =कुन्दाग्रदन्तः, 'कुन्दाभदन्तो रिपुदन्तिसंहः'='कुन्दाव—दातैश्चरितैर्विशुद्धः'। पद्यमिदं विष्णुपुराणमनुसृत्य कल्पितम्। पद्मपुराणे पुनश्शील एव पारियात्रसूनुः। मल्लिनाथो हेमाद्रिश्च पद्मपुराणमेवानुसरतः न च स्पृशतः पद्यमिदम्। अर्थबन्धदौर्बल्यमप्यस्याकालिदासीयत्वे प्रमाणम्। १७. शीलः = शिलः म.अ.ना., शैलः, शालः, शलः; पट्ट=पाट; अव्रज=आव्रज। १८. आत्मसंपन्नम्=आत्मजं पुत्रम्; कृत्वा युवानं=कृत्वाऽयुवानम्; सुखोपरोधि=सुखप्ररोधि व.; वृत्तं=वार्त्ता, वार्ता; अपरुद्धवृत्तम्=उपरुद्धवृत्ति म. हे.अ.ना., अपरुद्धवृत्ति। अपरुद्धपदे हेमाद्रिः —

परेष्वक्षिप्तकार्यो यः कर्माण्यारभते स्वयम् ।
सोऽपरुद्ध इति ख्यातो न राजा सुखमश्नुते ।।

तं रागबन्धिष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यम् ।
विलासिनीनामरतिक्षमाऽपि जरा वृथा मत्सरिणी जहार ।।१९।।
उन्नाभ इत्युद्गतनामधेयस्तस्याऽयथार्थो नतनाभिरन्ध्रः ।
आसीत् सुतः पङ्कजनाभकल्पः कृत्स्नस्य योनिर्नृपमण्डलस्य ।। २०।।
ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः ।
बभूव वज्राकरभूषणायाः पतिः पृथिव्याः किल वज्रणाभः ।। २१।।
तस्मिन् गते द्यां सुकृतोपलब्धां तत्संभवं शङ्खणमर्णवान्ता ।
उत्खातशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ।। २२।।

(१९) वह चित्त को पकड़ने वाले भोगों में जब तक अवितृप्त था तभी तक जरा ने उसका हरण कर लिया, क्योंकि उसमें विशेष सौभाग्य था, यद्यपि वह जरा रतिक्रिया के योग्य रह नहीं गई थी, तथापि उसमें विलासिनी नारियों के साथ डाह थी। **(२०)** शील का पुत्र हुआ **उन्नाभ**, उल्टे नाम का, क्योंकि उसका नाभिरन्ध्र (उन्नत नहीं अपितु) नत (गम्भीर) था। यह उन्नाभ पङ्कजनाभ विष्णु जैसा था सभी राजमण्डल का नाभिकेन्द्र। **(२१)** उन्नाभ के बाद इन्द्र जैसे प्रभाव से युक्त उसका पुत्र **वज्रणाभ** हुआ, रत्नाकरमेखला (पूरी) पृथ्वी का पति। युद्ध में उसकी गर्जना वज्र की गर्जना जैसी हुआ करती थी। **(२२)** वज्रणाभ जब अपने पुण्यों से स्वर्ग चला गया तब उसके पुत्र **शङ्खण** के पास पहुँची वसुधा। उसके साथ खनियों से उत्पन्न रत्नों के उपहार थे और वह शत्रुओं को उखाड़ चुका था।

१९. रागबन्धि=रागबन्धे, रागवृद्धि, रागधर्मे; तृप्तम्=तृष्णम् हे.; भोग्यम्=भाग्यम्; क्षमापि=क्षमत्वात्। मल्लिनाथवर्जमन्येऽत्र पद्यमिदमपि पठन्ति—

हित्वाऽथ भोगांस्तपसोत्तमेन त्रिविष्टपं प्राप्तवति क्षितीशे ।
तदात्मजः सागरधीरचेताः शशास पृथ्वीं सकलां नृसोमः ।।

अत्रापि पाठा—हित्वाथ=हित्वोप, हित्वा स; हित्वाशु; भोगान्=भोगम्। तस्माद् बभूवाथेपि १६ पद्येन सह परं दत्तं पद्यं केचिदत्र पठन्ति। २०. इत्युद्गत=इत्युन्नत; थार्थो न=थार्थोन्न हे., थार्थ न अ.ना.; आसीत् सुतः=सुतोऽभवत् म.; नाभ/भि/कल्प/तुल्यः=भिकल्पः, भितुल्यः, भ/भितुल्यः। २१. वज्रधर=ब्रह्मधर; तदात्म=तस्यात्म हे.; वज्रघोषः=लब्धघोषः; वज्राकर=रत्नाकर; भूषणाया= मेखलाया म.हे.अ.ना.; णाभः = नाभः, नामा। २२. द्यां=स्वः हे., स्वं; सुकृतोपलब्धां/ब्धं म.हे., सुकृतैकलभ्यम् अ.ना.; शङ्खणम्=खण्डनम् हे., शङ्खकम्, खंखनम्; उदितैः = खनितैः।

तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः ।
वेलातटेषूषितसैनिकाश्वं पुराविदो यं व्यु/ध्युषिताश्वमाहुः ।। २३ ।।
आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर् विश्वसहोऽधिजज्ञे ।
पातुं सहो विश्वसमः समग्रां विश्वम्भरामात्मजमूर्त्तिरात्मा ।। २४ ।।
अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनये नयज्ञः ।
द्विषामसह्यः सुतरां तरूणां हिरण्यरेता इव सानिलोऽभूत् ।। २५ ।।
पिता पितॄणामनृणस्तदन्ते वयस्यनन्तानि सुखानि लिप्सुः ।
राजानमाजानुविलम्बिवाहुं कृत्वा कृती वल्कलवान् बभूव ।। २६ ।।
कौसल्य इत्युत्तरकोसलानां पत्युः पतङ्गान्वयभूषणस्य ।
तस्यौरसः सोमसुतः सुतोऽभून् नेत्रोत्सवः सोम इव द्वितीयः ।। २७ ।।
यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयं गतिमाजगाम ।
ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम् ।। २८ ।।

(२३) उसके पश्चात् अश्विनीकुमार तुल्य रूप वाला और सूर्य के समान तेजस्वी **ध्युषिताश्व** ने पाया पिता शङ्खण का पद। उसने समुद्रतट पर सेना बिछा रखी थी। इसी कारण पुराविदों ने उसे ध्युषिताश्व नाम से पुकारा। (२४) ध्युषिताश्व को **विश्वसह** नामक पुत्र हुआ विश्वेश्वर (विश्वनामक धाम = काशी में प्रतिष्ठित ईश्वर शिव जी) की आराधना से। वह पूरी विश्वम्भरा की रक्षा में समर्थ था। वह ध्युषिताश्व का पुत्र रूप आत्मा ही था। (२५) विश्वसह को विष्णु का अंश **हिरण्यनाभ** पुत्र प्राप्त हुआ। उससे नयज्ञ वह शत्रुओं के लिए अतीव असह्य हो गया, वृक्षों के लिए हवा से युक्त अग्नि के समान। (२६) पितृऋण से उऋण पिता (विश्वसह) ने अन्तिम वय में अनन्त सुख पाने के लिए उस पुत्र हिरण्यनाभ को राजा बनाकर वल्कल धारण कर लिए। हिरण्यनाभ आजानुबाहु था। (२७) हिरण्यनाभ को पुत्र हुआ **कौसल्य**। हिरण्यनाभ सूर्यवंश का भूषण था और था उत्तरकोसल का शासक, सोमयाग करने वाला और द्वितीय सोम के समान नेत्रोत्सव। (२८) यशों से वह ब्रह्मदेव की सभा तक प्रख्यात था। उसे ब्रह्मत्व प्राप्त हुआ। उसके पहले उसने अपने पुत्र **ब्रह्मिष्ठ** को अपने पद पर बिठा दिया था। ब्रह्मिष्ठ सचमुच ब्रह्मिष्ठ था।

२३. **धामा=नामा** अ.ना.; **अश्वि=अश्व; वेलातटेषू=वेलान्तरेषू; ध्युषि=व्युषि** म.अ.ना.। २४. **सहः = समः** व.अ.ना.; **धिजज्ञे=विजज्ञे** म.; **विश्व=विष्णु; समः = सखः**। २५. **रण्याक्ष=हिरण्याख्य; स जाते=सुजाते; द्विषामसह्यः = विषामसह्यः**। २६. **अन्ते=अन्त्ये, एते; वल्कलवान्=वल्कधरः** म.हे.अ.ना.। २८. **सभं=पदं; स=यः** ना.; **भूयं=भूयाम्, भूयात्; आजगाम=आससाद; प्रसूतम्=प्रसूतिम्** अ.ना.,

तस्मिन् कुलापीडनिभे विपीडं सम्यङ् महीं शासति शासनाङ्काम् ।
प्रजाश्चिरं सुप्रजसि प्रजेशे ननन्दुरानन्दजलाविलाक्ष्यः ।। २९ ।।
तस्य प्रभानिर्जितपुष्परागं पौष्यां तिथौ पुष्यमसूत पत्नी ।
यस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनाः पुष्य इव द्वितीये ।। ३० ।।
पात्रीकृतात्मा गुरुसेवनेन स्पृष्टाऽऽकृतिः पत्ररथेन्द्रकेतोः ।
तं पुत्रिणां पुष्करपत्रनेत्रः पुत्रः समारोपयदग्रसंख्याम् ।। ३१ ।। पुत्रः
वंशस्थितिं वशकरेण तेन संभाव्य भावी स सखा मघोनः ।
उपस्पृशन् स्पर्शनिवृत्तलौल्यस्त्रिः पुष्करेषु त्रिषु शान्तिमाप ।। ३२ ।।
महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा ।
तस्मात् सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरुः ।। ३३ ।।

(२९) कुल के आपीड जैसा ब्रह्मिष्ठ जब शासनाङ्कित पृथिवी का पीड़ा पहुँचाए बिना शासन करने लग गया तो प्रजा आनन्दाश्रु से परिपूर्ण और आनन्द में मग्न दिखाई दी। वह राजा सुप्रजा कहलाया। (३०) ब्रह्मिष्ठ की पत्नी ने पुष्यनक्षत्र में **पुष्य** नामक पुत्र को जन्म दिया, पौषमास की पूर्णिमा को। उसके उदय से सभी जन पूर्ण पुष्टि को प्राप्त हुए। वह मानों दूसरा पुष्य नक्षत्र ही था। (३१) पुष्य का पुत्र हुआ **पुत्र** नामक। कमलपत्र जैसे नेत्र वाले उसने पुष्य को यशस्वी पिता बना दिया। उसकी आकृति कुछ कुछ विष्णु भगवान् से मिलती थी और उसने गुरुजनों की सेवा से स्वयं को पात्र सिद्ध कर रखा था। (३२) पुत्र नामक उस वंशकर्त्ता पुत्र से वंश की बेल आगे बढ़ती देख उस पुष्य ने पुष्कर तीर्थ में जल का तीन बार आचमन कर इन्द्र का भावी सखा बनने हेतु शान्ति प्राप्त की। उसमें रूपरसादि का आकर्षण अब समाप्त था। (३३) उस महेच्छ पुष्य ने पुत्र पर राज्यभार छोड़ा और योगवित् जैमिनि महर्षि से योग प्राप्त उस जन्मभीरु पिता ने जन्म से छुट्टी पा ली।

प्रभूतम्। २९. विपीडम्=विपीडाम् म., ऽपपीडम् अ.ना., विपीडः; शासनाङ्काम्=शासनाङ्कम्, शोभनाङ्काम् व.; प्रजेशे=क्षितीशे; जलाविलाक्ष्यः = जलाकुलाक्ष्य अ.ना.: जलोक्षिता म.हे.। ३०. पुष्परागम्=पुष्पराजम् हे., पुष्यरागम्, पुष्पबाणम् व., पद्मरागम् म.अ.ना.; पौष्यां=पुष्यां, पुष्यम्, पुष्प व., पुत्रम्; यस्मिन्=तस्मिन् म.; पुष्य इव=पुष्प इव। ३१. स्पृष्टा=स्पष्टा म.हे.; पुत्रिणां=पुत्रिणं; पुत्रः = पुष्पः, नेत्रः। ३२. करेण=वरेण; उपस्पृशन्=अपः स्पृशन् व.हे., अपस्पृशन् म.अ.ना., आपः स्पृशन, त्रिः पुष्करेषु=त्रिपुष्करेषु हे.अ.ना.; त्रिषु शान्तिमाप=त्रिदशत्वमाप व.म.हे.अ.ना.। ३३. जैमिनये=जैमिनिये, जैमनयेः, सयोगात्=स योग्यात्, सुयोग्यात्, सुयोगात्। ३४. तत्प्रभवः= तत्प्रभवं; पमेयो=पमेयं;

ततः परं तत्प्रभवः प्रपेदे ध्रुवोपमेयो ध्रुवसन्धिरुर्व्वीम् ।
यस्मिन्नभूज्ज्यायसि सत्यसन्धे सन्धिर्ध्रुवः सन्नमतां नृपाणाम् ।। ३४।।
सुते शिशावेव सुदर्शनाख्ये दर्शात्ययेन्दुप्रियदर्शने सः ।
मृगायताक्षो मृगयाविहारी सिंहादवापद् व्यसनं नृसिंहः ।। ३५।।
स्वर्गामिनस्तस्य तमैकमत्यादमात्यवर्गः कुलतन्तुमेकम् ।
अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार ।। ३६।।
नवेन्दुना तन्नभसोपमेयं शावैकसिंहेन च काननेन ।
रघोः कुलं कुड्मलपुष्करेण तोयेन चाप्रौढनरेन्द्रमासीत् ।। ३७।।
लोकेन भावी पितुरेव तुल्यः संभावितो मौलपरिग्रहात् सः ।
दृष्टो हि वृण्वन् कलभप्रमाणोऽप्याशाः पुरोवातमवाप्य मेघः ।। ३८।।

(३४) उसके पश्चात् उसके पुत्र ध्रुव जैसे **ध्रुवसन्धि** के पास पहुँची पृथ्वी। ध्रुवसन्धि सत्यसन्ध था। उसके साक्ष्य में उसे प्रणाम करने वाले राजाओं में जो सन्धि हुई, वह ध्रुव ही रही। **(३५)** मृगायताक्ष ध्रुवसन्धि मृगयाविहार में सिंह से मारा गया, यद्यपि था तो वह स्वयं नृसिंह। उस समय उसका पुत्र **सुदर्शन** शिशु ही था। **(३६)** स्वर्ग गए उस ध्रुवसन्धि के सभी अमात्यों ने प्रजा को अनाथ और दीन देख उसके एकमात्र कुलतन्तु उस सुदर्शन को साकेतनाथ विधिवत् बना दिया। **(३७)** आज रघु के उस कुल की स्थिति वैसी ही है जैसी उस आकाश की होती है जिसमें विद्यमान हो केवल नवीन इन्दु, उस कानन की जिसमें केवल एक सिंहशावक शेष हो या उस सरोवर की जिसमें कमल की केवल एक कली बची हो। क्यों? इसलिए कि रघु कुल में केवल वह बालक राजा शेष था। **(३८)** जनता ने उस बालक राजा को माना कि वह अपने पिता के ही जैसा हो जाएगा, क्योंकि उसने साथ ले रखे थे कुलक्रमागत अमात्य। देखा भी जाता है कि मेघ भले ही हाथी के शावक के बराबर

सन्धिरु/मुर्वी/वींम् व.म.हे.अ.ना.; यस्मिन्=तस्मिन्; सन्धे=सन्धि; सन्नमताम्=सन्धिमताम्; नृपाणाम्=नराणाम्। ३५. दर्शने सः = दर्शनेन; 'सुते—सः'='सुतेऽथ (व) मत्येव सुदर्शनाख्ये दर्शात्ययेन्दुप्रतिमे शिशौ सः'; नृसिंहः = नृसोमः, नरेन्द्रः। ३६. तमैकमत्यात्=गुरोर्निदेशात्; तमेकपुत्रम्=तमेकमत्यः; तन्तुमेकम्=तन्तुभूतम् म.हे.अ.ना., तन्तुशेषम्; अनाथ=आनाथ्य अ.ना.; नाथं=भूपम्। ३७. नवेन्दुना=बालेन्दुना; कुड्मलपुष्करेण=कुड्मलपङ्कजेन म.हे.अ.ना., कुद्मलपुष्करेण, पुष्करकुड्मलेन। ३८. मौल=मौलि म.अ.ना., मूल; हि वृण्वन्=भिवर्षन्; पुरोवातम्=पुरोवायुम् पुरोदक्षिणवातमेघः।

तं राजवीथ्यामधिहस्ति यान्तमाधोरणालम्बितमग्र्यवेशम् ।
षड्वर्षदेशीयमपि प्रभुत्वात् प्रैक्षन्त पौराः पितृगौरवेण ।। ३९ ।।
कामं न सोऽकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय ।
तेजोमहिम्ना पुनराविताानं तद् व्याप चामीकरपिञ्जरेण ।। ४० ।।
तस्मादधः किञ्चिदिवावतीर्णावसंस्पृशन्तौ तपनीयपीठम् ।
सालक्तकौ भूपतयः प्रसिद्धैर्ववन्दिरे मौलिभिरस्य पादौ ।। ४१ ।।
मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या ।
शब्दो महाराज इति प्रयुक्तस्तथैव तस्मिन् युयुजेऽर्भकेऽपि ।। ४२ ।।
पर्यन्तसञ्चारितचामरस्य कपोललोलोभयंकाकपक्षात् ।
तस्याननादुच्चरितोऽपवादश्चस्खाल वेलास्वपि नार्णवानाम् ।। ४३ ।।

हो तब भी वायु को आगे पाकर सभी दिशाओं को आच्छादित कर लेता है। (३९) वह जब राजमार्ग पर हाथी पर बैठकर निकलता तो उसका उत्तम वेष सम्हालता रहता पीलवान्। वह छः वर्ष का ही था तब प्रभु होने के कारण पुरवासी उसके दर्शन उसी गौरव से करते जिससे पिता के दर्शन किए जा सकते हैं। (४०) भले ही वह बालक पैतृक सिंहासन को भर नहीं पाता था, किन्तु उसका तेज वितान तक फैलकर उसे व्याप्त किए रहता था। उसका तेज होता सुनहले रंग का। (४१) वह उस सिंहासन से पैर नीचे लटकाता तो उनसे सुवर्ण का पादपीठ तो नहीं छू पाता, किन्तु राजा लोग उसको अपने अलङ्कृत सिर झुकाकर प्रणति निवेदन करते। (४२) जैसे आकार से छोटे नीलम में महानील शब्द मिथ्या नहीं होता वैसे ही महाराज शब्द का प्रयोग उस नन्हें से राजा के लिए भी ठीक ही होता था। (४३) उसके आजू बाजू डुलाए जाते चँवर, उसके कपोल पर लटकती काली भौंर अलकें, किन्तु उसके मुख से जो आदेश निकलता वह समुद्र तट तक अमान्य नहीं होता।

३९. **अधिहस्ति यान्तम्=अधि/तिहस्त/स्तियन्तम्** व.म.अ.ना.; **अग्र्यवेशम्=पूर्वकायम्** व., **मध य–देश/ हम्/कायम्** हे., **अभ्यवेषम्**। ४०. **पूरणाय=पूर्णतायाः; आविताानम्=आवितानात्** अ.ना., **आचितेन** हे., **आवृतात्मा** म., **आयतेन, अञ्चितेन, व्याप=व्यापि** अ.ना.; **पिञ्जरेण=पञ्जरेण; मीकर=यावत्**। ४१. **सालक्तकौ=सालङ्कृतौ, सकुङ्कुमौ** म.हे.अ.ना.; **प्रसिद्धैः, प्रसिद्ध्यै, प्रसिद्धा, प्रसिद्धिः**। ४२. **प्रयुक्तः = प्रतीतः** म., **प्रसिद्धः**। ४३. **लोलो=लोलां, लीनो**; अपवाद 'अपवादस्तु निर्देशो निदेशः शासनं च तत्' इत्यमरः, **विवादः, पि वादः; चस्खाल=चचाल**।

निर्वृत्तजाम्भूनदपट्टबन्धे न्यस्तं ललाटे तिलकं दधानः ।
तेनैव शून्यान्यरिसुन्दरीणां मुखानि स स्मेरमुखश्चकार ।। ४४ ।।
शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि भूषणेन ।
नितान्तगुर्व्वीमथ चानुभावाद् धुरं धरित्र्या बिभराम्बभूव ।। ४५ ।।
न्यस्ताक्षरामक्षरभूमिकायां कार्त्स्न्येन गृह्णाति लिपिं न यावत् ।
सर्व्वाणि तावच्छ्रुतवृद्धयोगात् फलान्युपायुङ्क्त स दण्डनीतेः ।। ४६ ।।
उरस्यपर्याप्तनिवेशभागा प्रौढीभविष्यन्तमुदीक्षमाणा ।
संजातलज्जेव तमातपत्रच्छायाछलेनोपजुगूह लक्ष्मीः ।। ४७ ।।
अनश्नुवानेन युगोपमानमबद्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गत्सरुणाऽपि चासीद् रक्षावती तस्य भुजेन भूमिः ।। ४८ ।।

(४४) उसके ललाट पर सुवर्ण का पट्ट सुशोभित होता और उस पर तिलक लगा दिया जाता तो उसी से वह शत्रुनारियों के ललाटों को तिलकशून्य कर देता। (४५) सुदर्शन था तो इतना सुकुमार कि वह भूषणों से खिन्न हो जाता था, किन्तु उसमें प्रभाव इतना था हि वह पूरी पृथिवी का अत्यन्त भारी बोझ भी धारण किए रहता था। (४६) पाटी पर अक्षर लिख–लिख कर जब तक पूरी वर्णमाला की लिपि भी नहीं ग्रहण कर पाया था तभी तक विद्यावृद्ध अमात्यों के सहयोग से दण्डनीति के सभी फलों को उपयोग में लेने लगा था। (४७) वक्षःस्थल पर तो पूरी समाती थी नहीं, अतः प्रौढ़ होने की प्रतीक्षा में रत लक्ष्मी बेचारी लजा लजा कर उस बालक पति का आलिङ्गन छत्र की छाया के बहाने करती। (४८) पूरी भूमि उस बालक सुदर्शन की भुजा से रक्षित रहती थी, यद्यपि उसमें जूए की लम्बाई नहीं आई थी, प्रत्यञ्चा की चोट से उसकी कलाई में घट्टा नहीं पड़ा था और वह तलवार की मूठ भी पकड़ नहीं पाता था।

४४. **निर्वृत्त=निवृत्त; बन्धे** व.हे.अ.ना.= **शोभे** म.; **स स्मेर=सस्मेर।** ४५. **पुष्पाधिक=पुष्पोपम** व.; **अपि=अथ; भूषणेन= कङ्कणेन; र्व्वीर्व्वा; च=सः; बभूव=चकार** व.अ.ना.। ४६. **सर्व्वाणि तावत्=तावत् क्षितीशः, तावत् फलानि, फलानि तावत्** व.; **फलानि=सर्वाणि; सर्वाणि=फलानि, पक्वानि** व.अ.ना., **वृद्धानि; उपायुङ्क्त=उपाभुङ्क्त** अ.ना.। ४७. **निवेश= निवास; भागा=भागात्, भागम्, भावात्, भोगात्, योगा, योगात्; उदीक्षमाणा=अवेक्षमाणा, उपेक्षमाणा, उदीक्षमाणाम्, उपेक्षमाणा।** ४८. **अबद्ध=अलब्ध; मौर्व्वी=मूर्व्वी।**

न केवलं गच्छति तस्य काले ययुः शरीरावयवा विवृद्धिम् ।
वंश्या गुणाः खल्वपि लोककान्ताः प्रारम्भसूक्ष्माः प्रथिमानमापुः ।।४९।।
स पूर्व्वजन्मान्तरदृष्टपाराः स्मरन्निवाऽक्लेशकरो गुरूणाम् ।
तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ।।५०।।
व्यूह्य स्थितः किञ्चिदिवोत्तरार्धमुन्नद्धचूडोऽञ्चितसव्यजानुः ।
आकर्णमाकृष्टसबाणधन्वा व्यरोचतास्त्रे स विनीयमानः ।।५१।।
अथ मधु वनितानां नेत्रनिर्वेशनीयं
मनसिजतरुपुष्पं रागबन्धप्रवालम् ।
अकृतकविधि सर्वाङ्गीणमाकल्पजातं
विलसितपदमाद्यं यौवनं स प्रपेदे ।।५२।।

(४९) समय बीता तो बालक सुदर्शन के शरीर के अवयव ही बड़े नहीं हुए, लोककान्त वंशानुगत गुण भी बढ़ते और फैलते गए, वे आरम्भ में अवश्य ही सूक्ष्म थे। (५०) वह तीनों विद्याओं का पूर्वजन्म में ही पारङ्गत विद्वान् हो चुका था। इस कारण इस जन्म में गुरुओं को बिना कष्ट दिए करता गया विद्याभ्यास। वे उसको स्मरण सी आती गईं। इसी प्रकार बिना क्लेश के ग्रहण कर सका वह पिता के अमात्यमण्डल को। (५१) वह अस्त्र की शिक्षा जिस मुद्रा में ग्रहण करता वह उसे खूब फबती। कभी शरीर का उत्तरार्ध ऊँचा करके बैठता, कभी बायाँ घुटना मोड़कर और बाणसहित धनुष को कान तक खींचता। (५२) अब बालक सुदर्शन में उपस्थित हुआ उत्तम यौवन। यौवन था वनिताओं के लिए नेत्रों द्वारा उपभोग्य मधु, कामरूपी तरु का रागबन्धरूपी प्रवालों के बीच खिला पुष्प, बिना किए हुआ पूरे शरीर का शृङ्गार, और विलास का आदि आस्पद।

४९. लोक=पौर; प्रथिमानम्=महिमानम्; आपुः = ईयुः। ५०. दृष्ट=दृष्टि; पाराः = पारः, धाराः। ५१. व्यूह्य स्थितः = व्यूह्यास्थितः, व्यूहस्थितः; दिवोत्तरार्धं = दिवोत्तराङ्गम्, दिवोन्नतांसः / सम् हे.; अस्त्रे स = अस्त्रेषु म.हे., अस्त्रं स, अस्त्रे स व.अ.ना.। ५२. मधु=मुनि; निर्वेशनीयम्= निर्वेशपेयम् व.हे. अ.; बन्ध म.अ.ना., वल्ली, बन्धि व.; जातं=जालं।

प्रतिकृतिरचनाभ्यो दूतसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः ।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ।।५३।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ वंशानुक्रमो नाम
अष्टादशः सर्ग्गः ।।१८।।

(५३) अमात्यों ने शुद्ध सन्तान की कामना से सुदर्शन के लिए जो प्रतिकृति रचनाएँ दूतों से मँगवाई थीं उनसे अधिक रूप वाली राजकन्याएँ ला उपस्थित कीं। उन्होंने पहले से परिगृहीत 'श्री' और 'भूमि' में सौतिया डाह जगा दी।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में वंशानुक्रम नामक
अष्टादश सर्ग पूर्ण।। १८।।

रेवाप्रसादकविनेत्थमलेखि सोऽय–
मष्टादशोऽपि ननु सर्गवरः स्ववर्णैः ।
यस्मिन्नुपेक्षिततमेऽपि महाकवित्व–
प्राकाम्यमस्ति पदशः प्रतिभासमानम् ।।

---

५३. दूत=दूति म.; यूनः = नेतुः।

॥ एकोनविंशः सर्गः॥

अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसम् ।
शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥१॥
तत्र तीर्थसलिलैः स दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः ।
सौधवासमुटजैश्च विस्मृतः सञ्चिकाय फलनिःस्पृहस्तपः ॥२॥
लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी ।
भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥३॥
सोऽधिकारमभिकः कुलोचितं काश्चन स्वयमवर्त्तयत् समाः ।
तन्निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोऽभवत् ॥४॥
कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदङ्गनादिषु ।
ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्व्वमुत्सवमपोहदुत्सवः ॥५॥

(१) अग्रणी विद्वान् सुदर्शन ने अग्नि के समान तेजस्वी पुत्र **अग्निवर्ण** को अपने पद पर अभिषिक्त किया और अन्तिम वय में वह संयम के साथ नैमिष तीर्थ में रहने लगा। (२) वहाँ उसने तीर्थजल से भुला दी राजभवन की दीर्घिकाएँ (परिखा में भरा जल), तल्प को भुला दिया भूमि पर बिछे कुशों से और सौधों में निवास को भुला दिया उटजों से। उसने फलनिस्पृह होकर संचित किया तप (कर्मयोगी बनकर)। (३) उस सुदर्शन का पुत्र अग्निवर्ण प्राप्त राज्य के पालन के लिए निश्चिन्त था, क्योंकि बाहुबल से शत्रुओं को जीत चुके सुदर्शन ने पृथिवी अग्निवर्ण को केवल भोगने के लिए दी थी, न कि सम्हालने के लिए। (४) अग्निवर्ण ने कुछ वर्षों तक तो अपना कुलोचित अधिकार पाला, उसके बाद उसे सचिवों पर डालकर उसने अपना नव यौवन स्त्रियों के वश में कर दिया। (५) होने लगे उसके महल में उत्सव पर उत्सव। पहले उत्सव के बाद के उत्सव में और अधिक दिखाई देने लगी समृद्धि। वह कामी कामिनियों के साथ ये उत्सव अपने अन्तःपुर में मनाता, जिनमें मृदङ्ग गड़गड़ाते रहते।

१. **श्रुत=सुत; नैमिषं=नैमिशम्** अ.ना.; **वशी=वनम्**। २. **कास्तल्प=कातल्प, स्वल्प; उटजैः स=उटजेन** म.अ.ना., **विस्मृतः = विस्मरन्; संचिकाय=संचियाय**। ३. **तत्सुतः =तत्सुते**। ४. **अभिकः=अधिपः** व. हे.अ.ना., **अधिकः; तन्निवे=सन्निवे** अ.ना.; **परं स्त्री=परस्त्री**। अतःपरमित्येक एव पदोच्चयः। परस्त्रीति पाठोऽत्राशक्यग्रहस्तस्मात्। ५. **नादिषु=वादिषु; अधिकर्द्धिरुत्तरः=अधिकर्द्धिरुत्तमः, अधिकर्द्धिरुत्सवः;**

इन्द्रियार्थपरिशून्यमक्षमः सोढुमेकमपि स क्षणान्तरम् ।
अन्तरेव विहरन् दिवानिशं न व्यपैक्षत समुत्सुकाः प्रजाः ।। ६।।
गौरवाद् यदपि जातु मन्त्रिणां दर्शनं प्रकृतिकाङ्क्षितं ददौ ।
तद् गवाक्षविवरालम्बिना केवलेन चरणेन कल्पितम् ।। ७।।
तं कृतप्रणतयोऽनुजीविनः कोमलांशुनखरागरूषितम् ।
भेजिरे नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहिणम् ।। ८।।
यौवनोन्नतविलासिनीस्तननक्षोभलोलकमलाश्च दीर्घिकाः ।
गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः ।। ९।।
तत्र सेकहृतलोचनाञ्जनैर् धौतरागपरिपाटलाधरैः ।
अङ्गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकान्तिभिर्मुखैः ।।१०।।

(६) वह एक भी क्षण न सह पाता जिसमें उसे इन्द्रियार्थ न मिलता। वह दिनरात अन्तःपुर में ही विहार करता रहा, समुत्सुक प्रजा की उसे तनिक चिन्ता नहीं थी। (७) मन्त्रियों को गौरव देने के लिए वह कभी उनके अनुरोध पर जनता को दर्शन देता, किन्तु उसके लिए गवाक्ष से एक चरण लटका देता। (८) अनुजीवी जन उसे प्रणाम अर्पित करते रहते। चरण के नख से कोमल कोमल किरणें बिखरती रहतीं और वह अरुण किरणों रञ्जित कमल सा दिखाई देता। (९) बावलियों में पानी में छिपे मिलनगृह बने रहते। उनमें वह कामान्ध होकर विहार करता। यौवन से उन्नत स्तनों वाली विलासिनी नायिकाओं के स्तनों की टक्कर से कमल हिल उठते। (१०) अङ्गनाओं ने उस (अग्निवर्ण) को और अधिक आकृष्ट किया, क्योंकि उनके अङ्ग स्वाभाविक रूप में दिखाई दे रहे थे । पानी से उनकी आँखों का काजल धुल चुका था, अधरों का रंग धुल गया था और उनकी अपनी ललोंई दिखाई पड़ रही थी।

उत्सवः=उत्तरः,'ऋद्धिमन्तमधिकर्द्धिरुत्सवः पूर्वमुत्सवमपोहदुत्तरः'। ६. रेव=रे च व., रेषु म.हे.अ.ना.; व्यपै=व्यपे; सुकाः=सवाः। ८. कोमलांशु = कोमलात्म म.अ.ना., केवलांशु; रूषितम्=भूषितम् व., रञ्जितम्; हिणं=हणम् म.हे.। १०. अञ्जनैः = ञ्जन; लोभ=लम्भ; अर्पित = अर्घित अ., निर्मित; प्रकृति= प्रकृत।

घ्राणकान्तमधुगन्धवर्षिणीः पानभूमिरचनाः प्रियावृतः ।
अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः ।।११।।
सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरङ्गनाः ।
ताभिरप्युपहृतं मुखासवं सोऽपिबद् बकुलतुल्यदोहदः ।।१२।।
अङ्कमङ्कपरिवर्त्तनोचिते तस्य निन्यतुरशून्यतामुभे ।
वल्लकी च हृदयङ्गमस्वना वल्गुवागपि च वामलोचना ।।१३।।
स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ।
नर्त्तकीरभिनयातिलङ्घिनीः पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ।।१४।।
चारुनृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलः पिबन्नन्वजीवदमरालकेश्वरौ ।।१५।।

(११) वह प्रियाओं के साथ अलंकृत पानभूमि पहुँचता जिनमें घ्राणेन्द्रियों को परितृप्त करने वाली सुगन्ध बिखरती रहती, उसी प्रकार जिस प्रकार हथिनी के साथ कोई गजराज खिली कमलिनियों में पहुँचे। (१२) एकान्त में अङ्गनाएँ अग्निवर्ण के द्वारा प्रदत्त, अतएव और अधिक नशीला मद्य चाह—चाह कर पीतीं। वह भी उन अङ्गनाओं के द्वारा उपहृत मुखासव बकुलवृक्ष के समान पीता। (१३) उसकी गोद दो वस्तुएँ अशून्य बनाए रहतीं, एक तो मञ्जुस्वना वीणा और एक मीठी वाणी वाली वामलोचना (सुन्दरनेत्रों वाली अंगना)। वीणा और अङ्गना दोनों को अभ्यास रहता है अङ्क में परिवर्तन का। (१४) कला में निपुण था अग्निवर्ण। कभी कभी वह स्वयं ठोंकने लग जाता था मृदङ्ग। उस समय उसके वक्षःस्थल के हार डोलने लगते और वह मन को हर लेता। फलतः नर्त्तकियों से अभिनय नियम का उल्लंघन हो जाता और वह उन्हें लज्जित करता, गुरुजनों के पास में। (१५) सुन्दर नृत्य पूरा हो जाने पर पसीने से बिगड़े तिलक वाले उनके मुख को अपनी फूँक से सुखाते सुखाते वह चूम लेता और उनका पान करता। तब उसके सामने न इन्द्र का कोई महत्त्व रहता और न कुबेर का।

११. घ्राणकान्त=घ्राणकाम; वर्षिणीः=कर्षिणीः म.अ.ना., वाहिनीः; वृतः=सखः, अभ्यपद्यत=प्रत्यपद्यत;वासिता=वाशिता, हस्तिनी, सङ्कशा; सखः=वृतः, कमलिनीरिव=कमलिनीमिव। १२. मद=मधु; कारणं=बन्धिनं अ.ना., कारिणम्; हृतं=हितं व.हे.ना.; तुल्य=कल्प, बद्ध; दोहदः=दोहदम्, दौहृदः, सौहृदः, सौहृदम्। १३. च=इव; स्वना=स्वरा; वल्गु=मञ्जु व.हे.ना.। १४. माल्य=माल, वलयो हरन्=वलयोऽहरन्मनः व.; तिलङ्घिनीः=भिलङ्घिनीः ; लज्जयत्=मज्जयत्। १५. नृत्य=नृत्त; विगमे च=विरमे च, विगमे स, विगमेषु, विरमेषु; निलः=निलं, अन्वजीव=अत्यजीव म.हे.अ.ना.।

तस्य सावरणदृष्टसन्धयः काम्यवस्तुषु नवेषु सङ्गिनः ।
वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः समागमाः ।।१६।।
अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितम् ।
मेखलाभिरसकृच्च बन्धनं वञ्चयन् प्रणयिनीरवाप सः ।।१७।।
तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ।
शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशङ्किनो वचः ।।१८।।
लौल्यमेत्य गृहिणीपरिग्रहान्नर्त्तकीष्वसुलभासु तद्वपुः ।
वर्त्तते स्म स कथञ्चिदालिखन्नङ्गुलीक्षरणसन्नवर्त्तिकः ।।१९।।
प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितम् ।
निन्युरुत्सवविधिच्छलेन तं देव्य उज्झितरुषः कृतार्थताम् ।। २०।।

(१६) नई नई कामिनियों से उसके समागम दोनों प्रकार की सन्धिओं से निष्पन्न होते सावरण सन्धि (प्रच्छन्न) और दृष्ट सन्धि (प्रकाश)। किन्तु इसमें विषयों का उपभोग अधूरा ही रहता। **(१७)** जब वह प्रणयिनीजनों की वञ्चना करता तो वे अङ्गुली किसलयाग्र से डाँटती, टेढ़ी भ्रुकुटियों से देखती, और करधनी से बारम्बार बाँध लेती थीं। **(१८)** दूती से सूचना मिलने पर वह सुरतवार की रात्रि में पीछे खड़े होकर प्रेयसियों की बातचीत सुनता, जिसमें विप्रलम्भ की अनेक आशंकाओं की बात होती रहती। **(१९)** गृहिणी की उपस्थिति में नर्त्तकी से मिलना जब कठिन हो जाता तो वह अग्निवर्ण उत्सुक होकर उनकी आकृति लिखने का यत्न करता, परन्तु उँगलिओं से पसीना चूने लगता तो वर्त्तिका खिसक जाती। **(२०)** प्रेमगर्वित सौतों से डाह के कारण और कामावेश की बढ़ी तीव्रता के कारण देवियाँ अग्निवर्ण को उत्सव के बहाने कृतार्थ करती रहतीं (द्र. माल. ५.१९)।

१६. दृष्ट=दृष्टि; सन्धयः = बन्धयः; वल्लभाभि=अङ्गनाभि; उपसृत्य=अपसृत्य; सामि=साभि म.हे.अ.ना.; **भुक्त=मुक्त।** द्र. माल. ४.१५.३०। **१७. वीक्षितम्=वीक्षणम्। १८. दूति=दूत; विदितं=कथितं, विषयं, भिहितं, गदितं; वार=चारु; कातरं=कातरां, कातरी; शङ्किनः= शङ्कितं; वचः=गिरः, वचा। १९. लौल्यम्=लोलम्, लौलम्; एत्य=अन्य; नर्त्तकीष्व=नर्त्तकीषु सु; वर्त्तते स्म स=चित्रकर्मसु। २०. तं=ते; उज्झितरुषः=उज्झितरुषा।**

प्रातरेत्य परिभोगशंसिना दर्शनेन कृतखण्डनव्यथाः ।
प्राञ्जलिः प्रणयिनीः प्रसादयन् सोऽदुनोद् ग्रहणमन्थरः पुनः ।। २१ ।।
स्वप्नकीर्त्तितविपक्षमङ्गनाः प्रत्यभैत्सुरवदन्त्य एव तम् ।
प्रच्छदान्तगलिताश्रुबिन्दुभिः क्रोधभिन्नवलयैर्विवर्त्तनैः ।। २२ ।।
क्लृप्तपुष्पशयनाँ ल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ।
अन्वभूत् परिजनाङ्गनारतं सोऽवरोधभयवेपथूत्तरम् ।। २३ ।।
नाम वल्लभजनस्य ते मया प्राप्य भाग्यमपि तस्य काङ्क्ष्यते ।
लोलुपं बत मनो ममेति तं गोत्रविस्खलितमूचुरङ्गनाः ।। २४ ।।
चूर्णबभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितम् ।
उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ।। २५ ।।

(२१) अग्निवर्ण रात भर कहीं अन्यत्र रहता और सबेरे परिभोग के चिह्न लिए लौटता तो उसकी दशा देखकर खण्डन की व्यथा में पड़ी रानियों को अंजली बाँधकर मनाने का प्रयत्न करता, यद्यपि उनसे लिपटने की तीव्रता उसमें नहीं रहती। ('प्रणय' पाठ में रतियाचना में वह मन्थरता लिए रहता।) **(२२)** अग्निवर्ण स्वप्न में किसी अन्य प्रेमिका का नाम ले डालता तो अङ्गनाएँ उसका प्रतिवाद करतीं, परन्तु शब्दों मे नहीं, अपितु पलंग की चद्दर के छोर तक वह निकले आँसुओं से तथा क्रोध में बदली करवटों में टूटी चूड़ियों से। **(२३)** दूतियाँ उसे रास्ता दिखलातीं और वह पहुँचता लतागृहों में। वहाँ फूल के बने बिछौने पर अनुभव करता वह परिजनों की अङ्गनाओं के साथ रति का, यद्यपि रानियों के भय से वह काँपता रहता। **(२४)** जब वह किसी की जगह किसी अन्य प्रेमिका का नाम ले लेता तो नाराज रानी उसे उलहना देती, 'तुम्हारी प्रेमिका का नाम तो मुझे मिल गया। उसका भाग्य भी मुझे चाहिए'। **(२५)** सबेरे जब वह उठता तो उसका बिस्तर उसकी रात को की रतिलीलाएँ प्रकट करता। कहीं चूर्ण बभ्रु, कहीं मसली माला से चिह्नित, कहीं टूटी पड़ी करधनी से युक्त और कहीं आलक्तक से अंकित। (इन सबमें कारण हैं भिन्न भिन्न रतिकरण)।

२१. शंसिना=शोभिना म.हे.अ.ना.; कृत=हृत; खण्डन= मण्डल; व्यथाः=व्यथः; ग्रहण=द्विगुण, प्रणय; मन्थरः=मत्सरः। २२. तम्=तत्; अश्रु=अस्र अ.ना.; विवर्त्त= निवर्त्त हे.। २३. दर्शनः=दर्शिनः। २४. काङ्क्ष्यते= काङ्क्षितैः, काङ्क्षिते; बत=ननु म.; तं=गां। २५. लुलित= लुलितं, ललितं, ललित; स्रगाकुलं=प्रजाकुलम्; छिन्न=भिन्न।

स स्वयं चरणरागमादधे योषितां न तु तथा समाहितः ।
लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितम्बिभिः ।। २६।।
चुम्बने विपरिवर्त्तिताधरं हस्तरोधि रसनाविघट्टने ।
विघ्नितेच्छमपि तस्य सर्व्वतो मन्मथेन्धनमभूद् वधूरतम् ।। २७।।
दर्प्पणेषु परिभोगदर्शिनीर्नर्म्मपूर्व्वमनुपृष्ठसंस्थितः ।
छायया स्मितमनोज्ञया वधूर् ह्रीनिमीलितदृशश्चकार सः ।। २८।।
कण्ठसक्तमृदुबाहुबन्धनं न्यस्तपादतलमग्रपादयोः ।
प्रार्थयन्त शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुम्बनम् ।। २९।।
प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेषमतिशक्रशोभिनम् ।
पिप्रिये न स तथा यथा युवा व्यक्तलक्ष्म परिभोगमण्डनम् ।। ३०।।

(२६) वह स्त्रियों के पैरों में अलता स्वयं लगाता, किन्तु एकदम एकाग्रचित्त हुए बिना ही। उसकी आँखे लुभा ली जातीं खिसके अंशुक वाली कटि के द्वारा, जिनसे झलक पड़ते कूल्हे। (२७) नई वधू चुम्बन में अधर उलटा लेती और करधनी छूने में हाथ रोक देती, इस प्रकार उसके साथ रति इच्छापूर्त्ति में विघ्न से युक्त रहती तब भी वह ईंधन बनती काम (अग्नि) के लिए। (२८) प्रमदाएँ दर्पणों में अपना प्रियतमपरिभोग देखतीं तो उन्हें नर्मपूर्वक मुसकुराता अग्निवर्ण पीछे खड़ा दिखाई देता। वे लज्जानतमुखी हो जातीं। (२९) प्रियतमाएँ जब रात बीतने पर बिछुड़ने को होतीं तो उससे चुम्बन चाहतीं, ऐसा चुम्बन जिसमें कण्ठ में किया बाहुपाश कुछ ढीला होता और अपने पादतल पादाग्र पर रखे होती। (३०) दर्पणतल में अपना इन्द्र से भी उत्कृष्ट राजवेष देखकर वह उतना तृप्त नहीं होता जितना तृप्त होता परिभोग का वेष देखकर, जिसमें दिखाई देते परिभोग के चिह्न। वह युवा जो था।

२६. न तु=ननु हे., न च म., तु न; समाहितः=समाहितम्। २७. ने विपरि=नेऽपि परि म.अ.ना., ने च परि, नेषु परि; वर्तिताधरं=वर्त्तिताननं, वर्तताधरा; रसना=रशना म.अ.ना.; थेन्धन=थोत्तर। २८. संस्थितः=संश्रितः, संश्रयः हे.अ.ना., संश्रिता; लितदृशः = लितमुखीः, लनयना। २९. कण्ठ=स्कन्ध; प्रार्थयन्त=प्रार्थयन्ति; शयनोत्थितं= शयनोत्थिता म.हे.अ.ना., शयने स्थितं; विसर्ग=निसर्ग, वियोग, विशेष,विरोध, विमोक्ष अ.ना.; चुम्बनम्=चुम्बितम्। ३०. तलस्थमात्म=तलस्थलात्म; वेष=वेश; शक्र=शक्ति, मात्र; शोभिनम्=शोभितम्, शोभनम्; न स=स न; तथा=यथा; यथा=तथा; यथा=युवा म.हे.अ.ना.; तथा=युवा ; लक्ष्मपरि=भोगपरि; मण्डनम्=मण्डलम्।

मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमनवस्थितं प्रियाः ।
विद्म ते शठ! पलायनच्छलान्यञ्जसेति रुरुधुस्तमङ्गनाः ।। ३१ ।।
तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्य योषितः ।
अध्यशेरत बृहद् भुजान्तरं पीवरस्तनविलुप्तचन्दनम् ।। ३२ ।।
सङ्गमाय निशि गूढचारिणं चारदूतिकथितं पुरोगताः ।
वञ्चयिष्यसि कुतस्तमोवृतः कामुकेति चकृषुस्तमङ्गनाः ।। ३३ ।।
योषितामुडुपतेरिवार्च्चिषां स्पर्शनिर्वृतिमसाववाप्नुवन् ।
आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ।। ३४ ।।
वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः ।
शिल्पकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलोकयन् ।। ३५ ।।

(३१) अग्निवर्ण का चित्त एकनिष्ठ नहीं था इसलिए मित्रकार्य का बहाना कर पास से चलने लगे उसे प्रियाएँ केश पकड़कर यह कहती हुई रोक लेतीं कि 'हे शठ! जान रही हैं तेरे भाग निकलने का छल'। **(३२)** निर्दयरत के श्रम से अलसाई प्रमदाएँ रति की 'कण्ठसूत्र' मुद्रा के बहाने उसके बृहद् वक्षःस्थल पर अधिष्ठित रहतीं। उनसे पीवर स्तनों से उस पर लगा चन्दन विलुप्त हो चुका रहता। (कण्ठसूत्र को स्तनालिङ्गन भी कहा गया है।) **(३३)** रात को वह छिपकर जहाँ पहुँचता दूतियों से उसकी सूचना पाकर अङ्गनाएँ वहाँ पहले ही पहुँच जातीं और यह कहती हुई खींच लिया करतीं कि अन्धकार में छिपकर भी देखती हैं तू कैसे हमें ठगता है। **(३४)** अग्निवर्ण को लत लग गई चन्द्रकिरणों और सुन्दरियों के स्पर्श से तृप्ति पाने की। फलतः वह कुमुदाकर की उपमा पाने लगा रात्रि को जागने और दिन को सोने के कारण। **(३५)** शिल्पकरी नामक सेविकाएँ अग्निवर्ण के दशनक्षत से अधर पर वेणु रखने में पीड़ा का अनुभव करतीं और नखक्षत से ऊरु पर वीणा रखने में। फलतः वे उसे टेढ़े नेत्रों से देखतीं। (शिल्पकरी मालविकाग्निमित्र ५.९–१०)।

३१. अपदिश्य=उपदिश्य; व्यपदिश्य; पार्श्वतः=पार्थिवः, पार्थिवम्; प्रस्थितम्=पार्थिवम्। ३२. रति=रत; दिश्य=विध्य हे., **विद्ध; चन्दनम्=कुङ्कुमम्** व.। **३३. चार=चारु** हे., **चौरि; गताः= गमाः; कुतः = नु नः, न नः ; तमोवृतः=तमोवृताः, तमोवृतं; चकृषुः=जगृहुः। ३४. निर्वृतिमसाववाप्नुवन्=निर्वृतिसुखान्यवाप्नुवन्; वाप्नुवन्=नाप्नुवन्; करोपमाम्=करोपमम्। ३५. तोरवः=तोरसः** व.हे.; **शिल्पकार्य=शिल्पिकार्य** हे.; **वेजिताः=वेजिनीः; व्यलोकयन्=व्यलोभयन्** म.।

अङ्गसत्त्ववचनाश्रयं मिथ: स्त्रीषु नृत्यमुपधाय दर्शयन् ।
स प्रयोगनिपुण: प्रयोक्तृभि: संजघर्ष सह मित्रसन्निधौ ।। ३६।।
अंसलम्बिकुटजार्जुनस्रजस्तस्य नीपरजसाऽ ङ्गरागिण: ।
प्रावृषि प्रमदबर्हिणेष्वभूत् कृत्रिमाद्रिषु विहारविभ्रम: ।। ३७।।
विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबला: स तत्वरे ।
आचकाङ्क्ष घनशब्दविक्लवास्ता विवृत्य विशतीर्भुजान्तरम् ।। ३८।।
कार्त्तिकीषु च विमानहर्म्यभाग् यामिनीषु ललिताङ्गनासख: ।
अन्वभुङ्क्त सुरतश्रमापहां मेघमुक्तविशदां स चन्द्रिकाम् ।। ३९।।
सैकतं च सरयूं विवृण्वतीं श्रोणिबिम्बमिव हंसमेखलम् ।
स प्रियाविलसितानुकारिणीं सौधजालविवरैर्व्यलोकयत् ।। ४०।।

(३६) अग्निवर्ण आङ्गिक, सात्त्विक और वाचिक नृत्य (अभिनय) स्त्रियों को स्वयं सिखाता और दिखलाता। प्रयोगनिपुण वह प्रयोगनिपुण प्रयोक्ताओं से विचारसंघर्ष करता, मित्रों के समक्ष। **(३७)** प्रावृट् (वर्षा) में उसका क्रीडाशैलों (कृत्रिमाद्रि) पर विहार—विभ्रम होता। उन पर मदमत्त मयूर घूमते। उस समय वह माला पहनता कुटज तथा अर्जुन के पुष्पों की और अङ्गराग लगाता कदम्ब पुष्पों के पराग का। **(३८)** रूठकर कोई अबला यदि शयन (पलंग) पर पराङ्मुखी होकर सो जाती, तो वह मनाने की शीघ्रता नहीं करता। वह चाहता कि बादल गरजे और उससे घबराकर वह स्वयं उलटे और उसके विशाल वक्ष:स्थल में चिपक जाए। **(३९)** शरद् ऋतु में कार्त्तिक की रात्रियों में वह ललित अङ्गना/नाओं के साथ सात मंजिले महल के वितानयुक्त हर्म्य पर मेघयुक्त अतएव पर्याप्त उज्ज्वल और सुरतश्रम मिटाने वाली चाँदनी का सेवन करता। **(४०)** वह सौध की जालियों में से सरयू को भी देखता। हंसमेखलायुक्त नितम्ब जैसे सैकत को खोले वह प्रिया के विलास का अनुकरण करती लगती।

३६. वचना=रचना; श्रयं=श्रितं, प्रियम् म.हे.अ.ना.; **नृत्यम्=नृत्तम्** हे.अ.ना.; **उपधाय दर्शयन्=उपधार्य दर्शयन्, अवधार्य दर्शयन्, अवधाय दर्शयन्, उपदर्शयन्नृप:; निपुण:= निपुणै:** म.हे.ना.; **प्रयोक्तृभि:=प्रियोक्तिभि:; संजघर्ष=संजहर्ष** व.हे.। **३७. अंस=अङ्ग** म.हे.अ.ना.; **लम्बि=लग्न** म.हे.अ.ना. ; **विभ्रम:=संभ्रम:** म.। **३९. च विमा=सविमा** म.हे.अ.ना.; **श्रमापहाम्= क्लमापहाम्** अ.ना., **कलमापहा:; मुक्त=मुक्ति। ४०. इव=इह; मेखलम्=मेखलाम्** व.; **स प्रिया=स्वप्रिया** म.हे., **स्वां प्रिया; व्यलोकयत्= व्यलोकयन्, विलोकयन्।**

मर्मरैरगरुधूपगन्धिभिस्त्यक्तहेमरसनैस्तमेकतः ।
जह्रुराग्रथनमोक्षलोलुपं हैमनैर्निवसनैः सुमध्यमाः ॥ ४१ ॥
अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु ।
तस्य सर्व्वसुरतान्तरक्षमाः साक्षितां शिशिररात्रयो ययुः ॥ ४२ ॥
दक्षिणेन पवनेन सम्भृतं प्रेक्ष्य चूतकुसुमं सपल्लवम् ।
अन्वनैषुरवकीर्णविग्रहास्तं दुरुत्सहवियोगमङ्गनाः ॥ ४३ ॥
ताः स्वमङ्कमधिरोप्य दोलया प्रेङ्खयन् परिजनप्रवृद्धया ।
मुक्तरज्जु निबिडं भयच्छलात् कण्ठबन्धनमवाप बाहुभिः ॥ ४४ ॥
तं पयोधर–निषिक्त–चन्दनैर्मौक्तिक–ग्रथित–चारु–भूषणैः ।
ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलम्बिमणिमेखलैः प्रियाः ॥ ४५ ॥
यत् स लग्नसहकारमासवं रक्तपाटलसमागमं पपौ ।
तेन तस्य मधुनिर्गमात् कृशश्चित्तयोनिरभवत् पुनर्नवः ॥ ४६ ॥

(४१) बढ़ियाँ मध्यभाग वाली प्रमदाएँ सुनहले और मर्मर ध्वनि वाले, अगुरु धूप से सुगन्धित और सुवर्ण मेखलायुक्त वस्त्रों से नींवी को खोलने के इच्छुक उसको एक तरफ खींच ले जाया करती थीं। (४२) शिशिर की रात्रियाँ वायु के प्रवेश से रहित गर्भगृहों में टकटकी लगाकर निष्कम्प दीप की दृष्टियों से अग्निवर्ण के सभी प्रकार के सुरतों का दर्शन करतीं। (४३) अङ्गनाओं को अग्निवर्ण का वियोग दुःसह होता और वे मान छोड़कर उसे भाँति भाँति से मनातीं ज्योंही दक्षिणी (मलय) पवन से प्रपुष्ट आम्रमञ्जरी और आम्रपल्लव उन्हें दिखाई पड़ जाता। (४४) प्रमदाओं को वह गोद में बिठा लेता और दोला को परिजनों से बढ़वा देता तो प्रमदाएँ रस्सी छोड़कर भय के बहाने उसको बाहुओं से कण्ठ में जमकर कस लेतीं। (४५) ग्रीष्म में प्रियाएँ अग्निवर्ण का सेवन पयोधरों को चन्दन से सींचकर करतीं, मोतियों से जड़े सुन्दर आभूषणों से और नितम्बों पर मणिमेखलाएँ लटका लटकाकर। (४६) वसन्त बीत गया था इसलिए अग्निवर्ण का काम दुबला हो गया था, किन्तु मधुपान ने

४१. अगरु=अगुरु; धूपगन्धिभिः=धूमधूपितैः म.हे.अ.ना.; त्यक्त=व्यक्त म.अ.ना., बद्ध; लोलुपं=लोलुभं; निवसनैः=सुवसनैः; सुमध्यमा=व्यलोभयन्। ४२. दृष्टयः=दीप्तयः, दृप्तयः; साक्षितां=साक्षताम्, प्रेक्ष्यतां। ४३. कीर्ण=धूत व.हे.अ.ना.; दुरुत्सह=सुदुः सह। ४४. ताः स्वमङ्क=काश्चिदङ्क, काञ्चिदङ्क; अधिरोप्य=अवरोप्य म.हे.अ.ना.; प्रेङ्खयन्=प्रेरयन्, प्रेषयन्; प्रवृद्धया हे.=प्रबद्धया व., प्रवृत्तया, अपविद्धया म.अ.ना.। ४५. षिक्त=षक्त; ग्रीष्म=ग्रैष्म; मेखलैः=मेखलाः व.; प्रियाः=स्त्रियः। ४६. लग्न=भग्न अ.ना.; समागमं पपौ=समागतं पपौ अ.ना., समागतं ययौ, समागतौ पपौ, मसेवतासकृत् हे.।

एवमिन्द्रियसुखानि निर्विशन्नन्यकार्यविमुखः स पार्थिवः ।
आत्म—लक्षण—निवेदितानृतूनत्यवाहयदनङ्गवाहितः ।। ४७।।
तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः ।
आमयस्तु रतिरागसंभवो दक्षशाप इव चन्द्रमक्षिणोत् ।। ४८।।
दृष्टदोषमपि तं न सोऽत्यजत् सङ्गमं तु भिषजामनाश्रवः ।
स्वादुभिस्तु विषयैर् हृतस्ततो दुःखमिन्द्रियगणो निवार्यते ।। ४९।।
तस्य पाण्डुवदनाल्पभूषणा सावलम्बगमना मृदुस्वना ।
राजयक्ष्मपरिहाणिराययौ कामयानसमवस्थया तुलाम् ।। ५०।।

उसे पुनः नया कर दिया। मधु में मिला रहता आम्रमञ्जरी का सुगन्धित अंश और मिली रहती रक्तपाटल की पँखुड़ियाँ। (४७) इस प्रकार राजा अग्निवर्ण काम से प्रेरित होकर अपने लक्षणों से सूचित ऋतुओं को इन्द्रियसुखों का भोग करते हुए बिताता रह जाता, वह विमुख रहता अन्य राजकाजों से। (४८) स्पष्ट रूप से अग्निवर्ण असावधान था, किन्तु अन्य राजे उस पर आक्रमण नहीं कर सके, क्योंकि उसका उतना प्रभाव था। किन्तु रति की निषिद्ध भुक्ति से उत्पन्न (क्षय) रोग ने उसे धर दबोचा, जैसे दक्षशाप ने चन्द्रमा को। (दक्ष ने अपनी सभी कन्याओं को चन्द्र को ही व्याह दिया थां, किन्तु वह अन्य कन्याओं को छोड़ केवल रोहिणी में ही आसक्त रहा तो दक्ष ने उसे क्षयरोग का शाप दे दिया।) (४९) रोग का दोष दिखाई देने लगा था, तब भी अग्निवर्ण से स्त्रीसङ्गरूपी अतीव मीठी वस्तु छूट न सकी और वैद्यों की सलाह उसने मानी नहीं। ठीक ही है, स्वादु विषयों पर लुटी इन्द्रियाँ उनसे कठिनाई से ही निवृत्त हो पाती हैं। (५०) अग्निवर्ण का चेहरा पीला पड़ गया, भूषण गिने चुने ही वह पहँनता, पकड़ कर चलता और उसका कण्ठस्वर धीमा हो गया। परिणाम यह हुआ कि वह कामुक व्यक्ति की जैसी अवस्था होती हैं उस जैसी अवस्था में आ पहुँचा।

---

४७. वेदिता=षेविता; वाहितः=मोहितः व.हे., नोदितः, पीडितः। ४८. प्रभावतः= स्वभावतः; तु रति=सुरत; अक्षिणोत्=अक्षणोत्। ४९. दृष्ट=दृष्टि; सः/च+अत्यजत्/ अत्यगात्=सोऽत्यजत् म.हे. अ.ना., चात्यजत्, चात्यगात् अ.ना., सोऽत्यगात्; सङ्गमं तु=सङ्गवस्तु म.हे.अ.ना., सङ्गतस्तु; नाश्रवः= नास्पदम् हे.; तु=च व., हि हे., स; निवार्यते=हि वार्यते व.अ.ना., निवार्यते म., न वार्यते। ५०. स्वना=स्वनी, स्वरा; यक्ष्मपरिहाणिः=यक्ष्मपरिहानिः, यक्ष्मणस्तु परिहाणिः हे., यक्ष्मणात्मपरिहाणिः अ.ना., यक्ष्मणाऽपि परिहाणिः, यक्ष्मणा सपदि हानिः, यक्ष्म आत्मपरिहानिः, यक्ष्माङ्गपरिहाणिः।

व्योम पश्चिमकलास्थितेन्दु वा पङ्कशेषमिव घर्म्मपल्वलम् ।
राज्ञि तत्कुलमभूत् क्षयाऽऽतुरे वामनार्च्चिरिव दीपभाजनम् ।।५१।।
गूढमेषु दिवसेषु पार्थिवः कर्म्म साधयति पुत्रजन्मने ।
इत्यदर्शितरुजोऽस्य मन्त्रिणः शश्वदूचुरघशङ्किनीः प्रजाः ।।५२।।
स त्वनेकवनितासखोऽपि सन् पावनीमनवलोक्य सन्ततिम् ।
वैद्ययत्नपरिभाविनं गदं न प्रदीप इव वायुमत्यगात् ।।५३।।
तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा ।
रोगशान्तिमपदिश्य मन्त्रिणः संभृते शिखिनि गूढमादधुः ।।५४।।
तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्म्मचारिणी ।
साधु दृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियम् ।।५५।।

(५१) उस राजा के क्षयरोग से पीड़ित हो जाने पर रघु का वंश ऐसा लगने लगा जैसे अन्तिम कला का चन्द्र लिए आकाश लगता है, ग्रीष्म का सरोवर लगता है, जिसमें केवल कीचड़ शेष रह गई हो या दीपपात्र जिसकी लौ छोटी पड़ गई हो। **(५२)** प्रजाओं में राजा के अनिष्ट की शंका उठती। मन्त्री लोग यह कहकर उन्हें शान्त करते रहते कि इन दिनों राजा पुत्रजन्म के लिए गोपनीय ढंग से कुछ अनुष्ठान कर रहे हैं। वे राजा की राजयक्ष्मा की चपेट छिपाए रहते। **(५३)** अग्निवर्ण का यह हुआ कि उसकी स्त्रियाँ तो अनेक थीं, परन्तु उसे पावन सन्तति के दर्शन नहीं हुए, और वह वैद्यों से असाध्य उस रोग को उसी प्रकार नहीं लाँघ पाया, जिस प्रकार प्रदीप वायु को। **(५४)** अग्निवर्ण को मन्त्रियों ने उसके महल के उपवन में ही अन्त्येष्टिवेत्ता पुरोहित के द्वारा प्रज्वलित अग्नि में गोपनीयता के साथ रख दिया, और बहाना रोगशान्ति का ही बनाते रहे। **(५५)** मन्त्रियों ने जनता और अमात्य वर्ग के प्रमुखों को इकट्ठा किया और अविलम्ब गर्भवती रानी का राज्याभिषेक कर दिया। गर्भ के लक्षण उसमें शुभ थे।

५१. तेन्दु वा=तेन्दुवत् व.अ.ना., तेन्दुमत्, तेन्दुना। ५२. गूढम्=वाढम् म.; एषु=एष; पार्थिवः=भूपतिः; साधयति=कारयति; जन्मने=साधने; शङ्किनीः=शंसिनीः। ५३. पावनीम्=ज्यायसीम्, पावनीः; अनवलोक्य=न समवाप्य; सन्ततिम्=सन्ततीः; न प्रदीप इव=प्राप्य दीप इव। ५४. एव संगताः=एव मन्त्रिणः हे., एवमागताः; अपदिश्य=उपदिश्य। ५५. मुख्य=पुष्प; साधु दृष्ट=साधुदृष्ट म.हे.अ.ना.; दृष्ट=पृष्ट हे.; प्रत्यपद्यत=प्रत्यपाद्यत।

तस्यास्तथाविधनरेन्द्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः ।
निर्वापितः कनककुम्भमुखोज्झितेन वंशाभिषेकपयसा शिशिरेण गर्भः।। ५६।।

तं भूत्यर्थं प्रसवसमयाकाङ्क्षिणीनां प्रजाना–
मन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ।
मौलैः सार्धं स्थविरसचिवैर् हेमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद् भर्त्तुरव्याहताज्ञा ।। ५७।।

इति रघुवंशे महाकाव्ये कालिदासकृतौ गर्भाभिषेको नाम
एकोनविंशः सर्ग्गः।। १९।।

रेवाप्रसादेन सनातनेन यत् काश्यपेनेदमटङ्कि काव्यम् ।
माघे सिते दस्रतिथौ तदेतन्मनीषिणामस्तु मुदेऽद्य काले ।।

(५६) रानी के गर्भ को पहले तो राजा के न रहने से उष्ण शोकाश्रु का अभिषेक सहना पड़ा, परन्तु कनककुम्भों के मुख से छूटे वंशानुगत अभिषेक के शिशिर जल से उसका शमन हो गया। (५७) रानी कुलक्रम से चले आ रहे वृद्ध सचिवों के सहयोग से हेमसिंहासन पर आसीन होकर राज्य का विधिवत् शासन पति की आज्ञा के अनुसार करने लगी। वह गर्भवती थी तो प्रसव समय की प्रतीक्षा कर रही प्रजा उसे उसी दृष्टि से देखती थी, जिस दृष्टि से बोई हुई भूमि को देखती है श्रावण की बोनी के बाद। प्रजा को प्रतीक्षा थी राजवंश की अक्षुण्णता की।

इस प्रकार महाकवि कालिदास की कृति रघुवंश महाकाव्य में गर्भाभिषेक नामक
उन्नीसवाँ सर्ग पूर्ण हुआ।। १९।।

५६. प्रथमा=पृथगा; खोज्झितेन=खोत्थितेन, खोद्गतेन, खोर्जतेन, खार्पितेन, खोद्धृतेन; वंशा=वंश्या, राज्या, स्नाना; पयसा=विधिना म.हे.अ.ना.। ५७. तं भूत्यर्थं=तं भावार्थं; संभूत्यर्थं, तं भावाय हे.अ.ना., तं सन्तान, संतानाय; समया=सखया; गूढं=गर्भा; नभो=बभौ व.; मौलैः = मूलैः; स्थविर=स्वचिर; हेम=हैम; अशिषत्=अवशात्; अव्याहताज्ञा= अव्याहताख्या, राज्ञेव गुर्व्वी।

इतः परं पद्यमिदं काशीनागरीप्रचारणीसभागते ८३१ इति पाण्डुग्रन्थविशेषे दृश्यते–

अथ दुहितरमस्याश्चित्रकान्ताय राज्ञे द्रविणहरिगजेन्द्रक्ष्मासमेतां निधाय ।
अनुययुरचिरेण स्वामिनं शुद्धधर्म्मा सुरसरिति विहाय स्वं वपुर्मन्त्रिणोऽपि ।।

पुष्पिका – इति रघुवंशे महाकाव्ये, कालिदासकृतौ = कविश्रीकालिदासकृतौ, कालदासकृतौ गम्भीरकाव्ये, गर्भाभिषेको नाम = राज्ञीराज्याभिषेको नाम, सुरतवर्णनो नाम, विषयवर्णनो नाम, अग्निवर्णक्रीडावर्णनो नाम, समाप्तः एक(ोन)विंशतिः सर्गः। संपूर्णमिदं रघुवंशाख्यं महाकाव्यम्।।

।। कुमारसम्भवम् ।।

अष्टमूर्त्तिमहाकाव्यम्

।।श्रीः।।

सनातनकविरेवाप्रसादद्विवेदिसंपादितं

महाकविकालिदासकृतम् अष्टमूर्त्तिमहाकाव्यं

।। कुमारसंभवम् ।।

।। प्रथमः सर्गः ।।

ॐ अस्त्युत्तरस्यान्दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्व्वापरौ वारिनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।१।।
यं सर्व्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।।२।।
अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।३।।
यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्त्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ।।४।।

(१) उत्तर दिशा में है एक पर्वतों का देवतारूप अधिराज, जिसका नाम है 'हिमालय'। वह पूर्व और पश्चिम के दोनों समुद्रों का अवगाहन करता है, ऐसा प्रतीत होता है कि वह पृथिवी की चौड़ाई नापने हेतु फैला दण्ड है। ('चार हाथ का एक दण्ड' भरतनाट्यशास्त्र २.१६)। (२) (प्राकृतिक सम्पदा को अनियन्त्रित रूप से नष्ट होते देख) पृथिवी गाय के रूप में छिप गयी तो चराचर भूख—प्यास से नष्ट होने लगे। उन्होंने भगवान् के अंशावतारी राजा पृथु से रक्षा की गुहार की। पृथु ने धनुषबाण ले पृथिवी को ही नष्ट करना चाहा तब डरी पृथ्वी ने गोरूप में दोहन स्वीकार किया। (अनेक दोग्धाओं ने उसे दुहा,) किन्तु जब दोग्धा बना मेरु तब पर्वतों ने चमकते रत्न और चमकती औषधियों का जो दोहन किया उस समय वत्स बनाया गया हिमालय को ही। (श्रीभागवत ४.१८) (३) जिसमें ठंड बहुत अधिक है, किन्तु उससे उसकी सुन्दरता तथा स्पृहणीयता समाप्त नहीं हुई, क्योंकि इसमें उत्पन्न हुआ करते हैं अनन्त रत्न। गुणों के समुदाय में एकाध दोष डूब जाता है, यथा चन्द्र की रश्मियों में उसका कलंक। (४) हिमालय के शिखरों पर गैरिक आदि विविध धातुएँ हैं, फलतः ऐसा लगता है कि इस पर सदा ही

(१) **वारि = तोय; वगाह्य = विगाह्य।** 'चतुर्हस्तो भवेद् दण्डः' इति नाट्यशास्त्रे २.१६ भरतः। संवादाय द्र० शाकुन्तले ७.९.२ पृ० ६४२ कालिदासग्रन्थावली—२।

आमेखलं सञ्चरतां घनानां छायामधः—सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते सानूनि यस्यातपवन्ति सिद्धाः ।।५।।
पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ।।६।।
न्यस्ताक्षरा धातुरसेन यत्र भूर्ज्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।।७।।
यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां स्थानप्रदायित्वमिवोपगन्तुम् ।।८।।
कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ।।९।।

सन्ध्या, जिसमें मेघखण्डों पर राग छाया रहता है, बनी ही रहती है, भले ही उसका समय उपस्थित न रहे, (धातुराग+सन्ध्याराग, शिखर+मेघखण्ड। शिखरों का वर्ण श्याम।) (५) जिस पर ऊपर रहती है धूप और बीच की चोटियों पर घूम रहे मेघों की छाया। जब मेघ बरस उठते हैं तो सिद्धजन उद्विग्न होकर ऊपर धूप में जा पहुँचते हैं। (६) यहाँ मुक्ताधारी हाथी भी हैं और शेर भी। शेर हाथी का शिकार कर चले जाते हैं, किन्तु उनका गमन—मार्ग किरात ताड़ लेते हैं उनके नाखूनों से खिसके मुक्ताफल देखकर, यद्यपि उनमें लगा रक्त पिघले बर्फ में बह चुका रहता है। (७) जहाँ विद्याधर सुन्दरियों के लिए अनङ्गलेख (प्रेमपत्र) लिखना सरल है। वे भूर्जपत्र पर धातुरस से लाल—लाल अक्षर बना देती हैं हाथी के शरीर पर उछले लाल चिह्नों के जैसे लगने लगते हैं वे पत्र। (८) यहाँ छिद्रवाले कीचक नामक बाँस गुफाओं के मुख से उठी हवा से गूँजते रहते हैं, वे एक प्रकार से जोर—जोर से गाना चाह रहे किन्नरों को स्थान/तान की संगत देते रहते हैं। (वाल्मीकि रामायण में स्थान—शब्द का उपयोग है। वल्लभदेव ने भी 'स्थान'—पाठ ही माना है।) (९) हाथी के कपोलों में चलती है खुजली, तो उसे मिटाने के लिए वे उन्हें रगड़ते हैं सरल वृक्षों से तो उनकी छाल उपट जाती है और उसकी सुगन्ध से पूरी की पूरी चोटियाँ भर जाती हैं।

(५) **मधः=मिषे; गतां=गताः** ना.। (६) **विदन्ति = वदन्ति, विन्दन्ति**। (७) **योगम् = भोगम्; सुन्दरीणां = कामिनीनां**। (८) **स्थान = तान** म.अ.ना.। स्थानमिति रामायणसंवादी पाठः। (९) **विघ = संघ; प्रसूतः = समीरः** व.; **गन्धः= गन्धैः** व.।

वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ।।१०।।
उद्वेजयत्यङ्गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्त्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ।।११।।
दिवाकराद् रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ।।१२।।
लाङ्गूल–विक्षेप–विसर्पि–शोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति वालव्यजनैश्चमर्यः ।।१३।।
यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति ।।१४।।
भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ।।१५।।

(१०) वनेचर लोग अपनी वनिताओं के साथ रमण करने गुफाओं में जाते हैं, वहाँ उन्हें रात्रि में भी दिन का सुख मिलता है, क्योंकि उनके भीतर प्रज्वलित औषधियाँ बन जाया करती हैं सुरत–प्रदीप। (११) गन्धर्व वनिताओं के नितम्बों का बोझ दुर्वह होता, उससे पीड़ित वे मार्ग में जमे बर्फ पर गति की मन्दता नहीं छोड़ पातीं, यद्यपि बर्फ से उनकी उँगलियाँ ठिठुर जाती हैं। (१२) जो हिमालय दिन में सूर्य से डरे से अन्धकार को गुफाओं में शरण दिए रहता है। ऊँचे सिर के मानी व्यक्ति शरण में आ पहुँचे क्षुद्र पर भी सत्पुरुष सा ममत्व रखते हैं। (१३) चमरीगण अपनी चन्द्रकिरण सी उज्ज्वल तथा शोभायमान पूँछे यहाँ वहाँ घुमाती रहती हैं और हिमालय के गिरिराज विरुद को चँवर डुला–डुलाकर सार्थक बनाती रहती हैं। (१४) जहाँ सिल्क की साड़ी खींच लेने पर जब किंपुरुषों की अङ्गनाएँ लाज में डूब जाती हैं, तब परदे का काम दरीगृह के द्वार पर ऐसे ही आकर लटक गए मेघ करते रहते हैं। (१५) हिमालय पर भागीरथी की धारा गिरती है और उससे सीकर/फुहार उछलती है। देवदारुओं को कँपाकर आयी हवा उन्हें उड़ा लाती है। जंगली जानवरों को खोजते–खोजते थके किरात इन झोकों का आसेवन करते हैं। इन्हीं झोकों से मयूरों के पिच्छ तितरबितर हुए रहते हैं।

(१०) गृहो = मुखो; निषक्त = विषक्त, निषिक्त; वामनस्य काव्यालङ्कारसूत्रवृत्तौ४.३.२३। **(१२) प्रपन्ने= प्रविष्टे; सां सतीव=सामतीव। (१४) द्वार=द्वारि।**

सप्तर्षिहस्तावचिताऽवशेषाण्यधो विवस्वान् परिवर्त्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ।।१६।।
यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ।।१७।।
स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ।।१८।।
कालक्रमेणाऽथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसङ्गे ।
मनोरमं यौवनमुद्वहन्त्या गर्भोऽभवद् भूधरराजपत्न्याः ।।१९।।
असूत सा नागवधूपभो/योग्यं मैनाकमम्भोनिधिबद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्तशत्राववेदनाज्ञं कुलिशक्षतानाम् ।।२०।।

(१६) हिमालय के ऊपर कमलवन हैं। सप्तर्षि उन कमलों को तोड़ते रहते हैं। बचे कमलों को नीचे से ऊपर किरणें फेंक फेंककर भगवान् सूर्य खिलाते रहते हैं। (१७) हिमालय को पर्वतों का आधिपत्य स्वयं प्रजापति ने दिया है, यह देखकर कि यज्ञ में अपेक्षित सामग्री इस पर उत्पन्न होती है और इसका सार (दृढ़ता तथा वजन) इतना है कि उससे पृथिवी पिण्ड स्थिर रह सकता है। राजा के रूप में इसे यज्ञभाग का अधिकार दे दिया गया है। (१८) हिमालय मेरु का मित्र था, उसे मर्यादा का ज्ञान था और अस्तित्व का भी। उसने कुल के अस्तित्व के लिए विवाह किया। उसने विधि–विधान का पालन किया। उसने प्राप्त की पितरों की कन्या मेना, पत्नी के रूप में। वह उसके अनुरूप भी थी और चरित्र में इतनी ऊँची थी कि उसे मुनिजन भी मान्य मानते थे। (१९) कालक्रम से इन दोनों का अपने अनुरूप मिलन होने लगा तो मेना को गर्भ रह गया। उस समय वह उत्तम यौवन में थी। (२०) उसने जन्म दिया पुत्र को। उसका नाम रखा गया मैनाक। मैनाक का उपभोग करती थीं नागलोक की सुन्दरियाँ । समुद्र था उसका सखा। इस कारण पर्वतों के पंख काटने वाले इन्द्र के क्रुद्ध रहने पर भी उसे वज्र के घाव की पीड़ा का ज्ञान नहीं।

१६.वचिता=चरिता, पचिता। अतः परं पद्यम् –

तपोवनैस्तत्त्वदृशामृषीणां मध्ये मृगैः प्रस्रवणैश्च गाङ्गैः।
पुनाति लोकत्रितयं पृथिव्यां स्थितोऽप्ययं धर्म इवाद्रिरूपः।।

(१७) भागं=भागः अ.ना. **(१९)** वल्लभः, अरुणगिरिनाथः, नारायणः, चारित्र्यवर्धनश्च पद्यमिदं न पठन्ति। **(२०) भोग्यम्= योग्यम्; क्षता=व्रणा।**

अथाऽवमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्व्वपत्नी ।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ॥ २१ ॥
सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन सम्पत् ॥ २२ ॥
प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव ॥ २३ ॥
तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥ २४ ॥
दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥ २५ ॥
तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥ २६ ॥

(२१) मैनाक के बाद मेना के पेट में फिर बालबच्चा आया। इस बार आई कन्या। वह थी दक्ष की कन्या और शंकर भगवान् की पूर्वपत्नी सती। पिता के अपमान पर उसने योग से शरीर छोड़ दिया था। (२२) पर्वतों के अधिप हिमालय ने उस समाधिमती मेना में उस भव्य कन्या को उसी प्रकार उत्पन्न किया जिस प्रकार उत्साहगुण उत्पन्न करता है सम्यक् प्रयोग से अपरिक्षत नीति में सम्पत्ति। (२३) उस कन्या का जन्मदिन स्थावर तथा जंगम सभी शरीरधारियों के लिए सुखकारी रहा। वायु में धूलि नहीं थी, क्योंकि सभी दिशाएँ प्रसन्न (साफ स्वच्छ) थीं, शङ्खों की मङ्गलध्वनि हो रही थी और उसके बाद पुष्पवृष्टि भी। (२४) उस सद्योजात कन्या से प्रभामण्डल स्फुरित हो रहा था। उस से युक्त उसकी जननी ऐसी सुशोभित हुई जैसी विदूर—पर्वत की भूमि नवीन मेघगर्जना से उत्पन्न रत्नशलाका से सुशोभित होती: है। (२५) वह कन्या दिन—दिन बढ़ती गई, जैसे उदित चन्द्रकला। उसी के समान उसके अंग— अंग में लावण्य उभरता गया, चन्द्रकला में चाँदनी के समान। (२६) उसे पर्वत वंश के आधार पर बन्धुजनों ने पुकारना शुरू किया 'पार्वती', किन्तु 'उ, मा' इन शब्दों में माता

(२१) अवमाने=अपमाने। (२२) दपरि=दपि र, दिव ल। (२३) शङ्ख=तूर्य्य। (२४) दुहित्रा=धरित्री, जनित्री व.; विदूर=वैदूर्य; शब्दा=नादा। (२५) विशेषान्=अवयवान्। (२६) तपसो=तपसें। आभिजनेन अभिजनः पर्व्वतः। पर्व्वतस्यापत्यं स्त्री पार्वतीति।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ।। २७।।
प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ।। २८।।
मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ।। २९।।
तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ।। ३०।।
असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साऽथ वयः प्रपेदे ।। ३१।।

मेनका ने जब उसे तप करने से रोका तो बाद में वही सुमुखी 'उमा' कहलाई। बन्धुओं को वह थी बहुत प्यारी। (२७) हिमालय को पुत्र प्राप्त था, तब भी उस नई संतान में उसकी दृष्टि तृप्त ही नहीं हो रही थी। ठीक भी है। मधुमास में पुष्पों की गिनती नहीं, किन्तु मधुकरमाला का आकर्षण आम्रमञ्जरी पर कुछ अधिक ही रहता है। (२८) हिमगिरि उस कन्या से उसी प्रकार पवित्र भी हुआ और विभूषित भी जिस प्रकार प्रभा बिखेरती शिखा से दीपक, गंगा से अन्तरिक्ष और संस्कारवती (संस्कृत) वाणी से मनीषी विद्वान्। (२९) बच्ची उमा क्रीड़ा का रस लेती हुई मन्दाकिनी की बालू में वेदिकाएँ बनाती, कभी गेंद खेलती और कभी गुड्डों से । (३०) अब वह बड़ी हुई तो उसको जो पढ़ाया गया उसका उपदेश स्थिर रहा और उसमें प्राक्तन जन्म की विद्याएँ उसी प्रकार प्रकट हो गईं जिस प्रकार हंसमालाएँ शरत्काल में गङ्गा में उपस्थित हो जाती हैं या महौषधि में रात आते ही अपनी स्वयं की ज्योति प्रकट हो जाती है। (३१) अब वह बचपन के बाद की उमर में आ गई, जो शरीरयष्टि का बिना सामग्री का मण्डन थी, न होते हुए भी मद का मदिरा रहित कारण थी और काम का पुष्प से भिन्न अस्त्र।

(२७) भृतः पुत्रवतोऽपीत्यस्य स्थाने भृतोऽपत्यवतोऽपीति महिमभट्टादृतः पाठः। **माला००संगा'='माला००संगाः', 'संघाः००संज्ञाः'।** निर्वाणो दीपः अमाङ्गलिकः, अत एव न पवित्रः, ततश्च ज्वालैव तत्र माङ्गलिकी। चूलिकान्यायश्चात्र कृतपदः। (२९) **पुत्रकैश्च=पुत्रिकाभिः; रसं=रसान्** अ.ना.; **बाल्ये=बाल्यम्** व.। **साऽथ=साधु।**

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ।। ३२।।

नखशिखवर्णनम्

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद् रागमिवोद्गिरन्तौ ।
आजह्तुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ।। ३३।।
सा राजहंसैरिव संनताङ्गी गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुर–सिञ्जितानि ।। ३४।।
वृत्तानुपूर्वे च, न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ।। ३५।।
नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्व्वोरुपमानबाह्याः ।। ३६।।

(३२) अब उसी का नवयौवन से विभक्त शरीर ऐसा चतुरस्रशोभी हो गया जैसे तूलिका से उन्मीलित चित्र हो या सूर्यकिरणों से खिला कमल। (चतुरस्र = चौकोर।) **(३३)** उसके दोनों चरण जहाँ पड़ते वहाँ उन्नत अंगुष्ठों की नखप्रभा से राग जैसे बिखेरते और पृथिवी पर स्थलकमल की अनन्त और अपार छवि बिखेर देते। **(३४)** वह डग भरती ऐसी कि उसमें रहते लीला और सौष्ठव। ऐसा लगता कि उस नतांगी को डग भरने की शिक्षा राजहंसों ने दी उसके नूपुरों का आसिञ्जन सीखने के ऐबज में। (अथवा विद्यया विद्या = विद्या की एबज में विद्या) **(३५)** ऊपर से नीचे क्रमशः उतारदार गोलाई लिए, किन्तु लम्बाई में मँझौल थी उसकी दोनों पिढ़री (जङ्घा)। उन दोनों शुभ पिढ़रियों के निर्माण के बाद शेष अंगों के निर्माण के लिए विधाता को अतिरिक्त लावण्य उत्पन्न करना पड़ा होगा। **(३६)** रूप तो बड़ा अच्छा पाया, परन्तु नागेन्द्र की सूँढ और विशिष्ट जाति की कदली दोनों पार्वती के ऊरुओं के उपमान नहीं बन पाए, क्योंकि नागेन्द्रहस्त की त्वचा कर्कश होती और कदली में होती है केवल शीतलता।

(३२) चतुरस्रपदे वामनः ५.२.५७। **शोभि=शोभम्** अ.ना.। **(३३) अभ्यु=असं; निक्षे=विक्षे; पृथिव्यां=पृथिव्याः**। अव्यवस्थामपरिच्छेदम्। **(३४) ताङ्गी = तांसा** अ.ना.; **विक्रमे = विभ्रमे** व.; **प्रत्युपदेश = प्रत्युपकार; लुब्धै = लब्धै** वपा.; **सिञ्जि = शिञ्जि**। **(३५) लावण्य उत्पा=लावण्यमुत्पत्तु** अ.ना.। आसपदे वामनः ५.२.२६। **(३६) शैत्यात्=शैत्याः; लब्ध्वाऽपि=लब्ध्वा हि** वपा.। **(३७) शोभम् = कान्ति, रूपम्।**

एतावता नन्वनुमेयशोभं काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यद् गिरिशेन पश्चादनन्यनारीकमनीयमङ्कम् ।। ३७।।
तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवलोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ।। ३८।।
मध्येन सा वेदिविलग्नमध्या बलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् ।। ३९।।
अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा विवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ।। ४०।।

(३७) उस अनिन्द्य सुन्दरी की कमर की शोभा इसी से अनुमानित की जा सकती है कि जिसे स्वयं शिव ने उस अंक में स्थान दिया जिसकी कामना भी अन्य नारी नहीं कर सकती थी। **(३८)** उसका नाभिरन्ध्र गहरा था। उसमें ऊपर से उतर आई रोमराजि ऐसी लगी जैसे उसकी करधनी के बीच लगे नीलम की किरण नीवीं के आगे फैल गई हो। **(३९)** उस बाला का मध्यभाग वेदी के मध्यभाग के समान कृश तो था, परन्तु उसमें तीनों बलियाँ बड़ी ही सुन्दर थीं। ऐसा प्रतीत होता था कि नवीन यौवन ने काम के लिए सीढ़ियाँ बना दी हों ताकि वह सुख से चढ़ सके। **(४०)** भूरे रंग के उसके दोनों स्तन एक दूसरे को रगड़ते हुए इतने बढ़े कि उनके बीच में मृणालसूत्र का भी प्रवेश संभव नहीं रहा। उनके मुख कुछ श्याम थे। (शृ.प्र. १६.२०२)।

(३८) तन्वी=नीला; लोम=रोम; राजिः=राजी।
अतः परं पद्यान्तरम्—

गभीरनाभीह्रदसन्निधाने रराज नीला नवरोमराजिः।
मुखेन्दुभीतस्तनचक्रवाकचञ्चुच्युता शैवलञ्जरीव।।

(३९) बलि=बल; चारु=साधुः; यौवनेन=यौवनस्य अ.ना.; **कामस्य=कामेन** अ.ना., **कालेन।** यौवनेन कामस्य यौवनस्य कामेनेति योजनयोराद्यैवादरणीया, कामस्य सेव्यत्वमिव यौवनस्यैव सेवकत्वस्यौचित्यात्। **(४०) पाण्डु = चारुः; तथा प्रवृद्धम् = तथा विवृद्धम्, बभार बाला। सूत्रान्तरमप्यलभ्यम् = सूत्रेण पदं न लब्धम्।**

अतः परं पद्यान्तरम् —

निर्भर्त्सिताशेकदलप्रसूति पाणिद्वयं चारुनखं तदीयम्।
नवोदितेन्दुप्रतिमस्य शोभां व्योम्नः प्रदोषे विफलीचकार।।

शिरीषपुष्पाधिकसौकुमार्यौ बाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य यौ कण्ठपाशो मकरध्वजेन ।। ४१ ।।
कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद् बभूव साधारणो भूषणभूष्यभावः ।। ४२ ।।
चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ।। ४३ ।।
पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ।। ४४ ।।
स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना ।। ४५ ।।

(४१) मुझे लगता है कि पार्वती के दोनों बाहू शिरीषपुष्प से अधिक सुकुमार थे तभी तो उन्हें पराजित हो जाने पर भी काम ने शिव का कण्ठपाश बना दिया था। (४२) पार्वती का उन्नत स्तनों के कारण जैसा गोल कण्ठ वैसा की वर्त्तुल मुक्ताहार। दोनों से बढ़ी दोनों की शोभा, अतः भूषणभूष्यभाव उभयसाधारण था। (४३) लक्ष्मी, जब वह चन्द्र में रहती थी तो पद्म के गुणों का उपयोग नहीं कर पाती थी और जब पद्म में रहती थी तब चन्द्र की शोभा का। उमामुख में पहुँचने पर दोनों की शोभा की तृप्ति उस चञ्चला को मिल सकी। (४४) पार्वती का धवल स्मित जब लाल ओठों पर पड़ता तो उसकी तुलना तब संभव हो पाती, जब सफेद पुष्प लाल कोंपल से घिरा हो या मुक्ताफल खुले रखा हो मूँगे में। (४५) उसमें जो कण्ठ था, लगता था कि वह अमृतस्रावी है। उससे जब वह बोलती थी तो कोयल की कूक ऐसी लगती थी सुनने वालों को जैसे किसी तार की जगह वीणा का कोई अन्य तार तान दिया गया हो।

(४१) पुष्पा=मालाः; वितर्क्कः=प्रतर्क्कः; पाशो=पाशौ व.म.अ.ना.। द्वौ मिलित्वा पाशत्वं भजत इति पाशपद एकवचनान्तत्वमेवोचितम्। (४२) तस्याः स्तनब=तस्यास्तनुब वपा.; निस्तलस्य=विस्तृतस्य, निस्तुलस्य व.म.अ.ना.। (४४) विशदस्य तस्या=विशदप्रभस्य (४५) तस्याम्=तस्या अ; प्रजल्पि=संजल्पि; पुष्टा=पुष्टाः,शब्दाः; ताड्यमाना= ताड्यमानाः, वाद्यमानाः।

अतः परं नवीनं पद्यद्वयम्– कर्णद्वयस्थं नगराजपुत्र्यास्ताटङ्कयुग्मं सुतरां रराज ।
म/ज्ञात्वा भवित्रीं त्रिपुरारिपत्नीं तां सेवमानाविव पुष्पदन्तौ ।।
ताटङ्कयुग्मं विरराज तस्याः शैलात्मजायाः श्रवणद्वयस्थम् ।
मत्वा भवित्रीं मदनारिपत्नीं सेवासमेताविव पुष्पदन्तौ ।।

प्रवात–नीलोत्पल–निर्विशेषमधीर–विप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ।।४६।।
तस्या शलाकाञ्जननिर्मितेव कान्तिर् भ्रुवोरायतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच ।।४७।।
लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्य्यः ।।४८।।
सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ।।४९।।
तां नारदः कामचरः कदाचित् कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्धहरां हरस्य ।।५०।।
गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः ।
ऋते कृशानोर्नहि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम् ।।५१।।

(४६) उसकी चितवन चंचल थी। उसमें और प्रवात के हिलते नीलकमल में कोई अन्तर नहीं था। यह चितवन या तो उसने ली है मृगियों से या मृगियों ने ही ली है उससे। (४७) उसकी भौंहे अर्धवृत्ताकार। उनकी जो कान्ति वह ऐसी लगती जैसे अञ्जन ही शलाका से निर्मित हों। उसमें लीलापूर्ण चतुरता भी थी। उसे देखा तो कामदेव ने अपने धनुष का गर्व छोड़ दिया। (४८) चमरी मृग पार्वती के उस केशपाश को देख लेते तो इसमें संशय नहीं कि उनके अपने वालों का प्रेम ढीला कर देते, यदि पशुओं में लाज होती। (४९) उपमा के सभी द्रव्यों का समुच्चय कर उन्हें उचित स्थानों पर जड़कर उस(उमा) को बड़े प्रयत्न से विधाता ने गढ़ा, सभी उपमानों का सौन्दर्य एक जगह देखने की इच्छा थी कदाचित् उनकी। (५०) एक बार आ पहुँचे नारद जी, वे तो हर कहीं घूमते ही रहते हैं और जहाँ चाहते हैं वहाँ जा पहुँचते हैं। उन्हें पिता के पास दिख गई यह बच्ची। उन्होंने भविष्यवाणी कर दी कि 'यह भगवान् शंकर की एकमात्र वधू होगी और इतनी प्यारी होगी कि उनका आधा शरीर ही बंन जाएगी'। (५१) इस भविष्यवाणी पर पिता ने बड़ी हो जाने पर भी पार्वती के लिए किसी अन्य वर की इच्छा नहीं की। यज्ञाग्नि को छोड़ अन्य कोई अग्नि मन्त्रपूत हविष्य के योग्य हो ही कैसे

पुष्पदन्तौ = सूर्याचन्द्रयसौ। (४६) क्ष्या=क्ष्याः; तया००भिः=तस्याः गृहीतं नु मृगाङ्गनाभिः। (४७) र्या=सा; तां=यां; चतुरा०=चिकुरा०, चितुरा०। (५१) तान्यवरा=तान्तरा।

अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ।। ५२ ।।
यदैव पूर्व्वे जनने शरीरं सा दक्षरोषात् स्वयमुत्ससर्ज ।
तदाप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ।। ५३ ।।
स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रपातोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किञ्चित्क्वणत्किन्नरमध्युवास ।। ५४ ।।
गणा नमेरुप्रसवावतंसा भूर्ज्जत्वचः स्पर्शवतीर् वसानाः ।
मनः–शिलाविच्छुरिता निषेदुः शैलेयगन्धेषु शिलातलेषु ।। ५५ ।।
तुषारसंघातशिलाः खुराग्रैः समुल्लिखन् दर्पकलः ककुद्मान् ।
दृष्टः कथञ्चिद् गवयैर्विविग्नैरसह्यसिंहध्वनिरुन्ननाद ।। ५६ ।।

सकता है? (५२) शिव को तब तक अपनी बेटी हिमालय ने नहीं दी जब तक उन्होनें माँग नहीं की। सत्पुरुष अभीष्ट वस्तु के प्रति भी तटस्थ रहे आते हैं इस भय से कि कहीं उनकी अभ्यर्थना भङ्ग न हो जाए। (५३) उधर यह हुआ कि जब पूर्वजन्म में इसी सुदती ने दक्ष पर क्षुभित होकर शरीर छोड़ा तभी से पशुओं के पति (शिव) असङ्ग बने रहे। उन्होंने किसी भी स्त्री को नहीं अपनाया। (५४) वे कृत्तिवास थे। मन में पाँचों यम जमाए आ डटे हिमाद्रि की ही उस चोटी पर जहाँ गङ्गा के प्रपात से देवदारु का अभ्युक्षण होता रहता था, कस्तूरी मृग जिसकी शिलाओं को अपनी कस्तूरी से सुगन्धित किए रहते और जहाँ किन्नर जाति की धीमी संगीत धुन भी सुनाई पड़ती रहती। (५५) भगवान् के गण भी वहीं आ डटे। वे नमेरु के किसलय को कान में लगाते, स्पर्श सुखद और चिह्नित भूर्जपत्र पहँनते और मैनसिल का अङ्गराग पोत लेते। (५६) नन्दी वहाँ अंग–अंग में दर्प से शृङ्गारित। वह खुरी करता और जमी बर्फ की चट्टाने कुरेदता। सिंह की गर्जना उसे सहन न होती तो खुद भी रँभाता और ऊँचे स्वर में रँभाता जिससे गवय घबरा जाते।

(५२) न हि देवदेवमद्रिः सुतां ग्राहयितुं = नहि देवमद्रिः सुतां प्रतिग्राहयितुं; स्थ्य = स्थ। (५३) पूर्वे = पूर्वा व.म.अ.ना.; जनने = ज्वलने; स्वयमुत्ससर्ज = सुदती ससर्ज। अत्र विससर्जेति विवक्षायां ससर्जेत्युक्तिश्चिन्त्या। वामनः ५.२.६६। तदा = ततः। (५४) यता = जिता; पातो = वाहो; तोक्षित= तोत्थित; चित्क्वण = द्गृण। (५५) वसानाः = दधानाः; गन्धेषु = नद्धेषु। (५६) खुराग्रैः = हिमाद्रेः;

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः ।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार ।। ५७।।
अनर्घ्यमर्घेण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम् ।। ५८।।
प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।। ५९।।
अवचितबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषाञ्चोपनेत्री ।
गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा तच्छिरश्चन्द्रपादैः।। ६०।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ उमोत्पत्तिर्नाम
प्रथमः पृथिवीमूर्त्तिसर्गः ।। १ ।।

(५७) (शङ्कर जी महाराज ने अपना नाटक शुरू किया।) अग्नि का आधान किया। उसमें समिधा छोड़ी। वह लपट उगलने लगी। वह थी तो उनकी ही अपनी एक मूर्त्ति। और आरम्भ कर दिया तप करना। इस तप के पीछे कोई कामना थी अवश्य जबकि ये स्वयं ही देने वाले हैं तप का फल। (कामना होती है अलब्ध की। अलब्ध है केवल अर्धाङ्गिनी।)। **(५८)** अद्रिनाथ हिमाद्रि ने भावी दामाद का नखरा ताड़ लिया और समस्त मूल्यों से परे, यहाँ तक स्वर्ग के निवासियों के द्वारा भी पूजित उन शिवजी की अर्घ्य देकर पूजा की और उनकी आराधना का आदेश दिया अपनी सखी सहित संयत पुत्री पार्वती को। (वर और वधू आमने–सामने, पर बीच में एक ओर तप और दूसरी यम–नियम। क्या चाहता है कवि?)। **(५९)** समाधि में प्रत्यूह(विघ्न) होते हुए भी पार्वती को शिवजी ने शुश्रूषा करने दी। अरे, धीर तो वह जो डिगने की सामग्री में अडिग रहे। **(६०)** पार्वती ने शिव की सेवा आरम्भ की। वह पूजा–पुष्प चुन लाती, वेदी साफ कर देती, स्नान आदि के लिए जल ला देती। कुश भी बीन लाती। यह प्रतिदिन का क्रम रहता। कभी भी उसके केश बिखरते नहीं, सदा ही वह सुकेशी बनी रहती। जब कभी थक भी जाती तो उसकी थकावट दूर हो जाती शंकर जी के सिर पर सुशोभित चन्द्रमा की किरणों से।

इस प्रकार महाकवि कालिदास की कृति कुमारसंभव नामक 'अष्टमूर्त्ति' महाकाव्य में
'उमाजन्म' नामक प्रथम सर्ग पूर्ण।। १ ।।

(५७) तत्रा = अथा; आधाय=आदाय; समिद्धं = समृद्धं; कामेन = कालेन। (५८) अर्घेण = अर्घ्येण व.म.अ.ना.; **समेतां=समग्रां** अ.ना.। **(५९) प्रत्यर्थि = प्रत्यर्थ।**

।। द्वितीयः सर्गः।।

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ।।१।।
तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ।। २।।
अथ सर्व्वस्य धातारं ते सर्व्वे सर्व्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ।। ३।।
नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे ।। ४।।
यदमोघमपामन्तरुप्तं बीजमज! त्वया ।
अतश्चराऽचरं विश्वं प्रभवस्तस्य गीयसे ।। ५।।
तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ।। ६।।

(१) उधर तारकासुर से सताए जा रहे स्वर्ग के देवता लोग इन्द्र के नेतृत्व में ब्रह्माजी के धाम पहुँचे **(२)** सबके चेहरे मुरझाए हुए थे। उनके समक्ष ब्रह्माजी प्रकट हुए जैसे सुप्तपद्म सरोवरों के समक्ष प्रकट हो प्रातःकाल की वेला में सूर्य। **(३)** अब सारे संसार के विधाता चतुर्मुख ब्रह्माजी को सभी देवताओं ने प्रणाम किया और उनकी स्तुति (उपस्थान) की। **(४)** आप त्रिमूर्त्ति हैं। आपको प्रणाम। सृष्टि के पहले आप एक और अकेले ही रहते हैं, किन्तु बाद तीनों गुणों (सत्त्व, रजस्, तमस्) के आधार पर आप तीन रूप में बँटे दिखाई देने लगते हैं। (विभाग = विभाजक—मल्लिनाथ।) **(५)** आप तो अजन्मा हैं। आपने जो अमोघ बीज अप्तत्त्व के भीतर बोया उससे ही चराचरात्मक विश्व बना है। अतः आपको इस विश्व का उद्भव स्थान कहा जाता है। **(६)** आप प्रलय, स्थिति और सृष्टि तीनों में कारण अकेले ही हैं। आप अपनी महिमा को प्रकट करने के लिए तीन अवस्थाएँ धारण कर लेते हैं। अवस्थाएँ हैं तीन, किन्तु ये अवस्थाएँ जिसकी हैं, वे आप तो अकेले ही हैं।

(१) तुरासा=रुराषा। (४) 'स्त्रिमूर्त्तये'='ऽस्त्वमूर्त्तये'। व.म.अ.ना. त्रिमूर्त्तय इति पाठे संवादः कुसं. ६.२३, ७.४४। **(५) अतः=अदः** अ.ना.; **प्रभवः=प्रसवः, प्रभावः** अ.ना.; **गीयसे=गीयते** अ.ना.।

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्त्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥७॥
स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते ।
यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥८॥
जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥९॥
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥१०॥
द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥११॥
उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥१२॥

(७) सृष्टि की इच्छा होते ही आपके ही दो रूप बन जाते हैं स्त्री और पुरुष। यह जो सृष्टि जन्म लेती है इसके, इसका कारण, आप ही माता–पिता भी माने जाते हैं और आप ही माता तथा आप ही पिता। (भला ऐसा भी होता है)। (८) आप अपने काल के परिमाण से रात्रि और दिन का विभाजन करते हैं और आप जो सोते और जागते हैं वे ही उत्पन्न विश्व के लिए बन जाते हैं प्रलय और उदय(सृष्टि)। (सोना प्रलय, जागना सृष्टि।) (९) आप सारे संसार भर की योनि हैं, परन्तु स्वयं हैं अयोनि (आपकी कोई योनि=उत्पत्तिस्थान नहीं।) आप हैं जगत् का अन्त, किन्तु आप में अन्त नहीं। आप जगत् के आदि (कारण) हैं किन्तु स्वयं अनादि=आदिरहित हैं (१०) आपको जानते हैं आप स्वयम्, आपको बनाते हैं स्वयं आप ही, और आप ऐसे कुशल हैं कि विलीन भी कर लेते हैं स्वयं को स्वयं के ही भीतर। (११) आप द्रव भी हैं और घन भी, स्थूल भी हैं और सूक्ष्म भी, लघु भी हैं और गुरु भी। व्यक्त भी हैं और अव्यक्त भी। आपकी विभूतियों में प्राकाम्य (सिद्धि) जो ठहरा। (१२) उन वाणियों (वेदमन्त्रों) के उत्पत्तिस्थान आप ही हैं, जिनका आरम्भ होता है प्रणव (ओंकार) से, जिनका उच्चारण

(८) माणेन=णामेन व.म.अ.ना.; व्यस्त=व्यक्त; भिन्न; दिवस्य=दिनस्य; यौ तु स्वप्नावबोधौ=यौ स्वप्न–बोधौ व, यौ तु सुप्तावबोधै, यौ तु स्वप्नावबोधौ तावेव भूतानां, भूतानां तावेव, यावेव स्वप्नबोधौ तौ अ.ना.व.;भूतानां=प्राणिनां। (९) जगदन्तो निरन्तकः=निरन्तो जगदन्तकः/जगतोऽन्तकः व., जगदन्तोऽप्यनन्तकः व(ना);जगदीशोनिरीश्वरः=जगदीशोऽप्यनीश्वरः म.अ.ना.व.।(११)लघुर्गुरुः=गुरुर्लघुः अ.ना.। अरुणगिरिनाथनारायणौ पद्यमिदं न पठतः। (१२) उद्घातः=उद्गीथः व.अ.ना., उद्भूतः; रणम्=रितम्।

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ।।१३।।
त्वं पितॄणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चासि विधाता वेधसामपि ।।१४।।
त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।
वेद्यं च वेदिता चासि ध्येयं ध्याता च यत् परम् ।।१५।।
इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ।।१६।।
पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ।।१७।।

तीन न्यायों (उदात्त, अनुदात्त, स्वरित तथा तार, मन्द्र, मध्य) से होता है, जिनका कर्म है यज्ञ और फल है स्वर्ग। **(१३)** मुनिजन प्रकृति भी आपको ही मानते हैं, जिसकी प्रवृत्ति होती है पुरुष के लिए। उधर प्रकृति को तटस्थ और निर्लिप्त रहते हुए देखते रहने वाला उदासीन पुरुष भी आपको ही माना जाता है। **(१४)** आप ही हैं पितरों के पिता और आप ही हैं भोग्य तथा भोक्ता और आप ही हैं देवों के देवता। आप पर से भी पर हैं और विधाताओं के विधाता। **(१५)** आप ही हैं हव्य और आप ही हैं होता, आप ही हैं भोग्य और आप ही हैं शाश्वत भोक्ता, आप ही हैं वेद्य (ज्ञेय) और आप ही हैं वेदिता (ज्ञाता)। इसी प्रकार आप ही हैं ध्याता तथा आप ही हैं सर्वोत्कृष्ट ध्येय। **(१६)** देवताओं ने ये जो स्तुतियाँ की, ये सब यथार्थ भी थीं और मनोरम भी। इन्हें सुनकर ब्रह्मदेव प्रसन्नता की ओर उन्मुख हुए और देवताओं से उन्होंने पूछा **(१७)** ब्रह्मदेव थे पुराण (सबसे पुराने) कवि उनके चार—चार मुख। सबसे बोले वे। उनसे जो शब्द निकले वे भी चार प्रकार के, किन्तु उन सबके अर्थ सत्य थे। (द्र.'ऋलृक्' सूत्र पर पातञ्जल महाभाष्य 'चतुष्टयी शब्दानां प्रवृत्तिः'।)

(१३) त्वामेव=तामेव, तामाम। (१४) देवता=दैवतम् अ.ना.; **वेधसाम्=वेदसाम्। (१५) भोज्यं=भोग्यं** अ.ना.; **शाश्वतः=शाश्वतम्; वेद्यं च वेदिता=त्वं वेद्यं वेदिता, वेद्यं वेदयिता, वेद्यश्च वेदिता; यत्=तत्। परम्='परम् ।।१।। कुलकम्।।' (१६) यथार्था=याथार्थ्या** अ.ना.; **वेधाः=ब्रह्मा। (१७) चतुर्मुख=वर्णस्थान।** द्र० रघुवंशे १०.३६। ऋलृक्सूत्रे महाभाष्यम्; **प्रवृत्तिरासीच्छब्दानां=अभूत् प्रवृत्तिः शब्दानाम्।**

स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः ।
युगपद् युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ।।१८।।
किमिति द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ।।१९।।
प्रशमाद–र्चिषामेत–दनुद्गीर्ण–सुरायुधम् ।
वृत्तस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ।। २०।।
किञ्चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ।। २१।।
कुबेरस्य मनः–शल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ।। २२।।
यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणाऽलातलाघवम् ।। २३।।

(१८) आप सबका स्वागत। आप सब अपने प्रभाव से सम्हाले हुए हैं अपने क्षेत्र का कार्य, यद्यपि शरीर से सबके सब यहाँ उपस्थित हैं। किन्तु जुए सी हैं आपकी भुजाएँ और बड़े ही पराक्रमी हैं आप सब । किन्तु, (१९) क्या बात है कि आप सबके चेहरों पर पहले जैसी द्युति (चमक) नहीं है। ऐसे लग रहे हैं ये जैसे ओस से निस्तेज पड़े तारे । (२०) इन्द्र तो वृत्र को मारने की शक्ति से युक्त है, किन्तु इनका वृत्रवधकारी वज्र कुण्ठित धारा क्यों लिए है, इससे लपटें और इन्द्रधनुष क्यों नहीं निकल रहे? (२१) वरुण तो प्रचेता और पाशी है। इनका पाश शत्रुगण रोक नहीं पाते। किन्तु यह मन्त्र से कीलित, निर्वीर्य सर्प जैसा, दैन्य में क्यों डूबा लग रहा है? (२२) कुबेर के भी मन में कोई काँटा चुभ रहा है और लगता है कि या तो ये कहीं हार गए हैं या उसी पीड़ा से टूट गए हैं, इनके हाथ में गदा नहीं हैं। ये लग रहे हैं ऐसे वृक्ष जिसकी शाखा टूट पड़ी हो । (२३) यम का दण्ड कान्तिहीन दिखाई दे रहा है। उससे ये भूमि कुरेद रहे हैं। लगता है इनके इस अमोघ दण्ड की चिनगारियाँ बुत गई हैं।

(१८) प्रभावै=प्रतापै। (१९) प्रकाशानि=प्रसादानि व.अ.ना., प्रभावाणि। (२०) नुद्गू=नुद्गी। उद्गूर्णपदं महाभाष्यादागतम्। र्णसुरा=र्णासुरा। (२१) मरिदु=मपि दु; पाशः=प्रासः/शः। (२२) भग्न=भिन्न। रघुवंशे १०. ७४। (२३) भूमिं=भूमौ। अस्मिन्निति दण्ड इत्यर्थः।

अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ।। २४।।
पर्य्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते ।
अम्भसामोघसंरोधः प्रतीपगमनादिव ।। २५।।
आवर्जितंजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्धानः क्षतहुंकारशंसिनः ।। २६।।
लब्धप्रतिष्ठाः प्रथमं किं यूयं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ।। २७।।
तद् ब्रूत वत्साः किमितः प्रार्थयध्वे समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ।। २८।।

(२४) ये सभी के सभी सूर्य प्रताप खोकर शीतल बने दिखाई दे रहे हैं। लगता है ये, ये न होकर इनके लिखित चित्र हैं, इनपर अब पूरी आँखे खोली जा सकती हैं और इन्हें जीभर कर देखा जा सकता है। ऐसा विपर्यय क्यों? (२५) जितने भी ४९मरुत हैं वे सब गतिहीनता से व्याकुल दीख पड़ रहे हैं। लगता है इनका वेग नष्ट हो गया है, धारा उलट दी जाए तो जैसे जल लग सकता है। (२६) अरे ये रुद्र! इनके हुंकार से प्रलय हो सकता है, किन्तु वह दुर्बल पड़ गया है और इनके सिर झुके दिखाई दे रहे हैं, जिनमें चन्द्र की कला लटकी हुई है। ('क्षताहंकार' पाठ में 'सिर झुके हैं', स्पष्ट है कि इनके अहंकार को क्षति पहुँची है। द्र. कुसं. ५.५४।) (२७) आप सब तो पहले ही जम चुके थे। क्या कोई अधिक बली शत्रु–वर्ग खड़ा हो गया कि आप सब हटा दिए गए अपवाद के द्वारा उत्सर्ग के समान? (उत्सर्ग = सामान्य नियम, अपवाद = सामान्यनियम के क्षेत्र में ही विशेष नियम। विशेष के रहते उत्सर्ग को लागू नहीं किया जाता।) (२८) तो हे वत्सों! बोलो इधर से क्या चाहते हो। कोई तो प्रयोजन है ही, क्योंकि इकट्ठे होकर यहाँ आए हो।

(२४) क्षति=क्षिति, क्षय अ.ना.; इव गताः=इवायाताः; लोकनीयताम्=लोकदर्शिनः; लोकदर्शनम्।
(२६) क्षतहुंकार=क्षताहंकार व.म.अ.ना., क्षताहुङ्कार।
अतः परं पद्यम्–

निशाकरोऽपि मलिनः सुप्तोत्थितमिवाननम् ।
कलाशेषेऽपि या लक्ष्मीः सा पूर्णेऽपि न विद्यते।।

(२७) 'किं यूयं बलवत्तरैः'='न खलु स्वबलोत्तरैः', 'न खलु स्वरणोत्तरैः'।

ततो मन्दानिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण चोदयामास वासवः ।। २९।।
स द्विनेत्रो हरेश्चक्षुः सहस्रनयनाधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ।। ३०।।
एवं यदात्थ भगवानामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो! ।। ३१।।
भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ।। ३२।।
पुरे तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ।। ३३।।
सर्व्वाभिः सर्व्वदा चन्द्रस्तं कलाभिर्निषेवते ।
नादत्ते केवलामेकां हरचूडामणीकृताम् ।। ३४।।

(२९) ब्रह्माजी का आश्वासन मिल गया तो इन्द्र ने अपने सभी नेत्रों से गुरु बृहस्पति को प्रेरित किया। उसके नेत्र मन्दपवन से कंपित कमलसमूह से सुशोभित थे। (३०) वही (बृहस्पति ही) इन्द्र का हजार नेत्रों से बड़ा चक्षु है, यद्यपि उसके नेत्र दो ही हैं। उसने हाथ जोड़े और कमलासन ब्रह्मा से इस प्रकार निवेदन करना शुरू किया। (३१) भगवन्! आपने जो कहा वह सत्य है— हमारा स्थान शत्रुओं ने हड़प लिया है। प्रभो! आप तो घट घट में व्याप्त हैं, आपको यह क्यों नहीं होगा ज्ञात। (३२) तारक नामका महासुर आपका वर प्राप्त कर ऐसा उद्धत हो उठा है कि वह संसार के विनाश के लिए उदित धूमकेतु सा लग रहा है। (३३) उसके नगर में सूर्य उतना ही तपता है जितनी तपन से उसकी वावड़ियों के कमल खिल सकें। (३४) चन्द्रमा उस की सेवा सदा सभी कलाओं से करता रहता है, केवल एक वह कला छोड़े रखता है जो भगवान् शङ्कर के द्वारा चूडामणि बना ली गई है।

(२९)नेत्र=चक्षुः;चोदया=नोदया,प्रेरया व.ना.। **(३०) द्विनेत्रः=द्विनेत्रं** म.,**विनेतृ** अ., **सहस्रनयनाधिकम्=दशचक्षुःशताधिकम्** अ.ना., **चतु(क्षु)र्दशशताधिकम्। (३१) यदात्थ = यथात्थ ; आमृष्टं = आकृष्टं, संमृष्टं, आदर्श/घृष्ट; ज्ञास्यसि प्रभो = ज्ञास्यति प्रभुः** व., **ज्ञास्यते प्रभुः। (३२) भवल्लब्ध = भवद्दत, त्वया दत्त** व.अ.ना.; **रोदीर्णः = रोद्गूर्णः।** द्र. कुसं. २.२०। **उपप्लवा = उपद्रवाय। (३३) स्य तनोति= स्यातनोति,स्य करोतिः** ना.; **साध्यते = सिध्यति** अ.ना.। **(३४) सर्व्वदा=सर्व्वतः; मेकां=रेखां** अ.ना.।

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ।। ३५ ।।
पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः ।
उद्यानपाल–सामान्य–मृतवस्तमुपासते ।। ३६ ।।
तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ।। ३७ ।।
ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ।। ३८ ।।
तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः ।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ।। ३९ ।।
इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ।। ४० ।।

(३५) उसके पास वायु पंखे की हवा से अधिक नहीं चलता। उसके उद्यान में भी वह अपना वेग रोके रहता है इस भय से कि फूलों की चोरी का अपराध न हो जाए। (३६) ऋतुओं की तो हालत यह है कि उन्होंने क्रम का बन्धन छोड़ दिया है और उद्यानपालों जैसे ही सभी ऋतु पुष्पसंभार उपलब्ध कराने हेतु एक साथ उद्यत रहते हैं, उस की सेवा में। (३७) समुद्र यह प्रतीक्षा करने में लगा रहता है कि जल के भीतर उत्पन्न रत्न कब होते हैं उसके उपायन के योग्य। (३८) वासुकि आदि भुजङ्ग उसकी सेवा रात में स्थिर प्रदीप बनकर किया करते हैं, उनके सिर पर मणि की सुलगती शिखा जो रहती है। (३९) इन्द्र भी दूतों के हाथ कल्पद्रुम से प्राप्त विभूषण भेज–भेजकर उसको अनुकूल बनाए रखने का यत्न करता रहता है उसके अनुग्रह की अपेक्षा में। (४०) इतनी कीमत दे देकर आराधना करने पर भी वह तारकासुर तीनों लोकों को क्लेश में डाले रहता है। दुर्जन यदि शान्त हो सकता है तो केवल अपकार के बदले में अपकार से,उपकार से नहीं।

(३५) व्यावृत्त = निवृत्तः; नेकुसुम = नकुसुम व.ना.; साध्वसात् = साहसात् अ.ना.। (३६) सामान्यम् = सामान्याः, ०नामान्या। (३७) प्रतीक्षते = प्रतीक्ष्यते, समीक्ष्यते। (३८) प्रमुखा = प्रहिताः। (३९) तं मुहुर्दूत = प्रत्यहं दूत, तं पुनर्‌दूत। (४०) शाम्येत् = काम्येत् ; प्रत्यप = प्रत्युप।

तेनामरवधूहस्तैः सदयाऽऽलूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ।। ४१ ।।
वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।
चामरैः सुरवन्दीनां बाष्पसीकरवर्षिभिः ।। ४२ ।।
उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः ।
आक्रीडपर्व्वतास्तेन कल्पिताः स्वेषु वेश्मसु ।। ४३ ।।
मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम् ।। ४४ ।।
भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात् पथि ।। ४५ ।।
यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ।। ४६ ।।

(४१) वह नन्दन वन के उन्हीं द्रुमों को छेदन और पाटन से अभिज्ञ बना रहा है, जिसके पल्लव भी देवाङ्गनाएँ तक दयापूर्वक चुना करती थीं। (४२) जब वह सो जाता है तब देवलोक की बन्दी बनाई मयी महिलाएँ आँसू बहाती जाती हैं और उस अंदाज में चँवर डुलाती रहती हैं जिससे उतनी ही हवा लगे जितनी श्वास की हवा लगती है। (४३) सूर्याश्व के खुरों से चिह्नित मेरुश्रृङ्गों को वह उखाड़–उखाड़ कर ले गया और उनसे बना लिए उसने क्रीडाशैल, अपने भवनों में । (४४) मन्दाकिनी में यदि कुछ शेष है तो केवल दिग्गजों के मद से गन्दा पानी, उसकी उपज जो हेमकमल है वह तो अब उसकी वापियों में ही देखने को मिलती हैं । (४५) स्वर्ग के निवासियों को अब देशाटन का आनन्द मिल ही नहीं पा रहा है, क्योंकि विमानों के पथ को तो घेर रखा है उस (तारकासुर) के आ पड़ने के भय ने । (४६) याज्ञिकजन बड़े–बड़े यज्ञों में जो हविष्य डालते हैं, मायावी वह उसे अग्नि के मुख से छीन लेता है, हमारी आँखों के सामने।

(४१) स्तैः स=स्तस व.; छेद=छिन्न अ.ना., छद्म, सद्म। (४२) हि=च ; सुप्तः=तप्तः; वन्दीनां=वन्दीभिः। (४४) हेमाम्भोरुहस=हेमाम्बुरुहश अ.ना.। (४५) स्वर्गि=नाकि व.; नानुभूयते=नानुमीयते; खिलीभूते=खिले कृते, खिलीकृते अ.ना.; तदापात=तदाघात ना.; पथि=पदि। (४६) वितते=विहिते; मिषता=पिबता।

उच्चैरुच्चै:श्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यश: ।।४७।।
तस्मिन्नुपाया: सर्व्वे न: क्रूरे प्रतिहतक्रिया: ।
वीर्य्यवन्त्यौषधानीव विकारे सान्निपातिके ।।४८।।
जयाशा यत्र चास्माकं प्रतीघातोत्थितार्चिषा ।
हरिचक्रेण तेनास्य कण्ठे निष्क इवार्पित: ।।४९।।
तदीयास्तोयदेष्वद्य पुष्करावर्त्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजा: ।।५०।।
तदिच्छामो विभो! सृष्टं सेनान्यं तस्य शान्तये ।
कर्म्मबन्धच्छिदं धर्म्मं भस्येव मुमुक्षव: ।।५१।।
गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव सुरश्रियम् ।।५२।।

(४७) उसने ऊँचा हयरत्न उच्चै:श्रवा हरण कर लिया है। वह तो इन्द्र का चिरकालार्जित यश ही है शरीरधारी। (४८) उसके विरुद्ध हमने जो–जो उपाय किए वे सब विफल हुए, सन्निपात की व्याधि पर उत्कृष्टतम औषधियों के समान । (४९) जिस पर हमें जय की पूरी आशा थी विष्णु भगवान् का वह सुदर्शन चक्र भी टकराया और चिनगारी उगल कर उसके कण्ठ में निष्क (कण्ठभूषण) बनकर रह गया। (५०) उसके हाथियों ने ऐरावत को मात दे दी है और अब वे पुष्कर और आवर्त्तक आदि महामेघों पर वप्रक्रीडा (ढूहा मारने की क्रीडा) का रियाज करते हैं। (५१) इस कारण हे विभो! उसकी शान्ति (समाप्ति) के लिए हम चाहते हैं एक सन्नद्ध (सृष्ट) सेनानी, जैसे कर्मबन्ध काटने वाला धर्म चाहते हैं संसार की शान्ति के लिए मुमुक्षुजन। (सृष्टम् = उद्युक्तम्। स्रष्टुं पाठ लेखाशुद्धि।)। (५२) देवसेना के रक्षक के रूप जिसे आगे कर इन्द्र, शत्रुओं के द्वारा बन्दी की गई देवलक्ष्मी को, शत्रुओं से लौटा सके।

(४७) **बद्ध = बन्ध** अ.ना.। (४८) **सर्व्वे न: = न: सर्व्वे; पातिके=पातके**। (४९) **तोत्थिता = तोद्गता** ना., **तार्पिता, तोद्गता; कण्ठे=गले; निष्क=निष्कम्** व.म.अ.ना.। (५०) **देष्वद्य=ष्वेव; पुष्करा=पुष्कला** अ.ना.; **घातं=घातान्** व.; **वता=वणा:** व.। (५१) **इच्छामो=इच्छाम** प्रार्थनायां लोट् व.; **विभो=विभो:**; **सृष्टम्** हामा. २११४ = **स्रष्टुम्** अ.ना.म.। स्रष्टुमिति त्वपपाठ इति वल्लभ:। सृष्टमुद्युक्तमित्यर्थ:। तथाहि रघुवंश एव 'अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय सृष्ट:। पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपति:' प्रतस्थे।। **धर्मम्=योगम्** व.। (५२) **सैन्या=सेना; यं=तं; सुर=जय**।

वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय या ।।५३।।
संपत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम् ।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ।।५४।।
इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ।।५५।।
वृतं तेनेदमेव प्राङ् मया चास्मै प्रतिश्रुतम् ।
वरेणाऽशमितं लोकानलं दग्धुं हि तत्तपः ।।५६।।
संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ।।५७।।

(५३) जब उसका वक्तव्य समाप्त हो गया तब ब्रह्माजी ने बोलना शुरू किया, जिसने जीत लिया गर्जना के बाद की वृष्टि को सौभाग्य में। (५४) 'संपन्न होगा आप सबका यह मनोरथ, किन्तु थोड़ी प्रतीक्षा करें। मैं स्वयं इसकी पूर्त्ति में अपना सृष्टि—व्यापार करना नहीं चाहूँगा। (५५) क्योंकि वह दैत्य यहीं (मेरे पास) से ही विभूतिमान् बना है, अतः यहीं से उसका क्षय हो यह उचित नहीं। अरे पौधा विष का भी हो, परन्तु बढ़ाकर उसे भी स्वयं काटना ठीक नहीं कहा जा सकता। (५६) उसने मुझसे यही वर माँगा था और मैने भी वचन दे दिया था। इस वर के द्वारा लोकों को जला डालने में समर्थ उसका तप शान्त करना आवश्यक था । (शमितं के स्थान पर 'अशमितम्' पाठ भी है। उसके अनुसार अनुवाद) यदि वर देकर उसका तप शान्त न किया गया होता तो वह सभी लोकों का दाहक बन सकता था। (५७) वह युद्ध में कुशल है। युद्ध के लिए उद्यत उसका सामना युद्ध में अन्य कौन कर सकता है, भगवान् नीललोहित (शिव) के निषिक्त अंश को छोड़कर।

(५३) अवसिते=उपरते; तस्मिन्=तस्य अ.ना., त्वस्य, चास्य, या=सा। (५४) कालः कश्चित् = कश्चित् कालः व.; त्वस्य= तस्य,नास्य; सिद्धौ=सिद्धये; आत्मना=चात्मनः। (५६) वृतं=कृतं;तेनेदमेव प्राङ्=तेनेदमेवादौ, तेनेदमेवाहं; चास्मै=तस्मै; श्रुतम्=ष्ठितम्;णाऽशमितं=ण शमितं म., ण शमितुं ; लोकान्=लोकम्। (५७) सांयुगीनं = संमुखीन अ.ना.; उद्यतम्=उद्गदम्, उद्यन्तम्; सहेत=हरेत; निषिक्तस्य=निषिक्तात् तु अ.ना., निषक्तस्य।

स हि देवः परं ज्योतिस् तमः पारे व्यवस्थितम् ।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना ।। ५८ ।।
उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ।। ५९ ।।
उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम ।। ६० ।।
तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ।। ६१ ।।
इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्त्तव्यास्तेऽपि प्रतिययुर्दिवम् ।। ६२ ।।
तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः ।
मनसा कार्यसंसिद्धित्वराद्विगुणरंहसा ।। ६३ ।।

(५८) और उन (शिव) का हाल यह है कि वे हैं तम से परे अवस्थित परज्योति, जिसके प्रभाव की सीमा न मैं आँक सका और न विष्णु। (द्र. महिम्नःस्तोत्र)। **(५९)** उन (भगवान् शिव) का मन संयम (ध्यान, धारण, समाधि) से अचञ्चल यानी स्थिर है। उसे तुम 'उमा' के रूप के द्वारा आकृष्ट करने का यत्न करो, लोहे को चुम्बक के समान। **(६०)** दो का आहित बीज (वीर्य) दो ही धारण कर सकती हैं या तो वह पार्वती शभ्भु का या उनकी ही जलमूर्त्ति मेरा। **(६१)** उन नीलकण्ठ भगवान् का पुत्ररूपी आत्मा ही आप लोगों का सैनापत्य स्वीकार करेगा तो उसी के पराक्रम की विभूति से खुलेंगी बन्दी बनी देवाङ्गनाओं की वेणियाँ। **(६२)** देवताओं से ऐसा कहकर भगवान् विश्वयोनि ब्रह्मा तो हो गए तिरोहित और कर्त्तव्य का निश्चय किए देवता लोग लौट गए स्वर्ग । **(६३)** उस पार्वती के प्रति शिव को आकृष्ट करने के दुष्कर कार्य में इन्द्र ने कन्दर्प (काम) को नियुक्त करने का निश्चय उस मन मे किया जो कार्यसिद्धि के कारण दुगुनी त्वरा और दुगुना वेग लिए था।

(५८) व्यवस्थितम्=प्रतिष्ठितम्/तः व.; **न च विष्णुना=नापि विष्णुना/वज्रिणा। (५९) ते यूयं=तेनास्य, यूयं ते; संयम=समाधि; मस्तिमितं=मावस्थितं। (६०) वोढु=सोढु** व.; **बीज=वीर्य** व.अ.ना.; द्र. **कुसं** ३.१५–१६ **(६१) सैना=सेना;क्ष्यते सुर=क्ष्यति स्वर्ग** व.; **वेणीर्वीर्यविभूतिभिः = वेणीबन्धानदूषितान्। (६२)** ते विबुधा अपि। **प्रतिययुर्दिवम्=देवा दिवं ययुः,प्रति दिवं ययुः। (६३). कार्य=कर्म्म; सिद्धित्वरा=सिद्धयै त्वरा, सिद्धौत्वरा।**

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पकेतुः ।। ६४।।

इति अष्टमूर्त्तिमहाकाव्ये कुमारसम्भवे कालिदासकृतौ मदनागमनो नाम द्वितीयो जलमूर्त्तिसर्गः।।२।।

।। जलमूर्त्तिः ।।

(६४) अब काम इन्द्र के पास हाथ जोड़े उपस्थित हुआ। उसने सुन्दरी की ललित भौंहों जैसे चारु शृङ्ग वाले धनुष को रति के कंगन के चिह्न से अंकित कण्ठ में टाँगा और उसके सहचर मधु (वसन्त ऋतु) के हाथ में रखा 'चूताङ्कुर' रूपी अस्त्र । (शृ.प्र.११.३७३ आदि।)

इस प्रकार महाकवि कालिदास की कृति 'कुमारसंभव' नामक 'अष्टमूर्त्ति' महाकाव्य में मदनागमन नामक पूर्ण हुआ द्वितीय सर्ग ।।२।।

२०६४ वर्षारम्भ प्रतिपद, सोमवार

---

(६४) स ललित=सुललित; शृङ्गं=शाङ्गं,भृङ्गं; पदाङ्के=पथाङ्के; मधुहस्त=मदहस्त; मख=मघ; पुष्पकेतुः=पुष्पधन्वा म.।

॥ तृतीयः सर्गः॥

ओ३म् तस्मिन् मघोनस्त्रिदशान् विहाय सहस्रमक्ष्णां युगपत् पपात ।
प्रयोजनाऽपेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥१॥
स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्त्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् ॥२॥
आज्ञापय ज्ञातिविशेष! पुंसां लोकेषु यत् ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया वः ॥३॥
केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः ।
यावद् भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्त्ती ॥४॥
असम्मतः कस्तव मुक्तिमार्ग पुनर्भवक्लेशभयात् प्रपन्नः ।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥५॥

(१) काम इन्द्र के पास पहुँचा तो इन्द्र को सभी आँखें देवताओं को छोड़कर उसी पर लग गई। प्रभु लोगों का आश्रितों में जो गौरव होता है वह प्रायः चल ही रहता है, प्रयोजन के आधार पर। (जैसा प्रयोजन जिससे सधना होता है उसका वैसा ही सम्मान।) (२) इन्द्र ने उसे अपनी आसन के पास की भूमि दी और कहा यहाँ बैठो। काम ने इसे मालिक का प्रसाद माना। इसे शिरोधार्य कर उन्हीं को सुनाकर इस प्रकार कहना आरम्भ किया। (३) हे भगवन्! आप तो मेरे सगे (ज्ञातिविशेष) हैं। अथवा ('ज्ञातविशेष पुंसां' पाठ में) प्रत्येक पुरुष की शक्ति जानते ही हैं। आज्ञा दीजिए कि किस लोक के किस व्यक्ति के साथ क्या करना अभीष्ट है आपको। आपने मेरा स्मरण कर जो अनुग्रह किया है चाहता हूँ कि उसमें वृद्धि हो 'आज्ञा'—से। (४) कौन है ऐसा जिसने नितान्त दीर्घ तप से आपके पद की इच्छा की और आपके साथ असूया (ईर्ष्या) दिखलाई है? देखिए, वह मेरे धनुष का आज्ञापालक बना मिलेगा इस पर बाण चढ़ते ही। (५) आपको अमान्य कौन व्यक्ति ऐसा है जो पुनर्जन्म के डर से मुक्तिमार्ग में भटक गया है, (मुक्ति की बात तो दूर है) मैं उसे बन्धन में पटके देता हूँ लम्बे समय के लिए, सुन्दरियों की (आरेचित) टेढ़ी भौंहों से चतुर (तीक्ष्ण) कटाक्षों की मार से।

सम्भावितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
कस्यार्थधर्म्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ।।६।।
कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जं, कण्ठे स्वयंग्राहनिषक्तबाहुम् ।।७।।
कयाऽसि कामिन् सरसाऽपराधः पादानतः कोपनयाऽवधूतः ।
यस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ।।८।।
प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः ।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ।।९।।
तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ।।१०।।
अथोरुदेशादवतार्य पादमाक्रान्तिसंभावितपादपीठम् ।
संकल्पितेऽर्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ।।११।।

(६) आपका कोई द्वेषी यदि शुक्राचार्य की भी नीति (दण्डनीति) पढ़ा हो तो उसके भी अर्थ और धर्म को मैं पीड़ा पहुँचा सकता हूँ, राग के गूढ़ दूत छोड़कर। समुद्र का बढ़ा ज्वार वेला को तहसनहस कर ही डालता है। (७) हो सकता है कोई एक पतिव्रत वाली सुन्दरी आपके चञ्चल मन पर जम गई हो। क्या आप चाहते हैं कि वह नितम्बवती सुन्दरी लज्जा छोड़ दे और आपके गले में स्वयं बाहुपाश डाल दे। (८) हो सकता है कोई अपराध बन पड़ा हो आपसे और मनाने हेतु पैरों पड़े आपको किसी कोपना ने दुत्कार दिया हो। मैं उसके मन में तीव्र अनुताप पैदा किए देता हूँ और पहुँचाए देता हूँ किसलय की सेज की शरण में। (९) भगवन्! कृपा करें और वज्र को विराम दे दें। कौन सा सुरशत्रु है जो मेरे शरों से ऐसा न हो जाए कि उसका बाहुबल व्यर्थ हो जाए और वह कोप में फड़कते अधरों वाली स्त्रियों से भी डरने लगे। (१०) आपकी कृपा रहे तो मैं कुसुमायुध होते हुए भी पिनाकपाणि शिव का धैर्य भी डिगा सकता हूँ, अन्य धनुर्धरों की तो बात ही क्या। और साथ लूँगा अकेले एक मधुमास को। (११) अब इन्द्र ने अपने ऊरु पर रखा पैर उतारा और उससे पादपीठ को अलंकृत कर अभीष्ट कार्य में अपनी शक्ति व्यक्त कर चुके काम से यह कहा—

(६) संम्भावित = अध्यापित (८) सरसा = सुरता म., सहसा अ.ना.; पराधः पा= पराधपा, पराद्धः पा; यस्याः = तस्याः म.। (१०) तवप्र = भवत्प्र व.; के=किं।

सर्वं सखे! त्वय्युपपन्नमेतद् द्वयं ममास्त्रं कुलिशं भवाँश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्व्वतोगामि च साधकं च ।।१२।।
अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ।।१३।।
आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ।।१४।।
अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ।।१५।।
तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ।।१६।।
गुरोर्नियोगाच्च नरेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ।।१७।।

(१२) 'सखे ! जो तुमने कहा वह सब ठीक ही कहा। दो ही तो हैं मेरे अस्त्र, एक वज्र और एक तुम। वज्र तो तपस्या की शक्ति वालों पर कुण्ठित रहता है। तुम सब पर चल भी सकते हो और काम बनाने में सफल भी हो सकते हो। **(१३)** मैं जानता हूँ तुम्हारी शक्ति। तुम मेरे ही समान हो। इसलिए एक गुरु कार्य में तुमको नियुक्त कर रहा हूँ। कृष्ण (विष्णु) शेष को अपना शरीर धारण करने का दायित्व यही देखकर तो देते हैं कि वे भूमि को धारण किए रहते हैं। **(१४)** तुमने मेरा कार्य लगभग जान ही लिया है 'तुमने अपने बाण की गति वृषाङ्क भगवान् शिव के ऊपर भी जो बतलाई है।' तो, जानों कि यज्ञांशभोगी देवताओं का यही है अभीष्ट। **(१५)** सभी देवता शिव के वीर्य से उत्पन्न वीर को अपनी जीत के लिए सेनानी बनाना चाहते हैं और शिव जिस ब्रह्मा से निकले हैं उसी ब्रह्मरूप उसी ब्रह्मा में स्वयं की आत्मा को ज़ोड़े हुए हैं। वे सध सकते हैं तो केवल तुम्हारे बाण की चोट से। **(१६)** ऐसा यत्न करो कि शिव को वह रुच जाए। इन दोनों के बीच में दीवाल है यम। वे भी यती हैं और वह (पार्वती) भी प्रयत है। ब्रह्मदेव ने कहा है कि स्त्रीजाति में केवल वही है जिसमें वे वीर्य का निषेक कर सकते हैं। **(१७)** अनुकूलता यह है कि हिमाद्रि की कन्याश्री पिता की आज्ञा से उसी की चोटी पर तप कर रहे शिव की सेवा में निरत है। यह मुझे अप्सराओं

---

(१३) व्या = आ; वेक्ष्य = वेत्य; अत्र कृष्णपदं विष्ण्वर्थे तथैव यथा रघुवंश ६ .४९ पद्ये।
(१४) मुच्चैर्द्विषा=मुच्चैस्तरा। (१६) निषेकभूमिः=निषिक्तभूमिः ; भुवोपदिष्टाम् = भुवा हि दिष्टम्।

तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ।।१८।।
अस्मिन् सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्म ।।१९।।
सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ।। २०।।
मधुश्च ते मन्मथ! साहचर्यादसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ।। २१।।
तथेति शेषामिव भर्त्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ।। २२।।
स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ।। २३।।

के मुख से सुनने को मिला है। यह सब मेरी गुप्तचर हैं। (१८) तो जाओ। सिद्धि प्राप्त करो। देवकार्य पूरा करो। इस देवकार्य में एक अन्य सहायक और अपेक्षित है। वह हो तुम। अङ्कुर अपेक्षा रखता है जल की बीज से बाहर आने के लिए। (प्रत्यय = कारण)। (१९) देवताओं की विजय के इस उपाय में गति है केवल तुम्हारे अस्त्र की। बड़भागी हो तुम। कर्म यदि अनन्यसाधारण हो तो उस से यश मिलता ही है भले ही वह सिद्ध न हो। (२०) अहो, कितना स्पृहणीय है तुम्हारा सामर्थ्य। याचक हैं ये देवगण, कार्य (प्रयोजन) है तीनों लोकों का, वह भी साध्य है तुम्हारे धनुष से और कर्म भी ऐसा जिसमें अधिक हिंसा नहीं। (२१) और तुम्हारा सहचर यह मधु (वसन्त) तुम्हारे बिना कहे ही सहायतार्थ उपस्थित है। वायु से कौन कहता है कि अग्नि के सहायक बनो।' (२२) इतना कहकर इन्द्र ने अपने गले की माला काम को पहना दी। काम ने उसे और उसी के समान इन्द्र की आज्ञा को 'जो आज्ञा' कह शिरोधार्य किया और कर दिया प्रस्थान। उस समय इन्द्र ने ऐरावत के थपथपाने से कर्कश हाथ से काम ही पीठ थपथपाई। (२३) वह भगवान् शंकर के हिमालय पर स्थित आश्रम जा पहुँचा, जबकि उसकी कार्यसिद्धि होने वाली थी शरीर छोड़ने से। उसके साथ था उसका प्रिय मित्र वसन्त और रति। दोनों साशङ्क थे।

(१८) प्रत्ययमुत्तमं = प्रत्ययकारणम् । (२०) महो=मतो अ.ना.। **(२१) साह=साप।**

तस्मिन् वने संयमिनां मुनीनां तपः—समाधेः प्रतिकूलवर्त्ती ।
संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ।। २४।।
कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग् दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ।। २५।।
असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण ।। २६।।
सद्यः—प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य ।। २७।।
वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ।। २८।।
बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ।। २९।।

(२४) उस वन में वसन्त ने अपना स्वरूप फैला दिया जो संयमी मुनियों की तपःसमाधि के प्रतिकूल था, किन्तु काम को उसी पर अभिमान था। (२५) सूर्य उत्तरदिशा की ओर चल पड़ा उसने यह नहीं देखा कि अभी उसका समय (मकर संक्रान्ति) आया नहीं है। दक्षिण दिशा, दक्षिणपवन को व्यलीक निःश्वास की भाँति छोड़ने लगी। (उत्तरदिशा, दक्षिणदिशा=सौतें, सूर्य पति।) (२६) अशोक में एकाएक फूल उत्पन्न हो गए, स्कन्ध से लेकर शाखा तक। उसने सुन्दरी के नूपुरसिञ्चित पाद के संपर्क की अपेक्षा नहीं की। (२७) आम्ररूपी नया बाण नई कोपलें फूटते ही जब पूर्त्ति को प्राप्त हो गया तो वसन्त ने उस पर भ्रमरावली के रूप में कामयोद्धा की नामाक्षरावली सी अंकित कर दी। (२८) कर्णिकार (अमलतास) के रंग का तो क्या कहना, परन्तु गन्ध का नाम भी नहीं। चित्त को कितना दुःख नहीं होता इस विषमता से। किन्तु, विधाता गुणों की समग्रता से प्रायः पराङ्मुख ही रहता हैं। (२९) टेसू में कलियाँ तो भर गईं, परन्तु अभी विकसित नहीं हुईं तो ऐसा लगा जैसे ये वनस्थलियों पर नखक्षत उभर रहे हैं, वसन्त के साथ हुए ताजे समागम में।

(२४) तपः = मनः। (२६) नापै= चापै। (२७) णीव =ण्येव। (२८) चेतः = चित्तम्।

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं निवेश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ।। ३० ।।
मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ।। ३१ ।।
चूताङ्कुरास्वादकषायकण्ठं पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ।। ३२ ।।
हिमव्यपायाद् विशदाधराणामापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ।। ३३ ।।
तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथञ्चिदीशा मनसां बभूवुः ।। ३४ ।।
तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ।। ३५ ।।

(३०) मधुश्री ने मुख पर लगाया तिलकवृक्ष के पुष्प का तिलक, जो अनेक रंग का था, भ्रमरावली कर रही थी जिसमें अंजन का काम। इसके बाद आम की कोपलों के ओठों को बालारुण कोमल राग से अलंकृत कर लिया। **(३१)** मृग मदमत्त हो उठे। वे प्रियालद्रुम (अचार) की मञ्जरी के रजःकणों से देखने में विघ्न का अनुभव तो कर रहे थे, परन्तु एक से दूसरी वनस्थलियों में उधर ही बढ़ रहे थे जिधर से हवा आ रही थी। **(३२)** चूताङ्कुरास्वाद से कषायित कण्ठ पुंस्कोकिल ने जो मीठी कूज लगाई वही मानवती वनिताओं के मानविघात में दक्ष वचन बन गई कामदेव का। **(३३)** किम्पुरुषों की अङ्गनाओं ने पत्रावली का मण्डन कर रखा था, अब उन पर पसीनें की बूँदें दिखाई देने लगीं, वैसे शिशिर बीत जाने से उनके अधर व्रणरहित और विशद हो गए थे और मुखच्छवि आपाण्डुर दिखाई दे रही थी। **(३४)** शिव के तपोवन के तपस्वी वसन्त के उस असमय में हुए विस्फार से अपने मन की विक्रियाओं को यत्न कर करके रोक रहे थे और जिस किसी प्रकार उन्हें वश में किए हुए थे । **(३५)** उसी आश्रम में जा पहुँचा रतिसहित काम। वह धनुष पर पुष्पबाण चढ़ाए हुए था। परिणाम यह हुआ कि जितने भी जोड़े वहाँ थे उनमें काष्ठागत स्नेहरस से सिक्त भाव (प्रीति) प्रकट होने लगा।

(३०) निवेश्य=प्रकाश्य म.अ.ना.। **(३३) पत्र = चित्र।**

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णशारः ।। ३६ ।।
ददौ रसात् पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः ।
अर्द्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा ।। ३७ ।।
गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे ।। ३८ ।।
पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस् तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ।। ३९ ।।
श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ।। ४० ।।
लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ।। ४१ ।।

(३६) भौरें कुसुम के एक ही पात्र में अपनी प्रिया के द्वारा पिये मधु का पान करने लगे और मृग स्पर्श से निमीलित नेत्र वाली मृगी को शृङ्ग से खुजलाने लगे। (३७) हथिनी हाथी को पङ्कजरेणु से सुरभित गण्डूषज़ल बड़े चाव के साथ देने लगी, चक्रवाक आधी खाई हुई कमल ककड़ी से जाया का समादर करने लगा । (३८) किंपुरुष प्रियामुख का चुम्बन गीत के बीच करने लगे। गीत के श्रम से हुए स्वेदबिन्दुओं से मुख पर बने पत्र कुछ फैले हुए रहते और पुष्पासव से नेत्र आघूर्णित दिखलाई देते। (३९) लतावधुओं से वृक्ष भी पाने लगे झुकी शाखारूपी भुजों में बन्धन, लतावधू रहती पर्याप्तपुष्पस्तबकस्तनी और स्फुरत्प्रवालोष्ठ–मनोहर। (४०) इसी बीच अप्सराओं के गान भी सुनाई देने लगे, किन्तु इन सबको सुनकर भी भगवान् शिव ध्यान में ही लगे रहे। जिसका अपने ऊपर नियन्त्रण रहता है उसकी समाधि तोड़ना विघ्नों के लिए भी संभव नहीं होता। (४१) (अब पटाक्षेप हुआ।)यह कि नन्दी ने लतागृह के द्वार पर आकर मुख पर तर्जनी रखी और गणों को आदेश दिया कि धींगामुश्ती बन्द करो ।

(३७) ददौ रसात् पङ्कज= ददौ सरःपङ्कज। (४०) भेद = भेदे, भङ्गे। (४१) वामप्रकोष्ठार्पितहेमवेत्रः= मुखाग्रसंस्थापिततर्जनीकः; नैषीत् = नैषत्।

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ।। ४२ ।।
दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ।। ४३ ।।

अथ सप्तभिः कुलकम्

स देवदारुद्रुमवेदिकायां शार्दूलचर्म्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ।। ४४ ।।
पर्यङ्कबन्धस्थिरपूर्व्वकायमृज्वायतं सन्नमितोभयांसम् ।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये ।। ४५ ।।
भुजङ्गमोन्नद्धजटाकलापं करावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां मृगत्वचं ग्रन्थिमतीं दधानम् ।। ४६ ।।

(४२) फिर क्या था? वसन्तवैभव से भरा–पूरा वन ऐसा हो गया जैसे चित्रलिखित वन हो। वृक्षों में निष्कम्पता, भ्रमरों में शब्द और गति दोनों का लोप, पक्षी मूक और मृगों का डोलना समाप्त। **(४३)** जैसे सम्मुख शुक्र को बचाकर प्रस्थान किया जाता है उसी प्रकार काम नन्दी की आँख से बचकर भगवान् शङ्कर के ध्यान स्थान तक जा पहुँचा। वहाँ प्रान्त भाग में नमेरु शाखाएँ संसक्त थीं। (सम्मुख शुक्र मृत्युकारी। काम भी भस्म होने वाला है।) **(४४)** वहाँ काम ने देखा संयम में लीन त्र्यम्बक शिव को। वे देवदारुद्रुम की वेदिका के ऊपर बिछे व्याघ्रचर्म पर विराजमान थे। काम का शरीर अब छूटने ही वाला था। **(४५)** पर्यङ्कबन्ध आसन लगाए बैठे थे भगवान् शिव। उनका ऊपरी भाग स्थिर था। वह सीधी लम्बाई लिए था, दोनों कन्धे झुके हुए थे। गोद में दोनों हथेलियाँ उत्तान रखी हुई थीं, ऐसा लग रहा था कि गोद में दो खिले कमलपुष्प रखे हों। **(४६)** जटाएँ धारण किए थे। जटाएँ ऊपर की ओर बँधी हुई थीं, हाथ में लिपटी थी दुगुनी रुद्राक्षमालाएँ, पहँना था मृगचर्म, जो कण्ठ की प्रभा से और अधिक नीला हो गया था। उसमें गाँठ लगी हुई थी।

(४२) रम्भ=रण्यम् अ.ना., रघु. २.३१। **(४३) दृष्टि=दृष्टेः; प्रपातं = प्रदीपं** व., **पतीपं** म.अ.ना. व., **प्रयातं, प्रयाणं। (४४) स्त्रियम्बकं=त्रैयम्बकं, तं त्र्यम्बकं, त्रिलोचनं। (४५) शात् प्रफुल्ल=शादुत्फुल्ल । (४६) मोन्नद्ध=मोद्बद्ध, माबद्धः; कराव=कर्णाव** म.; **वसक्त=वतंस; सङ्ग=भ्यङ्ग** अ.ना., **भिन्न, भ्यक्त** व.; **मृग=कृष्ण** म.। कृष्णास्य कृष्णशारस्य। **दधानम्=वसानम्** व.।

किञ्चित्प्रकाशस्तिमितोग्रतारैर् भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर् लक्ष्यीकृतघ्राणमधोमयूखैः ।।४७।।
अवृष्टिसंरम्भ–मिवाम्बुवाह–मपामिवाधार–मनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् ।।४८।।
कपालनेत्रान्तरलब्धमार्गैर् ज्योतिः–प्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ।।४९।।
मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् ।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ।।५०।।
स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ।।५१।।

(४७) नेत्रों का लक्ष्य बनाए हुए थे बीच नासिका को। नेत्र अर्धनिमीलित थे। उनकी पुतलियाँ उग्र और कुछ प्रकाश बिखेरती स्थिर थीं। भौंहे भी स्थिर थीं। बरौनियाँ (पक्ष्म) भी निस्पन्द थीं। (४८) वे लग रहे थे वृंष्टिरहित मेघ से, निस्तरङ्ग जलाशय से, निवात निष्कम्प प्रदीप से, क्योंकि उन्होंने अन्तश्चारी प्राणों का निरोध (प्राणायाम) कर रखा था। (४९) कपाल के तृतीय नेत्र से निकल रही प्रकाशकिरणों से बालचन्द्र की श्री को, जो मृणालसूत्र से भी अधिक सुकुमार थी, क्षीण कर रहे थे वे। (५०) समाधि से वशीभूत मन को नवों (इन्द्रिय) द्वारों से रोककर जो हृदय में एकाग्र किए हुए थे और थे उस आत्मतत्त्व का अपने भीतर दर्शन करने में निरत, क्षेत्रज्ञ महापुरुष जिसे अक्षर के रूप में जानते हैं। (५१) काम ने ऐसे शिव को इतने पास से देखा तो भय से इतना त्रस्त हो गया कि उसे यह भी समझ में नहीं आया कि उसके स्तब्ध हाथों से कब बाण गिर गया और कब धनुष। (वसन्त की जडश्री ध्वस्त हो गई, किन्तु वही जब पार्वती के शरीर पर अलंकार बनकर आई तो उसका प्रभाव देखिए।)

(४७) तोग्रतारैः = तान्यतारैः; विरत = विरसत् स्तिमित, स्थगित; प्रसङ्गैः = प्रसङ्गः, प्रचारैः; लक्ष्यी=लक्ष्मी व.। **(४८) अवृष्टि = अवृष्ट; मनुत्तरङ्गम् = वाम्बुराशिम्; निवात = निर्वात। (४९) मार्गैः॰॰रोहैरुदितैः = मांर्गान्॰॰रोहानुदितान्** अ.ना.। **(५०) नव=भव; क्षेत्र=ब्रह्म** म.अ.ना.। ।।५०।। कुलकम्, आदिकुलकम् आदिक्रियाकुलकम्। **(५१) न्नदूरान्म=न्नदूरे म; मनसाप्यधृष्यम्= मनसोऽप्यदृश्यम्।** अथ चतुर्भिः कुलकम्।

निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ।।५२।।
अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ।।५३।।
आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
सुजातपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव ।।५४।।
स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ।।५५।।
सुगन्धिनिःश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
पुनः पुनः संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ।।५६।।

(५२) अब काम की लगभग बुत चुंकी शक्ति को अपने शरीर के गुण से धौंकती हुई सी दिखाई दी पीछे चल रही दो वनदेवियाँ के साथ पार्वती। (५३) पार्वती धारण किए थी वसन्तपुष्पों के आभरण। अशोक से पद्मराग की भर्त्सना कर रही थीं, सुवर्ण की कान्ति ले रखी थी कर्णिकार ने, मुक्ताकलाप बन गया था सिन्दुवार। (५४) स्तनों के भार से कुछ झुकी हुई पार्वती अरुण कान्ति का वस्त्र पहने थी। लगती थी पर्याप्त पुष्पस्तबक से झुकी कोई पल्लवों से भरी सञ्चारिणी लता हो। (५५) केसर की माला नितम्ब से बार–बार खिसकती जाती थी और उसे वह पकड़े हुए थी। वह काञ्ची ऐसी लगती थी कि काम के धनुष की दूसरी प्रत्यञ्चा हो और उसे उसने धरोहर के रूप में रख दिया हो उचित स्थान समझ। (५६) वह प्रतिक्षण हटाती जा रही थी भ्रमर को, सुगन्धित निश्वास से जिसकी तृष्णा बढ़ती जा रही थी, जो बिम्बाधर के पास मँडरा रहा था, जिस कारण भय से जिसकी दृष्टि चञ्चल थी और उसे वह लीलारविन्द से हटा रही थी ।

(५२) वीर्यम्=बीजम्। **(५३) आकृष्ट= आक्रुष्ट** अ.ना.; **सिन्दु=सिन्धु** व.। **(५४) सुजात=संजात** व., **पर्याप्त** म.; **पल्लविनी=पल्कविता** अ.ना.। **(५५) दवलम्बमाना=दवरो–प /ध/ह–यन्ती; दाम=पुष्प** व.; **द्वितीयमौ=मौर्वी द्विती** म. इति तु महिम–मम्मट–भट्टौ। **(५६) चरम् = चलम्** व.; **लोलदृष्टि = लोलनेत्रा।** आदिकुलम्।।

तां वीक्ष्य सर्वावयवाऽनवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वबाणसिद्धिं पुनराशशंसे ।।५७।।
भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ।।५८।।
ततो भुजङ्गाधिपतेः फणाग्रैरधः कथञ्चिद् धृतभूमिभागः ।
शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद ।।५९।।
तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्त्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ।।६०।।
तस्याः सखीभ्यां प्रणिपातपूर्व्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ।।६१।।

(५७) पुष्पबाण काम ने ऐसी पार्वती को देखा तो जितेन्द्रिय और शूलधारी शिव पर अपने बाण की सिद्धि की आशा उसमें फिर जाग उठी। पार्वती का प्रत्येक अंग निर्दोष था और वह रति को भी लज्जित कर रही थी। (५८) इधर उमा अपने भावी पति शिव के दरवाजे पर पहुँची और उधर उन्होंने अपनी योगसमाधि छोड़ी, योग से परमात्म–नामक पर ज्योति का भीतर दर्शन कर। (इस योग का फल पार्वती ही।) (५९) शिवजी ने कसकर बँधा पर्यङ्कबन्ध छोड़ा। उसके पहले प्राणायाम में रोके प्राणों को धीरे धीरे छोड़ा। तब शेषनाग अपने फणों से भूमिभाग जिस किंसी प्रकार धारण कर पाए। (६०) उनसे नन्दी ने प्रणाम कर कहा–'पार्वती शुश्रूषार्थ उपस्थित है'। भ्रूक्षेप से प्राप्त अनुमति पर नन्दी ने उन्हें प्रवेश दिया। (६१) उसकी दोनों सखियों ने अपने हाथ से चुने वसन्त के पल्लवमिश्रित पुष्प भगवान् शिव के चरणों पर बिखेर दिए ।

(५७) रतेरपि ह्री = रतेर् ह्रिया, रतेरपि ह्रीतिमिवा अ.ना.; जिते = यते व., यती; चापः=धन्वा, केतुः व.अ.ना.; स्वबाण = स्वकर्म्म व.अ.ना., स कर्म्म; शंसे= शंस व.अ.ना.। द्र. रघु १४.५० (५८) 'भविष्य...भोः ; =' उपासितुं सा च/साथ/सापि पिनाकपाणि व.; न्तः परमात्म = चान्तः परमार्थ, चान्तर्गत०, दृष्ट्वा चिरमा०। (५९) फणाग्रैः = फणाभिः; भागः = भागम् व.। (६०) प्रवे = निवे; मत = मित व.। (६१) पातपूर्वं=पत्य पूर्वं अ.ना., पत्य मूर्ध्नाः, लूनः = भूतः व.; मूले = पद्मे।

उमाऽपि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ।। ६२ ।।
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् ।। ६३ ।।
कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद् वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ।। ६४ ।।
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ।। ६५ ।।
प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ।। ६६ ।।
हरस्तु किञ्चित्परि–वृत्त/लुप्त–धैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोच/कनानि ।। ६७ ।।

(६२) पार्वती ने भी भगवान् शिव को सिर झुकाकर प्रणाम किया। उनके नीले केशों से नवकर्णिकार खिसका और कान में लगा पल्लव गिर पड़ा। (६३) भगवान् ने आशीर्वाद दिया – 'ऐसा पति पाओ जो किसी को प्राप्त न हुआ हो।' भगवान् ने यह जो आशीर्वाद दिया यह बिलकुल सत्य था। ईश्वर की उक्ति कभी भी लोक में उल्टा अर्थ नहीं देती। (६४) काम को लगा कि यही है उपयुक्त अवसर बाण छोड़ने का तो वह्नि में पतंगे के समान प्रवेश का इच्छुक वह अपने धनुष की प्रत्यञ्चा बार–बार छूने लगा उमा के सामने शिव को लक्ष्य कर । (६५) अब गौरी ने तपस्वी गिरिश को भेंट की मन्दाकिनी के कमल के बीज की, सूर्य के प्रकाश में सूखी माला अपने रक्तवर्ण के हाथ से। (६६) भगवान् ठहरे प्रणयी के प्रेमी। उन्होंने उसे स्वीकार करना चाहा और काम ने अपने धनुष पर संमोहन नामक अमोघ बाण चढ़ाया। (६७) भगवान् का धैर्य डिगा जैसे चन्द्रोदय के आरम्भ में समुद्र का धैर्य डिगता है और उन्होंने उमा के बिम्ब जैसे लाल अधर पर तीनों नेत्रों को घुमाया।

(६२) नीला = लोलाः; कर्णच्युत = कर्णाच्युत। (६३) तथ्य = भव्य अ.ना. , सत्य; पुष्णन्ति= पुष्यन्ति व.; लोके=पाके व.अ.ना.। (६४) सरं प्रतीक्ष्य = सरं समीक्ष्य, सरप्रतीक्षः व.। सर्वत्रैव समक्षं हरेत्येव लेखः। अत्र बन्धनलक्षणान्यतरक्रियाविशेषणत्वमन्वीक्ष्यम्। मर्श=मर्ष। (६५) शोषिताम्= शेषिताम् व.अ.ना., श्लेषितं। (६६) प्रणयिप्रिय=प्रणयप्रिय; बाणम्=सायकम्। सायकपाठे चतुर्थे चरणे वंशस्थः।

विवृण्वती शैलसुतापि भावमङ्गैः स्फुटद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ।। ६८ ।।
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ।। ६९ ।।
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्त्तुमभ्युद्यतमात्मयोनिम् ।। ७० ।।
तपः—परामर्शविवृद्धमन्योर् भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ।। ७१ ।।
क्रोधं प्रभो! संहर संहरेति यावद् गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ।। ७२ ।।
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्त्तं कृतोपकारेव रतिर्बभूव ।। ७३ ।।

(६८) उमा ने भी खिल रहे बाल कदम्ब से (रोमाञ्चित) अंगों से अपना निगूढ भाव (आसक्ति) व्यक्त करते हुए मुख टेढ़ा कर लिया और आँखे घुमा लीं जिससे वह और अधिक सुन्दर लगने लगा। (६९) भगवान् फिर सावधान हो गए और उन्होने वशी होने के कारण अपने मन मे जो क्षोभ उत्पन्न हुआ उसका हेतु देखने के उद्देश्य से दिगन्तों में दृष्टि घुमाई। (शृ. प्र.१७.१२३)। (७०) उन्होंने देखा कि काम प्रहार करने की चेष्टा कर रहा है, उसका चाप चक्र जैसा गोल है, दाहिना पैर आकुञ्चित है, कन्धा झुका है और दक्षिण नेत्र के पास मुष्टि बनाए हुए। (७१) तप के कारण उनका क्रोध और बढ़ा हुआ था। उनका मुख भ्रूभङ्ग के कारण दुष्प्रेक्ष्य था। उनके तृतीय नेत्र से लपट फेंकती आग निकल पड़ी। (७२) जब तक आकाश में देवतालोग चिल्लाएँ और कहें कि हे प्रभो! क्रोध को रोकिए रोकिए तब तक तो शिव के नेत्र से निकली उस अग्नि ने मदन को भस्म कर दिया। (७३) रति मूर्च्छित हो गई उस तीव्र अभिषङ्ग के कारण। उससे इन्द्रियों की वृत्तियाँ स्तब्ध हो गई और उसे पति का शोक अनुभव में नहीं आया। एक प्रकार से यह उस पर उपकार ही हुआ।

(६८) स्फुटद्=स्फुरद् व., **कुचद्** अ.ना.। कुच संकोचे। **साचीकृता= साचिक्रिया, साविक्रिया। (६९) यक्षोभ=याक्षोभ; ससर्ज दृष्टिम्=विसृज्य दृष्टिम्, विसृष्टदृष्टिः। (७०) निविष्ट=निषक्त; नतांस=नितान्त; पादम्=जानुम्; चक्री=वक्री; योनिम्=योनिः। (७२) क्रोधं=कोपं** अ.ना.; **प्रभो=विभो; शेषं=सानम्। (७३) तीव्राभि=तीव्राति; संस्तम्भयते=संभमयती।**

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसन्निकर्षं परिहर्त्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ।। ७४।।

शैलात्मजाऽपि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित् ।। ७५।।

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृतात्मा ।। ७६।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ मदनदहनो नाम
तृतीयस्तेजोमूर्त्तिसर्गः।। ३।।

(७४) इधर भूतपति शिव तपोरत थे और यह तप में बहुत बड़ा व्याघात उपस्थित हुआ। वज्र जैसे वनस्पति को धराशायी कर डालता है वैसे ही शिव ने इस व्याघात को नष्ट किया और वे स्त्रीसन्निकर्षरूपी विघ्न का परिहार करने हेतु सभी भूतों के साथ अन्तर्हित हो गए। (७५) पार्वती ने देखा कि उसके ऊँचे सिरवाले पिता की इच्छा और उसकी अपनी ललित काया दोनों व्यर्थ हो चुकी हैं और वह भी दो दो सखियों के सामने तो और अधिक लज्जित हो शून्य चित्त लिए जिस किसी प्रकार घर की ओर चली। (७६) गिरिराज तुरन्त प्रकट हुए और शिव के क्रोध से डरकर आँख बन्द की हुई अनुकम्पनीय पुत्री को हाथों में उठाकर वेग से पीछे की ओर बढ़े। वे ऐसे लगे जैसा दन्तलग्न कमलिनी को लिए सुरगज लगता है। वेग में उनका शरीर लम्बा हो गया था। ('कृताङ्ग' शब्द में अश्लीलत्व दोष आता है।)

इस प्रकार महाकवि कालिदास की कृति 'कुमारसंभव' नामक अष्टमूर्त्ति महाकाव्य में
मदनदहन नामक तृतीय सर्ग (अग्निमूर्त्ति) पूर्ण हुआ।। ३।।

२०६४ वि.स.व्यतीत चैत्रशुक्ल प्रतिपद्, सोमवार

(७४) वज्र=वज्रम्; भज्य=रुज्य अ.ना., **दह्य; सन्नकर्षं=सन्निधानं; र्त्तुमिच्छन्न्=र्त्तुकामःसो** व(ना)। **(७५) समर्थ्य=समीक्ष्य** अ.नां.; **सख्योः=सख्युः भवना=भुवना; मुखी=मुखं। (७६) पदि=अथ च, अथ स; पथ=पद; कृतात्मा=कृताङ्ग** व.।

।। चतुर्थः सर्गः।।

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ।। १ ।।
अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ।। २ ।।
अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ।। ३ ।।
अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ।। ४ ।।
उपमानमभूद् विलासिनां करणं यत् तव कान्तिमत्तया ।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ।। ५ ।।
क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ।। ६ ।।

(१) काम की पत्नी को मूर्च्छा पर मूर्च्छा आ रही थी, किन्तु विधाता ने उसे होश में ला दिया इसलिए कि उसे असह्य वेदना वाला नववैधव्य भुगवाना था। (२) मूर्च्छा के बाद खुले नेत्रों से उसने खोजा, परन्तु उसके अतृप्त नेत्रों को कहीं भी प्रिय दिखाई दिया नहीं, उसके दर्शन तो सदा के लिए लुप्त हो चुके थे। (३) 'प्राणनाथ! जीवित तो हो' यह कहकर उठी रति ने सामने देखी केवल हरकोपानल की पुरुषाकृति भस्म। (४) उसे देखकर वह फिर से विह्वल हो उठी। भूमि का आलिङ्गन करने लगी। स्तन धूसर हो गए। केश बिखर गए। उसने पूरे क्षेत्र को दुःख में डुबाते हुए करना आरम्भ किया विलाप। (शृ.प्र.२४.७०, ३२.७८) (५) प्रिय! तुम्हारा जो शरीर विलासियों का उपमान हुआ करता था वही यह कण–कण होकर बिखरा पड़ा है और मेरा हृदय फट नहीं रहा। निश्चित ही कठिनहृदया ही होती हैं स्त्रियाँ। (६) तुम्हारे अधीन है मेरा जीवन। क्षणमात्र में अपनी प्रीति

(१) विबोधिता = प्रबोधिता; प्रतिपाद = प्रतिबोध (२) अवधान=अपधान, अप/वदान; विलुप्त= निमग्न व., विमग्न, विलग्न, मनित्य (३) पुरः = पुनः; कृति = कृतिः अ.ना (४) विह्वला = विक्लवा; धूसरस्तनी = धूसराकृतिः (५) न विदीर्ये = न च दीर्ये अ.ना । (६) न्धनो = न्धनां ।

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ।।७।।
स्मरसि स्मर! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ।
च्युत–केसर–दूषितेक्षणान्यवतंसोत्पल–ताडनानि वा ।।८।।
हृदये वससीति मत्प्रियं यदवादीस्तदवैमि कैतवम् ।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ।।९।।
परलोक–नव–प्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ।।१०।।
रजनी–तिमिराऽवगुण्ठिते पुरमार्गे घनशब्द–विक्लवाः ।
वसतिं प्रिय! कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ।।११।।
नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ।।१२।।

तोड़ कहाँ भाग गए तुम। यह तो वैसा ही हुआ जैसे नलिनी को छोड़कर टूटे सेतु से जलसंघात निकल भागे। (७) रति बिलख रही और तुम दर्शन नहीं दे रहे । अकारण ही ऐसा क्यों? न तुमने मेरा अप्रिय किया और न मैंने ही तुम्हारे प्रतिकूल। (८) गोत्रस्खलन होने पर मैंने जो तुम्हें करधनी की रस्सी से बाँधा था उसे स्मरण कर रहे हो! या अवतंसोत्पल की ताड़ना याद कर रहे हो, जिसमें गिरे पराग से आँखें दूषित हो जाती थीं। (९) 'मेरे हृदय में बसी हो तुम' यह जो मेरे लिए मीठा वचन तुम कहते रहे उसे मैं मिथ्या पा रही हूँ। यदि यह कथन ऊपरी न होता तो तुम तो हो गए अनङ्ग और रति का बाल भी बाँका नहीं हुआ क्यों? (१०) परलोक के तुम नए–नए प्रवासी हो। मैं भी तुम्हारे ही रास्ते पर आ रही हूँ। विधाता ने इस जन की वञ्चना की। देहियों का सुख तो तुम्हारे अधीन है। (११) प्रिय! जब पुरमार्ग रात को अँधियारी में डूबा रहता है, तब बादलों की गरज से घबराई प्रियाओं को कामिजनों के घर तक कौन पहुँचा सकता है, तुम्हें छोड़कर। (१२) अरुण नयनों को घुमाने और बोली को पद पद पर लड़खड़ाने वाला वारुणीमद अब जब तुम नहीं रहे तो विडम्बना बन कर रह जाएगा।

(७) न च = च न (८) दूषितेक्षणा = दूषितेक्षिता; ताडना = ताडिता व. (९) वससि = वसती (१०) पत्स्ये = पक्ष्ये ; सुखम् = मुखम् (११) विक्लवाः = विह्वलाः।

अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग! मोक्ष्यति ॥१३॥
हरिताऽरुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः ।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥१४॥
अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥१५॥
प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥१६॥
शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च ।
सुरतानि च तानि ते रहः स्मर! संस्मृत्य न शान्तिरस्ति मे ॥१७॥
रचितं रतिपण्डित! त्वया स्वयमङ्गेषु ममेदमार्त्तवम् ।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥१८॥

(१३) प्रिय! चन्द्रमा उदित तो होता रहेगा पर अब उसका उदय निष्फल रहेगा जब तुम्हारी कहानी ही बची। वह कृष्णपक्ष बीत जाने पर भी अपनी क्षीणता कठिनाई से छोड़ सकेगा। (१४) अब जब आम में सुन्दर हरितारुण अंकुर निकलेगा और पुंस्कोकिल की मीठी कूक उसकी सूचना देगी तब वह किसका बाण बनेगा? (१५) भ्रमरपङ्क्ति को तुमने अपने धनुष की प्रत्यञ्चा के काम में अनेक बार लिया। अब तो गहरे शोक में डूबी यह गूँज तो रही है, परन्तु कदाचित् मेरे रोदन का अनुकरण कर रही है। (१६) प्रिय! उठो, वही सुन्दर शरीर धारण करो और इस मधुर आलाप में निसर्गपण्डिता कोकिला को फिर से आदेश दो रति की दूती बनने का। (१७) स्मर! सिर से प्रणाम कर करके माँगे सकम्प आलिङ्गन और भाँति भाँति के वे वे तुम्हारे एकान्त के सुरत याद कर करके मुझे शान्ति नहीं मिल रही है । (१८) प्रिय! तुम तो थे रतिपण्डित। तुमने ऋतुओं के पुष्पों का जो सिंगार मेरे अङ्ग अङ्ग में किया था वह तो अभी बना ही है, पर तुम्हारा वह सुन्दर शरीर नहीं दिखाई पड़ रहा।

(१४) नव = वद (१५) कृत्ये = कृत्यैः; विरुतैः = विततैः व.; करुण = करुणैः; स्वनैः = स्वरैः व. अ.ना (१६) पुनरप्यादिश = परपुष्टा दिश; दूति = दूत अ.ना; कोकिलाम्=कोकिलान् व.म.अ.ना.; निसर्ग = विसर्ग व.; पण्डिताम्=पण्डितान् अ.ना (१७) नि च तानि = न्यपि तानि; ते=मे; रहः=पुरा। (१८) स्वयम् = नवम् अ.ना ।

विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्म्मणि स्मृतः ।
तदिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥१९॥
अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयिणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय! यावन्न विलोभ्यसे दिवि ॥२०॥
मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण! त्वामनुयामि यद्यपि ॥२१॥
क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥२२॥
ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च तत् ॥२३॥
क्व नु ते हृदयङ्गमः सखा कुसुमायोजितकार्म्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥२४॥

(१९) यह मेरा बाँया पैर, इसका अलंकरण कर ही रहे थे कि दारुण देवताओं ने तुम्हें याद कर लिया, प्रिय! आओ और इस पर तो पूरा अलता लगा दो। (२०) मैं पतंग के रास्ते चलकर पहुँच रही हूँ और तुम्हारी अंकाश्रयिणी बनने जा रही हूँ, जब तक चतुर अप्सराएँ तुम्हें लुभाती नहीं है। (२१) हे रमण! मैं तुम्हारे पीछे आ तो रही हूँ पर मेरे ललाट पर कलंक का यह टीका तो लग ही गया कि 'रति मदन से अलग होकर भी क्षण भर तो जीवित रही ही'। (२२) प्रिय! परलोक में जा छिपे तुम्हारा अन्तिम अलंकार कैसे करूँ मैं? तुम तो इस अतर्कित गति को प्राप्त हो गए शरीर और प्राण दोनों के साथ। (२३) प्रिय! तुम्हारी याद आ रही है मुझे —'धनुष को गोद में रखकर तुम सीधा करते जाते थे, वसन्त से मुसकुरा मुसकुरा कर बात करते जाते थे और नयनोपान्त से मेरी ओर ताकते रहते थे। (२४) तुम्हारा हृदयङ्गम सखा मधु, कहाँ है? वही तो फूल से तुम्हारा धनुष बनाया करता था। ऐसा तो नहीं कि उग्ररोष पिनाकी ने उसे भी तुम्हारी गति में पहुँचा

(१९) रसि यस्य दारु=रपि यत् सुदारु अ.ना.; विबुधैस्त्वमनङ्ग दारु;परिकर्म=प्रतिकर्म । (२०)अहमेत्य=इयमेत्य अ.ना.,पुनरङ्का=पुररुक्ता; विलोभ्यसे=विलुभ्यसे, विलुप्यसे (२१) विनाकृता=विना कथं, विना क्षता , विना क्षिता (२२) क्रियतां=क्रियते, ध्रियते; अन्त्य = अन्त, अद्य; कान्तरितस्य = कन्त्वरितस्य अ.ना.; सममेव=स्वयमेव; स्यतर्कितां =स्म्यतर्कितां; गतिमङ्गेन=स्वशरीरेण (२३) नयतः=नमसिः निषण्ण=निषक्त, निषिक्त, निषङ्ग; धन्वनः=धन्विनः;सस्मितां कथां = सस्मिताः कथाः; विलोकितं च तत्=विलोकितानि च, विलोचनानि च, विलोकनानि च, विलोकनं च तत्।

अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवार्दितः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत् पुरः ।। २५।।
तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ।। २६।।
इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त! कि स्थितम् ।
यदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ।। २७।।
अयि संप्रति देहि दर्शनं स्मर! पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ।। २८।।
अमुना खलु पार्श्ववर्त्तिना जगदाज्ञां ससुरासुरं तव ।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ।। २९।।
गत एव न ते निवर्त्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्यव्यसनप्रधूमिताम् ।। ३०।।

दिया हो। (२५) अब रति के विलाप के उन विषदिग्ध शरों जैसे शब्दों से पीड़ित मधु ने आतुर रति को ढाँढस बँधाने के लिए स्वयं को प्रकट किया। (शृ.प्र.३२.१६३) (२६) उसे देखा तो रति को और अधिक रोना आया। उसने स्तनों से भरी छाती पीटना शुरू किया। ऐसा है कि स्वजन के समक्ष दुःख का दरवाजा खुल सा जाता है। (२७) दुःख में डूबी उसने मधु से कहा—'वसन्त! अरे देखो तो तुम्हारे मित्र का क्या हो गया कि यह कबूतर सी चितकबरी भस्म कण कण करके हवा में बिखर रही है। (२८) स्मर! अब तो दे दो दर्शन। यह माधव कितना उत्सुक है। पुरुषों का प्रेम दयिताओं में तो अनवस्थित रहता है, परन्तु मित्रों में तो चल नहीं रहता। (२९) यही तो है जो सदा तुम्हारे पास में उपस्थित रहता था और सुकुमार पुष्पों के धनुष पर विसतन्तु की प्रत्यञ्चा चढ़वाकर देव—दानवों सहित सारे संसार को विवश कर देता था तुम्हारी आज्ञा मानने हेतु। (३०) मित्र वसन्त! तुम्हारा मित्र चला ही गया, अब कभी नहीं लौटेगा, हवा के झोकें से आहत दीपक की भाँति, और मैं, मुझे देखो मैं इसकी बत्ती के समान ही अविषह्य आपत्ति का धुआँ लिए

(२५) देविता=देवना , देवता; शरै=फलै व.अ.ना.; **र्दितः = हतः** म., **र्पितः** अ.ना.;**भ्युपपत्तु=भ्यवपत्तु** अ.; **मधु=ऋतु** व.; **पुरः=कृती (२६) रुरोद सा भृशं = भृशं रुरोद सा; स्तन=गुरु। (२७) सुहृदः=सुहृदं** अ.ना.; **सुहृदः पश्य वसन्त किं=सुहृदं पश्यसि किं मधो; यदि=तदि; विकीर्यते=प्रकीर्यते** अ.ना.म.; **कर्बुरम्=पाण्डरम् । (२८) दयिता=प्रमदा । (२९) पेलव=पेशल, कोमल** अ.ना.म.। **(३०) नप्रधूमिताम् = सनप्रदीपिताम्** व., **सनप्रदूषिताम्, सनेन धूमिताम्** म.व(ना)।

विधिना कृतमर्द्धवैशसं ननु मां कामवधे विमुञ्चता ।
अनघापि हि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ।। ३१ ।।
तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ।। ३२ ।।
शशिना सह याति कौमुदी सह मेघेन तडित् प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ।। ३३ ।।
अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ।। ३४ ।।
कुसुमास्तरणे सहायतां बहुशः सौम्य! गतस्त्वमावयोः ।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम् ।। ३५ ।।
तदनु ज्वलनं त्वदर्पितं त्वरयेर्दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ।। ३६ ।।

बची हुई हूँ। (३१) विधाता ने आधा ही दगा दिया जो कामवध की कुघड़ी में मुझे छोड़ दिया। आश्रयवृक्ष को यदि गज तोड़ डाले तो लता को भी गिरना तो पड़ता ही है, भले ही वह निर्दोष हो। (३२) तो वसन्त, अपने बन्धु काम का और्ध्वदेहिक कृत्य करते करते बिना अन्तर आए मेरी यह इच्छा पूरी कर दो कि विधुर मुझे अग्नि में डालकर पति के पास भेज दो। (३३) चाँदनी चन्द्रमा के साथ चली जाया करती है और मेघ के साथ विलीन हो जाया करती है विद्युत्। तो, यह तो अचेतनों ने भी स्वीकार कर रखा है कि प्रमदा पति के मार्ग पर चला करती है। (३४) प्रियशरीर के इसी सुन्दर भस्म को अपनी छाती पर अंगराग बनाऊँगी और नवपल्लव के बिस्तर के समान शरीर को अग्नि पर लिटा दूँगी (३५) माधव! तुमने हम दोनों के लिए फूल के बिछौने अनेक बार बनाए। अब हाथ जोड़कर याचना करती हूँ कि चिता बना दो। (३६) उसके बाद उसमें मेरे लिए लगा देना अग्नि और उस पर पंखा झल देना मलयानिल का। तुम्हें विदित ही है तुम्हारे मित्र को मेरे बिना क्षणभर भी चैन नहीं मिलता ।

(३१) अर्द्ध = अर्थ, अन्त्य; वधे=पथे; अनघापि हि=अनपायिनि म.अ.ना., अहतापि हि; संश्रयद्रुमे= संश्रितद्रुमे, संश्रिता द्रुमे व.म.अ.ना.। (३२) ननु=अनुः अ.ना., पत्यु=भर्त्तु (३३)प्रलीयते=विलीयतेः विचेतनैरपि=हि चिरं मनोहरैः, हि पृथग् जनैरपि, हि पृथग् विचेतनैः (३४) तनुं विभावसौ = विभावसौ तनुम् (३५) सौम्य=सोम्य व.; प्रणिपाता=विनिपाता अ.ना : याचितः=याचितां अ.ना.। (३६) त्वदर्पितं= ममार्पितं, मदर्पितं, समर्पितं; त्वरये=ज्वलये; मां विना=मद्विना व.अ.ना.।

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ ।
अविभज्य परत्र यं मया सहितः पास्यति ते स बान्धवः ।। ३७।।
परलोकविधौ च माधव! स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा ।। ३८।।
इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पत ।। ३९।।
कुसुमायुधपत्नि! दुर्लभस्तव भर्त्ता न चिराद् भविष्यति ।
शृणु येन स कर्म्मणा गतः शलभत्वं हरलोचनार्च्चिषि ।। ४०।।
अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत् प्रजापतिः ।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ।। ४१।।
परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन स योजयिष्यति ।। ४२।।

(३७) यह करने के बाद देना एक ही जलाञ्जलि हम दोनों के लिए। उसे परलोक में भी तुम्हारा वह बन्धु मेरे साथ बिना बाँटे पीएगा। (३८) श्राद्ध में भी, हे माधव! तुम हम दोनों के लिए सहकारमञ्जरी का उपयोग करना। उसमें हिलते पल्लव मिले रहें। तुम्हारे मित्र काम को सहकारमञ्जरी बड़ी प्रिय थी। (३९) इस प्रकार रति शरीर छोड़ने के लिए समुद्यत थी कि उस पर आकाशवाणी ने अनुकम्पा की,तलाब के सूख जाने पर कालकवलित होने जा रही शफरी पर प्रथम वृष्टि के समान। (४०) हे कामपत्नि! तेरा भर्त्ता बहुत बड़ी अवधि तक दुर्लभ नहीं रहेगा। सुन जिस (कु)कर्म के कारण उसे हर के कोपानल में शलभ बनना पड़ा। (४१) प्रजापति की इन्द्रियों ने जोर पकड़ा और वे अपनी पुत्री को ही चाह बैठे। फिर उन्होंने अपना मनोविकार रोक लिया और जो शाप दिया उसका भोगना पड़ा उसे यह फल। (४२) 'शंकर भगवान् ही तेरे पति को उसके शरीर में वापस ला देंगें, जब वे पार्वती के साथ परिणय कर लेंगे, उसके प्रति उसके तप से आकृष्ट होकर और विवाह का सुख भोगना चाहेंगे तब'।

(३७) एव=एष; यं मया=यन्मया व.अ.ना., **तं मया** म.; **बान्धवः=माधवः।** (३८) **च=स।** (३९) **इति देहविमुक्तये स्थितां = इति देहविसर्जने स्थिरां** अ.ना., **श्रुतदेहविसर्जनोद्यमाम्; विक्लवां= विह्वलां** व. अ.ना.; **कम्पत=कम्पयत्** म.। (४०) **पत्नि दुर्ल=पत्न्यदुर्ल; येन स कर्मणा गतः=येन गतः ; कर्म्मणा=कर्म्मिणा। नार्च्चिषि=नार्च्चिषः।** (४२) **पार्वतीं यदा=धर्म्मचारिणी, धर्म्मकारिण; स योज=नियोज** व.।

इति चाह स धर्म्मयाचितः स्मरशापावधिदां सरस्वतीम् ।
अशनेरमृतस्य चोभये वशिनश्चाम्बुधराश्च योनयः ।।४३।।
तदिदं परिरक्ष शोभने भवितव्यप्रियसङ्गमं वपुः ।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ।।४४ ।।
इत्थं रतेः किमपि भूतमदृश्यरूपं मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुचरितार्थपदैर्वचोभिः।।४५।।
अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा प्रतिपालयाम्बभूव ।
शशिन इव दिवातनस्य लेखा
दिवसपरिक्षयधूसरा प्रदोषम् ।।४६।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ रतिविलापो नाम चतुर्थो वायुमूर्त्तिसर्गः ।।४।।

(४३) धर्मराज ने याचना की तो उन्हीं (ब्रह्मा जी) ने यह वाणी भी सुनाई जिसमें काम के शाप का अन्त सूचित किया गया था। वशी महापुरुष और मेघ दोनों अशनि (वज्र, बिजली) और अमृत (प्रथमवृष्टि) दोनों ही प्रदान करते हैं। **(४४)** तो हे शोभने! इस शरीर को बचा। इसे प्रियसंगम मिलने वाला है। नदी का जल सूर्य पी लेता है, परन्तु ग्रीष्मकाल के बाद वह जलप्रवाह से फिर समृद्ध हो जाती ही है। **(४५)** इस प्रकार किसी अदृष्ट शक्ति ने रति की मृत्यु की बुद्धि को मन्द कर दिया। उसके भरोसे पर कामपत्नी को काम के सखा (मधुमास) ने आकाशवाणी की सत्यता की बात कहकर आश्वासन दिया। **(४६)** अब बेचारी रति इस घोर आपदा से कृशकाय हो गई। उसने इस उपद्रव के अन्त की प्रतीक्षा करना आरम्भ किया, वैसे ही जैसे दिन में किरणों के परिक्षय से धूसरवर्ण की शशिलेखा प्रदोष (रात्रि) की प्रतीक्षा करती है। (शृ.प्र.२४.४६)।

इस प्रकार कालिदास की कृति 'कुमारसंभव' नामक अष्टमूर्त्ति महाकाव्य में रतिविलाप नामक चतुर्थ सर्ग (वायुमूर्त्ति) पूर्ण हुआ।। ४।।

२०६४ वि.स.व्यतीत चैत्रशुक्ल प्रतिपद्, सोमवार

(४३) धर्मयाचित=धर्मचारिणी, धर्म्मचारिणि व.अ.ना.म.; **स्मरशापावधिदां=स्मरशापान्तशिवां** व., **स्मरशापान्तभवां** अ.ना., **स्मरशापान्तभवा सरस्वती; चोभये=चोभयोः** व.म.अ.ना.; **'चोभये...योनयः'= चोभयेऽप्यभिवृष्यामृतमंशुमानिव। (४५)** बुद्धिम् इत्येव सार्वत्रिकः पाठः। **रेनाम्=रेताम्; सुचरितार्थपदैः= समभिवृद्धरसैः** अ.ना.। **(४६) प्रति=परि; तनस्य=करस्य; लेखा=रेखा; प्रदोषम्=दिनान्तम्** अ.ना.।

।। पञ्चमः सर्गः ।।

ॐ तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्व्वती प्रियेषु सौभाग्यफला हि चारुता ।। १ ।।
इयेष सा कर्त्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ।। २ ।।
निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिषक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ।। ३ ।।
मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से! क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।। ४ ।।
इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ।। ५ ।।

(१) पिनाकी शिव ने जब उस प्रकार सामने ही काम को जला दिया तो पार्वती का मन टूट गया। उसने अपने शरीर (रूप) को कोसना शुरू किया। चारुता का फल सौभाग्य ही तो हुआ करता है प्रियजनों में। (सौभाग्य='प्रिय और प्रिया का परस्पर पर प्रेम'।) (२) पार्वती हारी नहीं। उसने अपने रूप (शरीर और सौन्दर्य) को अवन्ध्य (सफल = उपर्युक्त सौभाग्यरूपी फल से युक्त) करने का निश्चय किया उपाय तय किया तप। अन्य किसी भी मार्ग से कैसे प्राप्त होता वैसा प्रेम और पति। (३) माँ मेना ने इस (पुत्री) को शिव पर आसक्त सुना और सुना तदर्थ तप के लिए उद्यत तो मुनियों के कठिन व्रत तप से रोकने हेतु पुत्री को छाती से लगाती हुई वह बोली। (४) 'वत्से! घर में ही हैं ढेर सारे मनचाहे देवता। तप कहाँ और कहाँ तेरा सुकोमल शरीर। कोमल शिरीष पुष्प भौंरे के पैर सह सके तो सह सकता है, किसी पखेरू का नहीं।' (५) परन्तु, पुत्री की इच्छा अटल थी। माता की इस प्रकार ही शिक्षा पुत्री पार्वती को अपने

(१) तथा=ॐ श्रीगणेशाय नमः ॐ तथा समक्षं; प्रियेषु= प्रिये हि; फला = फलो। (२) रूपतां = कामतां अ.ना.; **वा = तत्** अ.ना.। **(३) गिरीशप्र = गिरीशं प्र** अ.ना., **त्रिनेत्रं प्र; षक्त = बद्ध, सक्त, शक्त। (४) मनी००वता: = मीषिताम/ता अर्च्चं गृहेषु देवताम्/ताः** अ.ना., **गृहेषु = गृहेऽपि; पेलवं = पेशलं, कोमलं** व.म.अ.ना.; **शिरीष = सरीष** अ.। **(५) ध्रुवेच्छा = श्रुतीच्छा, स्थिरेच्छा, स्थितेच्छा** अ.ना.; **र्थस्थिर = र्थे स्थिर।**

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपः—समाधये ।। ६ ।।
अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात् प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डितम् ।। ७ ।।
विमुच्य सा हांरमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।
बभार बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ।। ८ ।।
यथा प्रसिद्धं मधुरैः शिरोरुहैर् जटाभिरप्येवमभूत् तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ।। ९ ।।
प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्व्वनिबद्धया तया सरागमस्या रसनागुणास्पदम् ।। १० ।।

निश्चय से रोक नहीं सकी। भला कौन उलट सकता है चाही वस्तु पर स्थिरनिश्चयी मन को और नीचे की ओर बहते पानी को। (६) पिता पार्वती के मनोरथ को जानता था। पार्वती ने अपनी आसन्न सखी के मुख से पिता हिमालय से याचना की फलोदय पर्यन्त वन में रहकर तप:समाधि करने की। (७) पिता ने विचार किया और पार्वती में पाया तो अभिनिवेश, परन्तु वे हुए उससे तुष्ट, क्योंकि वह जैसा चाहिए वैसा ही था। उन्होंने अनुज्ञा दे दी। पिता महान् जो थे। पिता की आज्ञा मिलते ही पार्वती पक्षियों से भरे उस शिखर पर पहुँची जो प्रजा में बाद में उसी के नाम से (गौरीशंकर) प्रसिद्ध हो गया। (८) वहाँ उसने निश्चय नहीं छोड़ा। छोड़ा हार, जिसकी लड़ों से स्तनचन्दन पुछ चुका था या जो स्तनचन्दन से लिप्त था। उसने बालारुण के रंग सा भूरा वल्कल बाँध लिया, जिसकी लटकती शाखाओं/लटों की सन्धि उठे पयोधरों से विशीर्ण होती जा रही थी। (९) उसने धारण कर ली जटाएँ, तब भी उसका चेहरा उतना ही मधुर लगता रहा जितना अलंकृत (प्रसिद्ध) केशों से लगता था। कमल केवल भ्रमरपंक्तियों से ही नहीं, शैवाल से घिरकर भी सुहावना लगता है। (१०) उसने व्रत के लिए धारण की तिगुनी मौञ्जी। उससे उसे प्रतिक्षण रोमाञ्च होता रहता था। पहले पहल धारण की तो उससे करधनी का स्थान लाल पड़ गया।

(७) रूपाभि=कूलाभि; तदाख्यया तस्याः गौर्या एवाख्यया नामाक्षरैर् गौरीशिखरेति रूपया। तथा च रघु. १८.४१, कुसं. ७.१६। 'किमिव हि मधुराणां मण्डनं नाकृतीनामि'ति शाकुन्तलप्रयोगाच्च। **(१०) रोम=रूप** व.।

विसृष्टरागादधरान्निवर्त्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥११॥
महार्हशय्यापरिवर्त्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥१२॥
पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥१३॥
अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्द्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥१४॥
अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ॥१५॥

(११) उसने हाथ को हटाया अधर पर राग लगाने से और स्तन के अंगराग से अरुण गेंद से। अब उसे प्रणयी बनाया अक्षसूत्र (रुद्राक्ष की माला) का। **(१२)** जो कीमती शय्या पर करवट लेते समय गिरे फूलों से भी खिन्न हो जाती थी उसी ने आरम्भ किया सोना आस्तरणरहित स्थण्डिल (चबूतरे) पर वह भी या तो बैठे बैठे या यदि लेट कर तो हाथों को ही तकिया बनाकर। **(१३)** नियम धारण करने के कारण उसने दो को दो के पास धरोहर सा बनाकर रख दिया, जिससे आवश्यकता पड़ने पर लौटाकर लिया जा सके, तन्वी लताओं के पास विलासचेष्टाओं को और हरिणियों के पास चञ्चल चितवन को। **(१४)** वह बिना नागा किए छोटे छोटे वृक्षों (पौधों), को स्वयं ही घटस्तनप्रस्रवणों से सींचकर बड़ा करती। उन पर उसका जो पुत्रवात्सल्य था उसे कार्त्तिकेय भी दूर नहीं कर सकेंगे। वे पहले जो पैदा हुए हैं। (घटस्तन–प्रस्रवण=घट, स्तनों जैसे, उनका प्रस्रवण जल तथा घटरूपस्तनों का प्रस्रवण जल। पार्वती पक्ष में घट की प्रधानता अपेक्षित है, अतः द्वितीय समास त्याज्य और प्रथम समास ही ग्राह्य।) (शृ.प्र.२४.९६) **(१५)** पार्वती ने जंगली बीजों की मुट्ठी खिला खिला कर पोषे थे जो मृग वे उससे इतने हिल गए कि वह अपनी सखियों के सामने उनके नेत्रों से अपने नेत्र नाप लिया करती थीं।

(११) विसृष्ट=निसृष्ट अ.ना., **विमृष्ट; रुणिताच्च=रागादरुणाच्च; कन्दु=कञ्चु** व.म.अ.ना.। **(१३) द्वयेऽपि=द्वयेषु** व.,**द्वयीषु** अ.ना.; **निक्षेप=निक्षेपम्; दृष्टं=दृष्टिः** अ.ना., **दृष्टिम्**। **(१४) प्रस्रवणै=प्रस्नविणी, प्रस्नविनी** अ.ना., **प्रस्रवनै** व.म.;**व्यव=रव; येषां=तेषां; माप्त=मात्त; वात्सल्य=वाल्लभ्य**। अत्र घटाः स्तना इवेत्युपमितसमास एव विवक्षितः। दुश्शकश्च सः। स्तन्यैर्घटप्रस्रवणैरिति तु युज्येत वक्तुम्। क्वचित् १४.१५ पद्ययोः क्रमे विपर्य्यासोऽपि।

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन् न धर्म्मवृद्धेषु वयः समीक्ष्यते ।।१६।।
विरोधिसत्त्वोज्झितपूर्व्वमत्सरं द्रुमैरभीष्टप्रसवार्च्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ।।१७।।
यदा फलं पूर्व्व–तपः–समाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमार्द्दवं तपो महत् सा चरितुं प्रचक्रमे ।।१८।।
क्लमं ययौ कन्दुकलीलयाऽपि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्म्मितं मृदु प्रकृत्या च ससारमेव च ।।१९।।
शुचौ चतुर्ण्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ।।२०।।

(१६) पार्वती स्नान करती, अग्नि में आहुति देती, छाल का उत्तरीय धारण करती और अध्ययन में लगी रहती। उसे देखने ऋषिजन आते। धर्मवृद्धों में वय नहीं देखा जाता। (१७) पार्वती जहाँ तपोरत थी वह तपोवन बड़ा ही पावन बन गया, क्योंकि उसमें विरोधी प्राणियों ने पुराना मत्सर छोड़ दिया, द्रुमों से अभीष्ट फल–फूल मिलने लगे जिनसे अतिथियों की सेवा संभव थी और नए नए उटज में अग्नि सुरक्षित थी। (१८) अब तक की तपःसमाधि से पार्वती को लगा कि फल मिलना संभव नहीं होगा तो उसने अपने शरीर की मृदुता की ओर न देखकर घोर तप करना आरम्भ किया। (१९) जो गेंद खेलने से भी थक जाती थी उसी ने वह सब शुरू कर दिया जो मुनिजन कर सकते थे। निश्चित ही उसका शरीर काञ्चनपद्म से बना था जो स्वभाव से मृदु भी था और सारवान् भी । (२०) ग्रीष्म ऋतु में वह आस–पास चार अँगीठियाँ धधकाती और उनके बीच बैठी शुचिस्मिता और सुमध्यमा वह सूर्य पर उसकी नेत्र–प्रतिघातनी प्रभा को जीतकर टकटकी लगाती। यह हुआ पञ्चाग्नि तप।

(१५) तथा च=तथैव; तस्यां=तस्याः व.;पुरः = पुरा। स्मरणीयमत्र शाकुन्तलस्य वैखानसेति १.२४ पद्यम्। (१६) मधीतिनीम्=निवीतिनीम्; मृषयो=मुनयो; क्ष्यते=क्षते। (१७) रभीष्ट=रपीष्ट व.; तच्च=तत्र अ.ना.। (१८) पूर्व = सर्व; तपःसमाधिना = समा समाधिना अ.ना.; समाधिसाधनम् व.म.; काङ्क्षतं = वाञ्छितं अ.ना.; लभ्य = लब्ध; नपेक्ष्य = नवेक्ष्य; सा चरितुं = साधयितुं। (१९) लीलया = सेवया अ.ना.; व्यगाह्यत = विगाह्यते ;पद्मनिर्मितं = पद्मधर्मि यत्, काञ्चनधर्मि निर्मितं ; त्या च = त्यापि; ससारमे = सुसारमे; च = तत्। (२०) हविर्भुजां शुचिस्मिता=शुचिस्मिता हविर्भुजां अ.ना.; घातिनीं = घातिनां।

तथाऽतितप्तं सवितुर्गभस्तिभिर् मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ।। २१ ।।
अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ।। २२ ।।
निकामतप्ता द्विविधेन वह्निना नभश्चरेणेन्धनसम्भृतेन च ।
तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ।। २३ ।।
स्थिताः क्षणं पक्ष्मसु ताडिताऽधरा पयोधरोत्सेधनिपातचूर्णिताः ।
बलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ।। २४ ।।
शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः ।। २५ ।।
निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः पुरोवियुक्ते मिथुने कृपावती ।। २६ ।।

(२१) सूर्य की किरणों से गहरे में तपा उसका मुख कमल सी कान्ति से युक्त हो गया। केवल उसके दीर्घ अपाङ्गों में कुछ श्यामिका आई । (२२) अयाचित उपस्थित जल और चन्द्र की रसात्मक रश्मियाँ ही थी उसकी पारणासामग्री, वृक्षों की पारणासामग्री से तनिक भी भिन्न नहीं। (२३) आकाशीय और यज्ञीय दो प्रकार की अग्नि से अत्यन्त तपी पार्वती ने ग्रीष्म के बाद की पहली वृष्टि होने पर पृथिवी के साथ छोड़ी ऊपर उठती भाप । (२४) प्रथम जलबिन्दु को नाभि तक पहुँचने में देरी लगी। पहले वे क्षणभर रुकीं बरौनियों पर, वहाँ से टपकीं अधर पर उसे पीड़ा देती हुई, फिर टपकी ऊँचे पयोधरों पर और हो गई चूर्ण विचूर्ण। आगे मिल गई त्रिवली तो एक के बाद एक बली में खिसकती रहीं। (२५) भीतर हवा लिए लगातार हो रही वृष्टियों में चमकती बिजली की दृष्टि से रात्रियाँ पार्वती को देखती रहतीं मानों वे महातप का निरीक्षण करने हेतु नियुक्त थी। पार्वती का महातप ऐसा कि (२६) वह खुले में शिला पर सोती खूब ओस लेकर बहती हवाओं वाली माघ की रात्रियों को पानी में खड़ी होकर बिताती, सामने ही वियुक्त और एक दूसरे के लिए आक्रन्दन कर रहे चक्रवाक के जोड़ों पर पिघले हृदय के साथ।

(२१) तथाऽति = तथाभि अ.ना., तथापि; कृतं पदम् = पदं कृतम् । (२२) किल = खलु अ.ना., बत; वृत्तिर्व्यः साधनः = साधनम् । (२३) द्विविधेन = विविधेन म.; च = सा । (२४) स्थिताः क्षणं = क्षणं स्थिताः; त्सेध = त्सङ्ग अ.ना.; चिरेण = क्रमेण । (२५) वात = वर्ष व.,बाष्प। (२६) सात्यन्त = सात्यर्थ व.; त्किरा = त्करा व., त्तमा; कृपावती = दयावती ।

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम् ।। २७।।
स्वयंविशीर्णद्रुमपत्रवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ।। २८।।
मृणालिकापेलवमेवमादिभिर् व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ।। २९।।
अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ।। ३०।।
तमातिथेयी बहुमानपूर्व्वया सपर्य्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वधिगौरवाः क्रियाः ।। ३१ ।।

(२७) पार्वती के मुख से निकलती पद्म की सुगन्ध तो जलाशयों में ओस से कमल गल चुके थे तब भी पार्वती के मुख से लगता कि अभी भी उनमें कमल हैं। (शृ.प्र.५.५८) **(२८)** वृक्ष से अपने आप गिरे पत्रों की पारणा तप की परा काष्ठा कही जाती हैं, किन्तु उस प्रियंवदाने उसे भी छोड़ दिया, अतः पुराविदों में उसे अपर्णा नाम से पुकारा जाने लगा। **(२९)** पार्वती अपने मृणालकोमल शरीर को विभिन्न व्रतों से सुखाती गई और उसने तपस्वियों के कठिन शरीरों से अर्जित तपों को बहुत पीछे छोड़ दिया। **(३०)** (तप निष्फल नहीं जाता। देखिए आगे क्या हुआ–) तपस्या जब इतनी ऊँचाई तक पहुँच गई तो हुआ यह कि एक जटाधारी तपस्वी अजिन धारण किए और हाथ में आषाढ दण्ड लिए पार्वती के तपोवन में आ घुसा। वह ब्रह्मतेज से जल सा रहा था और लगता था कि प्रथम आश्रम (ब्रह्मचर्य) ही शरीर धारण कर आ पहुँचा है। वह बोलने में भी बड़ा ढीठ था। (शृ.प्र.३.८७) आदि। **(३१)** पार्वती आतिथ्य में निपुण थी। उसने उस अतिथि का स्वागत किया अतीव संमान पूर्वक पूजा कर। साम्य में ही निविष्ट होता है जिनका चित्त वे भी विशिष्ट व्यक्तित्व को अधिक गौरव देते हैं।

(२७) क्षत = क्षित; सन्धान = सन्तानम् अ.ना., द्र. शृ.प्र. ५.५८ **(२८) शीर्ण = कीर्ण; र्णेति च = र्णामिति** व.। **(२९) पेलव = कोमल; स्वमङ्गं = तदङ्गं** व.अ.ना.; **ग्लप = क्षप** व.अ.ना.म.। **सा = स**। तपोवनवर्णनम्।

इतः परं नूत्नं पद्यम् –**सुरास्तदुद्वीक्ष्य नगेन्द्रकन्यया कृतं तपः शम्भुवशिक्रियाक्षमम् ।**
ययाचिरे तं प्रणिपत्य दुःखिताः पतिं पशूनां सुतमाजिहेतवे।।

तदुद्वीक्ष्य=समुदीक्ष्य; नगेन्द्र=नरेन्द्र; वशि = वश ; हेतवे=हेतुम्। (३०) तेजसा=वर्चसा अ.ना.; **बद्धः= बन्धः** अ.ना.। **(३१) पूर्व्वया=रूपया; म्येऽपि=म्येऽभि** अ.ना.; **निविष्ट=विशिष्ट ; साम्येऽपि निविष्ट=**

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय स क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ।। ३२।।
अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्त्तसे शरीरमाद्यं खलु धर्म्मसाधनम् ।। ३३।।
अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ।। ३४।।
अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापराधिषु ।
य उत्पलाक्षि! प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ।। ३५।।
यदुच्यते पार्वति! पापवृत्तये न रूपमित्यव्यभिचारि तद् वचः ।
तथाहि ते शीलमुदारदर्शने! तपस्विनामप्युपदेशतां गतम् ।। ३६।।

(३२) उस ब्रह्मचारी ने विधिपूर्वक किए उस सत्कार को स्वीकार किया और क्षणभर आराम किया। फिर लगा बोलने। रुकने का नाम ले और पार्वती को ऋजु (निर्विकार) दृष्टि से देखता ही रहे। उसने कहा– (३३) 'तपोऽनुष्ठान के लिए समिधा और कुश तुम्हें सुलभ तो हैं, जल भी स्नान के योग्य सुलभ है न? तप में भी अपनी शक्तिभर ही न प्रवृत्त होती हो? अरे शरीर ही तो धर्म का पहला साधन है। (३४) ये जो लताएँ हैं इनमें तुम्हारे दिए पानी से कोपलें आती तो जाती हैं, इनके जो प्रवाल हैं वे ही तो चिरकाल से छूटे अलते के बाद भी तुम्हारे लाल लाल ओठों से तुलना पाते हैं। (३५) ये जो हिरन हैं, जो हाथ में रखे दर्भ में प्रणयापराधी बने हुए हैं इन पर तुम्हारा मन प्रसन्न तो है? ये ही तो हैं जो नीलकमलतुल्य आँखों वाली तुम्हारे नेत्रों की समता प्राप्त करने हेतु अपनी बड़ी बड़ी आँखें चंचल किए रहते हैं। (३६) हे पार्वति! यह जो कहा जाता है कि रूप यानी सुन्दर शरीर पापवृत्ति की ओर नहीं बढ़ाता, बिलकुल ठीक है। उदाहरण तुम हो। तुम्हारा शील तो तपस्वियों के लिए भी उपदेश बन गया है।

साम्ये विनिविष्ट; अधिगौरवाः = अतिगौरवाः म.अ.ना.। **द्र. रघु. १५.३८। (३२) परिगृह्य=प्रतिगृह्य** व.अ.ना.; **ज्झितक्रमः = नुक्रमज्ञा। (३३) अपि=अयि; क्रियार्थं=क्रियार्थे; विधि=विधौः; अपि=अयि। (३४) अपि = अयि; त्वदा = त्वया; यदा = समा। (३५) अपि = अयि; दर्भ = दर्भान् ; अपराधिषु= अपहारिषु** म., **उपहारिषु** व.म.अ.ना.; **तवाक्षि = यदक्षि; य उत्पलाक्षि प्रचलैर्विलोचनैस्त= य उत्पलाक्षेपचलै/ रैर्विलोकितैस्त; सादृश्य= सापत्न्य** व.म.अ.ना.। द्र. कुसं. ७.१६।

विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ।। ३७ ।।
अनेन धर्म्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि! ।
त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ।। ३८ ।।
प्रयुक्तसत्कारविशेषमात्मना न मां परं त्वं प्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि! सङ्गतं मनीषिभिः साप्तपदीनमुच्यते ।। ३९ ।।
अतोऽत्र किञ्चिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने! न चेद् रहस्यं प्रतिवक्तुमर्हसि ।। ४० ।।
कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात् किमतः परं वद ।। ४१ ।।

(३७) यह महीधर अपने खानदान के साथ उतना पवित्र अन्तरिक्ष से गिरे गङ्गाजलों से नहीं हुआ जितना पवित्र हुआ तुम्हारे सर्वथा निर्दोष चरितों से। **(३८)** हे भाविनि! 'धर्म, अर्थ और काम' के इस त्रिवर्ग में सार माना जाता था धर्म। वह आज मुझे विशेष रूप से लग रहा है सार, क्योंकि, तुम जैसी परमसुन्दरी अपना मन अर्थ और काम से निर्विषय रखते हुए केवल एक धर्म में लगाए हुए है। ('भाविनि' संबोधन ध्यान देने का विषय है।) (शृ.प्र. २८.८०) **(३९)** तुमने मेरा विशिष्ट सत्कार किया है, अत: अब तुम मुझे गैर समझो यह ठीक नहीं। हे सन्नतगात्रि! (स्तनों के भार से सामने झुकी हुई सुन्दरि!) सत्पुरुष तो संगत (मित्रता, बन्धुता) को केवल साप्तपदीन (सात बार बातचीत से भी संपन्न) कहते हैं। (सन्नतगात्रि! संबोधन ध्यान देने योग्य है।) **(४०)** आप तो बहुत अधिक सहनशील हैं तो यह जन आपसे पूछना चाहता है, यदि गोपनीय न हो तो बतलाने की कृपा करें। बात यह है कि मैं ठहरा ब्राह्मण, इसलिए मेरा चपल होना स्वाभाविक है। **(४१)** 'आपका जन्म उस कुल में हुआ है जो विधाता ने सबसे पहले चलाया, शरीर ऐसा कि तीनों लोकों का सौन्दर्य एकत्र प्रकट सा हो गया है, ऐश्वर्य सुख को खोजना है नहीं, वय भी नई नई, इसके अतिरिक्त किस फल के लिए कर रही हो तुम तप?

(३७) विकीर्ण = विशीर्ण, प्रकीर्ण; प्रहासि = प्रभासि, प्रकाशि, प्रहारिभिः,प्रवाहिभिः। (३८) मद्य मे= मध्यमे; भाविनि = भाजिनि; भामिनि व.अ.ना., **भामिनी; देक एव = देष एकः। (३९) सत्कार = संस्कार; परं त्वं प्रति=परं सा प्रति** अ.ना.। **(४०) अतोऽत्र = अहोऽद्य; प्रतिवक्तुमर्हसि = प्रतिगोप्तुमर्हसि, प्रतिबोधयिष्यसि** अ.ना., **प्रतिपादयिष्यति, प्रतिगोपयिष्यति; मर्हसि = मिच्छसि। (४१) वोदितं = आर्जितं** अ.ना., **स्थितं, द्यतं; वद = तव।**

भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि! त्वयि ।।४२।।
अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु! कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत् पन्नगरत्नसूचये ।।४३।।
किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ।।४४।।
दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ।।४५।।
निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ।।४६।।

(४२) मनस्विनी जन कभी कभी दुःसह अनिष्ट से भी ऐसा मार्ग चुनती हैं। सो बहुत दूर तक विचार करने पर भी वैसा कुछ, हे कृशोदरि! तुम्हारे साथ दिखाई नहीं पड़ रहा। (४३) ऐसी अच्छी तुम्हारी आकृति। इसे शोक झेलना पड़ा हो यह तो सोचा भी नहीं जा सकता, तुम्हारी अवज्ञा संभव ही कैसे तुम्हारे पिता के घर में, किसी ने तुम्हें छूना चाहा हो यह भी संभव नहीं, सर्परत्न की किरण की ओर कौन फैला सकता है हाथ। (४४) अरे, ऐसा उभरा तुम्हारा यौवन, जितने भी आभरण पहनों उतने थोड़े, सो तुमने आभरण तो दिए छोड़ और धारण कर रखा है वल्कल, जो शोभा देता वृद्धावस्था में। बताओ रात्रि चमचमाते चन्द्र और तारों वाले प्रदोष में यदि अरुण बनने लगे तो कैसा लगे? (प्रभातायां तु शर्वर्याम्– रामायण सुन्दरकाण्ड) (४५) तप से यदि चाह रही हो स्वर्ग, तो परिश्रम निरर्थक है, तुम्हारे पिता के क्षेत्र ही हैं देवभूमियाँ। और चाहती हो यदि वर तो समाधि अनावश्यक। रत्न थोड़े ही खोजता है, वह तो खोजा जाता है। इस बात पर पार्वती ने साँस ली। (४६) इस उष्ण निश्वास से मन संशय में पड़ रहा है मेरा। तुम्हारे लिए कुछ भी प्रार्थयितव्य नहीं, प्रार्थित भी हो और वह दुर्लभ हो ऐसा तो संभव ही कैसे?

(४२) कृशोदरि = तनूदरि व.; तलोदरि अ.ना.। (४३) अलभ्य = अलब्ध, अनन्य; पराभिमर्शो = परावमर्शो/र्षो; सूचये = सूचिषु, सूतये अ.ना.। सुभ्रुः कुतस्तातगृहेऽवमानम् इति शार्ङ्गदत्तं पाठान्तरम्। (४४) स्फुटचन्द्रतारका म. = विनिकीर्णतारका अ.ना., विनिकीर्य तारकाः। (४५) अन्विष्यति = अन्विच्छति अ.ना.। (४६) दृश्यते = विद्यते। (४७) उपेक्षते = अपेक्षते, अपेक्ष्यते; श्लथलम्बिनीर्जटाः कपोलदेशे अ.ना.=श्लथबन्धलम्बिनीर्जटाः कपोले व., श्लथबन्धिनीरिमा जटाः कपोले; कलमाग्रपिङ्गला जटाः कपोले श्लथलम्बिनीरिमाः।

अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ।। ४७ ।।
मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकरप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ।। ४८ ।।
अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं रविमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः ।। ४९ ।।
कियच्चिरं श्राम्यसि गौरि! विद्यते ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं वरं तमिच्छामि च साधु वेदितुम् ।। ५० ।।
इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्त्तिनीं विवर्त्तितानञ्जननेत्रमैक्षत ।। ५१ ।।

(४७) ओहो! तुमने किसी युवा को तय कर लिया है और वह ऐसा नासमझ है कि तुम्हारे कपोलों पर ढीली लटकती और धान सी पीली जटाओं की उपेक्षा कर रहा है। (४८) अरे, कौन ऐसा सहृदय होगा जिसका मन यह देखकर न दुःखे कि तुम्हारे जैसी अनिन्द्य सुन्दरी मुनिव्रतों से सूख गई, विभूषणों के स्थान धूप से झुलस गए, बन गई हो दिन की चन्द्रलेखा (४९) तुम्हारा प्रिय मुझे सौभाग्यमद से वञ्चित (हानि में पड़ा) लगता है, जो तुम्हारे इस बरौनी की घनी और टेढ़ी चतुर दृष्टि वाले नेत्र का पात्र सूर्य को बनवा रहा है वह भी इतनी लम्बी अवधि तक। (५०) हे गौरि! और कब तक मेहनत में पड़ी रहोगी। मेरा भी पूर्वाश्रम का तप संचित है। उसका आधा हिस्सा तुम्हें देता हूँ, उससे तुम्हारी चाही वस्तु, जाओ, पा लो। पर यह तो बतलाओ कि वह वर है कौन?' (शिव ने शिवा को आत्मदान कर दिया।) (५१) इस प्रकार उस द्विजन्मा ने जब भीतर पैठ के साथ कहा तो पार्वती अपने मन की बात स्वयं तो कह नहीं पाई, परन्तु पास की सखी को अञ्जनरहित नेत्र घुमाकर देखा। (शृ.प्र. ५.५४)।

(४८) मात्र = मान; कराप्लुष्ट = करस्पृष्ट; लेखा = रेखाम् अ.ना.; दूयते = दीर्यते व.अ.ना., शीर्यते। (४९) लक्ष्यम् = लक्षम् व.अ.ना., पात्रम्; रवि = चिर, चर, स्थिर व.; मस्य = मात्म। (५०) गौरि = सुभ्रु; सञ्चितं = सम्भृतं; तदर्ध = ततोऽर्ध, तस्यार्ध; वरं तमि = तमर्थमि। (५१) गतं = रथं; अथो = अतः, ततः, तथा; विवर्त्ति = निवर्त्ति अ.ना., विवर्जि; शशाक शंसितुम् = न जगाद वाञ्छितम् अ.ना.।

सखी तदीया तमुवाच वर्णिनं निबोध साधो! यदि चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ।। ५२ ।।
इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ।। ५३ ।।
असह्यहुङ्कारनिवर्त्तितः पुरा पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षणोद् विशीर्णमूर्त्तेरपि पुष्पधन्वनः ।। ५४ ।।
तदाप्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसराऽलका ।
न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ।। ५५ ।।
उपात्तवर्णे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः निन्नरराजकन्यका वनान्तसङ्गीतसखीररोदयत् ।। ५६ ।।

(५२) उसकी सखी ने उस वर्णी से कहा– 'सुनिए यदि आपका जानने का कुतूहल है कि जिसके लिए इसने अपने शरीर को तप का साधन बनाया, कमलपुष्प को धूप से बचने का साधन सा। (५३) इस मानिनी ने क्या किया कि खूब सम्पत्ति वाले चारों दिग्पालों को तो दिया छोड़ और मदन के निग्रह से जो रूप के द्वारा आकृष्ट नहीं किए जा सकते उन पिनाकपाणि शिव को पति के रूप में प्राप्त करने का निश्चय ठान लिया और उसी पर अड़ी हुई है। (५४) काम का बाण चला शिव पर, परन्तु उन्होनें 'हुं' कर दिया तो वह लौट पड़ा और आकर लगा इसे, और काफी गहरे में कर गया इसे घायल। तब तक, उधर, काम का शरीर राख बन चुका था। (५५) तभी से बाला काम से विह्वल है। थी घर में पिता के ही। ललाट के चन्दन से बिखरी अलकें धूसर हो गई थीं इसकी। हिम की शिलाओं पर भी शान्ति नहीं मिल रही थी इसे, न दिन में, न रात में। (५६) वनान्त के संगीत में जब चरितगान होने लगता और उसमें नाम आता शिव का तो इसका गला रुँध जाता, स्वर गद्‌गद हो उठता। इस स्थिति को देख कितनी ही बार इस किन्नरराजकन्यका ने अपनी संगीतसखियों को रुलाया।

(५२) निबोध = विबोध; 'मिवोष्णवारणं' = मिवैतया कृतंस्तपः, साधनमुष्णवारणम्। (५३) इयं = इत्थं; नवमत्य = नवमन्य; मानिनी = भामिनी अ.ना.; निग्रहात् = विग्रहात्। (५४) पुरा = स्मरा व.; मक्ष = मक्षि व.म.अ.ना.; विशीर्ण = विनष्ट। (५५) तदा = ततः; ष्वपि = ष्वियम्। (५६) उपात्त = उदात्त; वर्णे चरिते = वर्णैश्चरितैः; कण्ठ = कण्ठैः ; ररोदयत् = व्यरोदयत्।

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ! व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ।।५७।।
यदा बुधैः सर्व्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं जनं कथम् ।
इति स्वहस्तालिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः ।।५८।।
यदा च तस्याऽधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरोरियं प्रपेदे तपसे तपोवनम् ।।५९।।
द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपः—साक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः ।।६०।।
न वेद्मि स प्रार्थितदुर्लभः कदा सखीभिरस्त्रोत्तरमीक्षितामिमाम् ।
तपः—कृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ।।६१।।

(५७) त्रियामा रात्रि का जब तीसरा याम बचता तब इसकी आँख लगती और तुरन्त जागकर शिव को उलाहना देती हुई यह कहती सुनी गई— 'शिव कहाँ जा रहे हो?' और भुजाओं को कण्ठालिंगन की मुद्रा में लिए हुए देखी जाती, जबकि वहाँ इसके सिवाय कोई और होता ही नहीं था। **(५८)** कभी एकान्त में यह चन्द्रशेखर का चित्र बनाकर कहती 'जब विद्वज्जन तुम्हें सर्वगत कहते हैं तब तुम्हें यह कैसे ज्ञात नहीं कि यह जन तुमको चाहता है?' (भाव = प्रीति)। **(५९)** उस जगत्पति की प्राप्ति का जब अन्य कोई विधान खोजने पर भी नहीं दिखा तो पिता की आज्ञा ले, हम सब सखियों के साथ, यह तप के लिए इस तपोवन में आई। **(६०)** इस तपोवन में स्वयं इसी सखी के लगाए वृक्षों में फल लगने लगे, किन्तु इसके शिव से संबन्धित मनोरथ में अङ्कुर भी आता नहीं दिखाई दे रहा। **(६१)** समझ में नहीं आ रहा है कि अवर्षण से क्षतिग्रस्त जुती भूमि पर इन्द्र के समान कब करेगा अनुग्रह वह प्रार्थित दुर्लभ, हमारी इस सखी पर। अब तो हमें इसे देखकर आँसू बहाने पड़ रहे हैं।'

(५७) शेषासु००क्षणं = शेषासु निमीलिता क्षणं निशासु;व्यबुध्यत = विबुध्यते; क्व=त्वं। (५८) = यदा = यतः, सदा अ.ना.; **इति = तया; सर्व्वा = स्वप्न; हस्तालिखितश्च = हस्तोल्लिपितश्च। (५९) च=हि** अ.ना. **,तु,पि; यदा च तस्याधि = यदेश्वरस्याधि; विचिन्वती = निचिन्वती। (६०) दृष्टमेष्वपि = बद्धमेष्वपि ; च = तु; न चापि लब्धा;। (६१) कदा = कथं; अस्रोत्तरमी = अश्राकुलमी, अस्रान्तरमी** अ.ना., **अश्रान्तनि; अभ्युप = अभ्यव** अ.ना.; **सीतां = शीताम्।**

अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२॥
अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ॥ ६३॥
यथा श्रुतं वेदविदाम्वर! त्वया जनोऽयमुच्चैः—पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ॥ ६४॥
अथाऽऽह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्त्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न तु कर्त्तुमुत्सहे ॥ ६५॥
अवस्तुनिर्बन्धपरे! कथं नु ते करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६॥
त्वमेव तावत् परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७॥

(६२) पार्वती की सखी ने जब उस नैष्ठिकसुन्दर से यह सब बिना दुराव के कह दिया, तो उसने हर्ष का कोई लक्षण व्यक्त नहीं किया और पार्वती से ही पूछा 'अयि! यह ऐसा परिहास?' । **(६३)** अब उँगलियों में स्फटिक के गुरियों की माला रखती हुई पार्वती जिस किसी प्रकार वाणी को बड़ी देर में सम्हाल कर अतिसंक्षेप में बोली। (शृ.प्र.२९.५२)। **(६४)** 'हे वेदविदांवर! तुमने जो सुना वह ठीक है। यह जन (मैं) ऊँचा पद अधिकार में लेने के लिए उत्सुक है। उसकी प्राप्ति का साधन था एकमात्र यह (क्षुद्र) तप। मनोरथ से कुछ बचता नहीं।' **(६५)** अब वह वर्णी बोला 'महेश्वर तो विदित ही हैं, तब भी तुम उनकी प्रार्थना में डूबी हो। अरे वे तो अमङ्गलमग्न हैं, अतः मैं तुम्हारा समर्थन करने का उत्साह नहीं जुटा पा रहा। **(६६)** त्याज्य वस्तु के लिए हठ कर रही तुम सोचो तो 'तुम्हारे हाथ में विवाह का कंगन बँध जाएगा तो उसे झेलेगा कौन? शिव का हाथ। और उसमें कंकण बना मिलेगा सर्प। कैसे होगा उसे यह प्रथम पाणिग्रहण सहन?' **(६७)** तुम ही स्वयं सोचो ये दो कभी मिल सकते हैं— कलहंस से चिह्नित वधूदुकूल और रक्तबिन्दु बरसाता गजचर्म।

(६२) सद्भाव = तद्भाव; दितो = दिते व.; **अयी=अपि** व.अ.ना.; **हास इ = हासमि। (६३) थाग्र=थार्द्र; समर्पयन्ती=समर्थयन्ती; मालिकां = मण्डलं** व.; **चिर=चिरं। (६४) नोत्सुकः=नोद्यतः। (६५) अथाऽऽह= तथाऽऽह; महेश्वर=ममेश्वरः; पुनरेव=पुर एव** अ.ना.; **रतिं=रतं** व.; **(६६) कथं नु ते=हि पार्वती; मामुक्त= माबद्ध** व.; **कौतुकः=कङ्कणः; करेण=भुजेन; प्रथमावलम्बनम्=प्रथमं कथं नु तत्। (६७) स्वयं=स्वतः** अ.ना.; **दुकूलं=दुगूलं** व.; **कलहंस=च सहंस** व.; **गजाजि = क्व चाजि** अ.ना.; **वर्षि च=वर्षि व,**

चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ।। ६८ ।।
अयुक्तरूपं किमतः परं वद त्रिणेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति ।। ६९ ।।
इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ।। ७० ।।
द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ।। ७१ ।।
वपुर् विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ।। ७२ ।।

(६८) तुम्हारा कोई शत्रु भी क्या अनुमोदन करेगा तुम्हारे अलक्तक लगे चरणों के चौक का फूलोंपर से हटकर एकाएक बिखरे केशों की श्मशान भूमि पर पड़ने का। (६९) इससे अनुचित क्या होगा कि शंकर का वक्षःस्थल सुलभ भी हो गया तो तुम्हारे हरिचन्दन लगे इन दोनों स्तनों पर लगा दिखाई देगा चिताभस्म। (७०) तुम्हारे सामने यह एक अन्य विडम्बना खड़ी रहेगी कि इधर तो तुम उतरोगी करेणु की पीठ पर से और उधर चढ़ोगी बूढ़े बैल पर। महाजन इस पर हँसेंगे। (७१) कपाली के लिए हठपूर्ण इच्छा से आज एक से दो हो गए शोचनीय। चन्द्र की वह कान्तिमती कला और तुम, जो इस लोक के नेत्रों की कौमुदी हो। (७२) क्या शिव में कोई एक भी गुण है जो वरों में देखे जाते हैं। शरीर में तीन—तीन नेत्र (भयावह), जन्म का पता ही नहीं और धन—दौलत की तो बानगी है दिगम्बरत्व।

वर्षि तत् अ.ना.। (६८) प्रकराव = प्रकरावि; नुमन्यते = नुमंस्यते व., नुगम्यते, गंस्यत इति तु स्यात्; रावकीर्णयोः = करप्रकीर्णयोः , करास्थिकीर्णयोः। अत्रास्थिपदमधिकम्, बिम्बपक्षे तत्प्रातिनिध यस्यानवकाशात्। परेत = परेषु, परीत। (६९) रूपं = रूपः, मेतत्; वद = भवेत्, वह, त्रिणेत्रवक्षः सुलभं तवापि यत् = त्रिनेत्रवक्षः सुलभं चेत्,त्रिनेत्ररूपं००चेत् वक्षः किमतः परं वह, सुलभं तवापि चेत्; नास्पदे = नाङ्किते। ७०) हार्यया = भार्यया। अ.ना. (७१) कपालिनः = पिनाकिनः अ.ना.म.; कलावतः = कलात्मनः अ.नां.। द्र० कुट्टनीमते १३०। (७२) मलक्ष्यजन्मता = मलक्षिता जनिः; मलक्ष्यरूपता।

निवर्त्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया ॥७३॥
इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते ॥७४॥
उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥७५॥
विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ॥७६॥
अकिञ्चनः सन् प्रभवः स संपदां, त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः ॥७७॥

(७३) तुम्हारी कामना ठीक नहीं है, हटा लो इससे अपना मन। अरे कहाँ तो वह वैसा और कहाँ तुम पुण्यलक्षणा। साधुजन यह सोच भी नहीं सकते कि यज्ञयूप की वैदिक पूजासामग्री चढ़ाई जाएगी श्मशान शूल पर।' **(७४)** उस ब्राह्मण ने ऐसा विपरीत भाषण किया तो पार्वती को कोप आ गया। उसके होंठ काँपने लगे। भौंहे सिकुड़ गईं। आँखे तिरछे घूम गईं और उनके छोर लाल हो गए। **(७५)** और उसने उससे कहा–'तुम शिव की वास्तविकता से परिचित नहीं हो, इसीलिए ऐसा सब मुझ से कह गए हो। महान् आत्मा वालों के चरित सामान्य लोगों जैसे नहीं होते और उनका कारण भी अचिन्तनीय होता है, अतः मन्द लोग उनसे द्वेष करते हैं। **(७६)** मंगल की ओर दृष्टि वह देता है जिसे अभीष्ट होता है विपत्ति का प्रतीकार या फिर वह जो उत्सुक होता है भूति के लिए। जो सारे जगत् की रक्षा करने में समर्थ है और कामनारहित सर्वथा निष्काम, उसके लिए इन सबसे क्या? ये तो उनकी वृत्तियाँ हैं जिनके चित्त (आत्मा) आशाओं की चोट से आहत होते हैं। **(७७)** शिव की वास्तविकता को जानने वाला कोई है ही नहीं। वे अकिञ्चन हैं (उनके पास कुछ भी नहीं है) तब भी वे सम्पदाओं की जन्मभूमि हैं, त्रिलोकी के स्वामी हैं, किन्तु रहते हैं श्मशान में और वे रूप में भीम हैं, परन्तु

(७३) अपेक्ष्यते००क्रिया = अपेक्षते साधुजनो न वैदिकीं००हि००क्रियाम् व., **उपेक्षते साधुजनो न वैदिकी श्मशानशूलस्य हि यूपसत्क्रियाम्, उपेक्ष(क्ष्)यते साधुजनो न वैदिकी००क्रियाम्। (७४) वेपमाना=कम्पमाना;विकुञ्चि=निकुञ्चि** अ.ना.; **लतमाहिते तया=लतयाऽऽहिते तया/कृते। (७५) महात्मानाम्=महात्मनः, पिनाकिनः। (७६) किमेभिः= किमाभिः** अ.ना.; **हता=हता; वृत्तिभिः=वृत्तेः।** आभिरित्येव पाठोऽत्र लघुतरः, तत्र बहुव्रीहिप्रसक्तेः परिहारात्, याः खल्वाशोपहतात्मनां वृत्तयस्तासु कीदृशी नु प्रवृत्तिः निराशिषः। **(७७) त्रिलोक=स लोक** व.; **याथार्थ्य=याथात्म्य** व.।

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्त्तेरवधार्यते वपुः ॥७८॥
तदङ्गसंसर्गमवाप्य कल्पते ध्रुवं चिताभस्म रजोविशुद्धये ।
तथाहि नृत्याभिनयक्रियाच्युतं विलिप्यते मौलिभिरम्बरौकसाम् ॥७९॥
असम्पदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोऽरुणाङ्गुली ॥८०॥
विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥८१॥
अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥८२॥

कहे जाते हैं शिव। (७८) शिव विश्वमूर्त्ति हैं। उनके आकार को निर्धारित नहीं किया जा सकता, न किया जाना चाहिए। भले ही वह विभूषणों से उद्भासित हो या साँप लपेटे हो, गजचर्म ओढ़े हो या दुकूल धारण किए हां, कपालधारी हो या हो चन्द्रशेखर। (७९) उनके अंग से छुआई चिताभस्म की रज विशुद्धि देती है या चिताभस्म रजोगुण से मुक्ति दिला देती है। तभी तो नृत्याभिनय प्रयोग में झड़ी वह, देवताओं के सिरों पर लगाई जाती है। (८०) शिव के पास संपत्ति नहीं और वह वृष की सवारी पर चलते हैं तब भी मदजल चुआते दिग्गजों पर चलने वाला इन्द्र उनको सिर झुकाकर प्रणाम करता और उनके पैरों की उँगलियों को खिले मन्दारपुष्पों की रज से अरुण बना देता है। (८१) तू च्युतात्मा है, किन्तु तूने शिव में दोष दिखलाते हुए भी एक बात ठीक कही कि उनके जन्म का ठिकाना नहीं, क्योंकि जिसे ब्रह्मा का भी जन्मदाता कहा जाता है उसका जन्म कैसे देखा जा सकता है। (८२) विवाद व्यर्थ है। तुमने जैसा सुना शिव वैसे ही हो सकते हैं, तथापि मेरा मन उन्हीं पर टिक चुका है और जो अपने मन से चलता है वह बदनामी की ओर नहीं देखता।

---

(७८) दुकूल=दुगूल व.; वेन्दु=चन्द्र। इन्दुशेखरपदं यौगिकमेवात्र, न रूढम्; विश्व=दिव्य। (७९) संसर्ग=संस्पर्श व.; भस्म रजो=भस्मरजो; तथाहि=तथापि; नृत्या=नृत्ता अ.ना.; लिप्यते=लुप्यते। (८०) गम्य=नम्य; णाङ्गुली=णाङ्गुलौ। (८१) विवक्षता=विवृण्वता। (८२) श्रुतः=श्रुतम्; सः=वः ; स्थितं=स्थिरम् ; मीक्षते=दर्शि/र्शनी व.।

निवार्यतामालि! किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ।। ८३।।
इतो गमिष्याम्यथवेति भाषिणी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ।। ८४।।
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ।। ८५।।
अद्यप्रभृत्यवनताङ्गि! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ।। ८६।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसम्भवे कालिदासकृतौ तपःफलोदयो नाम
पञ्चम आकाशमूर्त्ति सर्गः।। ५।।

(८३) आलि! मना करो इसे यह फिर कुछ कहना चाहता है, देखो इसके ओंठ फड़क रहे हैं। महापुरुषों के लिए जो अपभाषण करता है वही नहीं, जो सुनता है उसे भी पाप लगता है। **(८४)** अथवा मैं ही यहाँ से चली जाती हूँ ‘ऐसा कहकर वह बाला चली और उसके स्तनों से वल्कल की लटें तितर–बितर हो गई, उधर शिव ने अपने स्वरूप में आकर मुसकुराते हुए उन्हें पकड़ लिया। **(८५)** पार्वती ने शिव को देखा तो उन्हें कम्पन हो उठा और पसीना आ गया। वे आगे रखने के लिए उठाए पैर को उठाए ही रहीं। इस स्थिति में वे उस नदी सी लगीं, जो मार्ग में पड़े पर्वत में टकराकर न आगे बढ़ सकती है न रुक सकती। **(८६)** शिव ने कहा ‘आज के इस क्षण से लेकर, हे अवनताङ्गि! मैं तेरा दास हूँ तपों से खरीद लिया गया’ – यह सुन पार्वती की तप से उत्पन्न सारी थकावट छूट गई। फल मिलते ही क्लेश पुनर्नवता ला देता है। (शृ.प्र.२०.३९ आदि।)

इस प्रकार कालिदास की कृति ‘कुमारसंभव’ नामक अष्टमूर्त्ति महाकाव्य में
पार्वतीतपःफलोदय नामक पञ्चम सर्ग (आकाशमूर्त्ति) पूर्ण हुआ।। ५।।

२१.३.०७ बुधवार रात ११.०० २०६४ वि.स. व्यतीत चैत्रशुक्ल प्रतिपद्, सोमवार

(८३) प्ययं = प्यसौ अ.ना.; **महतोऽपभाषते = महतो/तां व/विभाषते** व.म. **(८४) बाला स्तन = गौरी रय, सा च स्तन** व.अ.ना., **साग्रस्तन; कृतस्मितः = शुचिस्मितः। (८५) यष्टिः = सन्धिः** व.; **निक्षेपणाय = निक्षेप एव** व.अ.ना.; **मुद्वहन्ती = मर्पयन्ती । (८६) त्यवनताङ्गि = त्यनवमाङ्गि** इति भोजः ; **क्रीत = प्रीतः; क्लम = श्रम; विधत्ते = पिधत्ते।**

।। षष्ठः सर्गः ।।

ॐ अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ।। १ ।।
तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभाष्ये मधौ परभृतामुखी ।। २ ।।
स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान् सप्त सस्मार स्मरशासनः ।। ३ ।।
ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासंस्तपोधनाः ।। ४ ।।
आप्लुतास्तीर–मन्दारकुसुमोत्किर–वीचिषु ।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु ।। ५ ।।

(१) (इसके बाद क्या हुआ? -वह नहीं हुआ- जो शाकुन्तल में हुआ) पार्वती ने एकान्त में सखी से सन्देश भेजा विश्वात्मा शिव के पास और कहलाया मेरे दाता गिरिराज से अनुमति ले लीजिए (शृ.प्र. १५.१५५) आदि। (२) दूती से संदेश कहलाती और स्वयं चुप पार्वती की स्थिति आम ही उस टहनी सी थी जो मधुमास से कुछ कहती है कोयल के मुख से। (द्र.रघुवंश ७.६९)। (३) स्मरशासक शिवजी ने कहा ठीक है और उमा को किसीं प्रकार छोड़ कर सात ज्योतिर्मय ऋषियों का स्मरण किया। (स्मरशासक ने स्मर की ओर डग भरा।) (४) वे सातों तपोधन प्रभामण्डलों से आकाश को द्योतित करते हुए तत्काल प्रभु शिव के समक्ष प्रकट हो गए। साथ में अरुन्धती भी थीं। (५) वे आए स्नान करके। स्नान किए हुए थे आकाशगङ्गा के स्रोतों में जो दिग्गजों के मद से वासित थे और जिनकी तरङ्गो में तट के मन्दार के पुष्पों का समूह उतरा रहा था, अतः, और अधिक सुवासित थे।

(१) अथ=ॐ अथ।। १।। श्री।। ऐं नमः।। अथ।।; दाता=पिता। (२) वाभाष्ये=वाभ्याशे/से व.म.अ.ना.; भृतामु=भृतोन्मु अ.ना.म., भृतासखी व.। (३) र्मयान्=र्गणान्, गृहान् व.; षीञ्ज्योतिर्मयान्=ज्योतिर्मयानृषीन्। (४)तपोधनाः=पुरागताः, प्रभोः पुरः। (५) मोत्किर=मोत्क, मोत्तर व.अ.ना.; गन्धिषु=वाहिषु।

मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाऽऽश्रिताः ।। ६।।
अधः प्रवर्त्तिताश्वेन समावर्जितकेतुना ।
सहस्ररश्मिना शश्वत् सप्रणाममुदीक्षिताः ।। ७।।
आसक्तबाहुलतया स्नार्धमुद्धृतया भुवा ।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ।। ८।।
सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्त्तिताः ।। ९।।
प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जाना फलान्यपि तपस्विनः ।।१०।।
तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ।।११।।

(६) उन्होंने धारण किए थे मुक्ताधवल यज्ञोपवीत और सुनहले वल्कल। रत्नों की जपमाला थी उनके साथ। लगता था वे परिव्राजक कल्पवृक्ष थे। (७) उन्हें स्वयं भगवान् सूर्य प्रणाम कर रहे थे। उनके रथ के घोड़े इन महर्षियों के नीचे से चल रहे थे और उसका ध्वज झुका हुआ था। सूर्य भगवान् मुख ऊपर की ओर उठाए हुए थे। (८) ये वे महर्षि हैं जो प्रलय की आपदा में विश्राम किया करते हैं भगवान् महावराह की दंष्ट्रा पर, जिस पर समुद्र तल से उबारी गई पृथिवी देवी अपनी बाहुलता का आसङ्ग दिए रहती हैं। (उसी के साथ। स्मरणीय है ध्यान— जलौघमग्ना सचराचरा धरा विषाणकोट्याऽखिलविश्वमूर्त्तिना।
समुद्धृता येन वराहमूर्त्तिना स मे स्वयम्भूर्भगवान् प्रसीदतात्।।)

(९) ये ही वे महर्षि हैं जो ब्रह्मदेव के बाद की सृष्टि का निर्माण करते हैं और पुराविद् जिन्हें पुरातन प्रजापति कहते हैं । (१०) तपस्वी होते हुए भी ये प्राक्तन विशुद्ध (फलासक्ति दोष से अदूषित) तपों का फल भोग रहे हैं। (गीता के 'मा फलेषु कदाचन' की व्याख्याकर्म के फल तो मिलते ही हैं, वे फल क़र्म के होते हैं कर्त्ता की आसक्ति के नहीं, न स्वयं कर्त्ता होता उनका जनयिता।)। (११) उन महर्षियों के बीच साध्वी अरुन्धती ऐसी लग रही थीं जैसे तपःसिद्धि ही दृष्टिगोचर हो गई हो, वे बहुत अधिक प्रदीप्ति और शोभा से युक्त थीं। उनकी दृष्टि थी

(६) बिभ्रतो=बिभ्राणाः; हैम=हेम;वल्कलाः=बन्धनाः;सूत्राः=युक्ताः; वाऽऽश्रिताः=व ऽऽश्रिताः। (७) धः प्रवर्त्तिता= धः प्रस्थापिता व.अ.ना.; **शश्वत्=साक्षात्** म.। **(८) सार्ध=सम; धृतया=धतया। (९) पुरातनाः = पुरन्तनाः ; इति=इव। (१०) मुपभु=परिभु;** (१०)–(११)कुलकम्, आदिकुलकम्।

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ।।१२।।
तद्दर्शनादभूच्छम्भोर् भूयान् दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलसाधनम् ।।१३।।
धर्मेणपि पदं शर्व्वे कारिते पार्व्वतीं प्रति ।
पूर्व्वापराधभीतस्य कामस्योच्छ्वसितं मनः ।।१४।।
अथ ते मुनयः सर्व्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ।।१५।।
यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ।।१६।।
यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याऽप्यपथं मनोविषयमात्मनः ।।१७।।

पति(वसिष्ठ) के पैरों पर। (१२) भगवान् ने उसी गौरव से माता अरुन्धती को देखा जिससे मुनियों को, भेद नहीं रखा। सत्पुरुष यह नहीं देखते कि कोई स्त्री है और कोई पुरुष। वे तो आदर देते हैं चरित्र को। (१३) अरुन्धती को देखा तो भगवान् शिव का भी दारपरिग्रह के प्रति आदर बढ़ा। धार्मिक अनुष्ठानों में सत्पत्नियाँ ही बनती है मूल साधन। (१४) आज शिव के मन में पार्वती को धर्म से भी स्थान मिल गया तो पूर्व अपराध से डरे काम का मन आश्वस्त हुआ (१५) इसके बाद उन महर्षियों ने भगवान् शिव की पूजा की और वेदों को कण्ठस्थित किए हुए वे प्रेम से रोमाञ्चित हो (भक्तिपूर्वक) यह बोले– (१६–१७) 'हे भगवन्! हमने जो ठीक से वेद पढ़ा, अग्नि में जो विधिपूर्वक आहुति दी और जो तप किया उसका फल आज परिपक्व हो गया; जो संसार भर के साक्षी आपके द्वारा हमारा स्मरण किया गया, जिसकी कल्पना भी असंभव है।

(१२) पश्यदी=र्चयदी; स्थैषा= स्थेयं; महितं=महताम्। (१३)भूयान्=भूयः;दारार्थमादरः=दारक्रियादरः अ.ना.;सत्पत्न्यो=दाम्पत्यम् व.म.अ.ना.; साधनम्=कारणम् म.। (१५) मुनयः=प्रथमे,ऋषयः; सर्व्वे=दिव्याः; पूजयित्वा=मानयित्वा अ.ना., प्रणिपत्य; जगद्गुरुम्=जगत्पतिम्; इदमू=इत्थमू; प्रीति=प्रीत्या; तत्वचः=कितं वचः। (१६) विधिना=विधिवद्; यच्च=यत्तु। युग्मम्। (१७) रथस्याऽप्यपथं/दं=रथस्याविषयं म.। युग्मम्।

यस्य चेतसि वर्त्तेथाः स तावत् कृतिनां वरः ।
किं पुनर् ब्रह्म/विश्व—योनेर्यस्तव चेतसि वर्त्तते ।।१८।।
सत्यमर्क्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं तस्मात् स्मरणानुग्रहात् तव ।।१९।।
त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ।।२०।।
या नः प्रीतिर्विरूपाक्ष! त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ।।२१।।
साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा ।
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे ।।२२।।
किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।
अथ यस्तस्य संहर्त्ता भागः कतम एष ते ।।२३।।

(१८) भगवन्! आप जिसके चित्त में रहें वह भी धन्यधन्य होता है, फिर उसका तो कहना ही क्या जो ब्रह्मा को जन्म देने वाले आपके मन में आए। (कहीं, ब्रह्मा के पुत्र रुद्र और कहीं रुद्र के पुत्र ब्रह्मा स्वयं कालिदास में ही।) **(१९)** सत्य है कि हमारा पद सूर्य से भी ऊपर है और चन्द्र से भी, किन्तु आज तो और अधिक ऊपर उठ गया, क्योंकि आपका स्मरणानुग्रह प्राप्त हो गया हमें। **(२०)** अपने आपको हम आज मान रहे हैं बड़भागी। प्रायः अपने गुणों पर विश्वास तब होता है जब उत्तम लोग आदर करते हैं। **(२१)** आपने जो हमारा ध्यान किया, इससे हमारे भीतर जो परितृप्ति हो रही है, वह कैसे बतलाई जाए। आप तो सभी देहियों की अन्तरात्मा हैं। **(२२)** आपका हो तो रहा है हमें साक्षात्कार, परन्तु हम आपको ठीक से समझ नहीं पा रहे हैं। कृपा कीजिए और आप ही बतलाइए। बुद्धि के पथ में आप आ नहीं रहे हैं । **(२३)** क्या आपका यह स्वरूप वह है जिससे आप सृष्टि करते हैं, या वह जिससे इसका भरण करते हैं अथवा वह जिसमें यह सब वापस इकट्ठा हो जाता है। (सांख्यशास्त्र में अव्यक्त वह जो छिपा ले।)।

(१८) किं पुन=किमुत, किमत्र। (१९) सत्यम्=नित्यम् अ.ना.;**परम=पदम;पदम्=वयम्; तरं=तरां; तस्मात्=तत्रः, ताभ्यां। (२०) धत्ते=दत्ते। (२१) विरूपाक्ष=विशालाक्ष; त्वदनुध्यान=तव निध्यान** अ.ना.; **किमावेद्यते=किमाख्यायते; सि=हि। (२२) दृष्टो=द्रष्टा; सि न पुनर्विद्मस्त्वां=सि नो विद्मः पुनस्त्वां; वयमञ्जसा=अञ्जसा वयम्; कथ = दर्श। (२३) तत् = तम्; अथ=अथो** अ.ना.; **यस्तस्य=विश्वस्य** म.।

अथवा सुमहत्येषा प्रार्थना देव! तिष्ठतु ।
चिन्तितोपस्थिताँस्तावच्छाधि नः करवाम किम् ।। २४।।
अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः ।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः ।। २५।।
विदितं वो यथा काश्चिन्न मे स्वार्थाः प्रवृत्तयः ।
ननु मूर्त्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः ।। २६।।
सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः ।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ।। २७।।
अत आहर्त्तुमिच्छामि पार्व्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ।। २८।।
तामस्मदर्थे युष्माभिः प्रार्थितव्यो हिमालयः ।
विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः ।। २९।।
उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसबन्धं वित्त मामप्यवञ्चितम् ।। ३०।।

(२४) अथवा रहे यह लम्बी चौड़ी प्रार्थना, कृपया, आप तो आज्ञा दीजिए कि हमें क्या सेवा करनी है। हम आपके याद करने पर उपस्थित हैं। (२५) अब परमेश्वर ने उत्तर में कहा। उनके दाँतों की प्रभा से चन्द्र की प्रभा बढ़ी हुई दिखाई दे रही थी। (२६) 'यह तो विदित ही है कि मेरी कोई प्रवृत्ति मेरे अपने लिए नहीं होती। कहना अनावश्यक है कि मेरी आठों मूर्त्तियाँ ऐसी ही हैं। (२७) परन्तु प्यासे चातक जैसे मेघ से याचना करते हैं वेसै ही मुझसे शत्रुओं से कष्ट में पड़े देवताओं ने प्रसूति के लिए याचना की है। (२८) अतः मैं पुत्र के रूप में जन्म लेने के लिए चाहता हूँ पार्वती को पाना, जैसे यजमान अग्नि उत्पन्न करने हेतु चाहता है अरणि। (२९) आप सब उसे हिमाचल से माँगे, हमारे लिए। सत्पुरुषों द्वारा कराए गए सम्बन्धों में विकार नहीं आते। (३०) हिमाचल उन्नत है, स्थिति (मर्यादा) से युक्त है और पूरी पृथिवी का बोझ धारण किए हुए है। उससे सम्बन्ध होने में मेरी भी कोई हानि नहीं है।

(२४) तोपस्थिताँ=तोपगताँ व.; वाम=वाणि। (२५) उपचिन्वन्=विस्तारयन्। (२६) स्वार्थाः=स्वार्थ। अष्टाभिः पञ्चमहाभूतानि सूर्याचन्द्रमसौ यजमानश्चेत्यभिज्ञानशाकुन्तलाद्युक्ताभिः। सूचितः=चोदितः। (२८) अत आहर्तु = अहं ग्रहीतु ; आत्म = पुत्र; जन्मने = जन्मनि। (२९) मस्मदर्थे/दर्थ युष्माभिः=मस्मभ्यं सपर्णाभिः ;लयः=चलः ; संबन्धाः = संबाधः।

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते ।
भवत्प्रणीतमाचारमामनन्ति हि साधवः ।। ३१ ।।
आर्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति ।
प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता ।। ३२ ।।
तत् प्रयातौषधीप्रस्थं सिद्धये हिमवत्पुरम् ।
महकोशीप्रपातेऽस्मिन् सङ्गमः पुनरेव नः ।। ३३ ।।
तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ।। ३४ ।।
ततः परममोमुक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमास्पदम् ।। ३५ ।।
ते चाकाशमसिश्याममुत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा समरंहसः ।। ३६ ।।

(३१) कन्या माँगने के लिए उससे 'ऐसा कहना चाहिए' यह आपको नहीं बतलाना है। साधुजन जो आचार अपनाए हुए हैं वह आपके द्वारा ही तो प्रणीत है। (३२) आर्या अरुन्धती भी इस कार्य में सक्रिय हों। प्रायः ऐसे कार्यों में पुरन्ध्रियाँ ही होती हैं प्रगल्भ। (३३) तो आप सब हिमालय के नगर ओषधिप्रस्थ पहुँचें और सफल हों। महाकोशी के इस प्रपातस्थल में हम पुनः मिलेंगे।' (३४) संयमियों में प्रथम शिव जब विवाहोन्मुख दिखाई दिए तो गृहस्थाश्रम की लाज इन प्रजापति के पुत्र सप्तर्षियों ने भी छोड़ दी। (३५) इसके पश्चात् 'ठीक है' कहकर मुनिमण्डल चल पड़ा। भगवान् भी पूर्वोद्दिष्ट स्थान पर जा पहुँचे। (३६) सप्तर्षि असिश्याम आकाश में उड़े और मन जैसे वेग से जा पहुँचे ओषधिप्रस्थ।

(३१) हि साधवः एवं=इत्थं; मनन्ति हि=मनन्तीह, चरन्ति हि मनीषिणः। (३२) प्यरुन्धती=चारुन्धती; व्यापारं=साहाय्यं· अ.ना., व्याहारं। (३३) महाकोशी=महाकाशी, महाकाली, महाकोशे व., महाकौशी अ.ना., कौशिकीसं; रेव=रस्तु अ.ना.नः = वः। (३४) योन्मुखे=योत्सुके व.; जहुः जह्रु; तपस्विनः=तपोधनाः। स्मरणीयमत्र मालविकाग्निमित्रस्य 'कान्तासम्मिश्र देहोऽप्यविषयमनसां यः पुरस्ताद् यतीनामि' ति नान्दीपदम्। (३५) परममोमुक्त्वा = परममित्युक्त्वा, प्रमाणमित्युक्त्वा, प्रयाम इत्युक्त्वा, मण्डलम् = मण्डली; संप्राप्तः=संक्रान्तः अ.ना.; मास्पदम् = माश्रमम्। अत्र 'परमम् ओम्' इति स्वीकारोक्तिद्वयम्, विचिकित्सालेशस्याप्यनवकाशं द्योतयितुम्। (३६) ते चा=तेऽप्या, तेऽथा, त आ मुत्पत्य व.अ.ना.=मुत्प्लुत्य, मुपेत्य; परमर्षयः = मुनिपुंगवाः व(पा).; आसेदु=आजग्मु; समरंहसः=तुल्यरंहसः, सह मानसाः व., समरंहसा।

अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ।। ३७।।
गङ्गास्रोतः—परिक्षिप्त—वप्राऽन्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ।। ३८।।
जितसिंहभया नागा यत्राश्वा बिलयोनयः ।
यक्षाः किम्पुरुषाः पौरा योषितो वनदेवताः ।। ३९।।
शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर् मुरजस्वनाः ।। ४०।।
यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृह—यन्त्रपताका—श्रीरपौरादरनिर्मिता ।। ४१।।

(३७) अलका की अतिरिक्त सम्पत्ति लाकर ओषधिप्रस्थ को बनाया और इसमें निवासी जनता को स्वर्ग से लाकर, ऐसा लगता था। (३८) गङ्गा के प्रवाह से चारों ओर से घिरा हुआ था वह नगर। उसके परकोटे से लगे भवनों के भीतर दिव्य औषधि प्रज्वलित थी। परकोटा भी बना था बड़ी बड़ी मणियों की शिलाओं से। इस प्रकार नगर का बाह्य परिवेष भी मनोहर था। (३९) जहाँ के हाथी सिंहों से डरते नहीं थे। अश्व बिलयोनि (एक विशेष जाति) के थे। यक्ष और किंपुरुष थे निवासी और वनदेवियाँ थी महिलाएँ । (४०) जहाँ मृदङ्ग की ध्वनि मेघों की ध्वनि में मिल जाती है। अलग समझ पड़ती थी करणों से। (करण = वाद्यताडनविच्छेद, अरुणगिरिनाथ।) (४१) पूरा नगर झण्डियों से सजा हुआ, किन्तु ये झण्डियाँ नगरवासियों के द्वारा नहीं लगाई गई थीं। ये सब कल्पद्रुमों के कम्पित ध्वजपट की थीं । (गृहयन्त्रपताका=पताका लगाने के लिए बने यन्त्र—अरुण)

(३७) वसु=बन्धु; वाह्येव=वाह्यैव; कृत्वेवोप =-त्वेव विनि व.। **(३८)प्तवप्रा=प्तं वप्रा** व.म.अ.ना., **परिक्षेपो वप्र एवोचितान्वयः; न्तर्ज्व=न्तज्व**अ.ना.। **(३९) जित=वीत** अ.ना., **गत; यत्राश्व=अश्वक्ष; यक्षा:किं=यक्षकिं। (४०) सक्त=लग्न; व्यज्य=वीज्य; वेश्मनाम्=वेश्मसु** अ.ना.; **अनु=मन्द्र; करणै=करुणै; मुरज=मरुज; स्वनाः=स्वनैः। (४१) विलोल=चञ्चलः; यन्त्र=च्छत्र; पताकाश्रीर= पताकश्रीर, श्रीः पौरैरादर।**

127.50

यत्र स्फटिक–हर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ।। ४२।।
यत्रौषपधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ।। ४३।।
यौवनान्तं वयो यस्मिन्नातङ्कः कुसुमायुधः ।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ।। ४४।।
भ्रूभेदिभिः सकम्पोष्ठैर् ललिताङ्गुलितर्जनैः ।
यत्र क्रोधैः कृताः स्त्रीणामप्रसादार्थिनः प्रियाः ।। ४५।।
सन्तानकतरुच्छायसुप्तविद्याधराध्वगाः ।
यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः ।। ४६।।

(४२) जिसके हर्म्य बने हुए थे स्फटिक के। उन पर जब रात में पान–भूमि बनाई जातीं थी तो उनमें उपहार (हार की लड़ियों) का काम हो जाता था आकाश के प्रतिबिम्बित तारों से। (४३) जहाँ की अभिसारिकाओं को वर्षा की रातों में भी मार्ग दिखता रहता था ज़लती दिव्य औषधियों के प्रकाश से, अतः वे अन्धकार से अनभिज्ञ ही बनी रहती थी। (कृष्णपक्ष में भी।) (४४) जहाँ वय का अन्तिम छोर यौवन हुआ करता था, आतङ्क बनता था काम और रतिखेद से उत्पन्न निद्रा ही हुआ करती थी मूर्च्छा। (४५) जहाँ प्रियों को बने रहना पड़ता था याचक तब तक जब तक प्रियाएँ कोप न छोड़ दे। भ्रूभेद, ओष्ठकम्पन और ललित उँगलियों से ललित तर्जन रहते उनके कोप में। ('अप्रसादार्थिनः' पाठ में 'भ्रूभेद आदि ही इतने प्रिय लगते कि प्रियजन उन्हीं में रमे रहते और चाहते कि प्रिया कोप ही किए रहे तो अच्छा।) (४६) ओषधिप्रस्थ का बाहरी उद्यान था सुगन्ध से भरा 'गन्धमादन', उसमें लगे थे 'संतानक' नामक देववृक्ष। उनकी छाया में सो रहे थे विद्याधर पथिक।

(४२) हर्म्येषु=हर्म्याणां; आपान=सोपान ना.; उपहारताम्= उपकारताम् व.। उपहारा अत्र हारच्छेदाः, आपानभूमिषु तेषामेव वर्णना। (४३) धिप्र=धीप्र; नेष्वभि= नेऽप्यभि व.ना.। (४४) यस्मिन्: = यस्मात्: न्नातङ्कः = न्नान्तकः म., न्नानङ्गः; युधः=युधात् म.; रतिखेदसमुत्पन्ना=रतिः खेद/स्वेदसमुत्थानं, रतिखेदसमुत्थाना; निद्रा =सुप्तिः। (४५) सकम्पौ=प्रकम्पौ, विंकम्पौ; भ्रूभङ्गिभिः =भेदिभिः ; क्रोधैः कृताः = कोपकृताः; मप्रसा=माप्रसा व.अ.ना.। यद्धि प्रसादेन करिष्यते तत् क्रोधेनैव सम्पद्यत इति प्रसादप्रार्थने कैमर्थक्यम्। द्र.शृङ्गारप्रकाशे ३०.४३ (४६) कुलकम् । यस्य चोपवनं बाह्यं=बाह्यं चोपवनं यस्य; सुगन्धिः=गन्धवद् व., सुगन्धं; गन्धिमद्; मादनः=मादनम् व., शैलवाचित्वात् पुंस्त्वमेवात्र युक्तम्।

अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसन्धिसुकृतं वञ्चनामिव मेनिरे ।। ४७ ।।
ते सद्मनि गिरेर्वेगादुन्मुख—द्वाःस्थ—वीक्षिताः ।
अवतेरुर्जटाभारैर् लिखिताऽनलनिश्चलैः ।। ४८ ।।
गगनादवतीर्ण्णा सा यथावृद्धपुरस्सरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ।। ४९ ।।
तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः ।
नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम् ।। ५० ।।
धातुताम्राऽधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ।। ५१ ।।
विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः ।। ५२ ।।

(४७) उन मुनियों ने जब हिमालय का ओषधिप्रस्थ नामक नगर देखा तो उन्हें लगा कि स्वर्ग की इच्छा करना वञ्चना है। (४८) वे सबके सब हिमालय के ही भवन पर वेग से उतरे। द्वारपाल ऊँचा मुख करके उन्हें देख रहे थे। उतरते समय उनकी जटाएँ लिखित अग्नि सी निश्चल थीं। (४९) मुनियों में आगे थे वयोवृद्ध मुनि। वे उसी क्रम से आकाश से उतरे तो लगे जैसे पानी पर पड़े सूर्य के प्रतिबिम्ब हों। (५०) हिमालय उन पूज्य मुनिजनों की अगवानी में अर्घ्य लेकर दूर से ही दौड़ा, दृढ़ और वजनी पैरों से भूमण्डल को झुकाते हुए। (५१)धातुताम्राधर, प्रांशु, देवदारुबृहद्भुज और स्वभावतः ही शिलोरस्क होने के कारण स्पष्ट रूप से जो हिमवान् लग ही रहा था। (५२) उसने उन शुद्धकर्मा महर्षियों का यथाविधि सत्कार किया और स्वयं मार्ग दिखलाते हुए अपने अन्तःपुर में ले जाकर बिठाया।

(४७) अथ ते=ततस्ते, तं कान्तं व.अ.ना.म.; मुनयः=ऋषयः;दिव्याः=सर्व्वे; सन्धि=सन्धिं, ष्यन्दसु; सुकृतं=सुकृतां अ.ना.; मिव=मेव। (४८) गिरेः=गुरोः; तेरुः=पेतुः व.अ.ना.; निश्चलैः=निश्चलाः, सन्निभैः। (४९) युगलकम् । (५०) अर्घ्यमा = अर्घमा; दूरात् = दूरम् व.; गिरिः=नगः। (५१) सुव्यक्तो = सुव्यञ्जो व.; निति=निव, गिरिः। (५१) = (५१) युग्मम्। (५२) कारैः=कारान्, संस्कारैः ; स्य दर्शकः = स्य देशिकः, स्य देशिक, प्रदर्शकः; स तैराक्रमया = स तैराक्रामया म.अ.ना., स तदाक्रमया, स तानाक्रमया; कर्म्मभि = वर्त्मभिः।

तत्र वेत्रासनासीनान् कृताऽऽसनपरिग्रहः ।
इत्युवाचेश्वरान् वाचं प्राञ्जलिः पृथिवीधरः ।।५३।।
अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ।।५४।।
मूढं बुधमिवात्मानं हैमीभूतमिवायसम् ।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ।।५५।।
अद्यप्रभृति भूतानामधिगम्योऽस्मि शुद्धये ।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ।।५६।।
अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः! ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ।।५७।।
जङ्गमं प्रेष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ।।५८।।

(५३) मुनिजन वेत्र की आसन पर बैठ गए तो बाद में स्वयं आसन पर बैठा और उन समर्थ महामुनियों से हाथ जोड़कर यह बोला। **(५४)** 'आप सबके एकाएक दर्शन बिना मेघ की वर्षा है और बिना पुष्प का फल। **(५५)** आपके अनुग्रह से लग रहा है कि मैं मूढ से बुध बन गया, लोहे से हेम बन गया और भूमि से स्वर्ग पहुँच गया। (हेम सर्वोत्कृष्ट सुवर्ण।) **(५६)** आज से हूँ तीर्थ, अब आएँ मेरे पास संसार के सभी लोग शुद्धि लाभ के लिए। (तीर्थ वह जहाँ बड़े लोग रहें।) **(५७)** मैं तो दो से ही स्वयं को पवित्र मान रहा हूँ एक तो सिर पर हो रहे गंगाप्रपात से और दूसरे आपके इस चरणोदक से। **(५८)** मेरे दोनों प्रकार के शरीर को आपने अनुगृहीत कर दिया है– जङ्गम को अपना दास मानकर और स्थावर को अपने चरण रखकर।

(५३) कृताऽऽसन = अनासन ना., **नीचासन; इत्युवा = प्रत्युवा; चेश्वरान् = च मुनीन्, ऋषीन्; वाचं=वाचः** व.,**सर्व्वान्, सम्यक्; पृथिवीधरः=जगतीश्वरः, भूधरेश्वरः** म., **धरणीधरः** अ.ना.। **(५५) मूढं = मूर्खं** व.; **बुध = बुद्ध** व.म.अ.ना.; **हैमीभूत = हेमीभूत, हैमीकृत** अ.ना.; **ग्रहात् = ग्रहम्। (५६) भूतानाम् = मर्त्यानाम्** अ.ना.; **अधि = अभि** व.अ.ना.; **शुद्धये = सिद्धये। (५७) पातेन = वाहेन; धौत = धृत। (५८) प्रेष्य = प्रैष्य** म., **प्रेक्ष्य; भावे वः = भावेन, पक्षे वः; णाङ्कितम् = णाङ्कितैः; मन्ये = तद्धि** व.; **द्विरूप = द्वैरूप्य** व.अ.ना., **विरूप** म.; **वपुः = कृतम्** व.। ग्रहं तद्धि द्वैरूप्यमपि मे कृतम्, ग्रहं मन्ये द्वैरूप्यं तेन मे कृतम् अ.ना.।

भवत्संभावनोत्थाय परितोषाय मूर्च्छते ।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥ ५९॥
न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥ ६०॥
कर्त्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते ।
शङ्के मत्पावनायैव प्रस्थानं भवतामिह ॥ ६१॥
तथापि तावत् कस्मिंश्चिदाज्ञां मे दातुमर्हथ ।
विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु ॥ ६२॥
एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥ ६३॥
इत्यूचिवाँस्तमेवार्थं दरीमुख–विसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥ ६४॥

(५९) आपने जो मेरा मान बढ़ाया है उससे मुझे जो परितोष मिल रहा है वह दिगन्तों को भी आच्छादित कर लेने वाले मेरे शरीर में अँट नहीं रहा। (६०) आपके जो उज्ज्वल दर्शन हैं इनसे मेरी गुफाओं का ही अन्धकार नहीं हटा है मेरे अन्तर्मन का भी तम मिट गया है। (६१) आप किसी प्रयोजन से आए होंगे ऐसा मुझे नहीं लगता, यदि होता भी कोई प्रयोजन तो वह पूर्ण हुए बिना कैसे रहता। निश्चित ही मुझे पवित्र करने के लिए ही आपने किया है यह कष्ट। (६२) तब भी किसी भी विषय में मुझे आज्ञा देने का अनुग्रह करे, किङ्कर स्वामी की आज्ञा को स्वामी का प्रसाद मानते हैं। (६३) यह मैं, ये मेरी धर्मपत्नी और यह हमारे कुल की प्राण कन्या। इनमें से जिससे आपको कार्य हो। और वस्तुओं की तो कोई बात ही नहीं। (६४) हिमालय ने जो यह कहा इसी की गुहाद्वार से हुई प्रतिध्वनि के रूप में मानों दूसरी बार कह दिया।

(५९) अपि=अधि, अभि, अति; मे=हि। (६०) दरीसंस्थं=शरीरस्थं; भास्वतां=भास्वता व.; मपास्तं मे=मपि ध्वस्तं। (६१) किं नोपपद्यते= किमुपदिश्यते, पद्यते=दिश्यते; शङ्के=मन्ये म.; मन्ये मत्पावनार्थाय; मिह=मिदम् व., हि मे। (६२) मर्हसि=मर्हतः। (६३) जीवितम्=भूषणम्,भूषणा; येनात्र वः = येनार्थिनो यूयम्; कार्यम् = कृत्यम् व. ; बाह्यव='वा ह्यव'इति तु शृङ्गारप्रकाशे५.१०९। 'अहं मेना पार्वती चे'ति त्रयमेवात्र वस्तु, अवस्त्वेवान्यत् सर्व्वं यदेतत्त्रितयभिन्नमिति पाठान्तरमेवात्र महिमानं बिभर्त्ति। (६४) त्यूचिवाँस्त=त्युदीरितं; दरी=गुहा म.; द्विरिव=द्विरेव; लयः=चलः।

अथाऽऽङ्गिरस–मग्रण्य–मुदाहरण–वस्तुषु ।
ऋषयश्चोदयामासुः प्रत्युवाच स भूधरम् ।। ६५।।
उपपन्नमिदं सर्व्वमतः परमपि त्वयि ।
मनसः शिखराणां च सदृशी ते समुन्नतिः ।। ६६।।
स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते ।
चराचराणां भूतानां कुक्षिराधारतां गतः ।। ६७।।
गामधास्यत् कथं नागो मृणालमृदुभिः फणैः ।
आ रसातलमूलात् त्वमवालम्बिष्यथा न चेत् ।। ६८।।
अच्छिन्नाऽमलसन्तानाः समुद्रोर्म्यनिवारिताः ।
पुनन्ति लोकान् पुण्यत्वात् कीर्त्तयः सरितश्च ते ।। ६९।।

(६५) अब ऋषियों ने आङ्गिरस (बृहस्पति) को प्रेरित किया। वे वाक्कला में अग्रणी थे। उन्होंने हिमालय से कहना आरम्भ किया। **(६६)** तुमने यह जो कहा यह सब यथार्थ है। इससे अधिक भी जो कहना चाहते वह भी यथार्थ ही होता। उन्नति जितनी तुम्हारे शिखरों में है उतनी ही मन में भी। **(६७)** तुम्हें (जो भगवान् श्रीकृष्ण ने गीता १०.२५ में) स्थावरों में विष्णु कहा है, वह सर्वथा उचित है, क्योंकि तुम्हारी ही कुक्षि चर और अचर सभी भूतों की आधार है। **(६८)** शेषनाग के फन तो मृणाल जैसे कोमल हैं, वे पृथिंवी को धारण करते ही कैसे, यदि पाताल से लेकर तुम इसे धारण न करते? **(६९)** धारा में प्रवाहित समुद्र की तरङ्गों से न रुकने वाली जैसी लोकपावनी अच्छिन्न और निर्मल उज्ज्वल तुम्हारी कीर्त्ति है वैसी ही गङ्गा आदि नदियाँ हैं।

(६५) उदाहरणवस्तु वक्तव्यार्थनिवेदनकलाकौशलम्, अवाच्यवचनवाच्यावचनपुनरुक्तिपरिहारपूर्वक–मन्यूनानतिरिक्तत्वमुग्धमुदीरणम्। तथा च भारविः 'उदाजहार द्रुपदात्मजा गिरः'। आङ्गिरसो बृहस्पतिः। स एवाग्रे 'एवंवादिनी'– ति पद्ये देवर्षिपदेन परामृक्ष्यते, न तु नारदः, यथोच्यते रसगङ्गाधरे पण्डितराजेन "नारदकृतविवाहचर्चायामि" ति। **चोदया=प्रेरया, नोदया म.; प्रत्युवाच स भूधरम्=स च प्राह महीधरम्।**
(६६) मतः= मितः। (६७) स्थावरात्मा=स्थावराणां। तथा च गीता १०.२५। **तथाहि ते=मनीषिणः।**
अतः परं ६८पद्यतया पठितं पद्यम् –

'निःशेषभूत–सन्ताप–सन्ततिच्छेदिना भवान् ।
हिमरूपेण यशसा धवली–कृतविग्रहः ।।

(६८) मधास्यत् =माधास्यत्; मृदुभिः = सदृशैः व.। **(६९) मल = मूल; र्म्य= र्मि** नां.; **लोकान् = लोकम्** व.ना.।

यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया ।। ७० ।।
तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ।
त्रिविक्रमोद्यतस्यासीत् स च स्वाभाविकस्तव ।। ७१ ।।
यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया ।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकतम् ।। ७२ ।।
काठिन्यं स्थावरे काये भवता सर्व्वमर्पितम् ।
इदं तु यद् भक्तिनम्रं सतामाराधनं वपुः ।। ७३ ।।
तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात् तु वयमत्रांशभागिनः ।। ७४ ।।

(७०) गङ्गा ही प्रशंसा जैसे इसलिए होती है कि वह विष्णु के चरण से निकलती है वैसे ही इसलिए भी कि तुम हो उसका दूसरा स्रोत, तुम भी हो ऊँचे सिर वाले ही। (७१) विष्णु की महिमा ऊपर नीचे और आसपास व्यापक इसलिए हुई कि उन्हें त्रिविक्रम के लिए उद्यत होना पड़ा था। तुम्हारी महिमा अपने आप वैसी ही है। (७२) तुमने स्थान प्राप्त कर लिया है यज्ञभागभुक् (देवताओं) के बीच, इस कारण सुमेरु का जो ऊँचा और हिरण्मय शृङ्ग है उसे व्यर्थ कर दिया है तुमने। (७३) तुमने तुम्हारा संपूर्ण काठिन्य रख दिया है स्थावर शरीर में। यह जो तुम्हारा भक्ति से नम्र शरीर है यह है सत्पुरुषों की आराधना के लिए। (७४) तो, हमारे आगमन का कारण सुनो। वह कार्य तुम्हारा ही है। हम सब उपदेश करने के कारण श्रेय में अंशभागी हैं।

(७०) **श्लाघ्यते = श्लाघते** अ.ना.; **प्रभवेण=प्रभवेन, प्रसवेन** अ.ना., **प्रभवेण/न, प्रपातेन**। गङ्गायाः हि प्रथमः प्रभवो विष्णुपादः द्वितीयश्च भवान्। उच्छिरस्त्वमुभयत्र समानम्। अरुणगिरिनाथनारायणौ पुनः पद्यमिदमेवं पठतः— **यथैव श्लाघते गङ्गा पादेन परमेष्ठिनि।**
प्रथमेन द्वितीयेन तथैवोच्छिरसि त्वयि।।
(७१) **सीत् स च=भूत् सोऽपि; तव=तथा।** (७२) **पदमातस्थुषा त्वया=पदमाक्रम्य तस्थुषा** अ.ना.; **वितथी=बिफली।** (७३) **भवता=भवतः** अ.ना., **भवतां; नम्रं ते=नम्रस्य; सतामाराधनं=महदाराधनं, अर्हदाराधनं** व.अ.ना., **महोदारतरं, मभूदाराधनं।** इत्थमत्र त्रेधा व्यवस्थितो भेदः 'इदं तु ते भक्तिनम्रं महदाराधनम्' इति 'तु ते भक्तनम्रमभूदाराधनं इति, 'इदं तु भक्तिनम्रस्य महदाराधनमि'ति च। (७४) **तदाग=यदाग** अ.ना., **यथाग; तत्=च; शात् तु=शाञ्च; मत्रां=मप्यं** व.; **गिनः=जिनः।**

अणिमाऽऽदिगुणोपेत–मस्पृष्ट–पुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्त्ति यः ।। ७५ ।।
कल्पितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मनि ।
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाऽध्वनि ।। ७६ ।।
योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्त्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ।। ७७ ।।
स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्म्मणः ।
वृणुते वरदः शम्भुरस्मत्संक्रामितैः पदैः ।। ७८ ।।
तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्त्रे प्रतिपादिता ।। ७९ ।।
यावदेतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्येनामीशो हि जगतः पिता ।। ८० ।।

(७५) जो अणिमा आदि सिद्धियों से मण्डित हैं और जो अन्य किसी पर लागू न होने वाला 'ईश्वर' यह नाम अर्धचन्द्र के साथ धारण करते हैं। (७६) जो इस विश्व को अपने पृथिवी आदिरूपों में परस्पर में त्रिवृत्करण या पञ्चीकरण से सामर्थ्य अर्जित कर उनसे धारण करते हैं, जैसे मार्ग में यान को घोड़े। (७७) शरीर के भीतर विद्यमान रहने वाले जिसे योगीजन खोजते रहते हैं और मनीषीजन जिसका स्थान पुनर्जन्म के भय से मुक्त मानते हैं। (७८) विश्व के कर्मों का साक्षी वही साक्षात् तुम्हारी पुत्री को वरण कर रहा है हमारे माध्यम से प्रेषित शब्दों में। (७९) उन्हें अपनी पुत्री से युक्त करो जैसे अर्थ को भारती से युक्त किया जाता है (अन्विताभिधान मार्ग से) पिता के लिए कन्या दुःख का कारण नहीं बनती यदि सत् पति को दे दी जाए। (८०) ये जितने भी स्थावर और चर भूत हैं वे तुम्हारी इस कन्या को माता बनाएँ, क्योंकि ईश ही तो सबके पिता हैं।

(७५) गुणोपेतम्= गुणोत्थानम् व., गुणैश्वर्यम्, गुणैर्व्याप्तम् ; स्पृष्ट=स्पष्ट; ईश्वर=ईश्वरम्। (७६) कल्पिता=कलिता म.; आत्मनि=आत्मभिः व.; येनेदं = यस्येदं व.; धार्यते=तन्यते व., तन्त्र्यते; विश्वम्=व्यक्तम्। (७८) कर्मणः=कर्मणाम्; णुते = णीते; क्रामितैः=क्रमितैः अ.ना. । (७९) सद्भर्त्रे प्रति = सद्भर्तुः प्रति, सद्भर्तृप्रति; पादिता = पालिता। (८०) यावदेता = यावन्त्येतानि म., यावद्द्वयानि व.अ.ना., यानि द्वयानि; यन्त्येना = न्त्वेत; जगतः = जगतां।

प्रणम्य शितिकण्ठाय देवतास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ।। ८१ ।।
उमा वधूर्भवान् दाता याचितार इमे वयम् ।
वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः ।। ८२ ।।
अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुता–संबन्ध–विधिना भव विश्वगुरोर् गुरुः ।। ८३ ।।
एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्व्वती ।। ८४ ।।
शैलः संपूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ।। ८५ ।।
मेने मेनाऽपि तत् सद्यः पत्युः कार्य्यमभीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ।। ८६ ।।

(८१) देवता लोग शितिकण्ठ को प्रणाम करने के बाद इसके चरणों को चूडामणि मरीचियों से रञ्जित करें। (८२) 'उमा वधू, आप दाता, याचक ये हम, वर शिव'—इससे बड़ी क्या होगी आपके कुल के अभ्युदय की विधि। (८३) जो किसी की स्तुति नहीं करता, किन्तु सभी की स्तुति का विषय है, जो वन्द्य है और अन्य किसी की वन्दना नहीं करता, उस विश्वगुरु के गुरु बन जाओ कन्या देकर। (८४) देवर्षि अङ्गिरा ने जब यह सब कहा तो पिता के पास बैठी पार्वती का सिर लज्जा से झुक गया और वह लीलाकमल की पँखुड़ियाँ गिनने लगी। (पण्डितराज ने देवर्षि का अर्थ नारद कर लिया रसगंगाधर प्रथमानन के अन्त में।) (८५) शैलराज हिमाचल की कामना पूर्ण हो गई तब भी उन्होंने मेना के मुख की ओर देखा। प्रायः कुटुम्बीजन कन्या के विषय में गृहिणी—नेत्र होते हैं। (८६) मेना ने भी ताड़ लिया कि यह सब पति को स्वीकार्य है। पतिव्रताएँ पति के अभीष्ट कार्य में विरोध नहीं करतीं।

(८१) शितिकण्ठाय = नीलकण्ठस्य, यन्त्वस्याः= यन्त्यस्याः। (८२) त्वत्कु = स्वकु; कुलोद्भूत = कुलोन्नत। (८५) शैलः सं=शैलस्तु; मुदैक्षत=मुवैक्षत व.; नेत्राः=तन्त्राः, मुख्याः; कन्यार्थेषु=कन्यार्थे हि म. अ.ना.। (८६) वल्लभाऽरुणगिरिनाथनारायणाः पद्यमिदं त्यजन्ति। सद्यः=सर्व्वं, साधु; कार्यमभी=र्यं समीप्सि, र्यं समीहि; भवन्त्यव्यभि=भवन्ति व्यभि, न भवन्त्यभिचा; ण्यो भर्तुरिष्टे=ण्योऽभर्तृष्वेव। अन्तिमे पाठभेदे मूलपाठ एवंविधः संभाव्येत 'भवन्ति व्यभिचारिण्योऽभर्तुष्वे'ति।

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः/सा ।
आददे वचसामन्ते मङ्गलाऽङ्कृतां सुताम् ।। ८७।।
एहि विश्वात्मने वत्से! भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः, प्राप्तं गृहमेधिफलं मया ।। ८८।।
एतावदुक्त्वा तनयामृषीनाह महीधरः ।
इयं नमति वः सर्वास्त्रिलोचनवधूरिति ।। ८९।।
ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरः—पाकाभिरम्बिकाम् ।। ९०।।
तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम् ।
अङ्कमारोपयामास लज्जमानामरुन्धती ।। ९१।।
तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् ।
वरस्यानन्यपूर्व्वस्य विशोकामकरोद् गुणैः ।। ९२।।

(८७) हिमालय ने सोचा कि उचित उत्तर यही होगा तो वाग्दान करने के बाद माङ्गलिक अलंकरण धारण की हुई कन्या को हाथ में लिया और कहा। **(८८)** 'आ वत्से! तू आज विश्वात्मा शिव के लिए हमारी भिक्षा है। याचक हैं ये मुनिजन। मैनें गृहमेधी होने का फल पा लिया।' **(८९)** तनया से इतना कहकर हिमालय ने ऋषियों से कहा 'भगवन्! यह त्रिलोचन की वधू आपको प्रणाम कर रही हैं।' **(९०)** ऋषियों ने ईप्सितार्थ संपन्न करने की बात से उदार हिमालय के उस वचन का अभिनन्दन किया और पार्वती को आगे के फलों के आशीर्वाद दिए। **(९१)** अरुन्धती ने प्रणाम करते समय सुवर्ण का झुमका खिसकाती और लाज में डूबती पार्वती को गोद में बिठलाया। **(९२)** और उसकी माँ हुई पुत्री के स्नेह से विह्वल, तो अनन्यपूर्व वर के गुण सुनाकर उसे अरुन्धती नें शोकमुक्त कर दिया।

(८७) इदम्=एवम्; विमृश्य=विचार्य, विचिन्त्य अ.ना., ददे=दधे; वचसाम=वचनस्यान्ते। सर्वत्रैव सः इत्येव, न तु सेति पाठः। सा एव तूचितः। आगामिनि पद्ये भिक्षेतिपदस्य आर्यामुख एवा स्वाभाविकत्वात्। दत्ततपश्चरणक्लेशाय शिवायोपालम्भोऽप्यत्र सुलभः। अत्रालङ्करणकालगतो व्यापारोऽनुसन्धेयः। (८८) विश्वात्मने=शर्व्वात्मने, शर्व्वार्पणे, शर्व्वार्पणा व., सर्व्वात्मने; सि=त्वं व.अ.ना.। (८९) मृषीना=मुनीना; महीधरः=स भूधरः व(पा); (८९)–(९०)युग्मम्। (९०) गिरे=गुरो; एध= वर्ध। (९१) वतंस=वतंसि। (९२) दुहितृ=दुहितुः।

वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना ।
ते त्र्यहादूर्ध्वमाख्याय चेलुश्चीरपरिग्रहाः ।। ९३ ।।
ते हिमाचलमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ।। ९४ ।।

पशुपतिरपि तान्यहानि कृच्छ्रा–
दगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्यु–
र्विभुमपि तं यदमी स्पृशन्ति भावाः ।। ९५ ।।

इति अष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ उमाप्रदानो नाम
षष्ठः मनश्चन्द्रमूर्त्तिसर्गः ।। ६ ।।

(९३) हरबन्धु हिमालय ने तत्क्षण विवाह की तिथि पूछी तो तीन दिनों के बाद कहकर वे सब चीरधारी महात्मा चल दिए। (९४) उन्होंने हिमालय से अनुज्ञा ली, शिव के पुनः दर्शन किए और उन्हें कार्यसिद्धि होने की सूचना दे, विदाई लेकर, वे आकाश में उड़ गए। (९५) पशुपति के वे तीन दिन बड़ी कठिनाई से बीते, पार्वती के समागम के लिए उत्सुक जो थे वे। अन्य किसी अवश व्यक्ति को ये विषय विकारमग्न क्यों नहीं कर सकते जब उन विभु को भी ये छू रहे हैं।

इस प्रकार कालिदास की कृति अष्टमूर्त्तिमहाकाव्य 'कुमारसंभव' में 'उमाप्रदान' नामक
पष्ठ सर्ग (मनश्चन्द्रमूर्त्तिः) पूर्ण हुआ।। ६।।

(९३) पृष्टाः=पृष्ट्वा; ते=तां अ.ना.; चेलु=चेरुः म.। (९४) हिमाचल=हिमालय; पुनः=पुरः व.; प्रेक्ष्य=प्राप्य, दृष्ट्वा, प्रेष्य; चास्मै=चास्य। (९५) कृच्छ्रा = कृत्स्ना; दगमय = दगणय। पुष्पिकाः इति कुमारसम्भवे महाकाव्ये कालिदासकृतौ उमा/पार्वती/गौरी–प्रदानो।

।। सप्तमः सर्गः ।।

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ।। १ ।।
वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ।
आसीत् पुरं सानुमतोऽनुरागादन्तःपुरं चैककुलोपमेयम् ।। २ ।।
सन्तानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासा ज्वलत्काञ्चनतोरणानां स्थानान्तरस्वर्ग इवाबभासे ।। ३ ।।
एकैव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ।। ४ ।।
अङ्काद् ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त ।
सम्बन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं बभूव ।। ५ ।।

(१) अब हिमवान् ने बन्धुओं सहित पुत्री की विवाहदीक्षाविधि का अनुष्ठान किया। मुहूर्त्त था शुक्लपक्ष की जामित्रयोग से युक्त तिथि। (जामित्र—गुण जब लग्न से सप्तम भाव में कोई ग्रह न हो— मल्लिनाथ।) (२) विवाह से संबन्धित माङ्गलिक कार्य घर घर में होने लगे। उनमें पतिपुत्रवती महिलाएँ व्यग्र हो गईं। पर्वतराज का पूरा नगर और अन्तःपुर एक कुल सा हो गया, वह भी अनुराग से। (कुल = सजातीय वर्ग।) (३) नगर के महापथ संतानक (कल्पवृक्ष) के पुष्पों से छा गए। सिल्की झण्डियाँ लगा दी गईं। काञ्चन के बन्दनवारों (तोरण) की सुनहली कान्ति से लगता था कि दूसरे स्थान पर स्वर्ग उतर आया है। (४) पुत्र—पुत्रियाँ थे तो अनेक, किन्तु माता—पिता को पार्वती ऐसी लग रही थी कि बहुत लम्बी अविध के बाद देखने को मिली हो या मरकर जीवित हो गई हो, उसका पाणिग्रहण आसन्न जो था। (५) अंक से अंक में जाती, आशीष पाती, मण्डन पर मण्डन धारण करती। संबन्धी तो भिन्न भिन्न थे, परन्तु पर्वत के कुल का स्नेह उसी एक पर इकट्ठा हो गया। वही पुत्र, वही भतीजी, वही सब कुछ।

(१) ॐ अथौष; (९०) श्रीं।। ऐं नमः।। अथौष; तिथौ = तनौ; जामित्र = यामित्र; सुताया = सुतायाम्। (२) गृहे गृहे = दिने दिने; रागात् = रोधत्। (३) काकी = कैः की; महाप = चतुष्प; भासा ज्व = भासोज्जव; णानां = णाङ्क ना.; रस्व = रं स्व व.म., रे स्व, रस्व; र्ग = र्गम्। (४) एकैव = एकेव; चिरस्य= चिराय, चिरेण; ष्टेव मृ=ष्टेरमृ; आसन्न म. = उपोढ व.अ.ना.; ग्रहणेति=ग्रहणेव, ग्रहणेन; सितं= सिता अ.ना.। (५) भुङ्क्त=युङ्क्त; संबन्धि=सम्बन्ध व. ; कायतनं बभूव = कायनतां जगाम व.,

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफाल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म्म चक्रर्बुन्धुस्त्रियो याः पतिपुत्रवत्यः ।। ६ ।।
सा गौरसिद्धार्थनिवेशवद्भिर्दूर्व्वाप्रवालैः प्रतिभिन्नरागम् ।
निर्नाभि कौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलञ्चकार ।। ७ ।।
बभौ च संपर्कमुपेत्य बाला नवेन दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्कलेखा ।। ८ ।।
तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ।। ९ ।।
विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाविद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयां सतूर्यमेनां स्नपयाम्बभूवुः ।। १० ।।

(६) रिश्तेदारों की सुहागिन महिलाओं ने पार्वती को हल्दी लगाई। मुहूर्त्त था मैत्र और चन्द्रमा था उत्तर फाल्गुनी नक्षत्र से युक्त। (७) उसे पँहनाया गया धुला कौषेय वस्त्र नाभि से ऊपर तक। उसमें सफेद सरसों लगी थी और दूर्वाकिसलय का रंग भी उस पर उछल रहा था। हाथ में बाण रखे हुई थी। इस प्रकार इस अभ्यङ्ग नेपथ्य को पार्वती ने अलंकृत किया। (८) पार्वती को विवाहदीक्षा के समय जो नया बाण दिया गया उसके संपर्क से वह ऐसी लगी जैसे कृष्णपक्ष के बाद सूर्यरश्मि से युक्त चन्द्रकला लगती है। (९) उसे तैल लगाया गया, फिर लोध्रचूर्ण से उसे सुखाया गया, कुछ सूखे कालेय (जायक) का अंगराग लगाया गया, वस्त्र पँहनाया गया स्नान के योग्य। अब नारियाँ उसे चौक पर ले गईं। (१०) वहाँ शिलाफलक था ज़िसमें वैदूर्य जड़े हुए थे, बिना बिंधे मोतियों की पच्चीकारी की गई थी। सुवर्ण के घड़ों से जल छोड़कर तूर्यवादन के साथ वहाँ स्नान कराया गया।

तदेकायतनं जगान। द्र. शृ.प्र. ३३.४३ (६) लाञ्छनेन=लक्ष्मणेन व., लक्षणेन, लाञ्छनोत्थे; फाल्गु=फल्गु व.; शरीरे प्रति = शरीरे परि अ.ना.; ०स्त्रियो = प्रिया। (७) रागम्=शोभम् म.अ.ना.; निर्नाभि = उन्नाभि, उन्नीवि अ.ना., निर्भिन्न, निर्धौत; अभ्यङ्ग = उपोढ; बाणमभ्यङ्ग = बाणं प्रत्यङ्ग। (८) नवेन = नवेव, नवीन, विवाह ना.; लेखा = रेखा; संधुक्ष्यमा = संधुक्षयन्तीव, संधुक्षमाणेव। बहुलावसानीयं बिम्बमुपमेये मृग्यम्। (९) लोध= रोध; हृता = हता, धृता, कृता; कालेय = कालीय; मुखं = मुखीम्; व्यनैषुः = मनैषुः, मकुर्वन्। (१०) शिलातलेऽस्मिन् = शिले च तस्मिन् व.; आविद्ध = बावद्ध म., आयुक्त, आरक्त, आमुक्त; मुक्ताफलभक्तिचित्रे=मुक्ताकृतभक्तिचित्रे, मुक्ताकृतभक्तिलेखे, मुक्तामणिभक्तिचित्रे, मुक्ताफलजालचित्रे /चित्रैः; तोयां = तोयाः व.।

सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ।।११।।
तस्मात् प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम् ।।१२।।
तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरोनिषण्णाः ।
भूतार्थशोभाऽऽह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः ।।१३।।
धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तः—कुसुमं तदीयम् ।
पर्यक्षिपत् काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना ।।१४।।
विन्यस्तशुक्लागुरु चक्रुरस्याः गोरोचनापत्रविभङ्गमङ्गम् ।
सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कन्तिमतीत्य तस्थौ ।।१५।।

(११) पार्वती ने मङ्गलस्नान किया। उसका शरीर विशुद्ध हो गया। उसने पहना पति के लिए जाते समग्र का वस्त्र। तब वह शरत् की भूमि सी लगी, मेघों द्वारा स्नान करने के बाद जिसमें काश पुष्प खिल उठते हैं। (१२) उस स्थान से पतिव्रता सुहागिनों द्वारा उसे ले जाया गया कौतुकवेदी के मध्य। वे पार्वती को पकड़े हुई थीं। वेदी पर आसन रखी थी, ऊपर वितान था और चार मणिस्तम्भ थे। (१३) उस पर पार्वती को पूर्वाभिमुख बैठाया गया। वह तन्वी वहाँ अलंकारमुक्त बैठी है। सामने बैठी थीं अलङ्कार करने वाली महिलाएँ, परन्तु कुछ क्षण सभी स्तब्ध थीं, पार्वती की सहज सुषमा पर ही उनके नेत्र लुट चुके थे। (१४) अब सुगन्धित धूप से पार्वती के केशों की आर्द्रता हटाई गयी, केश के छोर पर पुष्प लगाए गए, फिर किसी महिला ने उनका जूड़ा दूर्वाङ्कित मधूकमाला से बाँध दिया। (१५) अब कई महिलाओं ने मिलकर पार्वती के शरीर (स्तनों) पर गोरोचन की पत्रावली बनाई और उसमें लगाया सफेद अगर। तब उस गङ्गा की छवि को लाँघ गई जिसकी बालू में चक्रवाक बैठे हों।

(११) पत्यु= प्रत्यु; छन्दोमञ्जरी संयुक्तपूर्व्वगुरुत्वविकल्पनिदर्शने। पत्युद्ग=शुद्धोद्ग, शुभ्रोद्ग व., वस्त्राद्ग ना.; वस्त्रा ना.=वस्त्रे, वस्त्रम् ना.; निर्वृत्त्यु ना.=निवृत्त, विसृष्ट; षेका=षेकैः। (१२) तस्मात् प्र =ततः प्र; परिगृह्य=प्रतिगृह्य। (१३) तन्वीं=बालां ; व्यलम्बन्त=विलम्बेन; भूतार्थशोभा=भूतानुशोभा; ह्रिय=क्रि/श्रिय; नार्यः=सख्यः। द्र.ध्वन्यालोक ४.७। (१४) धूपोष्मणा त्याजित=धूपेन संत्याजित/संमार्जित व.; पर्यक्षि=पर्याक्षि। (१५) विन्यस्त=आसक्त व., प्रसक्त, प्रसन्न अ.ना., प्रयुक्त, पर्यस्त; शुक्ला=कृष्णा, काला; गोरोचना=सरोचना व.; विभङ्ग=विभक्त म.आ.ना.; मङ्गम्=मस्याः।

लग्नद्विरेफं परिभूय पद्मं, समेघलेखं शशिनश्च बिम्बम् ।
तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम् ।।१६।।
कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभाद् बबन्ध चक्षूंषि यवप्ररोहः ।।१७।।
रेखाविभक्तश्च विभक्तगात्र्याः किञ्चिन्मधूच्छिष्टविमृष्टरागः ।
कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः ।।१८।।
पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्व्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर् माल्येन तां निर्वचनं जघान ।।१९।।
तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य ।
न चक्षुषोः कान्तिविशेषदृष्ट्या कालाञ्जनं मङ्गलमित्युपात्तम् ।। २०।।

(१६) पार्वती का चेहरा भूषित केशों से युक्त हुआ तो उसने भ्रमरों से युक्त कमल और मेघलेखा से घिरे चन्द्रबिम्ब को नीचा दिखा दिया और सादृश्य ही बात ही समाप्त कर दी। (१७) उसके कान में यवाङ्कुर लगाया गया। वह लटक आया कपोल पर जिस पर लोध्रचूर्ण मला गया था और चिकनाई दूरकर गोरोचन लगाया गया था जिससे उसका गौर वर्ण और उभर आया था। यवाङ्कुर ने उसमें परभाग ला दिया तो उसी पर अटक गई द्रष्टाओं का आँखें। (परभाग=अनेक रंगो के योग से निखरी नई छटा।) (१८) पार्वती का अधरोष्ठ फरका, उसे उसके लावण्य का फल तुरन्त ही जो मिलने वाला था। पार्वती का प्रत्येक अंग यौवन के कारण विभक्त था और अधर तो मोम से संतुलितराग बाला बना दिया गया था। (१९) सखी ने पार्वती के चरणों में महावर लगाया और परिहास में आशीर्वाद दिया 'इनसे पति की चन्द्रकला छूना' तो पार्वती ने बिना कुछ कहे उसे माला से मारा। (२०) प्रसाधिकाओं ने पार्वती के नेत्रों को देखा कि वे बढ़ियाँ खिले नीलकमल जैसे हैं, तो कालाञ्जन इसलिए लगाया कि वह मङ्गलकार्य था, इसलिए नहीं कि उनकी कान्ति बढ़ानी थी।

(१६) **लग्न=लीन** ना., **सक्त; लेखं = लेशं** व.ना., **रेखं।** प्रसिद्धौ ख्यातभूषिताविति। द्र. रघु.१८.४१, ध्वन्यालोक १.४ वृत्तिः। (१७) **लोध्र=रोध्र** व.; **रूक्षे= रूषे** ना(पा)., **गौरे, रागे; नाक्षेप=नोद्भेद,न्यास, भेद** व.अ.ना.; **क्षेप=भङ्ग; परभाग=परिभाग; रोहः=रोहैः;**। (१८) **रेखा=लेखा; च विभक्त=विभक्तः सु, प्रविभक्त, च पवित्र; मधूच्छिष्ट=मधूत्सृष्ट; विमृष्ट=विसृष्ट।** (१९) **रञ्जयित्वा=रञ्जयन्त्याः** व.। ध्वन्यालोक ३.४०। (२०) **निरीक्ष्य=समीक्ष्य** अ.ना.; **चक्षुषोः=चक्षुषः।**

सा संभवद्भि: कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद् विहङ्गैरिव लीयमानैरामुच्यमानाऽऽभरणा चकासे ।। २१ ।।
आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियाऽऽलोकफलो हि वेष: ।। २२ ।।
अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मन:शिलाञ्च ।
कर्णावतंसामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य ।। २३ ।।
उमास्तनोद्भेदमनुप्रवृद्धो मनोरथो य: प्रथमो बभूव ।
तमेव मेना दुहितु: कथञ्चिद् विवाहदीक्षातिलकं चकार ।। २४ ।।
बबन्ध चास्राकुलदृष्टिरस्या: स्थानान्तरे कल्पितसन्निवेशम् ।
धात्र्यङ्गुलीभिं: प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम् ।। २५ ।।

(२१) अलंकृत पार्वती ऐसी सुशोभित हुई जैसी निकलते पुष्पों से लता सुशोभित होती है, उदित होते तारों से रात्रि या उतरे पक्षियों से लगती है नदी। (२२) आदर्श बिम्ब में स्वयं को शोभायुक्त देखा तो पार्वती की आँखे निश्चल हो गईं और वह उत्सुक हो गई शिव के पास तुरंत पहुँच जाने हेतु। स्त्रियाँ जो वेष धारण करती हैं वह फलीभूत माना जाता है तब, जब प्रिय देख ले। (२३—२४) इसके बाद माता ने एक अंगुली में आर्द्र हरिताल लिया और एक अंगुली में मांगलिक मन:शिला और दूसरे हाथ से मुख उठाया, जिसके कान में निर्मल दन्तपत्र लगा था और वह विवाहदीक्षातिलक लगाया, जो उसी समय से उसका मनोरथ बना हुआ था जिस समय से उमा की छाती उभरने लगी थी। (२५) और इसे ऊन का बना कङ्कण हस्तसूत्र आँखो में आँसू लिए आकुलतापूर्वक पँहनाया। आकुलता में वह कहीं का कहीं पँहना गई थी जिसे धाइयों की अंगुली ने ठीक किया यथास्थान खिसका कर।

(२१) लीयमानै=नीयमानै, गीयमानै; रामुच्यमाना = राबद्ध्यमाना, रारोप्यमाणा; भरणा = भरणै:; चकासे = चकाशे व.अ.ना.। **(२२) बिम्बे स्ति=बिम्बस्ति; हरोपयाने त्वरिता = हरप्रयाणत्वरिता; हरोपयाने त्वरिता=हरोपयानत्वरिता** व.; **वेष: = वेश:। (२३) ङ्गुलि = ङ्गुलीद्ध; माङ्ग = मङ्ग** व.अ.ना.; **उन्नमय्य= उन्ननाम** अ., **उन्निनाय** ना., **उन्ममञ्ज (२४) मनुप्रवृद्धो = मनुप्रवृत्तो; प्रथमो = प्रथमं** म.अ.ना.; **तमेव= तेनैव।** तमेवेत्यशुद्धिमित्येके। **(२५) चास्रा = सास्रा, बाष्पा; दृष्टिरस्या = दृष्टिरन्या, दृष्टिरेषा; धात्र्यङ्गु= धात्र्याङ्गु** व.ना.; **प्रति = प्रवि, परि; कौतक = कङ्कण; हस्तसूत्रम् = सूत्रहस्तम्।**

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा ।
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना ।। २६ ।।
तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता ।
अकारयत् कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम् ।। २७ ।।
अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरभाजा पश्चात्कृताः स्निग्धजनाशिषोऽपि ।। २८ ।।
इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा ।
सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः ।। २९ ।।
तावद् वरस्यापि कुबेरशैले तत्पूर्व्वपाणिग्रहणानुरूपम् ।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात् पुरशासनस्य ।। ३० ।।

(२६) अब पार्वती ने नया क्षौम पँहना और हाथ में लिया दर्पण। उस समय वह ऐसी लगी जैसे फेनपुञ्ज से युक्त क्षीरसमुद्र की वेला लगती है या पूर्णचन्द्र से युक्त शरत् की रात्रि (शरत्पूर्णिमा) लगा करती है। (२७) माता मेना ने उस कुलप्रतिष्ठा पार्वती से कुलदेवताओं को प्रणाम करवाया। फिर परम्परागत आचारों में दक्ष उसी माता ने सती सुहागिनों के पैर छुआए। (२८) सखियों ने भी पार्वती को आशीर्वाद दिया—'पति का अखण्ड प्रेम प्राप्त करो', परन्तु उसने तो पति का आधा शरीर ही प्राप्त कर लिया और इन आशीर्वाद को पीछे छोड़ दिया। (२९) कृती हिमालय ने अपनी इच्छा और विभूति के अनुरूप पुत्री के सभी कार्य जब पूरे कर लिए तब सुहृज्जनों से युक्त सभा में शंकर जी के आगमन की प्रतीक्षा करनी शुरू की। वह स्वयं सभ्य था। (३०) इधर कैलास पर भगवान् शंकर का अलंकार माताओं ने बड़े आदर के साथ यह ध्यान रखते हुए किया कि शिव का विवाह पहले पहले होने जा रहा है।

(२६) क्षीरोद = क्षारोद; नवक्षौ = नवं क्षौ; बभौ दर्पण = ऽप्यच्छप्रभं; दधाना = ददाना। नवं नवमिति पाठे क्षौमेण न संभवी सम्बन्धस्तस्य समासनिगीर्णत्वात्। ततश्चात्र द्वितीयस्य नवस्य दर्पणविशेषणत्वमेव समञ्जसतरम्। **क्षौमनिवासिनी सा = क्षौममनुव्यधात् तां; मादधाना = मादधानाम्। (२७) माता = मेना; सतीनाम् = सखीनाम्।** (२८) नम्रा इत्युच्यते स्मेत्यन्वयः। 'च्यते स्माऽऽभिरुमा नतास्ये' तिवक्तुमुचिततरम्। **भिरुमा = भिरसौ; स्म नम्रा=सनम्रा; भाजा = लाभात्** व.अ.ना.; **पश्चात्** म.=**अधः; स्निग्ध=बन्धु। (२९) गमनप्रतीक्षः=गमनप्रतीक्षम्, गमनं प्रतीक्ष्य** अ.ना.। **(३०) वरस्या=हरस्या, भवस्या** म.; **पुर=स्मर** व.।

तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण ।
स्व एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे ॥ ३१॥
बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रीः ।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः ॥ ३२॥
शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम् ।
सान्निध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः ॥ ३३॥
यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ॥ ३४॥
दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ॥ ३५॥
इत्यद्भुतैकप्रभवः प्रभावात् प्रसिद्धनेपथ्यविधेर्विधाता ।
आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श ॥ ३६॥

(३१) माताओं का आदर करना था इसलिए उनकी प्रसाधन सामग्री भगवान् ने केवल छू दी। उनका अपना ही वेष वर का वेष बन गया। **(३२)** उन्होंने जो भस्म लगा रखी थी वही बन गई उज्ज्वल अंगराग, जो कपाल धारण कर रखा था वही बन गया उज्ज्वल शेखर (मौर), छोरों पर रोचना से अंकित दुकूल बन गया गजाजिन। **(३३)** हरिताल का तिलक बन गया कपाल(शङ्ख) का तृतीय नेत्र, उसमें अमल और पिङ्ग पुतली थी ही। **(३४)** अंगों से जहाँ बड़े बड़े सर्प लिपटे थे वहाँ का अलंकार बनने के लिए उनका शरीर ही बदला, उनके फन जो रत्न के थे वे अपने मूलरूपों में ही रहे आए। **(३५)** हर को चूडामणि की आवश्यकता नहीं पड़ी। उसका काम चला दिया चन्द्रकला ने ही, उससे दिन में भी किरण निकल रही थी और बालकला होने से कलंक दिख नहीं रहा था। **(३६)** इस प्रकार अद्भुतता के प्रधान हेतु शिव ने प्रभाव से ही अलंकृत वेष धारण कर लिया, आसन्नचारी गण के द्वारा लाकर दिए गए खड्ग में अपना प्रतिबिम्ब देखा।

(३१) स्व एव=स एव म., **स्वभाव** अ.ना.; **इष्टम्=इष्टो। (३२) सिता=कृता; भागेषु=भावेषु; गजाजिनस्यैव=गजाजिनं चैव, सिंहाजिनस्यैव** अ.ना.। **(३३) शङ्खा=नेत्रा, फाला, शृङ्गा; द्योति=ज्योति; पिङ्ग=गौर; ष्टानल=ष्टामल** । **(३४) करिष्य=गमिष्यं॥ (३५) मरीचि=मयूख, मनोज्ञ; भासा =भाजा** अ.ना.; **लाञ्छानेन=लक्षणेन** व.अ.ना.; **मणेः=मणौ** व.; **किंग्र = संग्र। (३६) इत्यद्भु=अत्यद्भु; प्रसिद्ध=स्वसिद्ध, उदार** व.म.अ.ना.; **नेपथ्य=नैपथ्य; विधेः = विधिः** व.; **खडगे=टङ्के** अ.ना.; **टङ्कः** परशुरित्यमरः। **निषक्त=नियुक्त, निषिक्त** अ.ना., **निविष्ट।**

स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्म्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलाशमिव प्रतस्थे ।। ३७।।
तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः ।
मुखैः प्रभामण्डलरेणुगौरैः पद्माकर चक्रुरिवान्तरिक्षम् ।। ३८।।
तासां च पश्चात् कनकप्रभाणां काली कपालाभरणा चकासे ।
बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव ।। ३९।।
ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्य्यघोषः ।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ।। ४०।।
उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ।। ४१।।

(३७) नन्दी ने हाथ का सहारा दिया तो वे भगवान् शंकर वृषभ पर आरूढ़ हुए। उस पर बिछा था व्याघ्रचर्म। वह वृष एक प्रकार से उन्हीं की भक्ति के कारण छोटा रूप धारण किए हुए कैलास ही था। अब किया उन्होंने प्रस्थान। (३८) जब ये देवाधिदेव चले तो मातरें (माताएँ) भी उनके पीछे चलीं। उनके वाहन हिलते तो उनके करनफूल भी हिलने लगते। प्रभामण्डल रूपी पराग से गौर उनके मुखों ने अन्तरिक्ष को मानों पद्माकर बना दिया। (३९) सुवर्ण सी प्रदीप्त और गौरवर्ण की उन मातरों के पीछे चल रही थी कृष्णवर्ण की कपाल लिए काली श्याम मेघमाला जो बलाका से भी युक्त हो और जिसमें आगे आगे खूब बिजली चमक रही हो, उसके जैसी। (४०) उस समय भगवान् शिव के गणों ने बजाया मङ्गलतूर्य। उसका घोष विमानों (सातमञ्जिल भवनों) के शृङ्गों में गूँज उठा और उसने देवताओं को सूचना दे दी सेवा के अवसर की। (४१) सूर्य भगवान् सेवा में उपस्थित हुए और उन्होंने भगवान् शिव के ऊपर त्वष्टा द्वारा निर्मित नवीन छत्र धारण किया। उसमें जो दुकूल था, वह जब शिव के सिर के पास आया तो लगा कि उनके सिर से गङ्गा अभी भी प्रवाहित हैं।

(३७) चर्म्मान्तरितो = चर्म्मापिहितो। (३८) नक्षोभ = नाक्षोभ; तंसाः = तंसैः; प्रभामण्डल = चलत्कुण्डल; रेणु=रश्मि; पद्माकरं चक्रु = पद्माकरीचक्रु; रिक्षम् = रीक्षम्। (३९) राजी = राजि व. ना., पङ्क्ति; पुरः=परि; शतह्रदेव=तडिल्लतेव। (४०) विमान = सुमेरु, प्रसाद; ण्यव=णि वि, ण्यपि। (४१) ददे = दधे; नवं = स्वयं; दविदूर = दवभिन्न; पतद्गङ्ग इवोत्तमाङ्गे = वहन्/द् गाङ्गमिव प्रवाहम् व.म.अ.ना.।

मूर्त्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।
समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे ।। ४२।।
तमन्वगच्छत् प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च पश्चात् ।
जयेति वाचा महिमानमस्य संवर्धयन्त्या हविषेव वह्निम् ।। ४३।।
एकैव मूर्त्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद् धाता तयोस्तावपि धातुराद्यौ ।। ४४।।
तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः ।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः ।। ४५।।
कम्पेन मूर्ध्नः शतपत्रयोनिं, वाचा हरिं, वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम् ।। ४६।।

(४२) गङ्गा और यमुना ने नारी शरीर धारण कर हाथ में चँवर ले रखे थे। ऐसा लगता था कि नदीरूप बदल जाने पर भी उन पर हंस उड़ रहे थे । **(४३)** उनके सामने चल रहे थे प्रथम विधाता (ब्रह्मा) और श्रीवत्सलाञ्छन साक्षात् पुरुष भगवान् विष्णु। ये कर रहे थे जय जयकार। उनकी यह वाणी बढ़ा रही थी शिव की महिमा, हविष्य से अग्नि के समान। **(४४)** एक ही मूर्त्ति तीन रूपों में बँट गई थी। इनमें प्रथमत्व और अवरत्व सबमें समान था। कभी विष्णु के पहले शिव, कभी शिव के पहले विष्णु कभी इन दोनों से पहले ब्रह्मा और कभी ये दोनों ब्रह्मा से पहले के माने जा सकते हैं। **(४५)** इन्द्र आदि लोकपाल भी अपनी श्री के लक्षण छोड़ छोड़ कर विनीत वेष धारण किए चल रहे थे उन देवाधिदेव के पीछे। भगवान् शिव ने जब उन पर दृष्टिपात करने की अनुज्ञा दी तो नन्दी की सूचना पर पहुँच रहे थे वे और कर रहे थे प्रणाम हाथ जोड़ जोड़कर। **(४६)** भगवान् शंकर ने सिर हिलाकर की अनुकम्पा ब्रह्माजी पर, बोलकर विष्णु पर और मुसकुराहट से इन्द्र पर। शेष सभी देवताओं को दर्शनमात्र देकर अनुगृहीत किया, उनकी प्रधानता के अनुसार।

(४२) सहंसपाते = सहंसपूते, सहजस्रपाते। (४३) मन्वगच्छत्= मभ्यगच्छत्; प्रथमो = प्रथमं; संवर्ध= समेध व.; **यन्त्या=यन्तौ** व.म.; द्र शृङ्गारप्रकाशे ५.७७। **षेव = षैव। (४४) सा = स़ौ; वरत्वम्= परत्वम्; रस्तस्य=रिस्तस्य; राद्यौ = रीड्यौ** व.। अत्र हि "हरेर्हरस्तस्य हरिः कदाचिद्धाते" ति तु युज्यते वक्तुम्। **(४५) लक्षणोत्सर्ग = लक्षणोत्सङ्ग, लाञ्छनोत्सर्ग; वेषाः = वेशाः** व.; **प्रणेमुः= विनेमुः। (४६) मूर्ध्नः = मूर्ध्ना; हणं = हरं; स्मितेन=स्मयेन; प्रधानम् = प्रभावम्, क्रमेण।**

तस्मै जयाशीः ससृजे पुरस्तात् सप्तर्षिभिस्तान् स्मितपूर्व्वमाह ।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्व्ववृता मयेति ।। ४७ ।।
विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार ताराधिपखण्डधारी ।। ४८ ।।
खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन् मुहुः प्रोतघने विषाणे ।। ४९ ।।
स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्त्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः ।। ५० ।।
तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः ।
स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः ।। ५१ ।।
तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्त्ती ।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ।। ५२ ।।

(४७) सप्तर्षियों ने भगवान् को जय का आशीर्वाद दिया तो उनसे स्मितपूर्वक भगवान् ने कहा– 'इस विस्तृत विवाहयज्ञ में आप अध्वर्यु हैं, आपका वरण पहले मेरे द्वारा किया जा चुका है। (४८) गन्धर्वराज विश्वावसु आदि ने गाना शुरू किया भगवान् शिव के त्रिपुर आख्यान का, उससे चन्द्रकलाधारी और अन्धकार मार्ग से अछूते शिव मार्ग पूरा कर ले गए। (४९) आकाश में खेलगामी वृषभ भगवान् शिव को अपनी पीठ पर बिठाए था और मेघ से युक्त सींग हिला रहा था, लग रहा था कि तटाभिघात से उन सींगो में पङ्क लग गया था। (५०) शत्रुपराभव से अछूता वह (नन्दी) नगेन्द्र से रक्षित नगर ओषधिप्रस्थ मुहूर्त्तमात्र में पहुँच गया। शिव के दृष्टिपात पहले ही उस नगर में लग चुके थे। वे लग रहे थे सुवर्णसूत्र। मानों उन्हीं से खिंचता चला गया वहाँ वह बिना विलम्ब के। (५१) घन के समान नीले कण्ठ वाले देवदेव महादेव उसके पास पहुँच कर अपने बाण से चिह्नित मार्ग (आकाश) से उतरकर पास के भूपृष्ठ पर पहुँचे। ('बाण' म., 'वाह' अ.ना.।) (५२) गिरिचक्रवर्ती हिमालय ने अगवानी की वह उनके आ पहुँचने से प्रसन्न और आश्वस्त थे। उसके साथ समृद्धिशाली बन्धुबान्धव थे।

(४८) हरैः = सरैः अ.ना.; वदानः=पदानः व.अ.ना.; ताराधिप = तारापति। (४९) धुन्वन् = धून्वन् अ.ना.। (५०) लग्नै = विग्नै; कृष्यमाणः=कृष्यमाणम् व.अ.ना.। (५१) स्वबाणचिह्ना = स्ववाहवाहात्, स्ववाहवाह्या; वतीर्य = वतार्य; मार्गा = वाहा । (५२) नाधिरूढै = नाभिरूढै; प्रतीतः = प्रहृष्टः; वृक्षैः = पुष्पैः।

वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ ।।५३।।
ह्रीमानभूद् भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्व्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद ।।५४।।
स प्रीतियोगाद् विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य ।
प्रावेशयन् मन्दिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पम् ।।५५।।
तस्मिन् मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि ।।५६।।
आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न संभावित एव तावत् करेण रुद्धोऽपि च केशपाशः ।।५७।।

वे सब हाथियों पर सवार थे। हाथी ऐसे लग रहे थे जैसे खिले (पुष्प)वृक्षों से युक्त स्वयं हिमालय के ही कटक हों। **(५३)** नगर के खुले दरवाजे वाले द्वार पर देवों और पर्वतों के वे दोनों वर्ग मिले। उनका हल्ला दूर तक फैल रहा था। ऐसा लगा जैसे बीच का सेतु टूट गया हो और दो जलराशि मिल गई हों। **(५४)** त्रैलोक्यवन्द्य शिव ने हिमाचल को प्रणाम किया। उसे बड़ी लज्जा आई। उसे यह पता ही नहीं चला कि उसका अपना सिर भगवान् की महिमा से पहले झुक चुका था। **(५५)** हिमालय की मुखश्री प्रीतियोग से खिल उठी। वह जामाता के आगे आगे चला और उसे अपने समृद्ध भवन में ले गया। वहाँ हर मार्ग पर घुटने तक फूल बिछे थे। **(५६)** उस क्षण नगर की सुन्दरियाँ शिव को देखने के लिए समुत्सुक हो उठीं, उनके अन्य सब कार्य छूट गए और प्रासादमालाओं पर उनकी ये चेष्टाएँ दिखाई देने लगीं। **(५७)** गवाक्ष की ओर सहसा चल पड़ी किसी के खुले जूड़े से फूल गिर पड़े ओर केशपाश को बाँध तो सकी ही नहीं, उसे हाथ से रोक भी नहीं सकी।

(५३) मिवौघौ = मिवौघः। (५४) वन्द्येन = नाथेन; दूरम् = दूरात् ना.। **(५५) रमृद्धमे = रमेनमृद्धं; मागुल्फ = माङ्गल्य; पणमार्ग = णान्तरपुष्प; पुष्पम् = मध्यम्; मार्गपुष्पम् = पुष्पमार्गम्, पुष्पतल्पम्, पुष्पवर्षम्, पुष्पप्रकरावकीर्णम्; आरोपितपुष्पमार्गम्, कीर्णापणमार्गपुष्पम् = कीर्णाम्बरपुष्पमार्गम्, कीर्णान्तरमार्गपुष्पम्, गाढार्पितपुष्पमार्गम्** व.म.ना.। **(५६) तस्मिन् = अस्मिन्; मालासु = मार्गेषु; त्यक्तान्य = मुक्तान्य। (५७) सहसा = त्वरया; वेष्टन = वेष्टित; वान्त=वीत; बन्धुं = बद्धुं** म., **बध्रेण; च = न** व.; **पाशः=हस्तः** व.। द्र. रघु. ७.६

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादालक्तकाङ्कां पदवीं ततान ।।५८।।
विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ।।५९।।
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ।।६०।।
अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ।।६१।।
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तरा सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ।।६२।।

(५८) प्रसाधिका के सामने फैला पैर अभी द्रवराग ही था कि उसे चट से खींचकर कोई लीलागति छोड़कर भागी और उसने गवाक्ष तक की भूमि अलते से रँग डाली। **(५९)** किसी ने दाहिने नेत्र में तो कज्जल लगा लिया, पर वामनेत्र अभी तक उससे वंचित ही था कि शलाका लिए दिए जा पहुँची वह वातायन के पास। **(६०)** खिड़की की जाली में दृष्टि दिए हुए चल पड़ी तो किसी की नीवी ढीली पड़ गई। उसने उसे हाथ से पकड़ लिया और पकड़ी पकड़ाई ही वह देखने में लगी रही, बाँध पाई नहीं। हाथ के आभरण की प्रभा उसकी नाभि में प्रविष्ट हो रही थी। **(६१)** कोई एकाएक उठ खड़ी हुई और आड़ी–टेढ़ी डग रखती भागी गवाक्ष की ओर तब तक वह करधनी आधी ही गूँथ पाई थी। आगे उसके भी गुरिए खिसकते गए और अन्त में उसका केवल धागा ही उसके अँगूठे में लिपटा रह गया। **(६२)** उनके मुखों से निकल रही थी गन्ध आसव की। उससे खिड़कियों के गर्भ भर गए। आँखे उनकी चंचल थीं, वे बन गई भौरें। इस प्रकार गवाक्ष कमल की सी सजावट लिए समझ में आए। (नारीमुख कमलपुष्प)।

(५८) प्रसाधि= प्रासाधि; आक्षिप्य= आकृष्य; उत्सृष्ट = उन्मृष्ट। द्र. रघुवंश ७.७। अत्र पद्यान्तरम्–

स्तनन्धयन्तं तनयं विहाय विलोकनाय त्वरया व्रजन्ती।
संप्रस्नुताभ्यां पदवीं स्तनाभ्यां सिषेच काचित् पयसाऽऽगवाक्षात्।।

'प्रस्नापयन्ती पदवीं स्तनाभ्यां सिषेचे'' ति, 'संप्रस्नुताभ्यां पदवीं सिषेच काचित् स्तनाभ्यामि'' इति चात्र पाठभेदः। **(५९) नेत्रा=नेत्रम्।** द्र. रघु.७.८। **(६०) न्तरप्रे=न्तरे प्रे; 'प्रस्था:००नीवीम्'= प्रस्थानभिन्नान–वबद्धनीविः** अ.ना.; **वासः=वस्त्रम्।** द्र. रघु.७.९। **(६१) अर्धाचिता=अर्धाञ्चिता; दुर्निमिते=दुर्निमितं/ ता/तुम्, दुर्निमिता/ ते।** द्र. रघु.७.१०। **(६२) गन्धगर्भै=गन्धिग/पर्णैः; सहस्रपत्रा=प्रफुल्लपद्मा; भरणा= वरणा** अ.ना.। द्र.रघु.७.११

तावत् पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे ।
प्रासादशृङ्गाणि दिवापि कुर्वञ् ज्योत्स्नाभिषेकद्विगुणद्युतीनि ।। ६३ ।।
तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तदा हि शेषेन्द्रियवृत्तिरासां सर्व्वात्मना चक्षुरिव प्रविष्टा ।। ६४ ।।
स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयाऽपि तप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताङ्कशय्याम् ।। ६५ ।।
परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ।। ६६ ।।
न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य ।
व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः ।। ६७ ।।

(६३) इसी बीच शिवजी राजपथ पर आ गए जिस पर पताकाएँ भरी हुई थीं और ऊँचे तोरण बने हुए थे। प्रासादों के शृङ्ग सफेद वर्ण के थे। शिव के सिर की चन्द्रकला के प्रकाश से वे दिन में भी द्विगुणित द्युतिवाले हो रहे थे। **(६४)** नेत्रों का उस समय एकमात्र दृश्य शिव ही थे। उन्हें नारियाँ नेत्रों से पी रही थीं। उनके मन अन्य किसी भी विषय की ओर नहीं जा रहे थे। ऐसा लगता था कि अन्य इन्द्रियों की वृत्तियाँ भी पूरी तरह से केवल चक्षु में ही सिमट गई थी। **(६५)** ओषधिप्रस्थ की विलासिनियाँ ये उद्गार प्रकट कर रही थीं 'कोमल अपर्णा ने जो इस पति के लिए दुश्चर तप किया वह ठीक ही किया। जो बड़भागिन इसकी दासी भी बन जाए तो वह भी कृतार्थ हो जाए, इसकी अङ्कशय्या पा ले तो क्या कहना। **(६६)** इस स्पृहणीय रूप वाले जोड़े को परस्पर में न मिलाता, तो इनके रूपविधान में विधाता को जो परिश्रम करना पड़ा था वह व्यर्थ हो जाता। **(६७)** काम का शरीर इसने नहीं जलाया, इस देवाधिदेव को देखकर लज्जावश काम ने स्वयं ही शरीर छोड़ दिया।

(६३) प्रसाद=विमान; ज्योत्स्नाभिषेक=द्विगुणाभिषङ्गा, ज्योत्स्नाविताना; णद्युतीनि=णच्छवीनि अ.ना.। **(६४) तमेकदृश्यं नयनैः=ताः शङ्करं दृष्टिभिरा; तामेकदृश्याम्** व.म.अ.ना.; **जग्मुः=जज्ञुः, जक्षुः; तदाहि =तथाहि; शेषे=सर्वे; सर्व्वात्मना चक्षुरिव प्रविष्टा=विनोपघातेन जडी/खिली—बभूव** अ.ना.। द्र. रघु. ७.१२। **(६५) दुश्चर = दुष्कर; पेलवया = पेशलया, कामलया; पि तप्तम् = भितप्तम्; दास्य = हास्य। (६६) शोभम्=रूपम्, शोभनम्; विफलो=वितथो** व.अ.ना.। द्र.रघु. ७.१४। **(६७) व्रीडा००म= व्रीडा/ला—वशादेन** अ.ना.; **मुदीक्ष्य, मवेक्ष्य** म.; **संन्यस्त = स न्यस्त** म.।

अनेन सम्बन्धमुपेत्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण ।
मूर्द्धानमालि! क्षितिधारणोच्चमुच्चैस्तरां वक्ष्यति शैलराजः ।। ६८।।
इत्योषधीप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखास्त्रिणेत्रः ।
केयूरचूर्णीकृत—लाजमुष्टिं हिमालयस्याऽऽलयमाससाद ।। ६९।।
तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद् दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ।। ७०।।
तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्व्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन् प्रशस्तमारम्भमिवोत्तमार्थाः ।। ७१।।
तत्रेश्वरो विष्टरभाग् यथावत् सरत्नमर्घ्यं मधुमच्च गव्यम् ।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत् सर्वममन्त्रवर्जम् ।। ७२।।

(६८) आलि! हमारा यह हिमालय इस ईश्वर (नामक जामाता) से सम्बन्ध पाकर क्षितिधारण से ऊँचा अपना सिर और ऊँचा रखेगा। (६९) ओषधिप्रस्थ की विलासिनियों की प्रिय बातें सुनते सुनते शंकर जी हिमालय के निवास भवन जा पहुँचे। वहाँ बरसा हो रही थी लावा की, जो चूरचूर हो रही थी केयूरों से। (७०) यहाँ शिवजी बैल पर से उसी प्रकार उतरे जिस प्रकार शरद् ऋतु के मेघ से सूर्य उतरता है। उतरकर हिमालय की दूसरी कक्ष्या में प्रविष्ट हुए जहाँ ब्रह्मा जी पहले से विराजमान थे। (७१) उनके पीछे थे प्रशस्त आरम्भ के पीछे उत्तम अर्थो के समान इन्द्र आदि देवगण, और सप्तर्षि आदि परमर्षि। गण भी पीछे पीछे जा रहे थे। (७२) वहाँ शिव ने आसन ग्रहण किया। हिमालय द्वारा उन्हें विधिवत् दिया गया रत्नयुक्त अर्घ्य, मधुयुक्त गव्य और दो नए दुकूल। शिवजी ने यह सब स्वीकार किया। साथ में मन्त्र बोले जा रहे थे

(६८) उपेत्य= अवाप्य अ.ना.; मूर्द्धा००च्चमु=मूर्धानमाक्रम्य महीधराणामु; तरां = तरं म.। (६९) श्रोत्रसुखास्त्रिनेत्रः= श्रोत्रमनोऽभिरामाः; त्रिनेत्र=गिरीशः; केयूर = कर्पूर; चूर्णी = चूर्णैः; लाज=राज; मुष्टिं = वृष्टिं, वर्षम्, मार्गम्, मुच्चै; हिमालयस्यालयमाससाद=संबन्धिनः सद्म समाससाद। सद्मपक्षे मुष्ट्यादीनि विशेषणान्यपि नपुंसकान्येव वाच्यानि। ससाद = ससाद।। कुलकम्। (७०) तत्रा = ततो व. अ.ना.; कक्ष्या=कक्षा। द्र.रघु ७.१७। (७१) तमन्वगिन्द्र=सर्वे महेन्द्र; मभ्यगच्छन् = न्वगच्छन् अ.ना.; प्रशस्त=प्रशस्य, यशस्य व.अ.ना., प्रकृष्ट, यशः समारम्भ; वोत्तमार्थाः = वोत्तरार्थाः। (७२) अर्घ्य=अर्घम्; गव्यम्=हव्यम्; नवे दुकूले ००नीतं=नवं दुकूलं ००नीतं अ.ना.; वर्जम्=बाह्यम्, वन्ध्यम् व.।

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः ।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ।। ७३ ।।
तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुः—कुमुदः कुमार्या ।
प्रफुल्लचेतः—सलिलः शिवोऽभूत् संसृज्यमानः शरदेव लोकः ।। ७४ ।।
तयोः समापत्तिषु कातराणि किञ्चिद् व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ।। ७५ ।।
तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्त्तिः ।
उमातनौ गूढतनोः स्मरस्य तच्छंङ्किनः पूर्वमिव प्ररोहम् ।। ७६ ।।
रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ।। ७७ ।।

(७३) शिवजी ने जब दुकूल धारण कर लिए तब उन्हें ले जाया गया वधू के पास। ले जाने वाले थे अन्त:पुर के पहरेदार। यह सब वैसे ही हुआ जैसे स्फुट फेनराजि से युक्त समुद्र को चन्द्रपाद वेला के पास ले जाते हैं। **(७४)** वधू से संसृष्ट हो रहे वर रूपी शम्भु ऐसे लगे जैसे शरत् से संसृष्ट लोक लगता है। वधू के आननचन्द्र की कान्ति बढ़ गई थी। शिव के नेत्ररूपी कुमुद खिल उठे थे और चित्तरूपी सलिल प्रसन्न था। **(७५)** उन दोनों के एक दूसरे के लिए चञ्चल नेत्र लज्जा की मनोज्ञ यन्त्रणा भोग रहे थे। मिल जाते तो कातर हो उठते, कुछ ठहरते और लौट आते थे। **(७६)** हिमालय ने पार्वती का ताम्र उँगली वाला हाथ दिया तो उसे अष्टमूर्त्ति शिव ने ग्रहण कर लिया। वह मानों शिव से डरे और उमा के शरीर में छिपे काम का पहला अंकुर था। **(७७)** उमा को रोमाञ्च हो उठा और शिव की उँगलियाँ पसीज़ गईं। पाणिसमागम ने कामवृत्ति दोनों में समान रूप से बाँट सी दी।

(७३) दुकूल = दुगूल ; वासाः व.= धारी अ.ना., वान् सोऽथ; रक्षैः = दक्षैः, पक्षैः, मुख्यैः; समीपं = सकाशं; व.अ.ना.; स्फुट = सित; राजि:= राशिः अ.ना.। ऋतुसंहार १.२। (७४) प्रवृद्धा = विशुद्धा, विवृद्धा; संसृज्य= संस्पृश्यं, संपृच्य; मानः = माणः; लोकः = सिन्धुः। (७५) 'तयो००तानि' = 'तयोरपाङ्गप्रविलोकितानि क्रियासमापर्त्तिनिवर्त्तितानि' ; यन्त्रणामानशिरे = यन्त्रणामन्वभवन्; मनोज्ञाम् = मुहूर्त्तम्। (७६) उमातनौ = उमात्मना; व.अ.ना., तच्छङ्किन:=तच्छङ्कितः। (७७) दुमायाः = तु कुमार्याः; स्विन्नाङ्गुलिः = चित्राङ्गुलिः; मनोभवस्य = मनोभवेन।

प्रयुक्तपाणिग्रहणं यदन्यद् वधूवरं पुष्यति कान्तिमग्र्याम् ।
सान्निध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ।। ७८ ।।
प्रदक्षिणप्रक्रमणात् कृशानोरुदर्च्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्त्तमानमन्योन्यसंसक्तमहस्त्रियामम् ।। ७९ ।।
तौ दम्पती त्रिः परिणीय वह्निं कराग्रसंस्पर्शनिमीलिताक्षीम् ।
तां कारयामास वधूं पुरोधास्तस्मिन् समिद्धार्चिषि लाजमोक्षम् ।। ८० ।।
सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद् वदनं निनाय ।
कपोलसंसर्पिशिखः स तस्या मुहूर्त्तकर्णोत्पलतां प्रपेदे ।। ८१ ।।
तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद् बभूव ।। ८२ ।।

(७८) पाणिग्रहण हो जाने पर जो एक नवीन और आकर्षक कान्ति वर और वधू दोनों में अलग अलग व्यक्त हुई उसकी छटा दोनों के सान्निध्य योग से और अधिक और अवर्णनीय सी दिखाई दी। (७९) प्रज्वलित अग्नि की प्रदक्षिणा कर रहे दोनों की वह जोड़ी ऐसी लगी जैसी मेरु के उपान्तभागों में घूमते घूमते आ मिले दिन और रात की जोड़ी लगती है। (८०) दोनों ने अग्नि की तीन बार प्रदक्षिणा की और फिर पुरोधा ने कराग्रसंस्पर्श से निमीलिताक्षी पार्वती से समिद्ध अर्चि वाली अग्नि में लाजाहुति छुड़वाई। (८१) गुरु के कहने से पार्वती ने लाजधूम को मुख तक आने दिया। उसकी सुगन्ध मीठी थी। जब उस धूम की शिखा कपोल पर आई तो उसने एक क्षण के लिए कर्णोत्पल का काम कर दिया। (८२) इस आचारधूम के ग्रहण से वधूमुख पर कुछ आर्द्र और अरुण रेखाएँ कपोलों पर उभर आई, आँखों का कालाञ्जन कुछ उच्छ्वसित हो गया और कान में जो यवाङ्कुर खुसा था वह क्लान्त हो गया।

(७८) दनयोः = दुभयोः; तदानीं = यदा यत्; रुभयस्य = र्मिथुनस्य; कथ्यते = कथ्यताम् व.। (७९) क्षिणप्र = क्षिणं प्र; चकासे = चकाशे, बभासे अ.ना.; ष्विव वर्त्त = न्ते परि अ.ना.; संसक्त=संयुक्त। पद्यमिदं वल्लभो न पठतीति नन्दर्गीकरभट्टः। (८०) कराग्र = अन्योन्य म.अ.ना., अङ्गाङ्ग भृङ्गेण;; संस्पर्श = सम्पर्क्क, संसक्त, क्षीम्=क्षौ; तां=स व.म.अ.ना.; समिद्धार्चि = समृद्धार्चि; मोक्षम् = होमम्, मार्गम्। द्र. रघु.७.२५। (८१) सा = स; गन्धं = गन्धिं; संसर्पि = संस्पर्शि; शिखः = शिखम्। द्र. रघु. ७.२६। (८२) लेख=रेखः; लाञ्जन=लागुरुपत्र /गण्ड; राग = युग्म; मक्ष्णोः = मक्षिणी। द्र. रघु.७.२७।

वधूं द्विजः प्राह तवैष वत्से! वह्निर्विवाहं प्रति पूर्व्वसाक्षी ।
शिवेन भर्त्रा सह धर्म्मचर्य्या कार्य्या त्वया मुक्तविचारयेति ।। ८३।।
आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्वणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ।। ८४।।
ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ।। ८५।।
इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ।। ८६।।
वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि! वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्त्तावाशास्यचिन्तास्तिमितो बभूव ।। ८७।।
क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात् कनकासनस्थौ ।
जायापती लौकिकमेषितव्यमार्द्राक्षतारोपणमन्वभूताम् ।। ८८।।

(८३) पुरोहित ने वधू से कहा वत्से! यह वह्नि है, तुम्हारे विवाह का प्रथम साक्षी। अब तुम शिव के साथ धर्मचर्या करो बिना विचारे। (८४) भवानी ने गुरु का यह वचन कान तक नेत्र फैलाकर पिया, निदाघकाल के उग्र ताप से तप्त पृथिवी जैसे इन्द्र के द्वारा बरसाया पहला जल पीती है। (८५) प्रियदर्शन ध्रुव भर्त्ता ने 'ध्रुव' दर्शन के लिए कहा तो उमा ने मुख उठाया और लज्जा से सन्न कण्ठ से जिस किसी प्रकार कह दिया कि 'देख लिया'। (८६) इस प्रकार विधिज्ञ पुरोहित ने पाणिग्रहण की विधि जब संपन्न करा दी तब दोनों ने पद्मासन पर बैठे ब्रह्माजी को प्रणाम किया। (८७) विधाता ने वधू को तो आशीर्वाद दिया 'वीरप्रसवा हो', किन्तु वाचस्पति होते हुए भी अष्टमूर्त्ति के विषय में आशास्य वस्तु की चिन्ता नहीं कर सके। (८८) उपचारयुक्त चौकोर वेदी पर रखे सुवर्ण सिंहासन पर उन दोनों को बिठाया गया। वहाँ उन दोनों दम्पती ने आर्द्राक्षत के आरोपण का अनुभव किया जो लौकिक मंगलविधान था।

(८३) द्विजः=गिरिः ना.; तवैष=स एष; वत्से=पुत्रि; पूर्व्व=कर्म्म व.म.अ.ना.; मुक्त=युक्त। (८४) नान्तं= नान्तात्; श्रवणे = श्रवणौ, श्रवसी; वितत्य=विवृत्य व.ना.; भवान्या=भवत्या; लोल्वण= लोलुन, लोल्लक; तापये=तप्तये, भेदये अ.ना., खेदये। द्र. रघु. ७.३३, शृ.प्र. ५.१०३। (८५) ध्रुवेण = शिवेन; दृष्ट इ=दृष्टामि; कण्ठी=कण्ठम्। (८६) प्रयुक्त=प्रसक्त। (८७) मूर्त्तावा =मूर्त्तेरा ना.। (८८) चारां= कारां, कारः; रस्र=रन्त व.अ.ना.; वेदीं=वेदिं अ.ना.; एषितव्य = एषणीय, ईषितव्यं। द्र. रघु. ७.२८।

पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम् ।। ८९।।
द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ।। ९०।।
तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्त्तं प्रयोगमाद्यं ललिताङ्गहारम् ।। ९१।।
देवास्तदन्ते हरमूढभार्य्यं किरीटबद्धाञ्जलयो निपत्य ।
शापावसाने प्रतिपन्नमूर्त्तेर्ययाचिरे पञ्चशरस्य सेवाम् ।। ९२।।

(८९) लक्ष्मी ने उन दोनों पर कमल का आतपत्र ताना, जिसकी पँखुड़ियों में से टपकते जलबिन्दुओं से लगता था कि मुक्ताफल जड़े हुए हैं। आतपत्र का नालदण्ड लम्बा था। (९०) सरस्वती ने भी उन दोनों की स्तुति दो प्रकार की बोलियों में की। संस्कारपूत बोली (संस्कृत भाषा) में वर की और वधू की स्तुति उस बोली में जिसका निबन्धन सुखग्राह्य होता है (प्राकृत भाषा)। (९१) उन्होंने अप्सराओं द्वारा किया, नाट्यप्रयोग भी देखा जिसमें सन्धियों में वृत्तियों का अन्तर स्पष्ट था और रसपरिवर्त्तन में राग बना हुआ था। नाट्य उत्कृष्ट था। उसमें अङ्गहार ललित थे। (९२) देवताओं ने सपत्नीक बन चुके हर से किरीट चरणों पर रखकर प्रार्थना की, कि काम, जिसका शाप उमामहेश्वर विवाह के साथ समाप्त हो चुका था, को उसका शरीर मिल जाए और उसकी सेवाएँ स्वीकार की जाएँ ।

(८९) लग्नै = लम्बै व.अ.ना.; जलबिन्दुजालै=जलसन्निपातै/वृन्दै/बन्धै व./वर्षैः अ.ना.; कृष्ट = क्रुष्ट ना.; फलजाल = फलभक्ति; कमलात = कलधौत। (९०) प्रयुक्तेन = प्रभूतेन; वधूं सुख = वधूमुख। (९१) बद्ध = बन्ध, भिन्न; ङ्गहारम् = ङ्गरागम्। (९२) बद्धा = जुष्टा, दष्टा व.अ.ना.; साने प्रति = सानप्रति व.अ.ना.; प्रतिपन्न = प्रतिलब्ध,प्रतिबद्ध। (९३) सायकानाम् = सायकस्य, सेवकानाम्; काले प्र = कालप्र म.; कार्य = काल व.ना., सिद्धिः।

अतः परं पद्यम् – अतः परं तत्र गिरीन्द्रनाथो यथाप्रधानं त्रिदिवेश्वराणाम्।
चकार रत्नैः पृथगर्हणां स मेनोपनीतैर्विधिवत् प्रणम्य।।

अत्रापि पाठभेदाः अतः = ततः व.; त्रिदिवे = त्रिदशे; नीतै = नीतां व.।

अतः परं पञ्च पद्यानि –

तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम् ।
काले प्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्त्तृषु सिद्धिमेति ।। ९३।।

अथ विबुधगणाँस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपति–कन्यामाददानः करेण ।
कनककलशरक्षाभक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात् ।। ९४।।

(९३) भगवान् का क्रोध हट गया था, अतः उन्होंने काम के बाणों का विषय स्वयं को भी बनाने की अनुमति दे दी। कार्य करने वाले जानते हैं कि मालिक से उपयुक्त समय की गई याचना सफल होती है। (९४) अब शिवजी ने आए देवगणों की विदा की और पार्वती को हाथ से पकड़े हुए कौतुकागार (कोहवर) पहुँचे, जहाँ शय्या जमीन पर विछी थी, कनक के पूर्ण कलश रखे थे रक्षा के लिए माँड़ने माँड़ दिए गए थे। (कौतुकागार का अर्थ अरुणगिरिनाथ ने मंगलगृह किया है, किन्तु है यहाँ मिलनगृह) ।

देवेशसंपादितचारुमूर्त्तिस्तत्संसदि प्रादुरभूत् स कामः ।
लक्ष्यीकृतं शङ्करमेव भूयो विध्यन् शरैः पुष्पमयैरमोघैः ।।
तं प्रेक्ष्य चक्रीकृतचारुचापमत्यन्तसंभावितदेवकार्यम् ।
ब्रह्मादयः साँध्विति देवसंघाः प्रीत्या मुहुः प्राहुरिति स्तुवन्तः।।
पुष्पेषुमेतं च रतिर्विलोक्य पूर्वोक्तवाक्प्रत्ययकालजातम् ।
हृत्प्रेमसंहर्षविमूढभावात् किं किं न कुर्यामिति नाभ्यजानात् ।।
चेतोभवश्चाप्युपलब्धसंज्ञो वागीश्वरादीनभिवीक्ष्य देवान् ।
बद्धाञ्जलिर्न्यस्तशरासनेषुर्भूमौ प्रणामेन ततः पपात ।।
ते तं समुत्थाय कृतप्रणामं रतिं वियोगाभिकृशां च तेन ।
संयोज्य पूजां प्रतिचक्रुरस्य सत्कार्मुकस्या०००० ।।

(९४) ददानः = दधानः व.; रक्षाभक्ति = युक्तं भक्ति म., कक्षासक्ति, रक्षाशक्ति।

नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृतोत्क्षेपमीशः ।
अपि शयनसखीभ्यो दत्तवाचं कथञ्चित्
प्रमथमुखविकारैर्हासयामास गूढम् ।। ९५।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ पार्वती—परमेश्वरपरिणयो नाम सप्तमः बुद्धिसूर्यमूर्त्तिः सर्ग्गः।। ७।।

(९५) कौतुकागार में गौरी थी नवपरिणय की लज्जा से भूषित। ईश को कर रही थी वह विफल— वे चेहरा उठाते, वह टेढ़ा कर लेती। उत्तर शयनसखियों को जिस किसी प्रकार देती (जबकि प्रश्न करते ईश)। तब (हास्यरस के देवता अपने) गणों की सहायता लेनी पड़ी परमात्मा को। गणों ने नाना प्रकार के मुख बनाए और गौरी को हँसाने में सफलता अर्जित की, किन्तु गौरी मन ही मन हँसी।

इस प्रकार महाकवि कालिदास की कृति 'कुमारसंभव' नामक अष्टमूर्त्ति महाकाव्य में उमापरिणय नामक सप्तम (बुद्धिसूर्यमूर्त्तिः) सर्ग पूर्ण हुआ ।। ७ ।।

(९५) तत्कृतोत्क्षेप = तत्कृताक्षेप म., तर्किताक्षेप; प्रमथ = प्रथम; मुख = सुख; कारै = हारै।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे महाकवि—कालिदासकृतौ
उमा/गौरी/पार्वती—परमेश्वरपरिणयो नाम सप्तमः सर्ग्गः ।। ७ ।।

।। अष्टमः सर्गः।।

ॐ पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत् कामदोहदमनोहरं वपुः ।।१।।
व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयने पराङ्मुखी सा तथापि रतये पिनाकिनः ।। २।।
कैतवेन शयिते कुतूहलात् पार्वती प्रति मुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत् ।। ३।।
नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः ।
तद्दुकूलमथ चाभवत् स्वयं दूरमुच्छ्वसितनीविबन्धनम् ।।४।।

(१) शिव और शिवा का पाणिग्रहण–संस्कार संपन्न हो गया (परन्तु विरक्त वर का क्या भरोसा, हो सकता है, वह कौतुकागार में भी समाधि लगा ले) पार्वती शिव को और अधिक लुभावनी लगी। वह शिव के प्रति अनुराग भी लिए थी और भय भी। (शृ.प्र. २३.३६) (२) शिव कुछ पूछें तो पार्वती उत्तर न दे, शिव वस्त्र का छोर छुएँ तो पार्वती जाने को तैयार हो जाए, सोये तो एक ही बिस्तर पर, परन्तु पार्वती पीठ किए रहे शिव की ओर। किन्तु वह शिव को अच्छी ही लगे। (३) शिव सो जाने का अभिनय करें तो पार्वती में कुतूहल जागे कि सो गए हैं क्या तो शिव का, मुख निहारें और पाएँ कि आँख से ज्योति निकल रही है और शिव मुसकुरा रहे हैं तो आँख मींच लें जैसे बिजली सी कौंध गई हो। (शृ.प्र.१७.१०८) (४) धीरे धीरे शिव ने हाथ बढ़ाया पार्वती की नाभि की ओर तो पार्वती काँप उठी और हाथ रोकने लगी, परन्तु उसका दुकूल अपने आप ढीला पड़ गया।

(१) पाणि= (९०) ऐं नमः, (९०) ॐ अर्हं।। पाणि; दोहद = दोहन, दौहृद व.म.अ.ना.; **मनोहरं वपुः = सुखं मनोहरम्** व.म.अ.ना.। **(२) दधे = ददे ; दवलम्बि = दविलम्बि। (३) कैतवेन=कैतवेषु ; शयिते = शयने; पार्वती = पार्वतीम् ; प्रति मुखं = प्रतिमुखं** व.; **रुन्मिषति सस्मितं = रुन्मिषितमस्मितं; प्रिये = प्रियो ; विद्युदाहत = विद्युताहत, विहतं** व., **पिहितम्, विहितम्, विद्युता हत इव।** एभिः पाठैर्निष्पन्नरूपः श्लोक एवंविधः – **कैतवेषु शयने कुतूहलात् पार्वती प्रतिमुखं निपातितम्।
चक्षुरुन्मिषितमस्मितं प्रिये विद्युतेव पिहितं न्यमीलयत्।।**

(४) सकम्पया = सशङ्कया; तया करः = करस्तया; तद्दुकूल = तन्नितम्बमथवाभवत् व.; **चाभवत् = मभवत् तदा, मिव चाभवत्, मथ चाऽगलत्।**

एवमालि! निगृहीतसाध्वसं शङ्करो रहसि सेव्यतां त्वया ।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्त्तिनि प्रिये ॥५॥
अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥६॥
शूलिनः करतलद्वयेन सा सन्निरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ॥७॥
चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ॥८॥
यन्मुखग्रहणमक्षताधरं दत्तमव्रणपदं नखं च यत् ।
यद् रतं च सदयं प्रियस्य तत् पार्वती विषहते स्म नेतरत् ॥९॥
रात्रिवृत्तमनुयोक्तुमुद्यतं सा विभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया शंसितुं च हृदयेन तत्वरे ॥१०॥

(५) सखियों ने सिखाया तो बहुत कि 'एकान्त में शिव का सेवन इस प्रकार करना, डरना नहीं, किन्तु जब शिव सामने आते तो उसे वह सब याद नहीं आता इतनी आकुल हो जाती वह। (६) बातचीत शुरू करने के लिए शिव कुछ भी पूछते तो पार्वती उन्हें केवल देख लेती और उत्तर में सिर हिला देती (शृ.प्र. ७.१५९)। (७) शिव पार्वती का अंशुक छिन लें तो दोनों हाथेलियों से शिव के दोनों नेत्र ढाँक ले, परन्तु उनका ललाटनेत्र देखता ही मिले और एकान्त की इस लीला में पार्वती का यत्न व्यर्थ होता रहे। (८) शिव को नई बहू के साथ हो रही रमणकेलि अच्छी ही लगती, यद्यपि चुम्बनों में अधरदान न मिलता, निर्दय आलिङ्गन में हाथ ढीले रहे आते, इस प्रकार बेचारा काम ही परेशान हो जाता, क्योंकि उस वधू से उत्तर ही न मिले। (९) स्थिति में कुछ सुधार आया। पार्वती मुखग्रहण को तो स्वीकार कर लेती, किन्तु अधर के क्षत के बिना, नखक्षत भी होने देती, किन्तु व्रण न होने तक और रति भी वहीं तक जहाँ तक निर्दयता न आवे। (१०) सबेरा हो और पार्वती को सखियाँ आ घेरें और लगें पूछने कि रात में क्या-क्या हुआ तो पार्वती लाजवश उनका कुतूहल तो शान्त न करे,

(६) वीक्षितेन=वीक्ष्यते स्म, वीक्षणेन; परिगृह्य=परिवीक्ष्य। (७) मोघयत्नवि=मोघयत्यवि, मोघवृत्तिवि। (८) चुम्बनेष्व=चुम्बने त्व; दान=पान व.; **सन्न=खिन्न, स्विन्न; हस्त=पाणि; मदयो=सदयो; गूहने=गूहनम्; प्रभोः=विभोः प्रियं प्रभोः=प्रभोः प्रियं, प्रियं सदा; भप्रतिकृतं=भं प्रतिकृतं; रतम्=कृतम्।** द्र.रघु. १९.२७। **(९) दत्त=दन्त,न्यस्त,दान,पान; नखं च=नखस्य; प्रियस्य तत्=हरस्य तत्; नेतरत्=नेतरम्। (१०) विभात=प्रभात** अ.ना.; **ह्रिया = रहः** अ.ना., **च=तु; 'शंसि००तत्वरे'='तत्परा च हृदयेन शंसितुम्'; तत्वरे=तत्परा।**

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमनुबिम्बमात्मनः कानि कानि न चकार लज्जया ॥११॥
नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् ।
भर्त्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ॥१२॥
वासराणि कतिचित् कथञ्चन स्थाणुना रतमकारि चानया ।
ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् ॥१३॥
सस्वजे प्रियमुरोनिपीडिता प्रार्थितं मुखमनेन नाहरत् ।
मेखलाऽपनयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ॥१४॥
भावसूचितमदृष्टविप्रियं चाटुमत् क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तदा तयोः प्रेम रूढमितरेतराश्रयम् ॥१५॥

किन्तु कहने के लिए उतावली भी रहे। (पार्वती का हृदय ही तो कालिदास के रूप में रहा है मुखर।) (११) पार्वती दर्पण में अपना परिभोग देखती और देखती अपने प्रतिबिम्ब के पीछे प्रिय का प्रतिबिम्ब तो लज्जा में क्या क्या नहीं करती। (१२) माता मेना ने भी पुत्री को देखा कि उसके यौवन का परिभोग शिव ने कर रखा है तो उसका चित्त आश्वस्त हुआ। माता की चिन्ता तब मिटती है जब पुत्री उसके पति को प्यारी दिखाई देती है। (१३) पार्वती ने कुछ दिनों तक तो शिव के साथ किसी किसी प्रकार रत किया, बाद में जब उसे काम का रस मिल गया तो धीरे धीरे उसने रति में प्रतिकूलता छोड़ दी। (शृ.प्र. ३४.९) (१४) प्रिय जब स्तनों को मसले तो वह उसको आलिङ्गन दे दे, चुम्बन के लिए मुख उठावे तो मोड़े नहीं, उसके करधनी छूते हाथ को धीरे धीरे रोके। (शृ.प्र. १६.१८१)। (१५) कुछ ही दिनों में उनका एक दूसरे पर जो प्रेम था वह रूढ हो गया, उसमें अनुराग की तो प्रतीति हो, पर विप्रिय दिखाई न दे, चाटु रहे और क्षण भर के वियोग में कातरता भी। (शृ.प्र. २२.२३८)

(११) दर्पणे च=दर्पणेषु; दर्शिनी=दर्शिनो; प्रेक्ष्य = वीक्ष्य; मनुबिम्ब=म् अनु बिम्ब, म् उपबिम्ब; कानि न=कानि च, कान्यपि अ.ना.; **लज्जया = लीलया। (१२) परिभुक्तयौवनां = परिमुक्तदर्शनाम्; समाश्वसत् = समाश्वसीत्** व.अ.ना. **(१३) रतमकारि चा= पदमकार्यत** व.म.अ.ना.; **रतिदुःख=रतदुःख।** स्मरणीयोऽत्र 'शर्वे पदं कारिते' कुमार.६.१४ इत्यादिषु सप्तमीप्रयोगः। **(१४) पीडिता = पीडितम्** व.अ.ना., **पीडनम्; पनय = प्रर्णय** व.म.अ.ना.। **(१५) भाव = हाव; चाटुमत्=चाटु तत्क्ष, दार्ढ्यभाक्; तदा=तथा; तदा तयोः=तयोस्तदा, तयोरभूत्; रूढ=गूढ।**

तं यथाऽऽत्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकनिर्वृतिः ।।१६।।
शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया यत् तदेव गुरुदक्षिणीकृतम् ।।१७।।
दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत् क्षतं मौलिचन्द्रशकलेन शूलिनः ।।१८।।
चुम्बनादलकचूर्णदूषितं शङ्करोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ।।१९।।
एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमात्रमवसद् वृषध्वजः ।।२०।।
सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखपीडितम् ।
तत्र तत्र विजहार संपतन्नप्रमेयगतिना ककुद्मता ।।२१।।

(१६) वधू को उसके अनुरूप वह पति जिस प्रकार अनुरक्त करता गया उसी प्रकार वर को वधू भी। जाह्नवी सागर से पृथक् नहीं होती और सागर भी उसी के जल से परितृप्त होता है। **(१७)** पार्वती को निधुवन का उपदेश देने वाले गुरु थे शिव। पार्वती को जो निपुणता सिखलाई उसने उसी को गुरुदक्षिणा बना दिया। (शृ.प्र. ३४.८) **(१८)** शिव जब गहरा दंशकर अधरोष्ठ को छोड़ते तो पार्वती वेदना के कारण पहले तो हाथ झटकारती फिर शिव के ही सिर के चन्द्रखण्ड से उसे सिराती। **(१९)** पार्वती चुम्बन करती तो उसके ललाट का चूर्ण ऊपर के नेत्र में गिर जाता। तब शिव उसे पार्वती के मुखपवन को दे देते। उससे आती कमल की गन्ध। (शृ.प्र. ३.२४) **(२०)** इस प्रकार इन्द्रियसुख के रास्ते पर चलकर शिव ने मन्मथ को अनुगृहीत करते हुए हिमालय के भवन में पार्वती के साथ एक मास निवास किया। **(२१)** इसके पश्चात् उन स्वभू शिव ने हिमालय से अनुज्ञा ली और अप्रमेयगति वृष से विभिन्न स्थानों पर विहार करते रहे। हिमालय पुत्रीविरह से कातर थे।

(१६) मुख = सुख। (१७) निधुवनो = निधुवरो। (१८) दष्ट = दग्ध; मौलि = मूर्ध्नि; हस्त = पाणि; क्षतं = क्षणं। (१९) अलक=अलिक; दूषितम् = रूषितम् व.अ.; रोऽपि = रोऽथ; वाहिने = वादिने, वायवे। (२०) वर्त्मनः = चात्मनः; मासमात्र = मासमेक। (२१) अनुमान्य = अनुमन्त्य, अनुमत्य; पीडितम् = खेदितम्; संपतन् = संचरन्।

मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतान् कृती ।
हेमपल्लवविभङ्गसंस्तरानन्वभूत् सुरतमर्द्दनक्षमान् ।। २२।।
पद्मनाभचरणाङ्किताश्मसु प्राप्तवत्स्वमृतबिन्दवो नवाः ।
मन्दरस्य कटकेषु चाऽवसत् पार्वतीवदनपद्मषट्पदः ।। २३।।
वारणस्वनितभीतया तया कण्ठसक्तघनवाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ।। २४।।
तस्य जातु मलयस्थलीरतेर्धूतचन्दनलतः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ।। २५।।

(२२) वायुवेग वाले वृषभ से वे पहुँचे सुमेरु अर्थात् सुवर्ण पर्वत वहाँ विछौने पल्लव के और पल्लव सोने के, अतः सुरत में मसले भी जाएँ, किन्तु म्लान न हों। पार्वती के स्तनों से पुरस्कृत इन सबका रस शिव ने लिया। (रति की वृषभास्कन्दित मुद्रा। शृ.प्र. ३४.९९) (२३) अब शिव जी पहुँचे मन्दर—पर्वत पर और वहाँ उसकी चोटियों पर रहे कुछ समय। पार्वती के मुखकमल पर शिव बने हुए थे मत्तभ्रमर। चोटी की शिलाएँ भगवान् विष्णु के चरणों से अंकित थी और अमृत की नई नई बूँदे प्राप्त कर चुकी थीं। (शृ.प्र. ३४.१००) (२४) उन जगत् के गुरु शिव ने एकपिङ्गल गिरि पर चन्द्र की स्वच्छ और उज्ज्वल चन्द्रिका का पान किया। वहाँ हाथी चिंघाड़े तो डरकर पार्वती शिव के कण्ठ में कसकर लिपट गई । (शृ.प्र. २०.१८) (२५) किसी समय मलयपर्वत पर उन दोनों ने रति लीला की। उसमें आई प्रिया की थकावट को दक्षिणानिल ने चाटुकार के समान दूर किया। दक्षिणानिल चन्दन की शाखाओं को हिलाकर आया करता और उसमें लवङ्ग के पुष्प भी रहते। (शृ.प्र. ३४.१०२)

(२२) मेरुमेत्य = मेरुमत्सु; दाशुगोक्षकः = दाशुवाहनः व.म.अ.ना.; पुरस्कृतान् = पुरस्कृतः म.अ.ना. ; संस्तरान् = संस्कृतान्; मर्द्दन = तत्परः व.म.; क्षमान् = क्षपाम् व.म.। तेन "सुरततत्परः क्षपामि" ति पाठान्तरमत्रोन्नेयम्।। (२३) पद्मनाभ = पद्मनाम, पद्मराग व.म.ना.; चरणा = वलया; नवाः = नवान्; मन्दरस्य=मान्दरेषु; चाऽवसत् = चाभवत् अ.ना.। (२४) वारण = रावण व.म.; स्वनित = ध्वनित; घन= दृढ, मृदु म.अ.ना.; बन्धनः = बन्धनम्।

सँनिधेर्ध्वनितस्येव स्वनितस्यात्रयुज्यते।
वारणो रावणस्थाने पठितुं शब्दकोविदैः।।

(२५) रतेः=रते व.म.अ.ना., तले; धूत=भूत; लतः=रसः, वनः; क्लमम् = श्रमम्; सलवङ्गकेसरः= सतुषारशीतलः; दक्षिणा=दर्दुरा।

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।
खे व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ।। २६ ।।
तां पुलोमतनयाऽलकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ।। २७ ।।
इत्यभौममनुभूय शङ्करः पार्थिवं च दयितासखः सुखम् ।
लोहितायति कदाचिदातपे गन्धमादनगिरिं व्यगाहत ।। २८ ।।
तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम् ।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्म्मचारिणीम् ।। २९ ।।
पद्मकान्तिमरुणंत्रिभागयोः संक्रमय्य तव नेत्रयोरिव ।
संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ।। ३० ।।

(२६) आकाशगङ्गा में किया पार्वती ने जलविहार। उसने सुवर्णकमल से प्रिय को लगाई चोट और प्रिय के हाथों फेंके पानी से उसकी भी आँखे हो गई बन्द। उसमें जो मीनपङ्क्ति थी उससे मेखला दोगुनी हो रही थी। (२७) शिव स्वर्ग के नन्दनवन में भी पहुँचे। वहाँ शची की अलकों में लगने वाले पारिंजात पुष्पों से जब शिव पार्वती का शृंगार कर रहे थे तो अप्सराएँ उन्हें बड़ी ललक के साथ देख रही थी। (२८) इस प्रकार शिव ने पार्वती के साथ पृथिवीलोक का भी सुख भोगा और अपार्थिव (स्वर्ग का) सुख भी। पश्चात् कभी गन्धमादन पर्वत पर पहुँचे जब धूप लाल हो रही थी अर्थात् सन्ध्याकाल। (२९) वहाँ भगवान् शङ्कर बैठे थे काञ्चनशिलातल पर और उनके बाएँ हाथ को तकिया बनाकर विराजमान थी पार्वती जी। भगवान् ने देखा कि सूर्य डूबने वाला है तो पार्वती से कहना शुरू किया। (शृ.प्र. ३४.१३)। (३०) पार्वती तुम्हारे नेत्रों के कोने अरुण वर्ण के हैं, इनमें पद्म की कान्ति संक्रान्त कर दिनपति सूर्य दिन का संवरण कर रहे हैं वैसे ही जैसे प्रलय में परमेश्वर करते है संवरण जगत् का।

(२६) कराम्बुवि=कराम्बुज; खे व्यगा= सा वगा; णीमुमा = णीपयः; मेखला=मेखलम्। (२७) प्रसाधयन्=प्रसादयन्, प्रसाधयत्; वधूभिरीक्षितः=वधूनिरीक्षितः, वधूभिरैक्ष्यत अ.ना.। (२८) दयिता=वनिता अ.ना.; गिरिं=वनं ना., वनात् अ.; गिरिं व्यगाहत=वनान्यगाहत, वनान्यवर्त्तत व., व्यगाहयत्। (२९) तलाश्रयः=तलाश्रयी व., तलाशयां। (३०) मरुणत्रिभा=रुणान्तभा; संक्रमय्य=संगमय्य; प्रजेश्वरः= प्रजापतिः।

सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ।। ३१ ।।
दष्टतामरसकेसरत्यजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ।। ३२ ।।
स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ।। ३३ ।।
पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे! विवस्वता ।
दीर्घया प्रतिमया सरोऽम्भसां तापनीयमिव सेतुबन्धनम् ।। ३४ ।।
उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः ।
दंष्ट्रिणो वनवराहयूथपाः दष्टभङ्गुरबिसाङ्कुरा इव ।। ३५ ।।

(३१) सूर्य झुक गया है। अब वह अपनी मरीचियों से फुहारों को दूरकर रहा है, इसलिए तुम्हारे पिता के ये निर्झर इन्द्रचाप के परिवेष से शून्य हैं। **(३२)** देखो इन चक्रवाक के जोड़ों को। कमल की चोंच से पकड़ी पँखुड़ी को अब ये छोड़ रहे हैं, क्रन्दन कर रहे हैं, इन्होंने अपने कण्ठ उलट दिए हैं। ये दोनों परस्पर पर आश्रित हैं और इनके बीच की दूरी छोटी होते हुए भी बहुत बड़ी हो रही है। (शृ.प्र.१७.१९) **(३३)** हाथियों को देखो ये जहाँ दिन भर रहे उस स्थान को छोड़कर पूरी रात बिताने के लिए जलाशयों में उतर रहे हैं जिनमें कमलकोषों में भौरें रुँधे हुए हैं और जो सल्लकी की शाखाओं के टूटे खण्डों से सुगन्धित हैं। **(३४)** देखो, हे मितकथे! देखो पश्चिम दिगन्त में लटके सूर्य बिम्ब ने अपनी लम्बी परछाहीं से सरोवर के जलों पर सुवर्ण का सेतु जैसा तान रखा है। **(३५)** जंगली वराह अपने यूथ के साथ घनी कीचड़ वाले तालाबों में से ऊपर आ रहे हैं दिन की गर्मी बिताकर। इनकी खींसें ऐसी लग रही है जैसे इन्होने कमलककड़ी के खण्ड मुँह में दबा रखे हैं।

(३१) दूरयत्य=धूनयत्य, पूरयत्य; स्तव पितुर्व्र=प्रसवितुर् अ.ना.; **व्रजन्त्यमी=पतन्त्यमी** अ.ना.। **(३२) त्यजोः=स्रजोः; विपरिवृत्त=विरहदीन; निघ्नयोः=भिन्नयोः; अन्तर=अम्बर। (३३) दन्तिनः=हस्तिनः; ''आविभात००पदम्'' =''आविभाति शरणाय गच्छतः सान्ध्य/साध्यकर्म्मविधयेऽनुगृह्णते''; बद्ध=रुद्ध** अ.ना.,**पत्र; षट्पदम्=लोचने, संपुटे। (३४) लम्बिना = लम्बिना; निर्मितं मितकथे = निर्मितं कथमिदं, निर्मितं मितकथं, नित्यनिर्मित—कथे; विवस्वता = विवस्वतः; दीर्घया = लब्धया; ऽम्भसां = ऽम्भसः। (३५) पङ्कमतिवाहितातपाः = पङ्कमितिव्वाहिताव्वाहितातातपा दंष्ट्रिणः, पङ्कविनिवारिताः।**

एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः ।
हीयमानमहरत्ययातपं पीवरोरु! पिबतीव बर्हिणः ।। ३६ ।।
पूर्व्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता भाति किञ्चिदिव शेषवत् सरः ।। ३७ ।।
आविशद्भिरुटजाङ्गणं मृगैर्मूलसेक–सरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ।। ३८ ।।
बद्धकोषमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्व्वमिव दातुमन्तरम् ।। ३९ ।।
दूरमग्रपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ।। ४० ।।

(३६) देखो इस मयूर को। यह वृक्ष के शिखर पर बैठा हुआ है और सोने के पानी से गोरा हो गया है। हे पीवरोरु! यह सन्ध्याकाल की क्षीण धूप को पी सा रहा है। **(३७)** आकाश तालाब जैसा लग रहा है। उस तालाब जैसा जिसके एक भाग में पङ्क दिखाई दे रहा हो और पानी थोड़ा ही बचा हो। ऐसा इसलिए कि पूर्वभाग में अन्धकार बढ़ रहा है और उसका आतपजल हट गया है। **(३८)** ये देखो आश्रम। इनमें कुटीरों के आँगन में मृग इकट्ठे हो रहे हैं, इनके पौधों की जड़ में पानी सिंचा है इसलिए गीली है, अग्निधेनु लौट रही हैं और अग्नि प्रज्वलित है, इसलिए और अधिक अच्छे लग रहे हैं। **(३९)** कुशेशय (कमल) के कोष तो सिकुड़ गए, परन्तु थोड़ा सा विवर शेष है, शरण में आने वाला है कोई भौंरों का समूह, उसको प्रेमपूर्वक मार्ग देने के लिए। **(४०)** सूर्य पश्चिम में पहुँच चुका है। इसकी कुछ रश्मियाँ शेष हैं। यह वारुणी (पर्श्चिम) दिशा ऐसी लग रही है जैसी केसर से युक्त बन्धुजीवपुष्प के तिलक से मण्डित कोई कन्या लगती है।

(३६) शिखरे = विवरे; गौर=बर्ह; मण्डलः = मण्डलम्, मण्डनम्, मङ्गल म.अ.ना.: **हीयमान = क्षीयमाण। (३७) व्यक्त = लग्न; खं हृता = संहृता; शेषवत् = शोषवत्** अ.ना.। **(३८) आविशद्भि= आवसद्भि** व.अ.ना., **ङ्गणं =ङ्गणे, ङ्गनं; सेकसरसै = के–स/शर–रसैः; अग्निधेनवः = अग्निधेनयः, अग्न्यधेनव/ यः; ताग्नयः =ताश्रयः।** अग्निधेनुर्नाम होमधेनुः। **(३९) अन्तरम् = उत्तरम्** अ.वा.। **(४०) मग्र=मग्नि, मग्न** व.अ.ना., **लग्न** म.; **मेय = पेय; वारुणी = वारुणा; भानुना = भास्वता** व.; **तिलकेन = कुसुमेन, कुसुमेषु।**

सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयङ्गमस्वरैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥ ४१ ॥
सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः सन्निधाय दिवसं महोदधौ ॥ ४२ ॥
खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत् प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम् ॥ ४३ ॥
सन्ध्ययाऽप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।
येन पूर्व्वमुदये पुरस्कृता नानुयास्यति कथं तमापदि ॥ ४४ ॥
रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि! भान्त्यमूः ।
द्रक्ष्यसि त्वमिति सन्ध्ययाऽनया वर्तिकाभिरिव साधु मण्डिताः ॥ ४५ ॥

(४१) किरण की ऊष्मा का पान कर रहे ये महर्षिजन भानु की स्तुति साममन्त्रों से कर रहे हैं जिस (सूर्य) ने अपना तेज अग्नि में डाल दिया है। (बालखिल्यादि ये महर्षि हजारों की संख्या में है और सदा साथ रहते हैं।) इनके साम के स्वर सूर्य के अश्वों के स्वर जैसे हैं। **(४२)** यह सूर्य दिन को समुद्र में रखकर अस्त हो रहा है। इसके रथ के अश्व गरदन झुकाएँ हुए हैं, इनके कानों में लगे चँवर से इनकी आँखें रगड़ा रही हैं और जुए से इनके बाल टेढ़े पड़ गए हैं। **(४३)** रवि हट गया तो यह पूरा आकाश सो सा गया है। देखो तो इतने महान् तेज वाले आकाश की यह गति। उदित होने पर जो प्रकाशित कर दिया करता है वह यदि गिर पड़े तो अन्धकारमग्न भी कर ही सकता है। **(४४)** देखो यह उपस्थित हो गई सन्ध्या (नारी रूप में)। सन्ध्या ने भी सूर्य के वन्द्य और अस्ताचल के शिखर पर स्थित शरीर का अनुगमन कर लिया। उदय के समय जिसने आगे किया था आपदा आने पर उसके पीछे वह क्यों नहीं चलेगी। **(४५)** हे कुटिलकेशिं! मेघ की ये लाल, पीली और चितकवरी पंक्तियाँ ऐसी लग रही हैं कि संध्यारूपी इस शिल्पकरी ने विभिन्न वर्णों से बड़ी बारीकी के साथ रंग रखा है

(४१) स्यन्दनाश्व = स्यन्दनस्य, वन्दनैश्च; स्वरैः = स्वनैः व.म.अ.ना.; **परि=विनि। ऊष्मपायिनो हि** बालखिल्यादयो महर्षयः। **(४२) सोऽयमानत = सोमयानत; धरै = रुहै; भुग्न=भग्न; महोदधौ = पयोनिधौ। (४३) खं प्रसुप्त = शङ्खसुप्त; संस्थिते = प्रस्थिते** व.; **उद्गतम् = उत्थितम्, उद्गतैः।** 'यत् प्रकाशयति पूर्व्वमुत्थितं मीलनाय खलु तस्य मीलितम्' इति भावः। **(४४) वपुः = पदं** म.; **वन्द्य = धर्म्य** व., **धर्म, वन्ध्य; पूर्व्वमुद = प्राक्तथेय** म.अ.ना., **तथैव;** द्र. कुसं. ४.४३; **पुरस्कृता = परिष्कृता। (४५) सन्ध्ययाऽनया = वेलयानया** अ.ना., **सांध्यवेलया** व.म., **सन्धिवेलया, सिन्धुवेलया; वर्तिका = वृत्तिका, वर्णिका; साधु मण्डिताः = साधुवर्णिताः, साधुवर्त्तिताः** अ.ना., **साधुवर्णिताम्** व.म.।

सिंहकेसरसटासु, भूभृतां पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु, भानुना संविभक्तमिव सान्ध्यमातपम् ।। ४६ ।।
पार्ष्णिमुक्तवसुधास्तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसन्ध्यमादृताः शु/सिद्धये विधिविदो गृणन्त्यमी ।। ४७ ।।
तन्मुहूर्त्तमनुमन्तुमर्हसि प्रस्तुताय सवनाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि! विनोदयिष्यति ।। ४८ ।।
निर्विभुज्य दशनच्छदं ततो वाचि भर्त्तुरवधीरणपरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ।। ४९ ।।
ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्व्वमनुतस्थिवान् विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ।। ५० ।।

इन्हें यह सोचकर कि तुम देखने वाली हो। (४६) देखो सूर्य ने अपने सान्ध्य आतप को बराबर बराबर बाँट दिया है सिंह की केसर सटाओं में, कोंपल निकाल रहे वृक्षों में और धातु शिखरों में। (४७) ये तपस्विजन एड़ी से भूमि को छोड़कर पंजे के बल खड़े होकर पवित्र जल से अञ्जलि देकर गूढ मन्त्र (गायत्री) का जप आदरपूर्वक शुद्धि/सिद्धि के लिए कर रहे हैं। इन्हें विधि का ज्ञान है। (४८) तो कुछ क्षणों के लिए मुझे अनुमति दोगी इस समय के नित्य कर्म (सन्ध्योपासन) के लिए। हे वल्गुवादिनि! तुम्हारा मन तुम्हारी विनोद में निपुण ये सखियाँ बहलाती रहेंगी। (४९) पार्वती में ईर्ष्या जागी। उसने अपने अधर चबाते हुए पति की बात की अवधीरणा की और पास ही स्थित सखी विजया से बिना हेतु के कुछ भी बात करना शुरू किया। (५०) ईश्वर (शिव) ने भी सन्ध्योचित विधि को मन्त्रपूर्वक पूरा किया और असूया से बोलना बन्द करके बैठी पार्वती के पास पहुँच कर मुसकुराते हुए कहा।

(४६) धातुशिखरेषु = चास्तशिखरेषु; षु भानुना = षु चात्मना, षु चात्मनः, षु भास्वता, विवस्वता। (४७) 'पार्ष्णिमुक्तवसुधा' = 'अद्रिराजतनये!"; विहिता = रचिता म.अ.ना., **सरसा** व.; **मभि = मति; सन्ध्य = सान्ध्य; सिद्धये=शुद्धये।** गूढं ब्रह्म गायत्रीमन्त्रः। सिद्धिपदं बह्वर्थसूचक शुद्ध्यपेक्षया न गुरु शुद्धेरेव गायत्र्यर्थत्वात्। **(४८) मामपि = गां/तां प्रति। (४९) भुज्य = भज्य; महेतुकम् = सहेतुकम्। (५०) पूर्व्व = पूत; अनुतस्थिवान् = अनुतिष्ठतान्; मवचना = मवनता** अ.ना., **महवना; प्रत्युपेत्य= सोऽभ्युपेत्य; पुन=मुनि।**

मुञ्च कोपमनिमित्तकोपने! सन्ध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्म्मचारिणं चक्रवाकसमवृत्तिमात्मनः ।।५१।।
निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु! पूर्व्वमुज्झिता ।
सेयमस्तमुदयं च सेवते तेन मानिनि! ममात्र गौरवम् ।।५२।।
तामिमां तिमिरवृद्धिपीडितां भूमिलम्बमिव संप्रति स्थिताम् ।
एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ।।५३।।
सान्ध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।
संपरायवसुधा सशोणितं मण्डलाग्रमिव तिर्यगुज्झितम् ।।५४।।
यामिनीदिवससन्धिसंभवे तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं दिक्षु दीर्घनयने! विजृम्भते ।।५५।।

(५१) पार्वती! तुम तो अकारण ही कोप करने लगती हो। छोड़ो इस कोप को, सन्ध्या को मैने प्रणाम किया है और किसी को नहीं। क्या तुम नहीं जानती कि तुम्हारा यह सहधर्मचारी चक्रवाक जैसी चित्तवृत्ति वाला है। (शृ.प्र.१५.९२)। **(५२)** स्वयंभू ने पितरों का निर्माण हो जाने पर जो शरीर पहले छोड़ दिया था वही सन्ध्या के रूप में अस्त और उदय के समय उपस्थित होता है। हे मानिनि! इसी कारण इस पर मेरा इतना आदर है। **(५३)** यह इस समय बढ़ते अन्धकार से पीड़ित है और अब भूमि से लगी सी स्थित है। यह धातुरस की नदी सी लग रही है जिसमें एक तट पर तमालवन लगा हो। (भूमिलम्ब=ज्यौतिषशास्त्र परिभाषा) **(५४)** अस्त होने से बचा और लाल रेखा में दिखाई दे रहा यह आतप पश्चिम दिशा लिए हुए है, अतः ऐसी लग रही है जैसे क़ोई युद्धभूमि हो जिसमें पड़ा हो रक्तलिप्ततिर्यक् खड्ग। **(५५)** हे दीर्घनयने! रात्रि और दिन की सन्धि से उत्पन्न तेज को सुमेरु ने रोक लिया तो यह गहरा अन्धकार निरङ्कुश होकर दिशाओं में बढ़ रहा है।

(५१) प्रण=प्रय; तोऽस्मि नान्यया=तोऽस्मि नान्यथा म.अ.ना.; **प्रणमितोऽहमन्यया** व.; **वेत्सि = वेद्मि** व. ; **सम = मनु। (५२) उज्झिता=उत्थिता; उदयं च = उदये च; सेवते = सेव्यते** म., **गाहते** व.। सेव्यत इति पाठे ''अस्ते उदये च'' इति पाठ्यम्। स एव चाधिकमुचितः। अस्तशब्दस्य प्रातिपदिकत्वं स्वीकृतचरमेव शृङ्गारप्रकाशादिषु। **(५३) भूमिलम्बपदार्थस्याकारायामौ कीदृशाविति ज्योतिर्विदः प्रष्टव्याः। (५४) मातपं=मापदं, मातरम्; लेख=शेष, रेख** म.अ.न.; **संपराय=सांपराय** अ.व.; **सशोणि = न शोणि; मण्डलाग्र = मण्डलीय, मण्डनाग्र; उज्झितम् = उत्थितम्,ऊर्जितम्, अर्पितम्। (५५) दन्ध=देव; निरङ्कुशं= निरर्गलं; विजृम्भते=विजृम्भिते। (५६) न चा=न वा; न पुरतो=न च पुरः** अ.ना.; **लोक एष=एष लोक; एष=एव; रौघ्र=रोल्ब** व.म., **रेण, राल्प, रोल्प; वेष्टितो=उत्थिते** अ.ना.; **वर्त्तते=तिष्ठते** व।

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरौघवेष्टितो गर्भवास इव वर्त्तते निशि ।।५६।।
निम्नमुन्नतमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं धिङ् महत्त्वमसतां हृतान्तरम् ।।५७।।
नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि! पूर्व्वदिङ्मुखं कैतकैरिव रजोभिरावृतम् ।।५८।।
मन्दरान्तरितमूर्त्तिना निशा लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः ।।५९।।
रुद्धनिर्गमनमादिनक्षयात् पूर्व्वदृष्टतनु चन्द्रिकास्मिता ।
एतदुद्गरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिचोदिता ।।६०।।

(५६) आँखों की गति न ऊपर है, न तो नीचे, न सामने, न आसपास और न पीछे। यह पूरा लोक तिमिर की बाढ से घिर गया है और लगता है कि रात्रिकाल में गर्भवास का अनुभव कर रहा है। **(५७)** असत् पुरुषों (नास्तिक नन्दों) के महत्त्व को धिक्कार जिसमें विशेष गुणों से जनित अन्तर को महत्त्व नहीं मिलता। देखो न! इस अन्धकार ने सबको समान कर दिया, जो शुद्ध है या जो गन्दा, जो टेढ़ा है और जो सीधा, सब बराबर। **(५८)** यह देखो यज्वा (यज्ञकर्त्ता) लोगों (ब्राह्मणों) का पति चन्द्र (सेनापति पुष्यमित्र) उदित हो रहा है। निश्चित ही इसका उद्देश्य है शार्बर(रात्रि के) अन्धकार का निषेध। सफेद कमल से मुखवाली हे पार्वती देखो इसी कारण पूर्व दिशा (भारत की पूर्व दिशा) का मुख (मगध जनपद) मानों केवड़े के पराग से रंजित (उज्ज्वल) हो गया है। (स्मरणीय है यज्ञसंस्कृति का पुनर्जागरण काल सेनापति पुष्यमित्र की क्रान्ति है।) **(५९)** रात्रि में तारे निकल आए हैं और चन्द्र भी मन्दर के पीछे तक आ पहुँचा है। अभी वह छिपा है। मैं भी तो जब तुम सखियों के साथ खड़ी रहती हो तो पीछे से छिपकर तुम्हारी बातें सुनता ही हूँ। **(६०)** देखो, रात्रि ने प्रेरित किया तो यह दिशा (पूर्व दिशा)

(५७) निम्नमुन्नतमवस्थितं=शुद्धमाविलमवस्थितं। महिमभट्टोद्धृतः पाठस्त्वत्र मूलतयाद्रियते समादृतपूर्व शुद्धेति पाठं विहाय; **चलं=जलं, चरं; धिङ्=दिङ्; हृता=हता, मन। (५८) पतिः=प्रियः मुन्नमित=मुन्नयति; शार्वर=शारद,** वामन ५.२.४९; **पूर्वदिङ्मुखं=पश्य दिङ्मुखं, दिङ्मुखं यथा** व.अ.ना./**तथा/हरेः; आवृतम्=आहतम्** व.। **(५९) मन्दरा=कन्दरा; सखीसमागता=सखीभिरावृता। (६०) तनु चन्द्रिका= तनुचन्द्रिका, मनु चन्द्रिका; स्मिता=स्मितम्** व.म.; **रात्रिचोदिता=रात्रिचोदितम्, चन्द्रमण्डलम्।**

पाठान्तरपाठः— **रुद्धनिर्गमनमादिनक्षयात् पूर्व्वदृष्टतनुचन्द्रिकास्मितम् ।**
एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिचोदितम्।।

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोऽम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ।। ६१।।
शक्यमोषधिपतेर्नवोदया: कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसम्पुटै: करा: ।। ६२।।
अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभि: ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ।। ६३।।
पश्य पार्वति! नवेन्दुरश्मिभि: सामिभिन्नतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितं संप्रसीददिव मानसं सर: ।। ६४।।

चन्द्रमण्डल को अपने रहस्य के समान उजागर कर रही है। इसे यह दिनभर अपने यहाँ छिपाए हुई थी। इसका शरीर पूर्व दिशा में दिखाई देने लगा है। यह चन्द्रिका की मुसकुराहट भी लिए है। (नायक धृष्ट, एक नायिका ज्येष्ठा (भुक्ता) दूसरी कनिष्ठा (खण्डिता)। **(६१)** देखो पके फलिनी के फल की कान्ति धारण किए चन्द्रबिम्ब एक ओर आकाश में दिखाई दे रहा है और दूसरी ओर सरोवर के जल में। ऐसा लग रहा है कि चन्द्रमा बिछुड़ कर दूर–दूर बैठे हुए चक्रवाकों की जोड़ी का अनुकरण कर रहा है। **(६२)** चन्द्र ओषधिपति है यही अमृत भरता है अन्नकणों में। इसकी रश्मियाँ इतनी घनी हैं कि लगता है नई–नई यवाङ्कुर जैसी। इन रश्मियों को नाखूनों की नोंक से तोड़ा जा सकता है और यवाङ्कुर के ही समान तुम्हारे कान का कर्णपूर बनाया जा सकता है। **(६३)** देखो! प्यारा चन्द्रमा अंगुलियों जैसी किरणों से केशों जैसे तिमिर को बटोर कर रजनीसुन्दरी का मुख चूम सा रहा है। इसीलिए चुम्बन सुख में रजनी के सरोजरूपी लोचन मुकुलित हो रहे हैं। यह रसलीन है। (शृ.प्र. १०.४२१, १७.१४७, ३३.१५६)। **(६४)** पार्वती! देखो, नवेन्दुरश्मियों से आकाश का घना अन्धकार मिश्रित हो रहा है। यह ऐसा लग रहा है जैसे हाथी की जलक्रीड़ा से मटमैला मानससरोवर का जल निर्मलता की ओर बढ़ रहा है। (शृ.प्र.९.६८; ३३.७८)।

द्र. अस्माकं लेख: सागरिकाया १९८४वर्षीयेऽङ्के प्रकाशित:। **(६१) कृष्ट = कृत्त; विवरं = विषयं** व., **विधुरम्, विरहम्। (६२) शक्यम् = शक्य:;** वामनस्य का.सू. ५.२.२२। **दया: = दयात्, दिता:; तव=नवा:; छेत्तु = भेत्तु। (६३) गृह्य = यम्य** व., **रुद्ध्य, कृष्य; लोचनं = लोचने।** वामनस्य का.सू. ४.३.३३। **(६४) सामिभिन्न = सामभिन्न, श्यामभिन्न, संविभिन्न, भिन्नसान्द्र** व., **भग्नसान्द्र; स्तलम् = स्थलम्; दूषितम् = रूषितम्; संप्रसीददिव = सप्रसादमिव** व.म.अ.ना., **संप्रसादमिव।**

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ।। ६५।।
उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता वेधसेह गुणदोषयोर्गतिः ।। ६६।।
चन्द्रपाद–जनित–प्रवृत्तिभिश्चन्द्रकान्त–जलबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानमून् बोधयत्यसमये शिखण्डिनः ।। ६७।।
कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरविकल्पसुन्दरि!
हारयष्टिगणनामिवांशुभिः कर्त्तुमागतकुतूहलः शशी ।। ६८।।
उन्नतावनतभागवत्तया चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तदन्तिनः ।। ६९।।
एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमानिबन्धनात् ।। ७०।।

(६५) चन्द्रमा अभी तक रक्त था, अब इसका मण्डल रक्तता छोड़कर उज्ज्वल हो चुका है। जो स्वभाव से निर्मल होते हैं उनमें कालदोषजन्य विकार उदित तो होते हैं पर स्थिर नहीं हो पाते। (६६) इस समय चन्द्र की प्रभा ऊँचे स्थानों पर स्थित है और रात्रि का तम नीचे आश्रय लिए हुए है। निश्चित ही विधाता ने गुण और दोष की स्थिति उनके अनुरूप बना रखी है। (६७) यह पर्वत मेखलातरुओं पर सो रहे मयूरों को असमय में जगा रहा है चन्द्रकिरणों के स्पर्श से चन्द्रकान्तमणियों से निस्सृत जल ही बूँदे टपका टपकाकर। (६८) कल्पवृक्षशिखरों पर चमक रही किरणों से यह चन्द्र, हे निसर्गसुन्दरि! गणना सी करने का कुतूहल लिए हुए सा लग रहा है कल्पवृक्षशिखरों पर ही लटक रही मुक्ताहारों की लड़ियों की। (६९) पर्वत के ऊँचे–नीचे स्थलों में अंधेरा भी है और चाँदनी भी, इसलिए ऐसा लग रहा है कि किसी मत्त हाथी पर कई प्रकार के माँड़ना माँड़ दिए गए हों। (७०) कुमुद को तो देखो, यह चटक रहा है, इसने चन्द्रिकारस इतनी अधिक मात्रा में पी लिया है कि उसे

(६५) भाव = भाग; एष = एव। (६६) सदृशी = सदृशि अ.ना., सदृशो; वेधसेह= वेधसा हि, वेधसेव म.अ.ना., वेधसा ह; गतिः= स्थितिः। (६७) त्तिभि= त्तयः व.; जल = मणि; बिन्दुभिः=बिन्दवः व.; गिरिः = गिरेः, गिरौ व.; निद्रिता= निर्वृता अ.ना.; नमून= निमान् अ.ना.; बोधयत्य= बोधयन्त्य व. । (६८) प्रस्फुरद्भि= संस्फुरद्भि; रविकल्पसुन्दरि= रवि पश्य सुन्दरि, रह पश्य सुन्दरि अ.ना., रिव शम्भुसुन्दरि व.म.; गणना = रचना; मागत = मुद्यत, मानत, माहत, मुद्यदेति स। (६९) भाग=भाव; सतिमिरा=सुतिमिरा; दन्तिनः=हस्तिनः। (७०) पीत = वीत; रसम् = सरम्; बोढु = सोढु व.अ.ना.; मुक्त=

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डि! केवलं व्यज्यते विपरिवृत्तमंशुकम् ।। ७१ ।।
शक्यमङ्गुलिभिरुद्धृतैरधः शाखिनां पतितपुष्पपेशलैः ।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ।। ७२ ।।
एष चारुमुखि! योगतारया युज्यते तरलबिम्बया शशी ।
साध्वसादपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ।। ७३ ।।
पाकभिन्न—शरकाण्ड—गौरयोरुल्लसत्प्रतिकृति—प्रसन्नयोः ।
रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षि! चन्द्रिका ।। ७४ ।।
लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनान्तदेवता ।। ७५ ।।

सम्हाल नहीं पा रहा है और डकार रहा है भौरों की गुंजार के रूप में। (शृ.प्र.३.९) (७१) देखो पार्वती! कल्पवृक्ष पर लगा सफेद ध्वजपट चाँदनी में छिप गया है। हवा चलने पर जब वह हिलता है तब समझ में आ पाता है । (७२) चन्द्रप्रभा की फुहारों से तुम्हारे केशों का जूड़ा बनाया जा सकता है, इन्हें वृक्षों के नीचे से उनके पुष्पों के समान उँगलियों से बटोर कर। (७३) चारुमुखि! देखो यह चन्द्र योगतारा से जुड़ने जा रहा है। योगतारा का बिम्ब तरल (हिल रहा) है। वैसे ही जैसे कोई वर नई विवाहित कन्या से योग करने जाता है और वह साध्वस से काँपने लगती है। (७४) प्रिये! जब तुम चन्द्रबिम्ब पर दृष्टि केन्द्रित करती हो तो यह चन्द्रिका तुम्हारी गण्डलेखाओं पर आरूढ़ सी हो जाती है गण्डलेखाएँ पककर फूटे शरकण्डे सी सफेद हैं और इन पर चन्द्र की परछाँही छा जाती है तो इनमें और अधिक प्रसन्नता आ जाती है। (प्रतिकृति के स्थान पर 'प्रकृतिज' पाठ भी है। तदनुसार 'स्वाभाविक प्रसाद' अर्थ किया जा सकता है।) (७५) देखो, गन्धमादन वनान्त की यह अधिदेवी स्वयं तुम्हारे पास आई है। हाथ में लिए है लाल सूर्यकान्तमणि के पात्र में रखी कल्पवृक्षमधु। तुम तो ठहरी

युक्त; मञ्जसा=मम्भसाम् अ.ना । (७१) कल्पतरुलम्बि= कल्पकविलम्बि; शुद्धया =शुभ्रया; संशयम् = सञ्चयम्; चलति=चरति अ.ना.; चण्डि केवलं=चण्डिके बलं व.म.अ.ना., चण्डि केवले; व्यज्यते= युज्यते। (७२) रुद्धृतैः=रुत्थितै, रुद्यतैः व.; पतित=फलित; पेशलैः=कोमलैः; पत्रजर्जर=पत्रझर्झर, पत्रमञ्जलि; लवैः=चयैः व.; अलकान्=अलकाः, अलकम् अ.ना.। वामनस्य ५.२.२२। (७३) चारु=चन्द्र, तार अ.ना.; योग=योग्य, पश्य; बिम्बया=नेत्रया; दीक्षया=दीक्षितो। (७४) भिन्न=पाण्डु; प्रतिकृति=प्रकृतिज; प्रसन्नयोः=प्रपन्नयो, प्रसादयो, प्रदीप्तयो म.; लेखयो=रेखयो अ.ना.; निहिताक्षि = निहिताक्षिण, वदनेऽद्य। (७५) लोहि=रोहि; मतीम्=मती व.; उपस्थिता=उपागता, समागता व.;

आर्द्रकेसरसुगन्धि ते मुखं मत्तरक्तनयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि! मदः करिष्यति ।। ७६ ।।
मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शङ्करस्तामपाययत पानमम्बिकाम् ।। ७७ ।।
पार्वतीतदुपयोगसम्भवां विक्रियामपि सतां मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मितामाम्रतेव सहकारतां ययौ ।। ७८ ।।
तत्क्षणं विपरिवर्त्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्त्तिनी द्वयोः शूलिनः सुवदना मदस्य च ।। ७९ ।।
घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ।। ८० ।।

मर्यादा पालन में निरत। (७६) घिसी केसर सी सुगन्ध लिए ही हुए है तुम्हारा मुख, इसकी आँखे अपने आप नशीली और लाल हैं। हे विलासिनी! इस मुख पर मद आ भी गया तो नया क्या लाभ देगा (मत्तमत्त पाठ में अत्यधिक मत्त अर्थ। (शृ.प्र.१३.६०)। (७७) यह तुम्हारी सखी है। सखीजन की भक्ति मान ली जाती है। अतः करो ग्रहण इस मधु को। यह काम को प्रदीप्त करता है। इस प्रकार की ऊँची ऊँची बातें कर शङ्कर जी ने उस बेचारी अम्बिका को मद्य पिला ही दिया। (७८) पार्वती यदि पहले आम थी तो उस मद्य के उपयोग से वह सहकार (अतिसुगन्धित आम) बन गई। (सहकारता के लिए भी आवश्यक होता है अकल्पनीय विधान)। पार्वती में उस मद्यपान से जो परिवर्त्तन आया वह भी सत्पुरुषों को मनोहर ही लगा। (शृ.प्र. १४.२६) (७९) नशे की स्थिति में पार्वती दो के वश में हो गई—एक तो शंकर जी के और दूसरे नशे के। दोनों से लज्जा हट गई, दोनों ही शयन (बिस्तर) पर ले जाना चाहने लगे और राग से धधक उठे। (शृ.प्र.२२.२३५) (८०) नशें में पार्वती के नेत्र घूमने लगे, वाणी लड़खड़ाने लगी, स्वेदबिन्दु उभर आए और वे अकारण मुसकुराने लगीं। इस स्थिति में शिवजी ने उमा के मुख का पान मुख से नहीं, आँखों से किया और करते ही रहे। (शृ.प्र. १४.२७)।

नान्त=नाभि। (७६) आर्द्र=पद्म; मत्तरक्त= मत्तमत्त व.अ.ना., रक्तमत्त, प्रान्तरक्त, रक्तमेव म., मत्तमेव; अत्र=तत्र; मदः=मधुः म.। (७७) मान्य=मान; दीपनम्=दीपकम्; मम्बिकाम्=मङ्गनाम् अ.ना., मम्बिका। (७८) योग=भोग व.; सतां अ.ना.=सखीं व., सती०,सखी०; हराम्=भवाम्; माम्रते=नम्रते म.; कार=करि। (७९) तत्क्षणं=तत्क्षणे; विपरिवर्त्तितह्रियोः=विपरिवृत्तलज्जयोः; नेष्यतोः=शिष्यतोः,शिक्षतोः, वाञ्छतोः; सा बभू=संबभू (शृ.प्र.२२.२३५,३४.१९४); वशवर्त्तिनी=वशवर्त्तिका; शूलिनः=प्रेयसः व.। (८०) नयनं स्ख=नयनस्खः; लत्कथं=लत्कचं, लद्वचः, लत्पदम् (शृ.प्र.३४.१९५); बिन्दुमदकारण=

तां विलम्बितपनीयमेखलामुद्वहञ् जघनभारदुर्वहाम् ।
ध्यानसंभृतविभूतिभास्वरं प्राविशन्मणिशिलागृहं हरः ।। ८१ ।।
तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ।। ८२ ।।
क्लिष्टकेशमवलुप्तचन्दनं व्यत्ययार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभून्न तृप्तये ।। ८३ ।।
केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्परिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ।। ८४ ।।
स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्च्छना–परिगृहीत–कैशिकैः किन्नरैरुषसि गीतमङ्गलः ।। ८५ ।।

(८१) शिवजी ने उस स्थिति में उसे लिए प्रवेश किया गृह में जो मणिशिलाओं से निर्मित था। पार्वती की सोने की करधन लटक रही थी और जघन का भार इतना था कि उनको ढोना कठिन था। मणिशिलागृह भरा हुआ था विभूतियों से, जो उपस्थित हो गई थीं केवल ध्यान करने से। (८२) उस मणिशिलागृह में बिस्तर लगा था। उस पर हंस जैसी धवल चादर बिछी थी ऐसी वह जैसे गंगा की बालू। उस पर शिव लेटे और पार्वती को भी लिटाया वैसे ही जैसे शरत्कालीन शुभ्रमेघ पर बैठता है चन्द्रमा रोहिणी के साथ। (शृ.प्र.१६.६५) (८३) वहाँ पार्वती के साथ शिव की जो रति हुई उसमें पार्वती के केश ऊबड़–खाबड़ हो गए, चन्दन मिट गया, नखक्षत कहीं के कहीं हुए, मत्सर भी जागा और मेखला छिन्न–भिन्न हो गई। इतने पर भी पार्वती के साथ किया गया यह सुरत शिव के लिए तृप्तिदायक नहीं हुआ। (८४) प्रियतमा पर द्या आ गई तो शिव ने तारों की पंक्तियाँ जब आकाश से झुक गईं तब की लीला आँख बन्द करने (सोने) की, पार्वती उनके वक्ष से चिपकी रहीं। (८५) सबेरे वे जागे जब सुवर्णकमल जागे और किन्नरों ने वीणादण्ड लिए हुए मूर्च्छना की गीतमङ्गल में। भगवान् शिव अब देवों के लिए स्तुत्य थे।

स्वेदबिन्दु मदकारण व.। (८१) संभृत=संभृति, संभव व.म.अ.ना.; भास्वरं=शोभितं; ईश्वरः,गौरवः, भास्वरं अ.ना., संभृतं म., गोचरं व.; हरः=रहः, हरेः,ततः। (८३) केशम–व/भि/ति/वि–लुप्त; व्यत्ययार्पितनखं समत्सरम्=(व्यस्त) चन्द्रमदयैः कचग्रहैः म.अ.ना., हृत्पथार्पितनखं व., उत्पथार्पितनखं म.अ.ना., व्युत्पथार्पितनखं, न च्युतार्पितनखं; नखक्षतं च यत्; भून्न तृप्तये=भूदतृप्तये म.अ.ना.। (८४) केवलं प्रिय=केवलप्रिय; परि=प्रति। (८५) बुधस्तवोचितः=तया निशाक्षये म.; शातकुम्भ=शातकौम्भ व.; समम्=सह; कैशिकैः, द्र. रघुवंशे ५.६५–७५.८६ मेघ. ३१, ३३, ८७।

तौ क्षणं शिथिलितोपगूहनौ दम्पती चलितमानसोर्म्मयः ।
पद्मभेदनिपुणाः सिषेविरे गन्धमादनवनान्तमारुताः ।। ८६ ।।
ऊरुमूलनखराजिमार्गणैस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ।। ८७ ।।
स प्रजागर–कषाय–लोचनं गाढ–दन्तपद–पीडिताधरम् ।
आकुलालकमरंस्त रागवान् प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ।। ८८ ।।
तेन भङ्गिविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ।। ८९ ।।
स प्रियामुखरसं दिवानिशं तर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदितः ।। ९० ।।

(८६) जब उन दोनों का आलिङ्गन शिथिल हुआ तो उनकी सेवा की गन्धमादनवनान्त वायु के झोकों ने। वे मानस की तरङ्गों को चंचल बना रहे थे और सूचना दे रहे थे कमलों के खिल जाने की। (शृ.प्र. ३३.१८३) (८७) जाग जाने पर शिव के नेत्र पार्वती के ऊरुमूल में बने नखक्षत के चिह्नों पर आकृष्ट हो गए। पार्वती कपड़ा सम्हालने लगी तो शिव ने उसे रोकना शुरू किया। (८८) शिव ने प्रिया के मुख को देखा कि उसमें आँखें प्रजागर के कारण लाल थीं, अधर पर गाढ़ दन्तक्षत की पीड़ा थी, अलक आकुल थे और तिलक बिखरा हुआ था। उनका राग उभर उठा और उसी स्थिति का खूब आनन्द लिया। (८९) उठ तो आए पर शिव जी ने पलंग छोड़ा नहीं। पलंग पर बिछी चद्दर में सलवटें पड़ गई थीं, टूटी मेखला बीच में इकट्ठी हो गई थी और वह चरणराग से रंजित था। (९०) शिव दिन–रात केवल रागवृद्धि करने वाले उमामुखरस का सेवन करने की इच्छा से दर्शनार्थियों के लिए अदृश्य ही बने रहे, यद्यपि विजया उन्हें सूचना देती रही।

(८६) शिथिलितो = प्रशिथिलो; चलित = रचित म.अ.ना.; भेद = बोध; मारुताः = वायवः। (८७) मूलनख = लग्ननख; मार्गणैः = पङ्क्तिभिः; क्षणं = क्षणे; संयमं = सञ्चयं; मवा = न्यवा। (८८) लोचनम्=लोचनः; पद=परि; पीडिता=ताडिता, कारिता, दारिता अ.ना.; आकुला=व्याकुला; 'मरंस्त००मुखम्'='मरंस्त रङ्गवान्००मुखम्'; 'लकमपास्तचित्रकं वीक्ष्य तृप्तिमभजन्न तन्मुखम्। (८९) भङ्गि=भङ्ग अ.ना., पिण्डित=खण्डित; पिण्डितविसूत्र=मण्डित/पीडित–वितस्त। (९०) मुख= सुख; रसं = रतं, तर्ष = हर्ष म., तत्र, तस्य; राग; जननं = जनकं अ.ना.; सिषेविषुः = निषेविषुः; निवेदितः= निवेदनात् व.।

समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां साधर्मेका निशेव ।
न तु सुरतसुखेषु च्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलेषु ।।९१।।

इत्यष्टमूर्त्तिमहाकाव्ये कुमारसंभवे कालिदासकृतौ पार्वतीपरमेश्वरसामरस्यो नाम अष्टमश्चरमश्च यजमानमूर्त्तिसर्गः।। ८।।

(९१) शिव जैसे रात्रि में पार्वती का संग करते रहे वैसे ही दिन में भी। इसी स्थिति में कुछ अधिक सौ ऋतु बीत गई और उन्हें लगा कि अभी एक ही रात बीती है। इतने पर भी शिव की तृष्णा सुरतसुख से शान्त नहीं हुई समुद्र के जल में जलती वडवाग्नि के समान।

इस प्रकार कालिदास की कृति 'कुमारसंभव' नामक अष्टमूर्त्ति महाकाव्य में
यजमानमूर्त्तिरूप सामरस्यनामक अष्टम सर्ग पूर्ण हुआ।। ८।।

इसके आगे के सर्ग ९–१७ कालिदास के कविकर्म से रहित और असंगत तथा अशुद्ध भाषा में लिखित है। यदि आगे की कथा को काव्यरूप में देखना हो तो हमारा 'कुमारविजयम्' देखा जाए।

(९१) सार्धम् = साग्रम्, सायम्, सारम् व.; **जलेषु = जलेभ्यः, जलौघैः** म.।
अतः परं नवीनं पद्यम् –

अथो शिवश्चन्द्रसुचारुमौलिः, सस्मार तत्राऽमरशिल्पिरत्नम् ।
चिकीर्षयाऽगारवरस्य विष्णुर्मायां नु संसारसिसृक्षयेव ।।

१–७ सर्गश्लोकसंख्या ५२२ + ९१ = ६१३ + प्रक्षिप्ताः १० = आहत्य ६२३।
पुष्प्रिका: इति श्रीकालिदासकृतौ कुमारसंभवमहाकाव्ये सुरतवर्णनं नाम अष्टमः सर्गः।।८।। समाप्तमिदं कुमारसंभवं नाम महाकाव्यम्।। सं० १८६७ चैत्रशुक्लदूती। सूच्यम् –

इतः परं ये नव सन्ति सर्गाः प्रकाशिता निर्णयसागरादिभिः।
देवेन ते शङ्करपूर्वकेण नूनं समायोजिषतेति धीर्नः।।
अत्र प्रमाणं कुमारसंभवस्यैव 'अहो अहो देवगणा' इति १२.५४ पद्यम्।
यद् वस्तुभाषारचनासु साम्यं श्रीकालिदासस्य बिभर्त्ति लेशात् ।
तदस्ति काव्यं तु सनातनीयं 'कुमार'सञ्ज्ञं 'विजयो'–त्तरं वै ।।
अष्टमूर्त्तिमहाकाव्यस्यास्य शोधे ममैष यः।
श्रमो रेवाप्रसादस्य प्रीयेतां तेन तौ गुरू ।।
।।ॐ तत् सत्।।


मेघमार्ग
कैलास
अलकापुरी
मानसर
सरस्वती
क्रौंचरन्ध्र
कुरुक्षेत्र
कनखल
(मन्दसौर)
दशपुर
यमुना
गंगा
देवगिरि
सिप्रा
उज्जयिनी
निर्विन्ध्या
चर्मण्वती
गंभीरा
कालीसिंध
(सिन्धु)
विदिशा
वेत्रवती नदी
आम्रकूट
माल
रेवा
(अमरवाड़ा)
(रामगिरि)
(रामटेक)

मेघसन्देशाभिधानं

।। मेघदूतकाव्यम् ।।

॥ॐ॥

महाकविकालिदासविरचितं
सनातनकविरेवाप्रसादद्विवेदिसंपादितमूलञ्च
मेघसन्देशाभिधानं

॥ मेघदूतकाव्यम् ॥

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनया–स्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडा–परिणत–गज–प्रेक्षणीयं ददर्श ॥२॥

(१) एक था यक्ष। वह करता था सेवाकार्य। उसे जिस कार्य का दायित्व दिया गया था उसमें की उसने असावधानी। उस पर उसके स्वामी (कुबेर) ने दे दिया शाप। शाप भारी था क्योंकि प्रियाविरह का था, वह भी पूरे एक वर्ष का। उससे उसकी महिमा हो गई लुप्त। उसने डेरा डाला रामगिरि के आश्रमों में जहाँ सीता के स्नान से जल पवित्र थे और लगे थे छायादार नमेरुवृक्ष। (२) पत्नी से वियुक्त उस कामी यक्ष ने उस पर्वत पर कुछ महीने (लगभग आठ) बिताए। वह इतना कृश हो गया कि उसकी कलाई से सोने का कड़ा खिसक गया और उसका प्रकोष्ठ रिक्त हो गया। अब आया आषाढ़ का प्रमुख दिन, जिस दिन भगवान् विष्णु को सुलाते हैं और मेघदर्शन का विधान है अर्थात् हरिशयनी पर्व। उस दिन उसने भी मेघ के दर्शन किए जो पर्वत की चोटी से लिपटा था और ऐसा लग रहा था जैसे वप्रक्रीडा में झुका हुआ हाथी हो। (प्रथम = प्रमुख।)।

---

१. 'स्वाधिकारात् प्रमत्त' इत्येके व्याक्रियादासाः। **२. प्रथम=प्रशम** व.।

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो–
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।। ३ ।।

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुलशमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमै कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।। ४ ।।

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रणयकृपणाश्चेतनाऽचेतनेषु ।। ५ ।।

(३) यक्ष उस मेघ के सामने किसी प्रकार खड़ा हुआ, वह कौतुक जो पैदाकर दिया करता है। उसकी आँखों में आँसू आ गए। उस स्थिति में वह बहुत देर तक सोचता रहा। जब मेघ दिखाई देते हैं तो सुखी (अवियुक्त) व्यक्ति का भी मन कुछ का कुछ हो जाता है। उस जैसे व्यथित वियोगी और कण्ठाश्लेष की याचना में लगे व्यक्ति की तो बात ही क्या। (४) भादों का गहन वर्षामास आसन्न था। उसमें प्रिया के प्राणों को आधार देने हेतु उसने अपनी कुशलवार्त्ता को भेजना चाहा। उसके लिए उसी मेघ को संदेशवाहक बनाना चाहा। इस उद्देश्य से उसने पहले तो कुटज के ताजे पुष्पों से दिया अर्घ्य और प्रीतिपूर्वक 'स्वागत' कहा, वही जो होता है प्रीतिव्यक्ति का प्रमुख वचन। (५) धूम, अग्नि, पानी और हवा का सन्निपात (जड) मेघ कहाँ और संदेश की बात कहाँ, जिनमें समर्थ होते हैं केवल चतुर इन्द्रियों वाले चेतन व्यक्ति ही। यक्ष ने औत्सुक्यवश इस कठिनाई पर ध्यान नहीं दिया और याचना कर दी। बात यह है – 'कामार्त्त जन किसी से भी याचना (प्रणय) करने हेतु उद्यत हो जाते है चाहे वह चेतन हो चाहे अचेतन।' (प्रणय = याचना।)।

---

३. कौतुका = केतका व.। ५. प्रणय = प्रकृति म.।

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६॥

सन्तप्तानां त्वमसि शरणं तत् पयोद! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थित–हरशिरश्चन्द्रिकाधौत–हर्म्या ॥ ७॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः[1]।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८॥

(६) मैं आपका वंश भी जानता हूँ और पद भी। दोनों उच्च हैं। वंश है पुष्कर और आवर्त्तक मेघ का और पद से हैं आप इन्द्र के मनचाहा रूप धारण कर लेने में सक्षम अमात्य (प्रकृति)। इसी कारण मैं आपके समक्ष याचक बन रहा हूँ, कारण कि मैं दैवयोग से वियुक्त हूँ और मेरी प्रिया यहाँ से बहुत दूर है। बड़ों से की गई याचना मोघ (व्यर्थ) भी रहे तो अच्छी, अधम से सफल हो तब भी अच्छी नहीं। (७) हे पयोद! तुम्हारे इस नाम से ही स्पष्ट है कि तुम संतप्तों की रक्षा करते हो। तो मेरी और मेरी प्रिया की भी रक्षा करो। हम दोनों को धनपति (कुबेर) के क्रोध ने अलग कर दिया है। मेरा संदेश मेरी प्रिया के पास पहुँचा दो। जाना है तुम्हें यक्षेश्वरों (कुबेर) की नगरी अलका। उसके बाहरी उद्यान में रहते हैं भगवान् शंकर, जिनके सिर पर रहती है चन्द्रकला। अलका के हर्म्य उसी की चाँदनी से धुले हुए रहते हैं। (८) तुम जब वायुमार्ग पर आकाश में आरूढ़ होओगे तो पथिक वनिताएँ (प्रिय आगमन के) विश्वास और आश्वासन से तुम्हें देखेंगीं। भला कौन होगा जो तुम्हारे आकाश में सन्नद्ध हो जाने पर विरह से विधुरा जाया की उपेक्षा करे, यदि मुझ जैसा अन्य भी कोई न हो जिसकी वृत्ति दूसरे के अधीन हो।

---

[1] नुमागमे प्रतिपक्षिणः द.पूस.म.। **'आश्वसन्त्यः'** इति गणकार्यस्य अनित्यत्वे द.।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधान–क्षम–परिचयं नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।। ९ ।।

ताश्चावश्यं दिवसगणनातत्परामेकपत्नी–
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः–पातप्रणयि हृदयं विप्रयोगे रुणद्धि ।।१०।।

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद् विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ।।११।।

(९) स्थिति यात्रा के अनुकूल है, क्योंकि (यथा) अनुकूल पवन तुम्हें धीरे–धीरे उसी ओर उड़ा रहा है जिधर जाना है, तुम्हारे (त्वां) बाईं ओर यह तुम्हारा सगा बन्धु चातक मधुर ध्वनि कर रहा है। यह तो हुई स्थिति यहाँ की। आगे भी तुम्हारी सेवा करती मिलेंगीं आकाश में बकपंक्तियाँ, उनके लिए तुम्हारा परिचय ही तो बनता है गर्भाधानकारी। वे निश्चित ही (नूनम्) पंक्ति बनाकर उड़ती चलेंगी तुम्हारे साथ। **(१०)** (तुम अलका तक जाने का परिश्रम करोगे तो वह व्यर्थ भी नहीं होगा, क्योंकि जिसे संदेश देने तुम्हें जाना है) उस अपनी भौजाई को भी तुम देख पाओगे। तुम्हारे प्रवेश में कोई रुकावट नहीं आएगी और तुम धड़धड़ी के साथ उस तक पहुँच जाओगे और पाओगे उसे जीवित और दिवस की गणना में तत्पर। बात यह है कि विरह में अङ्गनाओं के हृदय को आशाबन्ध ही रोके रहता है, यद्यपि वह तो तुरन्त टुकड़े टुकड़े हो जाने का प्रार्थी रहता है। (सद्यःपातप्र. पाठ।) **(११)** तुम्हारे साथ राजहंस भी कैलाश तक जाएँगे। जो पृथिवी पर शिलीन्ध्र के छत्ते ऊपर तान देती है तुम्हारी वह श्रवणसुभग गर्जना सुनकर मानस सरोवर के लिए उत्सुक राजहंस चोंच में कमलककड़ी (विस) के कोमल खण्ड का पाथेय लेकर उड़ेंगे।

---

९. यथा यतः नूनं तत इत्यर्थः। क्षम = क्षण म.। १०. पातप्रणय = पाति प्रणय म.।

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ।।१२।।

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसाञ्चोपभुज्य ।।१३।।

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि–
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ।।१४।।

रत्नच्छायाव्यतिकर इव प्रेक्षणीयं पुरस्ताद्
वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ।।१५।।

(१२) अपने प्रियमित्र इस शैल से ऊँची चोटी का आलिङ्गन कर विदाई लेना। इस शैल की मेखलाएँ रघुपति राम के मनुष्य जाति के लिए वन्द्य पदों से अंकित हैं। जब कभी इसका तुमसे मिलना होता है तो चिरविरह से उत्पन्न इसके उष्ण बाष्प के आँसू निकलते दिखाई देते, जिनसे होती है इसके स्नेह की अभिव्यक्ति। **(१३)** हे जलद! पहले तुम मार्ग सुन लो जो तुम्हारे प्रयाण के अनुकूल होगा। मेरा श्रोत्रपेय संदेश उसके बाद सुनोगे। मार्ग ऐसा जिसमें मिलते रहेंगे पर्वत जिन पर थकने पर विश्राम कर सकोगे और मिलेंगे जल के सोते जिनका तुम क्षीण होने पर पानी पी सकोगे। उनका पानी परिलघु होगा। **(१४)** जब तुम आकाश में उठोगे तो सिद्ध जाति की भोली अङ्गनाएँ तुम्हारी उमड़–घुमड़ को यह सोचकर देखेंगी कि हवा किसी पर्वतशृङ्ग को उड़ा रही है। तुम इस स्थान से जहाँ हरे बेंत लगे हुए हैं उत्तर की ओर उठना। उससे दिङ्नागों को अपनी स्थूल सूँढ का जो घमंड है, वह हट जाएगा। **(१५)** तुम्हारे जिस भाग पर धूप पड़ रही है उस पर दिखाई दे रहा है इन्द्रधनुष, जो उतना ही सुन्दर लग रहा है जितना अनेक रत्नों की कान्ति का मिश्रण। इससे तुम्हारा श्याम शरीर

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः–सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ।।१६।।

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।।१७।।

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै–
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ।।१८।।

और अधिक सुन्दर प्रतीत होगा। लगेगा जैसे श्रीकृष्ण के सिर पर चमचमाता मोर मुकुट लगा है। (१६) गाँवों की बहुएँ तुम्हें भ्रूविकार से अनभिज्ञ और प्रीतिस्निग्ध नेत्रों से पीएँगी यह सोचकर कि कृषि का फल तुम्हारे ही अधीन है। माल के पठार में अभी–अभी बखरन हुई है, अत: उससे सुगन्ध निकल रही है। इसपर थोड़ी देर रुक लेना और उसके बाद तीव्र गति से पुन: उत्तर की ही ओर बढ़ना। (माल उन्नत भूतल = पठार बुन्देली)। (१७) उधर मिलेगा आम्रकूट नामक प्रशस्त चोटियों वाला पर्वत। गहन वृष्टि से तुम उसकी दवाग्नि शान्त कर देना। वह तुम्हें ठीक से सिर पर स्थान देगा। ऐसा तो कोई क्षुद्र व्यक्ति भी नहीं होता जो पहले किए उपकार को यादकर आश्रय लेने आए मित्र से विमुख हो, फिर वैसा ऊँचा व्यक्ति तो कैसे ऐसा कर सकता है। (१८) आम्रकूट पर इस समय पककर पीले पड़े जंगली आमों से लदे होगे जंगल। चिकनी चोटी से रंग के तुम उसके शिखर पर जा बैठना। फिर क्या कहना है, वह पर्वत बन जाएगा गर्भवती भूमि का स्तन, बीच में श्याम और शेष विस्तार में पाण्डु।

---

१७. पद्यान्तर –

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटस्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्तस्य नैदाघमग्निं सद्भावार्द्र: फलति न चिरेणोपकारो महत्सु ।।

जब यात्रा से थके तुम सामने पहुँचोगे तो वह चोटी वाला पर्वत आम्रकूट तुम्हें बड़ी खुशी के साथ, अपने को धन्यवाद मानते हुए, शिखर पर धारण करेगा। तब तुम्हें भी उस पर लगी ग्रीष्म की दँवार को खूब पानी बरसा कर बुता देना। बड़े लोग अपने सद्भाव के कारण ऊपर आए उपकार का उत्तर देने में देरी नहीं करते।

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्ण्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्ण्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।।१९।।
तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि–
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्ण्णता गौरवाय ।। २०।।
नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै–
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्ग्गम् ।। २१।।

(१९) वहाँ वनचर वधू कुञ्जों का भोग कर रही होंगी। वहाँ थोड़ी देर ठहर जाना, वर्षा भी कर देना, जिससे तुम कुछ हल्के हो जाओगे। फिर उसके आगे का मार्ग झटपट पार कर लेना। वहाँ मिल जाएगी रेवा (नर्मदा) जो विशीर्ण हो रही होगी विन्ध्य के एक शिखर से गिरकर (भेड़ाघाट का धुआँधार) और लगेगी किसी गजराज के माथे पर चूर्ण निर्मित पत्रावली सी। (भक्ति =भाँति, भङ्गिमा, छेद=भराब के फूल। अंग=माथा, न कि शरीर।) (२०) हे घन! वर्षा करने के बाद रेवा का जल ले लेना। वह जंगली हाथियों के तिक्त मद से वासित होगा और जम्बूकुञ्ज से टकरा कर बह रहा होगा। फिर आगे बढ़ना। तब वायु तुम्हें उड़ाने में समर्थ नहीं होगी। क्योंकि खाली होता है लघु और भरा गुरु। (२१) इस समय कदम्ब हरे और कपिश होंगे। उनमें केसर भी निकल आए होंगे, आधे ही। तट के ऊपर लगी कन्दली में पहली कलियाँ निकल चुकी होंगी। इन दोनों को देखकर और दवाग्नि से जले जंगलों से भूमि की अधिक गहरी गन्ध सूँघकर सारङ्ग सूचना देते रहेंगे कि उस रास्ते तुम बरसते हुए निकले हो। (सारङ्ग=मृग, चातक, हाथी।)

---

२०. पद्यान्तर–

अम्भोबिन्दुग्रहणचतुराँश्चातकान् वीक्षमाणाः श्रेणीभूताः परिगणनया निर्विशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः सोत्कण्ठानि प्रियसहचरीसम्भ्रमालिङ्गितानि ।।

तुम्हें पाकर जब तुम्हारी गर्जना होगी तो सिद्ध जनों से उनकी उत्कण्ठित प्रियतमाएँ चिपक जाएँगी। ये सिद्धलोग देख रहे होंगे– जल बिन्दुओं को चुगने में चतुर चातकों को, और लगे होंगे। वकपक्तियों की कतार को एक–दो–तीन करके गिनने में।

२१. दग्धा = जग्ध्वा म.।

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्व्वते पर्व्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ।। २२।।

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै–
र्नीडाऽऽरम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ।। २३।।

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।। २४।।

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो–
स्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा–
मुद्दामानि प्रथयति शिलावेश्मभिर् यौवनानि ।। २५।।

(२२) सखे! मेरा प्रिय करने के लिए तुम यद्यपि तीव्रगति से जाना चाह रहे होगे तब भी अर्जुनवृक्षों की सुगन्ध से युक्त पर्वत–पर्वत पर कुछ समय लगता ही रहेगा। ठीक है, वहाँ आँखों में पानी लिए मयूर केकाध्वनि में तुम्हारा स्वागत करते हुए करेंगे तुम्हारी अगवानी। उसे स्वीकार कर वहाँ से किसी भी प्रकार शीघ्र ही चलने का प्रयत्न करना। (२३) तुम्हारे पास पहुँचते ही दशार्ण क्षेत्र के केवड़ों के फूटे भुट्टों के मुखाग्र (सूचि) से बिखरे पराग से उपवन की बागुड़ें सफेद दिखाई देंगी, गाँव गाँव के चैत्य कौओं के घोंसले बनाने से आकुल होंगे, पकी जामुन से बगीचे काले पड़ गए होंगे और हंस अब कुछ ही दिनों दिखाई देंगे। (२४) दशार्णों की जो राजधानी है वह विदिशा नाम (लक्षण) से चारों देश देशान्तरों में प्रसिद्ध है। वहाँ पहुँचोगे तो तुम अपनी कामुकता का अविकल फल पा जाओगे। क्यों? इसलिए कि वहाँ पान करोगे तुम वेत्रवती (बेतवा) का चपल तरंगों वाला, तीर के पास पहुँचकर मीठी ध्वनि करता स्वादु जल, उसके भ्रूभङ्ग युक्त मुख के समान। (२५) वहाँ है एक टेकरी (नीच = छोटा गिरि) उसे नीचगिरि नाम से जाना जाता है, विश्राम के लिए उस पर ठहर

विश्रान्तः सन् व्रज वननदीतीरजानां निषिञ्च–
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ।। २६।।

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्, वञ्चितोऽसि ।। २७।।

वीचिक्षोभस्तनित–विहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।। २८।।

जाना। ज्यों ही तुम्हारा सम्पर्क होगा वह पके फूलों के कदम्बों के बहाने पुलकित दिखाई देगा। उसमें कुछ गुफाएँ (शिलावेश्म) हैं जिसमें निकलते रहते हैं वेश्याओं के रतिपरिमल जो करते रहते हैं नागर लोगों के उद्दाम यौवन को प्रौढ़। (२६) विश्राम के बाद दो काम करते हुए आगे बढ़ना एक तो वहाँ एक वननदी (पार्वती) मिलेगी उसके तीर पर लगे उद्यानों की यूथिकाओं (मोंगरा, बेला) को नवीन जलकणों से सींच देना और दूसरे वहीं पुष्पवाली सुन्दरियों के मुखों का परिचय प्राप्त कर लेना, उन मुखों का जिनके कर्णोत्पल कपोल का पसीना बार बार पोंछने से क्लान्त हो गए होंगे। परिचय के लिए उनपर छायाकर देना। (२७) तुम्हें जाना है उत्तर दिशा की ओर, अतः मार्ग टेढ़ा अवश्य पड़ेगा, तब भी उज्जयिनी के जो सुधा (छुई मिट्टी) से धवल भव्य प्रासाद हैं उनकी गोद का भी परिचय लेना छोड़ना नहीं। वहाँ की पौराङ्गनाओं के नेत्र चंचल होते हैं और जब तुम्हारी बिजली चमकेगी तो वे हो जाएँगे चकित। उन नेत्रों में यदि तुम रमे नहीं तो तुमने कुछ भी नहीं पाया। (२८) आगे मिलेगी निर्विन्ध्या (नेबुज) नदी। वह स्वयंदूती बनी मिलेगी तुम्हारे लिए। तरंगों के क्षोभ से कूजती विहगश्रेणी होगी उसकी खनखनाती करधनी, फिसलनभरी ठुमक होगी उसकी चाल में, आवर्त्तरूपी नाभि खोल रखी होगी देखने के लिए उसने तो, मित्र मेघ! रास्ते में ही सही, कूद पड़ना उस पर और ले लेना उसका रस। अरे स्त्रियों की (रति) याचना का प्रमुख शब्द हुआ करता है उनका विभ्रम (हावभाव) ही।

वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः (काली)
पाण्डुच्छायां तटरुह–तरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ।। २९ ।।

प्राप्यावन्तीनुदयनकथाकोविद–ग्राम–वृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ।। ३० ।।

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलाऽऽमोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ।। ३१ ।।

(२९) उसे पार करोगे तो तुम्हें मिल जाएगी (काली) सिन्ध नदी। वह भी तट पर ऊगे वृक्षों से झड़े जीर्ण पत्तों से पीली पड़ गई होगी। यह है फल उसमें विद्यमान तुम्हारे प्रेम का। इस कारण वह जिस कार्य से अपनी कृशता छोड़ सकती है वह तुम ही कर सकते हो। **(३०)** यहाँ से आरम्भ हो जाएगा अवन्ती जनपद। वहाँ मिलेंगे गाँव गाँव में बूँढे लोग जो बड़े कुशल हैं 'उदयन'–कथा को कहने में। वहाँ से तुम मार्ग पकड़ना पूर्वकथित (उज्जयिनी) नाम की श्रीविशाला विशाला नगरी का। विशाला तो मानो, स्वर्ग से भूमि तल पर लौट रहे स्वर्ग के निवासी जनों द्वारा बचे पुण्यों की एवज में अपने साथ भूमितल पर ले आया गया द्युलोक का एक कान्तिमान् खण्ड ही है। **(३१)** उज्जयिनी में है सिप्रा नदी। उसका वात सबेरा होने पर प्रार्थनाचाटुकार प्रियतम के समान स्त्रियों की सुरतजनित अङ्गग्लानि को चुराता रहता है। वह प्रभात में तड़के खिल रहे कमलों के आमोद से कषायित और सारस की मदकल

---

३०. पद्यान्तर –

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पादित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः।।

यहाँ बाहर से आए बन्धुओं को अभिज्ञ लोग यह कह कहकर रमाते रहते हैं कि 'यहाँ हरण किया था प्रद्योत की प्रियपुत्री का वत्सराज ने, उसी राजा प्रद्योत का सुनहला तालद्रुमवन यहाँ था, यहाँ नलगिरि नामक हाथी खूँटा उखाड़ कर दर्प के कारण भागा था।

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै–
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
लक्ष्मीं पश्यँल्ललितवनितापादरागाङ्कितेषु ।। ३२।।

भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या–
स्तोयक्रीडा–निरत–युवति–स्नान–तिक्तैर्मरुद्भिः ।। ३३।।

बोली को लम्बाई देता रहता है। (३२) उज्जयिनी के हर्म्यों पर रास्ते की थकावट दूरकर लेना इनकी श्री देखते देखते। ये हर्म्य होंगे ललित वनिताओं के पादराग (अलते) से अंकित और पुष्पों से सुरभित। यहाँ जालियों से निकले केशसंस्कार धूप से तुमको कुछ उपचय भी प्राप्त होगा शरीर में। उधर तुमको बन्धु मानकर पालतू मयूर तुम्हें नृत्त का उपहार देंगे। (३३) अब पहुँचना त्रिभुवनगुरु भगवान् चण्डीश्वर/चण्डेश्वर के पवित्र धाम। वहाँ गण तुम्हें बड़े ही आदर के साथ निहारेंगे यह सोचकर कि तुम्हारी छवि वैसी ही है जैसी उनके स्वामी भगवान् नीलकण्ठ के कण्ठ की। उस धाम का उद्यान गन्धवती नदी की हवाओं के कुवलय–रज से सुगन्धित और तोयक्रीडा में निरत युवतियों के स्नान से तिक्त (चिरपिरे) झोकों से कम्पित।

---

३३. दो पद्यान्तर–

हाराँस्ताराँस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान् संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ।।

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात्।
योधाग्रण्यः प्रतिदिशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाऽऽ भरण–रुचयश्चन्द्रहास–व्रणाङ्कैः ।।

उज्जयिनी की हाट में लम्बे और चमचमाते मोती के हार, भाँति भाँति (कोटि) के शङ्ख और सीपें, हरी दूर्वाजैसी हरे रंग की किरन विखेरती मरकत मणियाँ तथा मूँगों को रचा हुआ देखने से ऐसा लगता है कि अब सागरों में केवल जल ही शेष है। जहाँ पत्तों से हरे रंग के घोड़े ऐसे होते हैं जो सूर्य के घोड़ों से होड़ लेते हैं। ऊँचे और मदजल चुआते हुए (हाथी भी तुम्हारे जैसे) लगते हैं। इसी प्रकार दिशाओं में युद्ध में निरत जहाँ के योद्धा वीर तलवार के घावों को आभरण से अधिक मानते हैं।

अप्यन्यस्मिञ् जलधर! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया–
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ।। ३४।।

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितबलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू–
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ।। ३५।।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ।। ३६।।

(३४) हे जलधर! भले ही और कभी पहुँचो परन्तु महाकाल पहुँचकर ठहरे रहना जब तक सूर्य ओझल न हो जाए आँखों से। तब होगी सन्ध्याकालीन आरती (पूजा/बलि) उसमें बजते हैं नगाड़े। सो उनका काम तुम ही कर देना गरज–गरज कर। तुम्हें तुम्हारी आमन्द्र गरजन का अखण्ड फल प्राप्त होकर रहेगा। (३५) सान्ध्य आरती के समय वहाँ चँवर डुला रही होंगी वेश्याएँ। पादन्यास से उनकी रशनाऐं बज रही होगी। वे चँवर डुला रही होंगी भाँति भाँति से, फलतः उनकी मूँठ (बलि) में जड़े रत्नों की प्रभा से उनके हाथ चमक रहे होंगे। तुम जो बूँदे छोड़ोगे वे उनके नखक्षतों पर सुखद बनेंगी और उन्हें पाकर वे तुम्हारे ऊपर छोड़ेंगी अपने मधुकरश्रेणी जैसे लम्बे–लम्बे कटाक्ष। (३६) अब भगवान् महाकालेश्वर फैलाएँगे अपनी भुजाएँ। उनमें तुम मण्डलाकार बनकर लिपट जाना। तुम्हारे ऊपर नए जपापुष्प सा सन्ध्याराग उछला रहेगा ही। कितनी बड़ी सेवा हो जाएगी इससे कि नृत्य के समय भगवान् को जो आर्द्र नागाजिन अपेक्षित होता है, उसकी अपेक्षा नहीं होगी और लाभ यह होगा कि भवानी तुम्हारी इस सेवा को उद्वेगरहित निश्चल दृष्टि से निहार सकेंगी।

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकष–स्निग्धया दर्शयोर्व्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ।। ३७।।

तां कस्याञ्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।। ३८।।

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्त्रं कमलवदनात् सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ।। ३९।।

(३७) उज्जयिनी में रात के गहन (सूचिभेद्य) अन्धकार से जब राजपथ पर सूझना बन्द हो जाए तो अपने रमण के घर जा रही (अभिसारिका) स्त्रियों को कनकनिकषस्निग्ध (कसौटी) पर उभरी सुवर्ण रेखा जैसी नयनसुभग बिजली चमकाकर भूमि दिखला देना, परन्तु ध्यान रहे बरसना गरजना नहीं, वे बहुत अधिक घबराई रहती हैं। (३८) यह एक रात तुम महाकालेश्वर की उज्जयिनी में अवश्य बिताना। तुम्हारे निवास के लिए वहाँ उच्च हर्म्य सुलभ हैं। वहाँ पारावत भी सोते मिलेंगे। रात में तुम्हारी प्रिया विद्युत् के साथ लम्बा विलास होगा तो वह रहेगी खिन्न, तथापि सूर्य भगवान् के दिखाई देते ही शेष रास्ता तय करना न भूलना, ऐसा न हो कि तुम उज्जयिनी की रम्यता पर मोहित होकर वहीं रुके रह जाओ। बात यह है जो भी सत्पुरुष किसी मित्र के कार्य के लिए निकलते हैं, वे अपना उत्साह क्षीण नहीं करते। (३९) सबेरे के समय प्रणयिजनों को खण्डिता नाायिकाओं के आँसू पोंछने होते हैं। सो तुम सूर्य के मार्ग से हट जाना। वह भी नलिनी के कमलवदन से ओस के आँसू पोंछने लौटा होगा। यदि तुमने उसके कर (किरण रूपी हाथ) रोक दिए तो उसमें तुम्हारे लिए प्रबल असूया जाग उठेगी। (असूया = द्वेष विद्युल्लता।)

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्
मोघीकर्त्तुं चटुल–शफरोद्वर्त्तन–प्रेक्षितानि ॥ ४० ॥

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४१ ॥

त्वन्निःष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनित–सुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्व्वं गिरिं ते
शीतो वातः परिणमयिता काननोदुम्बराणाम् ॥ ४२ ॥

(४०) अब मिलेगी गम्भीरा (नदी)। उसका प्रसन्न जल ही समझना उसका प्रसन्न चित्त। उसमें तुम्हारा प्रकृतिसुभग प्रतिबिम्ब रूप आत्मा (स्वरूप) घर कर जाएगा। वह कुमुदविशद चञ्चल उलटते मीनों के कटाक्ष कर रही होगी। वहाँ तुम उपेक्षाधारी धीर पुरुष मत बन जाना, जिससे उसकी ये सब प्रणयचेष्टा मोघ/असफल हो जाए। **(४१)** उसे छोड़ना तुम्हारे लिए कठिन होगा, क्योंकि तुम ललना का आस्वाद जानते हो। तुमको वह विवश कर देगी समागम के लिए। वह अपना ऊँचे तटरूपी नितम्ब पर से खिसका नीला जल–वस्त्र वानीर (वेंत) की शाखा रूपी हाथों से कुछ थामे होगी; जिससे उसकी आवर्त्तरूपी नाभि दिखाई पड़ जाए। तुमसे रहा नहीं जाएगा। तुम उसे पूरी तरह उठा लेना। अब यहाँ से तुम जिस किसी प्रकार प्रस्थान कर सकोगे, वहीं रह आओगे औंधे लटके। कोई भी ज्ञातास्वाद व्यक्ति जघन खोलकर तैयार बनिता को कैसे छोड़ सकता है। **(४२)** अब तुम चलोगे देवगिरि (देवडूँगरी) की ओर। वहाँ तक तुम्हें ले जाएगा शीतल पवन। वह सुगन्धित भी होगा, तुम्हारी वर्षा के सम्पर्क से खिली मिट्टी की सोंधी गन्ध से। उसे फुड़फुड़ाती सूँढ से हाथी पी रहे होंगे। यह वायु तुम्हारे नीचे नीचे चलेगा, जिससे जङ्गली उदुम्बर (ऊमर, गूलर) गदरा जाएगी।

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनाञ्चमूना–
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ।। ४३ ।।

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलक्षेपि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर् गर्जितैर् नर्त्तयेथाः ।। ४४ ।।

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद् वीणिभिर् मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्त्रोतोमूर्त्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ।। ४५ ।।

(४३) वहाँ विराजमान बने रहते हैं भगवान् कार्त्तिकेय। उन्हें तुम आकाशगङ्गा जल से भीगे पुष्पों की घनी वृष्टि से स्नान करा देना। नवशशिधारी भगवान् शंकर का सूर्य से भी अधिक तेजस्वी वही तेज है वह जिसका, इन्द्र की सेना की रक्षा हेतु अग्नि में वपन किया था शिव ने। **(४४)** अग्नि से ये ही उत्पन्न हुए थे। इन्हें कार्त्तिकेय (पावकि) कहा ही जाता है। इनका वाहन है मयूर। इसका गिरा ज्योतिर्लेखावलयी मोरंगा भगवती पार्वती पुत्र प्रेम से कान में कुवलय की पखुड़ी छोड़कर धारण करती हैं और भगवान् शङ्कर अपनी चन्द्रकला का सफेद काजल इसकी आँखों में आँजते रहते हैं यह तुम्हारी मन्द्र गर्जना पर नाचने लगता है। सो गरज पड़ना तुम। तुम्हारी वह गरजन और घनी हो जाएगी पीछे पहाड़ की झाँई से,जिससे वह जी भरकर नाच ले। **(४५)** शरवण (सरकंडे के वन) में उत्पन्न इस देव (कार्त्तिकेय) की इस प्रकार आराधना कर लेने के पश्चात् कुछ मार्ग तय कर लेने पर तुम्हें मिलेगी चर्मण्वती नदी (चम्बल) उसके ऊपर कुछ देर रुके रहना जिससे उसका मान रह जाए। जानते हो वह कैसी नदी है? वह राजा रन्तिदेव के गवालम्भ–नामक यज्ञ से उत्पन्न कीर्त्ति है ज़ो नदी प्रवाह के रूप में परिणति पा गई हैं भूलोक में। हाँ जब तुम देवगिरि से आगे बढ़ोगे तो तुम्हारे मार्ग से वीणावादक सिद्धों की जोड़ियाँ हट जाएँगी, उन्हें भय रहेगा जलकणों का कि उनकी वीणा के तार भीग न जाएँ।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी–
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ।। ४६।।

तामुत्तीर्य व्रज परिचित–भ्रूलता–विभ्रमाणां
पक्ष्मोत्क्षेपादुपरि विलसत्कृष्णशारप्रभाणाम् ।
कुन्दोत्क्षेपाऽनुग–मधुकर–श्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुर–वधू–नेत्र–कौतूहलानाम् ।। ४७।।

ब्रह्मावर्त्तं जनपदमथच्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन् मुखानि ।। ४८।।

(४६) चर्मण्वती पर विष्णु के रंग चुरा लेने वाले काले रंग के तुम जब पानी लेने हेतु झुकोगे तो उसका चौड़ा प्रवाह भी दूरी के कारण पतला दिखाई देगा। फलतः आकाशचारी लोग अन्य सब ओर से हटाकर केवल उसी को आँखें फाड़ फाड़ कर देखते मिलेगें। क्यों? इसलिए कि उस समय भूमिरूपी सुहागिन ऐसी लगेगी कि उसने बीच में एक बड़ा सा नीलम लगा धवल मुक्ताहार धारण कर लिया है। (४७) चर्मण्वती को पारकर आगे बढ़ना दशपुर जनपद की ओर। इस जनपद की वधुओं के नेत्र दर्शनीय होते हैं। उनमें कौतुक भरा रहता है। तुम उनके पात्र बनने का दुर्लभ अवसर पाओगे। जब वे तुम्हारी ओर आँखे ऊँची करेंगी तो उनकी भ्रूलताओं में विभ्रम रहेगा। पक्ष्म ऊपर उठा लेंगी तो उनसे निकलती दिखाई देगी चितकबरी छवि। अब वे सफेद कुन्द पुष्प की ऊपर उछाल का पीछा कर रहे काले भौरों की छवि चुरा लेंगी। (४८) अब मिल जाएगा तुम्हें ब्रह्मावर्त्त नामक जनपद। छाया डालते हुए उसका अवलोकन करते करते उस कुरुक्षेत्र पहुँच जाओगे जिससे क्षत्रियों के युद्ध की स्मृति

---

४७. दृष्ट्वा लोकान् दशपुरगतान् विद्युदुल्काप्रकाशैस्तत्प्रासादानुपवनवतो वारिणा प्लावयित्वा ।
याया: शीघ्रं शिखिकुलरवोद्गीतसानूपकण्ठं दिव्यस्त्रीणां विलसनभुवं पर्वतं पारियात्रम् ।।
दशपुर के लोगों को बिजली की चमक से देखते हुए, उसके उपवनयुक्त प्रासादों को पानी से प्लावित करते हुए आगे बढ़ना और शीघ्र ही पारियात्र पर्वत पर जा पहुँचना। उसकी चोटियों पर मयूर केकाध्वनि कर रहे होंगे। वह दिव्य वनिताओं के विलास का उत्तम स्थान है।) हामा.२१५३

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लांङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य! सारस्वतीना–
मन्तः–शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ।।४९।।

तस्माद् गच्छेरनुकलखलं शैलराजावतीर्ण्णा
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीं वक्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ।।५०।।

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्क्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसिच्छाययाऽसौ
स्याद–स्थानोपनत–यमुना–सङ्गमेवाऽभिरामा ।।५१।।

जाग उठती है। जानते हो वहाँ जो युद्ध हुआ था उसमें क्या हुआ था? अरे, अरे उसमें गाण्डीवधारी अर्जुन ने क्षत्रियों के चेहरों पर तीक्ष्ण शरों की ऐसी वर्षा की थी जैसी धारासार को तुम कमलपुष्पों पर बरसाते हो। (४९) यही है पुण्यसलिला सरस्वती जिसका जल ऐसा कसैला है कि बलरामजी ने अभिमत रसवाली प्रियतम रेवती के नेत्र की परछाई से युक्त हाला को छोड़ उसी को पीना पसंद किया था। मित्र! तुम भी उसका ग्रहण करना। तब तुम काले केवल वर्णमात्र से रहोगे, अन्तरात्मा तो तुम्हारा शुद्ध (पवित्र और स्वच्छ) हो जाएगा। (५०) कुरुक्षेत्र से बढ़ना हिमालय, कनखल की ओर उतरी गङ्गा जी की ओर जो सगर के पुत्रों को स्वर्ग पहुँचाने के लिए बनाई गई मानों सीढ़ी है। इस गङ्गा ने शिव के केशों का ग्रहण कर लिया इन्दु से अपनी तरङ्ग के हाथ छुआते हुए और सौत गौरी ने भ्रुकुटी वक्र की तो उसकी फेनों के द्वारा हँसी उड़ा दी। (५१) तुम यदि चाहो तो उस (गंगा) का स्वच्छ स्फटिक के समान धवल वर्ण का जल पी लेना, परन्तु, आकाश से ही। अपना पिछला भाग आकाश में ही लटकाए रखना। उस समय तुम्हारी छाया उसकी प्रवाहित धारा में पड़ेगी तो लगेगा कि यमुना संगम पहले ही हो गया, जो उसे और सुन्दर बना देता है।

---

५०. गौरीं वक्र = गौरीवक्त्र।

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खात–पङ्कोपमेयाम् ।।५२।।

तं चेद् वायौ सरति सरलस्कन्ध–संघट्ट–जन्मा
बाधेतोल्का–क्षपित–चमरी–वालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै–
रापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ।।५३।।

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्तध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्व्वीथाः सघनकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ।।५४।।

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत् सिद्धैरुपचितबलिं भक्तनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ।।५५।।

(५२) वहाँ से उसी गङ्गा के उत्पत्तिस्थान हिमाचल पहुँचना जिसकी शिलाएँ बैठे कस्तूरीमृग की नाभिगन्ध से सुरभित रहेंगी और जो बर्फ से गौर होगा। वहाँ उसके शृंग पर बैठकर यात्रा की थकान दूर कर लेना। उस समय उसकी शोभा नन्दी के द्वारा उखाड़ी कीचड़ जैसी हो जाएगी। (५३) वहाँ 'सरल' वृक्ष लगे हैं। हवा चलने से उनकी शाखाएँ रगड़ा जाती हैं और आग लग जाती है। यदि ऐसा हो और वहाँ के चमरी मृगों की पूँछ उचटी चिनगारियों से झुलसने लगे तो उसे हजारों वारिधाराएँ बरसा कर अवश्य ही शान्त कर देना। उत्तमों की संपत्ति का फल आपत्ति में पड़े व्यक्तियों की आपत्ति का प्रशम ही है। (५४) वहाँ यदि तुम गरजोगे तो शरभ नामक आठ पैरों वाले मृग गुस्से में आकर तुम्हारे ऊपर कूद–कूद अपने अंग भंग करने लगें तो उन्हें घनी करका (ओला) वृष्टि कर तितर–बितर कर देना। निष्फल उछल कूद में लगने वाले किसका परिभव नहीं होता। (५५) वहाँ है हर की पैड़ी और भगवान् शंकर के चरणचिह्न, चट्टान पर उछरे हुए। सिद्ध जाति के लोग उनकी पूजा नियमित रूप

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयोगीयते किन्नरीभिः ।
निर्ह्रादी ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।५६।।

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ।।५७।।

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्प्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ।।५८।।

से करते रहते हैं। उनकी भक्तिनम्र होकर करना प्रदक्षिणा। उनके दर्शन का फल यह होता है कि श्रद्धालुजन भगवान् की सामीप्यमुक्ति पा जाते हैं, बन जाते है स्थायी गण। **(५६)** वहाँ भगवान् पशुपति की उपासना में छिड़ेगा संगीत, उसमें हवा से पूरित कीचकों की मधुर ध्वनि वंशीरव का कार्य कर रही होंगी, और त्रिपुरविजय का गान कर रही होंगी टोली बना बनाकर किन्नरियाँ । बचा मृदङ्ग, तो वह कमी तुम पूरी कर देना गरज कर, जिससे वह समग्रता पा जाए। **(५७)** प्रालेयाद्रि (हिमगिरि) में अनेक महत्त्वपूर्ण स्थल हैं। उन सबके आगे बढ़कर जा पहुँचना तुम भगवान् परशुराम की कीर्त्ति का मार्ग, जो क्रौञ्चरन्ध्र है वहाँ। वही से आया करते हैं हंस। उस रंध्र से निकलकर उत्तर ही जाना। उससे निकलने के लिए तुम्हें टेढ़ा होना पड़ेगा। तुम उस स्थिति में शोभायमान रहोगे बलि–नियमन के लिए उद्यत भगवान् विष्णु के श्यामपाद के समान। **(५८)** और ऊपर चले जाना और पहुँच जाना कैलाश। उस कैलाश पर जिसको रावण की भुजाओं ने चरमरा दिया था, उसके प्रस्थों की सन्धियाँ मिल गई थीं, किन्तु वह बना रहता है अप्सराओं का दर्पण। उसके अतिथि बनना। उसके कुमुदों जैसे आकाश में ऊँचे फैले शृङ्ग ऐसे लगते हैं जैसे प्रतिदिन इकट्ठा होता गया अट्टहास हो भगवान् शिव का।

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः—कृत्तद्विरद—दशनच्छेद—गौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री—
मंसन्यस्ते सति हलभृतो मेचके वाससीव ।। ५९ ।।

हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विहरेत् पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं व्रज मणितटाऽऽरोहणायाग्रयायी ।। ६० ।।

तत्राऽवश्यं वलय—कुलिशोद्घट्टनोद्गीर्ण—तोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे! घर्म्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर् गर्जितैर् भीषयेस्ताः ।। ६१ ।।

(५९) मित्र! तुरन्त कटे हाथी दाँत के खण्ड जैसे गौर वर्ण के उस कैलाश पर जब चिकने कज्जल से श्यामवर्ण के तुम फैल जाओगे तो उसकी शोभा ऐसी होगी जैसी बलदाऊ जी की होती है, जब वे अपने कन्धे पर नीलवर्ण का वस्त्र डाल लेते हैं, जिसे देखने में टकटकी लग जाती है। (६०) वह कैलाश है भगवान् का क्रीडाशैल। जब उस पर भगवान् शंकर चढ़ने लगे और भुजग का वलय हटाकर पार्वती को हाथ दें और जब वे मणितट पर आरोहण करने हेतु उद्यत हों तो मित्र! तुम वहाँ आगे पहुँच कर सीढ़ी बन जाना, तदर्थ अपने भीतर भरा जल का भण्डार जमा देना। (६१) वहाँ पहुँचते ही तुम जम जाओगे और ग्रीष्म के बाद मिलने के कारण सुरयुवतियाँ तुम्हारे साथ क्रीडा करेंगीं। तुम पर हीरे के कंगन रगड़ कर तुम्हें यन्त्रधारगृह (फौव्वारे वाला घर) बना देंगीं। सखे! यदि तुम उनसे छुटकारा न पा सको तो कर्णकटु ध्वनि से उन्हें डरा देना।

---

६१. हेमाम्भोजप्रसविसलिलं मानसस्याऽऽददानः कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातैर्नानाचेष्टैजलद! ललितैर्निर्विशेस्तं नगेन्द्रम् ।।
वहाँ हे जलद! तुम नाना प्रकार की चेष्टा से उस नगेन्द्र का आनन्द लेना। उसके मानस सरोवर का सुवर्णकमल उत्पन्न करने वाला जल ले लेकर, ऐरावत के माथे पर मुखपट बनकर, कल्पद्रुमों के किसलय और अंशुकों को कँपा कँपाकर।

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ।। ६२ ।।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्, तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर् विशेषैः ।। ६३ ।।[1]

हस्ते लीलाकमलमलके बालकुन्दानुवेधो
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।। ६४ ।।[2]

(६२) वहाँ मिलेगी तुम्हें अलका। वह संभोगावस्था में अपने प्रिय की गोद में बैठी हटे दुकूल की नायिका जैसी लगेगी। हिमालय है उसका प्रिय। उसकी गोद में बैठी उसकी गङ्गारूपी साड़ी खिसक रही होगी। हे कामचारिन्! तुम उसे देखकर नहीं पहँचान लोगे ऐसा नहीं। अरे यही तो तुम्हारे समय (वर्षा ऋतु) में अपने ऊँचे सतमजिलें भवनों पर बरसते अभ्रवृन्दों को धारण करती है, जैसे कोई कामिनी अलकों में मोती की माला धारण किया करती है। (यह हुआ पूर्वमेघ– मेघदूत काव्य का पूर्व भाग)।

(६३) अलका में ऐसे प्रासाद हैं कि हे घन! तुम्हारी तुलना अनेक विशेषताओं में कर सकते हैं। तुम्हारे भीतर विद्युत् है तो उनके भीतर है ललित वनिताएँ, तुम्हारे ऊपर इन्द्रधनुष है तो उनमें बने हैं चित्र, तुम्हारा घोष स्निग्ध और गम्भीर है तो उनमें भी वैसे ही मुरज संगीत में खनखनाते रहते हैं, तुम्हारे भीतर जल है तो उनमें मणि के फर्श हैं और तुम यदि इतने ऊँचे हो तो उनके भी शृङ्ग अभ्रंलिह(गगनचुम्बी) हैं। **(६४)** अलका में छहों ऋतुएँ एक साथ रहती हैं जहाँ की वधुएँ हाथ में लिए रहती हैं नीला कमल (शरद्), अलकों में कुन्द की कलियाँ (हेमन्त), चेहरे पर लोध्र–पुष्प के कारण पाण्डुता (शिशिर), चूडापाश में नवकुरबक (वसन्त), कर्ण में चारु शिरीष (ग्रीष्म) और सीमन्त में तुम्हारे आने से उत्पन्न कदम्ब (वर्षा)।

६४. वेधो = विद्धं व.म.।

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै–
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यत्र प्रणयकलहाद् विप्रयोगोपपत्ति–
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ।। ६५ ।।[3]

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।। ६६ ।।[4]

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ।। ६७ ।।[5]

(६५) जहाँ आँखों में अँसू तो आते हैं, परन्तु आनन्द से उत्पन्न, अन्य कारणों से नहीं, ताप तो होता है, किन्तु कुसुमशर (काम) जन्य जो साध्य होता है इष्टसंयोग से, अन्य कोई ताप नहीं, वियोग भी होता है, किन्तु प्रणयकलह से जन्य, शाप आदि अन्य कारणों से नहीं, और वहाँ के निवासी सभी धनपति हैं, जिनका वय एकमात्र यौवन ही होता है अन्य कोई नहीं। **(६६)** जहाँ यक्षजन उत्तम स्त्रियों के साथ छककर सेवन करते हैं कल्पवृक्ष से प्रसूत मधु (मदिरा) का, जिसका फल होता है रति। उसके लिए स्थान होता स्फटिक मणियों के हर्म्य, उन पर पानभूमि बनाने के लिए जो पुष्प बिखेरे जाते हैं, उनका काम कर देते हैं आकाश के तारों के प्रतिबिम्ब। उस समय तुम्हारी गम्भीर ध्वनि में पुष्कर वाद्य (मृदङ्ग) बजते रहते हैं। **(६७)** जहाँ बिम्बफल जैसे अधरों की वनिताओं के क्षौम वस्त्र, जिनकी नीवी स्वयं उच्छ्वसित हुई रहती है, अतः जो ढीले रहते हैं, प्रियजन रागावेश में आकर जब उन्हें खींचने लगते हैं तो लज्जामूढ वे और कुछ नही तो सामने जलते रत्नप्रदीपों की लम्बी–लम्बी लौ पर

---

६६. मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरूद्भिर्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।।
जहाँ मन्दाकिनी की ठंडी हवाओं के द्वारा जिनकी सेवा होती रहती है, तटपर पैदा हुए मन्दारों की छाया से जिनकी धूप मिटती रहती है, ऐसी देवों द्वारा चाही गई कन्याएँ खेलती रहती हैं सुवर्ण–वर्ण की बालू में छिपाई मणि को खोजने का खेल।

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी–
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गै–
र्धूमोद्‌गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ।। ६८ ।।[६]

यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्‌वासिताना–
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधोपगमविशदैश् चन्द्रपादैर् निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ।। ६९ ।।[७]

चूर्णमुष्टि (कपूरचूर्ण) को मुट्‌ठी भर–भर कर बुताने हेतु फेंकती हैं और वे बुतते नहीं। (६८) जिसके सतमँजिले भवनों के ऊपर की मञ्जिल सदा चलती रहती हवा, मेघों को ऊपर पहुँचा देती है और वे भी वहाँ भीतर चले जाते हैं तथा वहाँ बने चित्रों को बिगाड़ देते हैं। फिर मानों उनमें भय जागता है और वे गवाक्ष मार्ग से जर्जर होकर भाग निकलते हैं। (६९) जहाँ प्रियतम जब भुजाओं से आलिङ्गन करते तो वनिताओं के अंग अंग हर्ष में फूल उठते हैं। फिर आती है उनमें सुरतजनित अङ्गग्लानि। उसे दूर करती रहती हैं चन्द्रकान्त मणियाँ जललव बहा बहाकर। वे लगी रहती हैं मच्छरदानियों में। उनका स्पर्श करती रहती हैं चन्द्र की किरणें, जो तुम्हारी रुकावट से मुक्त रहती हैं, अतः जिनकी सफेदी निखरी रहती है।

---

६९. प्रक्षिप्त पद्य–

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै–
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ।।

जहाँ के कामिजन के पास अकूत धन है, उनके भवनों के भीतर अक्षय्य निधियाँ हैं। वे अलका का जो बाहरी उपवन है – बैभ्राज, उसमें अप्सराओं और वेश्याओं के साथ पहुँचते और उसमें विहार करते रहते, संगीत का आलाप छेड़–छेड़कर, उनके साथ किन्नर भी रहते हैं, जिनके कण्ठ बड़े ही सुरीले होते हैं। उनसे वे कुबेर का यश ऊँचे स्वर में गाते रहते हैं और यह क्रम प्रतिदिन का रहता है।

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै–
नैंशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ।। ७० ।।[८]

मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्ग–प्रहित–नयनैः कामिलक्ष्येष्वमोघै–
स्तस्याऽऽरम्भश्चतुरवनिता–विभ्रमैरेव सिद्धः ।। ७१ ।।[९]

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या–
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ।। ७२ ।।[१०]

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
तस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ।। ७३ ।।[११]

(७०) जहाँ कामिनियाँ रात को जिस मार्ग से अभिसार करती हैं उसकी सूचना सबेरे सूर्य उगते ही मिल जाया करती है, क्योंकि कहीं पैर लड़खड़ाने से गिरे मन्दार पुष्प मिलते हैं, कहीं पत्रच्छेद मिलते हैं, कहीं कानों से गिरे कनककमल मिलते हैं, कहीं मुक्ताजाल और कहीं स्तन परिसर के टूटे हार। **(७१)** वहाँ कुबेर के मित्र भगवान् शंकर साक्षात् रहते हैं, यह जान कर कामदेव भयवश अपना भ्रमरपङ्क्ति की प्रत्यञ्चा वाला धनुष नहीं उठाता, तब भी उसका काम बन ही जाया करता है, चतुर वनिताओं के विभ्रमों से ही, जो कामी रूपी लक्ष्यों पर अमोघ ठहरते हैं। **(७२)** जहाँ अबलाओं के मण्डन की सारी सामग्री अकेला एक कल्पवृक्ष ही सुलभ कर देता है यथा रंगबिरंगा वस्त्र, नयनों में विभ्रम की बलात् शिक्षा देता मधु, पुष्प, किसलय, नाना प्रकार के भूषण और चरणकमल में रचने योग्य अलता। **(७३)** वहाँ हमारा घर कुबेर के घर के उत्तर दूर से ही दिखाई दे जाता है। उसकी पहँचान है इन्द्रधनुष जैसा सुन्दर तोरण। तोरण के ही पास मन्दार का बालवृक्ष है जिसके पुष्पगुच्छ हाथों

वापी चास्मिन् मरकतशिला–बद्धसोपानमार्गा
हैमैश्छन्ना कनककमलैः स्निग्ध–वैदूर्यनालैः ।
यस्यास्तोये कृत–वसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ।। ७४ ।।[१२]

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदली–वेष्टन–प्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां, तमेव स्मरामि ।। ७५ ।।[१३]

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवककवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ।। ७६ ।।[१४]

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि–
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः सिञ्जद्वलयसुभगैः कान्तया नर्त्तितो मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ।। ७७ ।।[१५]

में आ जाते हैं। उनसे यह पौधा झुका रहता है। इसे मेरी कान्ता ने अपना पुत्र मान कर बढ़ाया है। (७४) मेरे भवन में ही एक वापी है उसकी सीढ़ियाँ हरे रंग की मरकतमणियों से बनी हैं, उसमें खिलते हैं कनककमल जिनकी नाल रहती है वैदूर्य (मूँगे) की। इसके जल में जो हंस आ बसते हैं वे तुमको भी देखकर चिन्तित नहीं होते और मानससरोवर नहीं जाते, जो वहाँ से पास ही है। (७५) उस वापी के ही तीर पर बना है क्रीडाशैल, जिसके शिखर बने हैं कोमल इन्द्रनील से और चारों तरफ बाड़ बनी है कनककदली ही। वह मेरी प्रिया को प्रिय है, इसलिए बगल में चमकती बिजली से युक्त तुम्हें देखता हूँ तो मुझे वह स्मरण हो आता है। (७६) यहाँ एक तो चञ्चल पल्लव वाला रक्ताशोक है और एक रम्य केसर। दोनों ही कुरबक से घिरे माधवीमण्डप से लगे लगाए हैं। इनमें एक (रक्ताशोक) तो चाहता रहता है मेरे साथ तुम्हारी सखी के बाँए पैर का आघात और दूसरा वदनमदिरा, दोहद के बहाने। (७७) इन दोनों के बीच है सोने की वासयष्टि जो लगी हुई है स्फटिक के फलक पर। उसकी जड़ में लगी हैं किञ्चित् प्रौढ़ बाँस जैसी मणियाँ। खनकती चूड़ियों से युक्त ताल दे–देकर

एभिः साधो! हृदय–निहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ ७८ ॥[१६]

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ७९ ॥[१७]

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥ ८० ॥[१८]

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम् ॥ ८१ ॥[१९]

नचाया गया तुम्हारा सुहृद् नीलकण्ठ बैठता है उसपर दिन डूबे। (७८) साधो! इन लक्षणों को याद रखना और देखना वहाँ द्वार के पास बने है शङ्ख और पद्म (निधियाँ)। वैसे कुल मिलाकर मेरा आवास मलिन होगा, क्योंकि, मैं वहाँ से दूर हूँ। सूर्य अस्त हो जाने पर कमल अपनी शोभा नहीं ही बढ़ा पाता। (७९) शीघ्र उड़ने के लिए हाथी के बच्चे सा बन जाना और जाकर पूर्वोक्त क्रीडाशैल पर बैठ जाना। उसकी चोटी रम्य है। फिर डालना घर के भीतर विद्युदुन्मेषरूपी दृष्टि, जिसमें प्रकाश कम रहे, ऐसा जैसा खद्योताली (जुगनू की पंक्ति) की चमक में रहता है। (८०) वहाँ तुम्हें एक ललना ऐसी दिखाई दे, जो हो दुबली, सोलह वर्ष की उमर की, हीरे की कनी से नुकीले दाँत वाली, अधरोष्ठ पके बिम्बाफल जैसा लिए, कटिभाग में क्षीण, चकितहरिणी जैसी दृष्टि से युक्त, गहरी नाभि वाली, नितम्बभार से अलसगति, स्तनों से कुछ झुकी और कुल मिलाकर जो हो विधाता की युवतिसृष्टि में सर्वोत्कृष्ट प्रथम रचना सी। (८१) उसे समझना कि वही है बहुत कम बोलने वाली, मेरा दूसरा प्राण। मुझ सहचर के दूर हो जाने से अकेली पड़ी चक्रवाकी सी। वह होगी अत्यधिक

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्तिलम्बालकत्वा–
दिन्दोर्दैन्यं त्वदुपगमज–क्लिष्टकान्तेर्बिभर्त्ति ।। ८२ ।।[२०]

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद् भर्त्तुः स्मरसि रसिके! त्वं हि तस्य प्रियेति।। ८३ ।।[२१]

उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ।। ८४ ।।[२२]

शेषान् मासान् विरहदिवसे स्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
मत्सङ्गं वा हृदयनिहिताऽऽरम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ।। ८५ ।।[२३]

उत्कण्ठित और इन बड़े बड़े दिनों के बीतते–बीतते वह बाला ऐसी बदल गई होगी, जैसी शिशिरमथित पद्मिनी बदल जाती है। (८२) निश्चित ही उसका मुख तुम्हारे समीप पहुँच जाने पर तुमसे आच्छादित चन्द्रमण्डल सा क्लिष्टकान्ति, फीका पड़ रहा होगा। अधिक आँसू बहाने से उसमें आँखें सूज/फूल गई होंगीं, निःश्वास उष्ण होने से अधर का रंग बदला हुआ होगा, हथेली पर रखा होगा वह और लटकती लटों से पूरा दिखाई नहीं दे रहा होगा। (८३) वह तुम्हें दिखाई देगी या तो पूजापाठ(बलि) में लगी, या मेरी विरहकृश प्रतिकृति (सादृश्य) सोच सोचकर लिखती या पिंजरे में बैठी मैना से पूछती– 'रसिके! अपने भर्त्ता की याद है न तुझे, तू तो उसकी बड़ी प्यारी रही है। (८४) उसके वस्त्र मलिन होंगे। गोद में वीणा रखी होगी और मेरे नाम से अंकित स्वरचित गीत को जोर से गाते गाते आँसू से तार भिगोकर स्वयं उठाई मूर्च्छना भुला देती होगी। (८५) या संभव है विरह के पहले दिन से निश्चित विरहावधि की गणना देहली पर रखे पुष्पों को गिन गिन कर करने में लगी होगी

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमतः पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ।। ८६ ।।[२४]

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर् विरहमहतीमश्रुभिर्यापयन्तीम् ।। ८७ ।।[२५]

पादानिन्दोरमृतशिशिराञ् जालमार्गप्रविष्टान्
पूर्व्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ।। ८८ ।।[२६]

अथवा मन ही मन मेरे संग का अनुभव कर रही होगी। प्रिय के विरह मे अंगनाओं के ये ही हुआ करते हैं प्रायः मनबहलाव के कार्य। (८६) मित्र! सौधवातायन में बैठकर मेरी उन्निद्र और जमीन पर सो रही उस प्रिया को अर्धरात्रि में सुनाना मेरा संदेश, क्योंकि दिन में तो वह काम मे लगी रहेगी, अतः दिन में उसे मेरा वियोग उतनी पीड़ा न देता होगा। पर मैं सोचता हूँ मेरा वियोग उसे गुरुतर वेदना का अनुभव कराता होगा रात में, क्योंकि उस समय उसे निर्विनोद रहना पड़ता होगा। (८७) मनोवेदना से वह दुबली हो गई होगी, विरहकालीन बिस्तर पर एक करवट पड़ी होगी, लगती होगी चन्द्रमा की पूर्व दिशा के क्षितिज पर दिखाई देती केवल एक कला सी, जिस रात्रि को मेरे साथ यथेच्छ रतों से क्षण के समान बिता लिया करती थी, विरह मे पर्याप्त बढ़ी हुई उसी रात्रि को जो आँसू बहा बहाकर काट रही होगी। अथवा (८८) जालमार्ग से भीतर आ रही अमृतशिशिर चन्द्ररश्मिओं की ओर उसके नेत्र पुरानी प्रीति से बढ़ते होंगे और तुरन्त ही लौट पड़ते होंगे। उन्हें वह आँसुओं से भारी बरौनी से ढँकती होगी और लगती होती मेघाच्छन्न दिन की कमलिनी सी न खिली और न सोई। अथवा,

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्संयोगः कथमुपनमेत् स्वप्नजोऽपीति निद्रा–
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ।। ८९ ।।[२७]

आद्ये बद्धा विरहदिवसे या शिखादाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ।। ९० ।।[२८]

सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्व्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ।। ९१ ।।[२९]

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा–
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ।। ९२ ।।[३०]

(८९) वह शुद्ध स्नान कर रही होगी, अतः उसके अलक रूखे और बिखरे होंगे। वे गण्ड तक लटक कर गड़ रहे होंगे, अतः वह अपने अधर किसलय को क्लेश देते निश्वास से उन्हें हटाती जा रही होगी। या वह चाह रही होगी निद्रा, इस आशा से कि किसी भी प्रकार स्वप्न में ही हो जाए मेरा समागम। किन्तु आँसुओं का प्रवाह (उत्पीड) उसे भी स्थान नहीं देता होगा। (९०) विरह के पहले दिन रिबिन हटाकर मैंने ही जिसे बाँधा था और शाप के अन्त में जिसे प्रसन्नचित्त होकर मुझे ही खोलना है, उस स्पर्श क्लिष्ट एक वेणी को बढ़े नाखूनों वाले हाथ से कपोल पर से हटाने में लगी होगी वह। (९१) वह अबला आभरण छोड़ चुकी होगी। अपना कोमल शरीर बार–बार शय्या की गोद में बड़े दुःख के साथ पटके होगी। उसे देखोगे तो तुम्हारे भी नए जल के आँसू फूट पड़ेंगे। करुणापूर्ण चित्त का प्रत्येक प्राणी प्रायः करुणवृत्ति और आर्द्र अन्तरात्मा का हुआ करता है। (९२) मैं इस प्रथम विरह में ये सब तथा इसलिए कर रहा हूँ कि मैं जानता हूँ तुम्हारी सखी के मन से मेरे प्रति भरपूर

रुद्धापाङ्ग–प्रसर–मलकैरञ्जन–स्नेह–शून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ।। ९३ ।।[३१]

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै–
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ।। ९४ ।।[३२]

तस्मिन् काले जलद! यदि सा लब्धनिद्रासुखा स्या–
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युत–भुजलताग्रन्थि गाढोपगूढम् ।। ९५ ।।[३३]

स्नेह है। मुझे अपने को झूठे ही सुभग मानने का (सुभगम्मन्य का) भाव वाचाल नहीं कर रहा है। हे भ्रात:! तुम्हें वह सब अतिशीघ्र प्रत्यक्ष दिखाई दे जाएगा जो जो मैनें कहा है। **(९३)** तुम्हारे पास पहुँचते ही उस मृगाक्षी का (बाँया) नेत्र ऊपर की ओर फरकने लगेगा और प्राप्त कर लेगा मीनक्षोभ से चलित कुवलय (नीलकमल) की श्री। यद्यपि (रूखी) अलकों के कारण उसका अपाङ्ग में फैलना रुका होगा और कज्जल से शून्य होगा, साथ ही मधुपान छूट जाने से भ्रूविलास भी भूल चुका होगा। **(९४)** इसका बाँया ऊरु (घुटने से ऊपर का भाग), मेरे नखों के चिह्न से छूटा हुआ है, चिर परिचित मुक्ताजाल से देवगति से मुक्त है और संभोग पूरा हो जाने पर मैं अपने हाथों से जिसका संवाहन करता था वह कदली के सरस स्तम्भ जैसा गौर (ऊरु) फरकने लगेगा। **(९५)** हे जलद! उस समय यदि उसे निद्रासुख मिल गया हो अर्थात् उसे नींद लगी हो तो इसकी प्रतीक्षा करते हुए याम भर का कष्ट बिना गरजे सह लेना। ऐसा न हो कि स्वप्न में मिल गए मुझ प्रणयी का कण्ठाश्लेष और गाढ आलिङ्गन भुजलताग्रन्थि से तत्काल छूट जाए।

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीर! स्तनितवचनैर्मानिनीं प्रक्रमेथाः ।। ९६ ।।[३४]

भर्त्तुर्मित्रं प्रियमविधवे! विद्धि मामम्बुवाहं
तत्संदेशैर् हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर् ध्वनिभिरबलावेणिमोक्षोत्सुकानि ।। ९७ ।।[३५]

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैवम् ।
श्रोष्यत्यस्मात् परमवहिता सौम्य! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः ।। ९८ ।।[३६]

(९६) अपने जल की फुहारों से शीतल वायु उठा लेना और जब वह मालती के नए गुच्छों के साथ आश्वस्त हो जाए तो बिजली भीतर ही रोके हुए जब वह तुमसे युक्त गवाक्ष पर दृष्टि स्थिर करे, तब उस मानिनी से अपनी कोमल ध्वनि मे कहना शुरू करना। **(९७)** 'हे अविधवे! मैं हूँ तेरे पति का प्रिय मित्र मेघ। उसके संदेशों को हृदय में रखकर तेरे पास आया हूँ। मैं वह मित्र हूँ जो मार्ग में विलम्ब करते प्रोषित पथिकवृन्दों को मन्द्र और स्निग्ध ध्वनियों से शीघ्र लौटने हेतु प्रेरित करता हूँ। वे भी अपनी अबलाओं की बँधी वेणियाँ छोड़ने के लिए उत्सुक रहते हैं।' **(९८)** यह कहते ही हनुमान् को सीता के समान तुमको वह उत्कण्ठा से उच्छ्वसित हृदय होकर देखेगी और तुमको ऐसा (दूत) ही मान लेगी, फिर सुनेगी तुम्हारा कथन पूर्ण ध्यान के साथ। 'हे सौम्य! सीमन्तिनी महिलाओं के लिए कान्त का जो संदेश मित्र द्वारा मिलता रहता है वह कान्त के संगम से थोड़ा ही कम होता है।'

तामायुष्मन्! मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तः
पूर्वाऽऽभाष्यं सुलभविपदां प्राणिनामेतदेव ।। ९९ ।।[३७]

अङ्गेनाङ्गं प्रतनु तनुना गाढ–तप्तेन तप्तं
सास्त्रेणाऽश्रुद्रुतम–विरतोत्कण्ठ–मुत्कण्ठितेन ।
दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ।।१००।।[३८]

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुम–भूदाननस्पर्श–लोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट–
स्त्वामुत्कण्ठा–विरचित–पदं मन्मुखेनेदमाह ।।१०१।।[३९]

(९९) हे आयुष्मन्! मेरा अनुरोध है और तुम्हारा अपना भी उपकार होगा इसलिए उससे ऐसा कहना – 'तुम्हारा सहचर रामगिरि आश्रम में है, वह वियुक्त है, किन्तु जीवित है और तुमसे कुशल पूछ रहा है। ऐसा है मरणशील प्राणियों से यही पहले बोला जाता है। (१००) वैरी विधाता वाम हो गया है और वह मार्ग रोके हुए है, इसलिए संकल्पों में ही तेरा भोग कर रहा है दूरवर्त्ती वह। उसका शरीर दुबला हो गया है तो तुम्हें भी दुबली समझकर, उसका शरीर गाढतप्त है तो तुम्हें भी तप्त समझकर, उसको आँसू आते रहते हैं तो तुमको साश्रु समझकर, वह उत्कण्ठित है तो तुम्हें भी अविरत उत्कण्ठित मानकर, उसे बहुत अधिक उँसास चलती है तो तुम्हें भी दीर्घ उँसास से युक्त मानकर। (१०१) तुम्हारा जो प्रिय, सखीजनों के सामने, जो बात बोलकर भी कही जा सकती थी उसे कान में कहने का बहाना बनाता रहता था, तुम्हारे आनन के स्पर्श के लोभ से, वही शब्द की पहुँच से परे है, आँखों से भी ओझल है, अतः उत्कण्ठा में बनाए (गेय) पदों के द्वारा मेरे मुख से ऐसा कह रहा है।

श्यामास्वङ्गं चकित–हरिणी–प्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि! सादृश्यमस्ति ॥१०२॥[४०]

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया–
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।
अस्त्रैस् तावन्मुहुरुपचितैर् दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥१०३॥[४१]

मामाकाशप्रणिहितभुजं निर्दयाऽऽश्लेषहेतो–
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥१०४॥[४२]

(१०२) हे चण्डि! तेरा पूरा सादृश्य किसी भी एक वस्तु में नहीं है। मैं जब श्यामा लताओं को देखता हूँ तो उनमें कल्पना करता हूँ तुम्हारे अङ्गों की, हरिणी के चकित नेत्र देखता हूँ तो उनमें तुम्हारे दृष्टिपात की, चन्द्रमा में तुम्हारी वक्त्रकान्ति की, मयूरों के विस्तृत बर्ह देखता हूँ तो उनमें तुम्हारे केशपाश की पतली, नदीवीचियों में तुम्हारे भ्रूविलास की। (१०३) तुमको धातुरागों से शिला पर प्रणयकुपित मुद्रा में चित्रित जब तक मैं स्वयं को तुम्हारे चरणपतित रूप में चित्रित करना चाहता हूँ, तभी तक बार बार उमड़े आँसू मेरी दृष्टि ढँक देते हैं। क्रूर विधाता को चित्र में भी हम दोनों का मिलन सह्य नहीं है। (१०४) स्थली देवियाँ जब अनेक बार मुझे देखती हैं जिस किसी प्रकार स्वप्न में मिली तुम्हारे निर्दय आश्लेष के लिए आकाश में भुजाएँ ताने, तो उनके नेत्रों से मुक्तास्थूल अश्रुबिन्दु

---

१०३. धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले!
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्म्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु–
र्दिक्संसक्तप्रविततघनव्यक्तसूर्य्यातपानि ॥

बाले! धारासिक्त भूमि सी सोंधी सुगन्ध से युक्त तेरें मुख से बहुत दूर पड़े और दुर्बल हुए मुझपर काम प्रहार करता ही है। सोचो की ग्रीष्म के अन्त के ये दिन कैसे बीतें जिनमें छाए बादल दिशाओं में सिमट जाते है और सूर्य की धूप सीधे लगने लगती है। सभी प्रार्थनाएँ दुर्लभ हैं। (शृ.प्र. ३१.३१८)

भित्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते कथमपि मया ते तुषाराद्रिवाताः
पूर्व्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ।।१०५।।[४३]

संक्षिप्येत क्षण इव कथं दीर्घ्घयामा त्रियामा
सर्व्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने! दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ।।१०६।।[४४]

नन्वात्मानं बहु विगणय—न्नात्मनैवाऽवलम्बे
तत् कल्याणि! त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।।१०७।।[४५]

तरुकिसलयों पर टपकने लगते हैं। (१०५) हे गुणवति! हिमाचल के देवदारुद्रुम के पत्रपुटों को फोड़कर उनके रस से सुरभित पवन के जो झोंके दक्षिण की ओर बहते हैं, मैं उनका आलिङ्गन करने दौड़ता हूँ यह सोचकर कि इन्होने कदाचित् तुम्हारा स्पर्श किया हो। (१०६) प्रगाढ ताप भरी तुम्हारी वियोग व्यथाओं ने, हे चटुलनयने! मुझे शरणहीन बना दिया है। मेरी न यह प्रार्थना पूरी होती कि दीर्घयामा रात्रि क्षण सी संक्षिप्त हो जाती, न यह कि दिन ही सभी अवस्थाओं में किसी प्रकार मन्दातप हो जाए। (१०७) बहुत कुछ सोचकर मैं अपने आप को स्वयं ही बचाए हुए हूँ, हे कल्याणि! तो तुम भी बहुत अधिक कातर मत होना'। ऐसा है किसके दिन सदा एक से रहते हैं, दशा कभी नीचे जाती है तो कभी ऊपर, चक्रनेमि की भाँति।

१०८. चतुरो = चतुरे।

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमाऽऽत्माऽभिलाषं
निर्वेक्ष्याव: परिणत–शरच्चन्द्रिकासु क्षपासु ।।१०८।।[४६]

भूयश्चाह त्वमसि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्ट: स्वप्ने कितव! रमयन् कामपि त्वं मयेति ।।१०९।।[४७]

एतस्मान्मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने! मय्यविश्वासिनी भू: ।
स्नेहानाहु: किमपि विरहे ध्वंसिनस्ते त्वभोगा–
दिष्टे वस्तुन्युपचितरसा: प्रेमराशीभवन्ति ।।११०।।[४८]

(१०८) मेरे शाप का अन्त होगा जब शार्ङ्गपाणि भगवान् विष्णु भुजयशयन से उठेंगे। शेष बचे चार मास तुम भी आँखे मींचकर बिता लो। उसके पश्चात् हम दोनों विरह में गुणित हुई उस–उस इच्छा को पूर्ण करेंगे शरत् की परिणत चन्द्रिका वाली निशाओं में। (१०९) और कहना एक बार तुम मेरे कण्ठ से लगकर सोती–सोती चिल्लाकर रोती हुई किसी कारण जाग उठी। फिर असकृत् पूछने पर तुमने हँसते हँसते कहा था 'छलिया तुझे मैंने स्वप्न में किसी दूसरी के साथ रमण करते देखा।' (११०) यह अभिज्ञान दे रहा हूँ इससे मुझे सकुशल जानना और हे असितनयने! कोई कुछ कह दे तो मुझ पर अविश्वास मत करना। स्नेह एक ऐसी वस्तु हैं जो विरह में नष्ट हो जाती ऐसा कुछलोग कहते हैं, वास्तविकता यह है कि यदि भोग्य वस्तु पसंद की हो तो वे भोग न होने से इकट्ठी होती जाती है और प्रेमराशि के रूप में परिणत हो जाती है।

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञान–प्रहित–वचनैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ।।

कच्चित् सौम्य! व्यसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ।।

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशाञ्जलद! विचर प्रावृषा सम्भृतश्री–
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ।।१११।।

।। इति महाकविकालिदासविरचितं मेघसन्देशं नाम मेघदूतकाव्यं सम्पूर्णम् ।।

(१११) हे जलद! प्रथम विरह में जिसे शोक अधिक असह्य लगा होगा तुम्हारी उस सखी को इस प्रकार आश्वस्त कर शिवजी के वृष से जिसके कूट उखाड़े गए हैं, ऐसे इस कैलाश पर्वत से लौटकर,

अभिज्ञान के साथ उसके वचनों को मुझे भी आ सुनाना और प्रातःकाल के कुन्द पुष्प जैसे झड़ने ही वाले मेरे प्राणों को भी बचा लेना।।

हे सौम्य! क्या तुमने मुझ बन्धु का यह कृत्य स्वीकार कर लिया? अथवा तुम्हारे उत्तर से ही यह मानूँ कि उसे तुमने स्वीकार कर ही लिया, यह आवश्यक नहीं। अरे तुम चातकों की याचना पर, बिना बोले ही जल बरसाते ही रहते हो। सत्पुरुष का उत्तर अभीष्टपूर्त्ति ही होता है।।

मेरी प्रार्थना है तो अनुचित, परन्तु इसे पूर्ण कर ही देना, चाहे यह सोचकर कि मेरा कार्य सुहृद् का कार्य है, या यह सोचकर कि मैं विपत्ति में हूँ और इसलिए दया का पात्र हूँ इसे कर देना।

मेरी कामना है कि, प्रावृड् ऋतु से श्रीसम्पन्न तुम जल बरसाते हुए जिधर चाहो उस दिशा में विचरण करना और तुम्हारी प्रिया विद्युत् के साथ तुम्हारा मेरे समान कभी विप्रयोग न हो ।।१११।।

।। इस प्रकार महाकवि कालिदास विरचित मेघसन्देश नामक मेघदूत काव्य पूर्ण हुआ।।

कालिदासकृतिकल्पम्

।। ऋतुसंहारकाव्यम् ।।

॥ श्रीः॥

सनातनकविरेवाप्रसाददद्विवेदिसंपादितं

महाकविकालिदासकृतिकल्पम्

॥ ऋतुसंहारकाव्यम् ॥

(१) ग्रीष्मवर्णना*

ग्रीष्मो नाम ऋतुरुत्तराफाल्गुनीयुक्तां फाल्गुनमासपूर्णिमामतीत्य प्रवृत्तो व्याप्तश्च विशाखायुक्तां वैशाखमासपूर्णिमां यावत् तिथीनां षष्टिं वसन्तर्तोरत्ययः। अयमस्य भोगकालः। अस्य लक्षणं च कर्णिकारकुसुमादिकम्।

प्रचण्डसूर्यः, स्पृहणीयचन्द्रमाः, सुखावगाहः, क्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये! ॥१॥
निशाः, शशाङ्कः, क्षतनीरराशयः, क्वचिद् विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः, सरसं च चन्दनं, शुचौ प्रिये! यान्ति जनस्य सेव्यताम् ॥२॥
सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः ॥३॥

(१) सूर्य पहले चण्डांशु रहे किन्तु इस समय वे प्रचण्डांशु हैं। चन्द्रमा शीतांशु कहा जाता है, सो यथार्थ है, इस समय वह स्पृहणीय है। स्नान अच्छा लगने लगा है, किन्तु सभी वारिसञ्चय क्षीण हो गए हैं। अच्छा लगता है दिन का अन्त। भगवान् कामदेव कुछ अधिक ही शान्त हो गए हैं। हे प्रिये! यह वह ग्रीष्मकाल ठीक ठीक आ पहुँचा है, क्योंकि अब दिन सबसे अधिक बड़े होने लगे हैं। इसीलिए इसे निदाघ भी कहा जाता है (ज्येष्ठ, आषाढ़)। **(२)** ग्रीष्म को शुचि भी कहा जाता है। हे प्रिये! इस समय सेवनीय बन गए हैं ये पदार्थ—'निशाएँ, चन्द्रमा, क्षत होने पर भी जलाशय, कहीं कहीं विचित्र जलयन्त्र—मन्दिर, नई नई सुनिश्चित मणियाँ, घिसा चन्दन। **(३)** अब प्रिय लगने लगी है सुगन्धित चाँदनी (हर्म्य की ऊपरी छत) और उस पर प्रिया मुख के उच्छ्वास से विकम्पित मधु, बढ़ियाँ वीणानाद। इनका सेवन कामी लोग अर्धरात्रि में करने लगे हैं। इनसे मदन दीप्ति पाता है। (द्र. 'यस्यां यक्षाः' मेघ. ६६ पद्य; 'यत्र स्फटिकह' कुसं. ६.४२ पद्य)

---

* वर्णना=सर्ग इति परे। **(१) प्रचण्ड = विशेष** हामा.३१३; **सुखावगाहः क्षत = सदावगाहक्षत/म।** द्र. 'सुभगसलिलावगाहाः' शाकु. १.३;ऋतु. १.२८;रघु. १६.५४। **(२) निशाः श=निशाश; राशयः=राजयः।**

नितम्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम् ।।४।।
नितान्तलाक्षारसरागरञ्जितैर् नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभिर् जनस्य चित्तं क्रियते समन्मथम् ।।५।।
पयोधरा–श्चन्दन–पङ्क–चर्चितास्तुषार–गौरार्पित–हार–शेखराः ।
नितम्बदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ।।६।।
समुद्गतस्वेदचिताङ्गसन्धयो विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः ।।७।।
सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैः प्रबोध्यते सुप्त इवाद्य मन्मथः ।।८।।

(४) कामियों के इन लम्बे लम्बे दिनों वाले ग्रीष्म को स्त्रियाँ शान्त करना जानती हैं। वे अपने नितम्बबिम्बों पर अब दुकूल और मेखला धारण करने लगी हैं, स्तनों पर चन्दन का आलेप कर उन पर (मौक्तिक) हार पहनने लगी हैं, केशों को धोती हैं और कषाय गन्ध (अगुरुधूप) से वासित रख रही हैं। यह सब शिशिर में छूट गया था। (५) विपुल नितम्बवाली स्वस्थ महिलाएँ अब अपने चरणों से (लात मार मार कर) जगा रही हैं लोगों के चित्त में सोए काम को। चरणों पर वे गहरा अलता लगा रही हैं और नूपुर पहन रही हैं। वे डग रखती हैं तो पद पद पर भनक मिलती है हंसों की ध्वनि की। (६) ये सब किसके मन को उत्सुक नहीं कर देते– 'पयोधर जिन पर लगाया चन्दनरस (पङ्कचर्चित) और फिर उनके अगले भाग (चूचुकों) में पहना दिए तुषार जैसे गौर हार (मुक्ताहार) एवं नितम्ब–देश जिन पर लटक रही हों सुवर्ण की करधनी। (७) अब निकलने लगा है पसीना, अङ्गसन्धियाँ उससे भरने लगी हैं। अतः अब मोटे वस्त्र छोड़कर सुन्दरियों ने धारण करना शुरू कर दिया है पतले वस्त्रों को। उन महिलाओं ने, खासतौर पर जिन के स्तन उन्नत हैं और जिन पर यौवन छाया हुआ है। (८) इन दिनों काम सोया सा है (यानी कामशयन का पर्व है यह जैसे हरिशयन का होता है। हरि सोए, सुनिश्चित समय पर ही वे जागते हैं। परन्तु काम को तो कभी भी जगाया जा सकता है) इन दिनों उसे जगा लिया जाता है पंखों की हवा से, उन पंखों की जिन पर चन्दनमिश्रित जल

---

६. उत्सुकमिति भावप्रधानो निर्देशो यथा वासवदत्तामङ्गले। अत्रैव २.६। ७. स्तनपदेऽत्र कथितपदत्वं दुष्परिहरम्। ८. काकलिः कोकिलादीनां कलो रवः। मन्मथः खलु येन निदाघतापेन सुप्तः स ह्येवात्र वर्णनीयतामर्हति।

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्यन्त्रणमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम् ।। ९।।
असह्य–वातोद्धत–रेणु–मण्डला प्रचण्ड–सूर्य्यातप–तापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानल–दग्ध–मानसैः ।।१०।।
मृगाः प्रचण्डातपतापिता भृशं तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ।।११।।
सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसन्दीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः ।।१२।।
रवेर् मयूखैरतिमात्रतापितो भृशं विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन् मुहुः फणी मयूरस्य तले निषीदति ।।१३।।

छिड़का जा रहा है, उन स्तनों के अर्पण से जिन पर हारयष्टि लटक रही हो, और वीणासहित काकली गा गाकर। (९) सफेद हुई चाँदनी पर रात को सोई सुन्दरियों के सुखप्रसुप्त मुखों को चन्द्रमा देखता रहता है बिना रुकावट, तो वह भी उत्सुक हो उठता है और रात बीत जाने पर मानों लज्जावश पीला पड़ जाता है। (१०) इस समय प्रवासी लोग भीतर से तो प्रियावियोग की आग से झुलसते रहते हैं, ऊपर से पृथ्वीमण्डल की यह स्थिति कि आँधी से धूल का पहाड़ खड़ा हो रहा है, सूर्य का ताप इतना प्रचण्ड कि पूरी पृथ्वी तप गई है। इसे बेचारे प्रवासी देख भी नहीं पा रहे। (११) बेचारे हिरण प्रचण्ड आतप से तपे हुए हैं। उन्हें बड़ी ही पीड़ाकारी प्यास लगी है। उससे उनके तालु सूख गए हैं। उन्हें जब दूर क्षितिज पर चिकने काजल सा आकाश दिखाई देता है तो दौड़ने लगते हैं उसे पानी समझकर। (१२) प्रवासियों के चित्त में अनङ्गसंदीपन होने में देर नहीं लगती जब उन्हें विलासवती महिलाएँ नाज–नखरों (विभ्रम) के साथ मुसकुराकर टेढ़ी दृष्टि (कटाक्ष) से देख देती हैं, इसी प्रकार जब आ जाती हैं चाँदनी रातें। (१३) सूर्य की किरणों से अत्यन्त तप्त और रास्ते की तपी धूल से और अधिक प्रतप्त सर्प नीचा मुँह किए, लम्बी श्वास लेता हुआ और कुछ नहीं तो मयूर के छत्ते के ही नीचे जाकर बैठ रहा है।

---

९. प्रह्वे वेति विकल्पान्न पूर्वस्वरे दीर्घता। गडुभूतैव किन्तु सा सहृदयानाम्। ११. भिन्नत्वमत्र स्नेहेन सह निरतिशयमसृणितत्वम्।

विवस्वता तीक्ष्णतरांशुमालिना सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति ।।१४।।
तृषा महत्या हृतविक्रमोद्यमः श्वसन् मुहुर् दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगेश्वरो विलोलजिह्वश्चलिताऽग्रकेसरः ।।१५।।
विशुष्ककण्ठाहृतसीकराम्भसो गभस्तिभिर्भानुमतोऽति/भितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि बिभ्यति ।।१६।।
हुताग्निकल्पैः सवितुर्मरीचिभिः कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्त्तिनं कलापचक्रेषु निवेशिताननम् ।।१७।।
सुभद्रमुस्तं परिपाण्डुकर्दमं सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाऽभितापितो वराहयूथो विशतीव भूतलम् ।।१८।।
समुद्धृताऽशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडन–संहतैर्गजैः कृतं सरः सान्द्रविमर्द्दकर्द्दमम् ।।१९।।

(१४) सूर्य की बड़ी ही प्रखर किरणों से परितापित मेंढक, कीचड़ के जल से उचककर कुछ नहीं तो सर्प के फन के छत्ते की छाया में बैठ रहा है और लगी है प्यास उस सर्प को भी। (१५) हाथी शेर के पास जा पहुँचा, परन्तु शेर उसे मार नहीं रहा है, क्योंकि वह शेर भयंकर प्यास की व्याकुलता से अपना पराक्रम खोए हुए है, बड़ा सा मुँह फाड़े हुए जीभ घुमा रहा है और उसकी सटा का अग्रभाग हिल रहा है। (१६) हाथी भी शेर से नहीं डर रहे हैं क्योंकि इस ग्रीष्म में उनके कण्ठ सूख गए हैं, सीकर का भी पानी वे पीना चाह रहे हैं अथवा सीकर का पानी अब वे नहीं छोड़ रहे हैं। सूर्य की किरणों से अत्यधिक संतप्त वे अत्यन्त बढ़ी प्यास से पीड़ित हैं और केवल पानी खोज रहे हैं। (१७) आहुति पड़ी अग्नि सी प्रज्वलित सूर्यकिरणों से मयूरों के शरीर भी क्लान्त हो गए हैं और चित्त भी। इसी कारण वे सर्प को भी मार नहीं रहे हैं, यद्यपि वे समीप में ही हैं, यहाँ तक कि, वे मयूर के कलापचक्र में अपना मुँह घुसा रहे हैं। (१८) अधिक चमचमा रही धूप से सूर्य के द्वारा परितप्त वराहयूथ भद्रमुस्ता के लिए तलाब की परिपाण्डु कीच अपने लम्बे थूथनों से खोदने में लगा है। ऐसा लगता है कि पृथिवी को परितप्त देख उसे छोड़कर उसके तल (पाताल) में प्रवेश कर रहा है। (१९) तालाब में घुसे हाथी तो मच गया विप्लव। एक तो जितनी भी मृणालराशि थी सबकी सब डाली खोद, मीन पड़ गए विपत्ति में, सारस डरकर भाग खड़े हुए। स्वयं हाथियों ने एक दूसरे को पीटना शुरू कर दिया, सभी हाथी सट गए और उन्होंने कीचड़ को बुरी तरह मँचा सा दिया।

रवि–प्रभोद्भिन्न–शिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्य्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥
सफेन–लालावृतवक्त्रसंपुटं विनिर्गतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वराद् गवेषमाणं महिषीकुलं जलम् ॥ २१ ॥

पटुतर–दव–दाह–प्लुष्ट–वंश–प्ररोहाः
परुष–पवनवेगोत्क्षिप्त–संशुष्कपर्ण्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ताद्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥
श्वसिति विहगवर्ग्गः शीर्णपर्ण्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर् निकुञ्जम् ।
भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ २३ ॥

(२०) सर्प के भीतर तो धधक रही है विष की अग्नि और ऊपर से तपा रहा है उसे सूर्यातप, सूर्य की प्रभा के मिल जाने से उसके सिर की मणि और अधिक उद्‌भासित हो रही है और वह दो दो चञ्चल जीभों से हवा चाट रहा है, किन्तु पिपासा से इतना व्याकुल है कि वह मण्डूक कुल को भी मार नहीं रहा है। (२१) तृषाकुल महिषीकुल (भैसें) पानी को तलाशते हुए पहाड़ के गह्वर से बाहर निकल पड़े हैं, उनके जबड़े फेन और लार से आवृत हैं, लाल जीभ बाहर निकाले हुए हैं और मुख ऊँचा किए हुए हैं। (२२) ये सभी वनान्त दिखाई देते हैं तो भय लगने लगता है। इनके भीतर ऊगे सस्य के अंकुर भयंकर भागती दँवार से सूख गए हैं, परुष वायु के वेग से सूखे पत्ते उड़ते दिखाई दे रहे हैं। सभी ओर यही स्थिति है। (२३) वृक्षों के पत्ते झड़ गए। उन पर बैठे पक्षी हाँफ रहे हैं। बन्दर क्लान्त हो गए तो पहाड़ पर से निकुञ्जों की ओर जाते दिखाई दे रहे हैं। गवय (जंगली गाय) यूथ सब तरफ घूम रहा है, पानी की चाह में, परन्तु लम्बी गरदन वाले शरभों को देखो ये बिना झुके ही कूपों में से पानी उठा लेते हैं।

विकच–नव–कुसुम्भस्वच्छसिन्दूरभासा
प्रबल–पवन–वेगोद्धूत–वेगेन तूर्णम् ।
तरु–विटप–लताऽग्राऽऽलिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ।। २४।।
ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुरति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ।। २५।।
बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरित कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतन् प्रांशुवृक्षाद्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ।। २६।।
गजगवयमृगेन्द्रा वह्निसन्तप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदाशु निर्गत्य कक्षाद्
विपुलपुलिनदेशां निम्नागामाश्रयन्ते ।। २७।।

(२४) सभी दिशाओं में भूमियाँ परिदग्ध दिखाई दे रही हैं अग्नि से। पावक, कुसुम्भ के तुरन्त खिले पुष्पों सी स्वच्छ कान्ति लिए हैं। आँधी के वेग से और अधिक वेग लिए इसने जलाने का काम चुटकी बजाते ही कर डाला है और अभी भी यह पावक व्याकुल है वृक्षों की शाखाओं और लता के अग्र भागों को जलाने में। (२५) (वन) प्रान्तों में लगी दँवार को पवन का साथ मिल गया तो पर्वतों की कन्दराओं में आवाज करने लगी है, सूखे बाँसों के स्थानों पर निनाद–पटु दँवार फूट फूट पड़ रही है, जहाँ घास है वहाँ फैलती जा रही है क्षण क्षण में और मृगयूथों को तितर बितर भी कर रही है और झुलसा भी रही है। (२६) अग्नि वन में पवन से धौंका जा रहा है तो शाल्मलीवनों में लाल लाल पुष्पों से मिल जाने पर लगता कि इसका आयाम और बढ़ा हुआ है, वृक्षों की कोटरों में लगता है सुवर्ण जैसा गौर, पके पत्तों वाले ऊँचे वृक्षों की शाखाओं पर चढ़कर कूद सा रहा है। (२७) अग्नि से संतप्त 'गज, गवय और शेर' संघर्ष छोड़ मित्रों से आपस में मिल गए हैं। अपनी अपनी माँद (कक्ष) से

कमलवनचिताम्बुः पाटलाऽऽमोदरम्यः
सुखसलिल–निषेकः सेव्य–चन्द्रांशुजालः ।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललित–गीतैर्हर्म्यपृष्ठे सुखेन ।। २८।।

इति श्रीकालिदासकृतावृतुसंहारे विशेषकाव्ये ग्रीष्मवर्णना।। १।।

अग्नि की तपन के कारण अत्यन्त खिन्न होकर विस्तृत बालू वाली नदी के पास इकट्ठे हो रहे हैं। (२८) ग्रीष्म आप सबका सुख से बीते। पानी इन दिनों कमलवनों में ही इकट्ठा है, पाटला–लता की सुगन्ध मन हर रही है, जलस्नान में सुख मिल रहा है, चाँदनी अच्छी लग रही है। कामिनियों के साथ रात में ललित गीतों की गोष्ठियाँ हर्म्यपृष्ठों पर आयोजित होती रहें।

इस प्रकार कवि कालिदास की कृति ऋतुसंहार नामक काव्य में पूर्ण हुई
ग्रीष्मवर्णना ।।१।।

।।अथ।।

(२) प्रावृड्वर्णना

प्रावृण् नाम वर्षाः। तदृतुश्च उत्तराषाढापूर्णिमायोगात्ययादारभ्य उत्तराभाद्रपद–पूर्णिमायोगव्यापी। श्रावणभाद्रपदौ तस्य भोगः। लक्षणानि चास्य मेघाडम्बरकदम्बकुसुमादीनि।

ससीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये! ।।१।।
नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित् प्रभिन्नाञ्जनराशिसन्निभैः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः ।।२।।
तृषाऽऽकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं नववारिवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ।।३।।
बलाहकाश्चाशनिशब्दभीषणाः सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकास्तुदन्ति चेतः प्रसभं प्रवासिनाम् ।।४।।

(१) प्रिये! अब घनागम (ऋतु चक्र की प्रावृट् या वर्षा) ऋतु आ चुकी है। यह राजा के समान ताम झाम लिए दिख रहा है। इसके मदमाते हाथी हैं बरसते मेघ, बिजली है पताका और वज्रगर्जना है नगाड़ा, परन्तु कामिजनों को तो यह प्रिय है। (२) आकाश पूरी तरह भर गया है मेघों से। ये कहीं नितान्त नीले कमल की कान्ति लिए हैं, कहीं खूब चिकने काजल की राशि के समान हैं, और कहीं गर्भवती प्रमदा के स्तनाग्र की प्रभा बटोरे हैं। (३) मेघ निकल निकल कर जाते जा रहे हैं इधर से उधर। कहीं तो प्यास से व्याकुल चातक पक्षी, इन्हें पर्याप्त पानी से झुका देख कर, इनसे याचना (जल की) कर रहे हैं। पर्याप्त पानी से भरे हैं इसीलिए इनकी गति भी मन्दी है। नया नया पानी भी वर्षा रहे हैं ये और जो गरजते हैं वह कानों को खींच लेता है। (४) ये बलाहक प्रवासियों को कुरेद रहे हैं। कभी वज्र की ध्वनि से भीषण हो जाते हैं, बिजली की प्रत्यञ्चा चढ़ा इन्द्रधनुष ताने हुए हैं और इनकी घनी वृष्टि बन रही है सुतीक्ष्ण धारापाती सायकों की वृष्टि। सायक भी साधारण नहीं, अपितु उग्र हैं। उग्रता वृष्टि में भी है।

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥५॥
सदा मनोज्ञाम्बुदनादसोत्सुकं विकीर्णविस्तीर्णकलापशोभितम् ।
ससंभ्रमाऽऽलिङ्गनचुम्बनाऽऽकुलं प्रवृत्तनृत्तं कुलमद्य बर्हिणाम् ॥६॥
निपातयन्त्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रदुष्टा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥७॥
तृणोत्करैरुद्गतकोमलाङ्कुरैश्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥८॥
विलोलनेत्रोत्पलशोभिताननैर्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः ॥९॥

(५) भूमि को लीजिए। इस पर तृणों के वैदूर्य की शलाकाओं से अंकुर फूट रहे हैं। इनसे भूमि पूरी की पूरी छा गई है। कन्दली में पत्तें निकलने लगे हैं। इन पर इन्द्रगोप दिखाई दे रहे हैं तो पृथिवी रंगीन रत्नों (शुक्लेतर) से सजी एक उत्तम सुन्दरी बन गई है। (६) अब मयूरों के समुदाय नृत्त में प्रवृत्त हैं। इन्हें प्रिय मेघध्वनि अब इन्हें सदा ही उत्सुक बनाए हुए है, अपने कलापों को फैलाए हुए हैं ये, वे बिखरे हुए और झड़े हुए भी हैं, इनसे कितने शोभायमान हैं ये। संभ्रमपूर्वक ये आलिङ्गन और चुम्बन में भी लगे हैं। (७) नदियों का हाल यह है कि ये तेजी के साथ (अपने पति) समुद्र की ओर दौड़ पड़ी हैं। इनके पानी मटमैले हैं और तीव्र वेग में बह रहे हैं, यहाँ तक कि तट पर लगे द्रुमों को ज़हाँ देखो वहाँ निपात के मुख में ढकेलती जा रही हैं, जैसी कि अतिदुष्टा और नाज नखरे लिए बिगड़ी स्त्रियाँ होती हैं। (८) विन्ध्यपर्वत के पठारों पर नए कोमल अङ्कुर की नीली घाँस जम चुकी है, उन्हें मृगियों ने कहीं कहीं चर भी लिया है। विन्ध्य के द्रुमों में भी पत्ते निकल आए हैं और अब ये मनोहरण योग्य बन गए हैं। (९) हिरनों को चारा तो सर्वत्र सुलभ हो गया है, परन्तु बेचारे मेघ गर्जना से डरे डराए बालू वाली भूमि पर इकट्ठे हो रहे हैं, इनके मुख उत्पल जैसे सुदीर्घ और नील नेत्रों की चञ्चलता से शोभित हैं। इन्हें देखने से मन में उत्सुकता (प्रियामिलन की तीव्र स्पृहा) जाग जाती है।

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचाघनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः प्रियान् ।।१०।।
पयोधरैर् भीमगभीरनिःस्वनैर् ध्वनद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम् ।।११।।
विलोचनेन्दीवरवारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम् ।।१२।।
विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद् वक्रगतिप्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम् ।।१३।।
विपन्नपुष्पां नलिनीं समुत्सुका विहाय भृङ्गाः श्रुतिहारिनिःस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया ।।१४।।
वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः सभृङ्गयूथैर् मदवारिभिश्चिताः ।।१५।।

(१०) माना कि निरन्तर गरजते मेघ ने रात्रियों का अन्धकार और अधिक घना बना दिया है, तब भी अभिसारिकाएँ अपने प्रियों तक पहुँच ही रही हैं। कैसे? उनकी सहायता में आगे आ जाती है मेघ की प्रिया, बिजली। वह चमक कर मार्ग दिखला देती है। दूसरे उन्हें बल देता है उनका राग। (११) एक ही शयन पर रूठ कर सोई प्रिया अपराधी प्रिय का भी कस कर आलिङ्गन करने लगी हैं, उनको जमकर डरा दिया है गम्भीर मेघगर्जना ने। (१२) परन्तु बेचारी प्रोषितपतिकाएँ निराश ही बैठी हैं। आँखों के नीलकमलों से टपके पानी से उनके बिम्बतुल्य अधरपल्लव निरन्तर सिंच रहे हैं और उन्होंने माला, आभूषण और अनुलेपन छोड़ रखे हैं। (१३) यह जो नया जल है यह नीचे की ओर जा रहा है। इसका रंग मटमैला है, कीड़ों, धूल और कचरे–कूड़े से भरा हुआ है यह। चल भी रहा है सरक सरक कर टेढ़ा, भुजंगों सा। (१४) भौरों पर विपत्ति आ गई है और उनकी बुद्धि भ्रम में पड़ गई है। जब कमलिनी के पुष्प नष्ट हो गए तो उसे छोड़ कर भौंरे मीठी गुञ्जार के साथ नृत्यरत मयूरों के कलापचक्रों को नीलकमल समझकर उन पर टूटे पड़ रहे हैं। (१५) ये जो जंगली हाथी हैं, ये नवीन मेघों की गर्जना से हो उठे हैं मदमत्त और खुद भी चिंघाडने लगे हैं। इनके गण्डस्थल धुलकर नीलकमल से दिखने लगे, अब इन पर मदवारि भी निकला दिखाई दे रहा है और उन पर टूटे भौंरे भी। अतः इसका रंग गहरा हो गया है।

सतोयनम्राम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्तैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः ।।१६।।
कदम्बसर्जाऽर्जुननीपकेतकीर् विकम्पयँस्तत्कुसुमाऽधिवासितः ।
ससीकराऽम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम् ।।१७।।
शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं सञ्जनयन्ति कामिनाम् ।।१८।।
तडिल्लताशक्रधनुर्विभूषिताः पयोधरास् तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत् प्रवासिनाम् ।।१९।।
मालाः कदम्बनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य।
कर्णान्तरेषु ककुभद्रुममञ्जरीभिः श्रोत्राऽनुकूलरचितानवतंसकाँश्च ।। २०।।

(१६) इन दिनों पहाड़ चित्त में उत्कण्ठा जगा रहे हैं। इनकी चट्टानों पर पानी से भरे मेघ आ बैठे हैं, चहुँओर बहते दिखाई दे रहे हैं झरने। इसी प्रकार नृत्यरत मयूर भी चहुँ ओर दिखाई पड़ रहे हैं। **(१७)** यह समीरण (वायु) किसे उत्सुक नहीं कर देता। यह कदम्ब, सर्ज, अर्जुन, नीप, केतकी को हिलाकर उनके पुष्पों से सुवासित है और बरसते मेघ के संग से शीतल भी। (नीप, कदम्ब समानार्थक, इसी प्रकार सर्ज–अर्जुन।) **(१८)** स्त्रियाँ कामिजनों में आकर्षण (रति) पैदा कर रही हैं, क्योंकि उनके केश कमर तक लटके हुए हैं, उनमें पुष्प लगे हैं और वे सुगन्धित भी हैं। इसी प्रकार स्तनों पर हार पहन रखे हैं और मुख में भरी है शराब की बास। **(१९)** प्रवासिओं के मन ये दोनों एक साथ हर रहे हैं (१) मेघ जो जल की पुष्कल मात्रा से झुके हुए हैं और जिन पर तडिल्लत भी चमक रही है तथा इन्द्रधनुष भी उछल रहा है तथा (२) स्त्रियाँ जो करधनी और मणिकुण्डल से उज्ज्वल हैं। **(२०)** महिलाएँ इन दिनों सिर पर कदम्बपुष्प के नवीन रेशों और केतकी से माला बना बनाकर धारण कर रही हैं और कान में अवतंस बना रही हैं अर्जुन की मञ्जरी के, ये अवतंस होते हैं कानों के अनुकूल।

---

१७. सोत्सुकपदाय द्र. अत्रैव १.६, २.६ टिप्पणी।

१८. पद्यान्तर–

वहन्ति वर्षन्ति नदन्ति भान्ति रुदन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः ।।

नदियाँ बहने लगी हैं, मेघ बरसने लगे हैं, मत्तगज चिंघाड़ने लगे हैं, वन सुशोभित लगने लगे हैं, प्रवासी रोने लगे हैं, मयूर नाचने लगे हैं और वानरगण जहाँ तहाँ जा बैठे हैं।

कालागुरुप्रवरचन्दनचर्चिताङ्गयः पुष्पाऽवतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ।। २१ ।।
कुवलयदलनीलैरुन्नतैस्तोयनम्रैर्मृदुपवनविशेषान्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः पथिकजनवधूनां तद्वियोगक्षतानाम् ।। २२ ।।
मुदित इव कदम्बैर्जातपुष्पैः समन्तात् पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां नवसलिलनिषेकोत्खाततापो वनान्तः ।। २३ ।।
शिरसि बकुलमालां मालतीभिः समेतां विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत् काल एषः ।। २४ ।।
दधति कुचयुगाग्रैरुन्नतैर्हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसङ्गादुद्गतां रोमराजिं ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ।।२५।।

(२१) नारियाँ बादलों की ध्वनि सुनती हैं तो गुरुजनों के बीच से उठ कर शय्यागृहों में प्रवेश करती देखी जाती हैं, उसके पहले वे अङ्गों में चन्दन का लेप करती हैं जिसमें कालागुरु की मात्रा प्रचुर रहती है और पुष्प के अवतंस से अपने केशपाश को सुगन्धित कर लेती हैं। (२२) मेघ हैं कुवलय (नीलकमल) की पंखुड़ी से नीले वर्ण के, उन्नति लिए हुए, पानी के बोझ से झुके हुए, पवन के मृदु वेग से धीरे धीरे चल रहे और ऊपर से इन्द्रधनुष से युक्त। इन्होंने तो पथिकजनों की वधुओं का चित्त लूट सा लिया, वे तो बेचारी पहले ही से उन (प्रिय) के वियोग से घायल थीं। (२३) वनप्रान्तों का ताप पानी के नए नए निषेक से जब उखाड़ दिया गया तो देखो इनमें क्या खुशी मनाई जा रही है। कदम्बों में फूल लग गए हैं तो लगता है कि ये खुशी से रोमाञ्चित हैं, वृक्षों की शाखाएँ पवन से डोल रही हैं तो लगता है वे शाखायोनि नृत्य कर रहे हैं और केवड़े के भुट्टे अग्रभाग में खिल गए हैं तो लगता है हास विनोद कर रहे हैं। (२४) यह जो वर्षाकाल है यह वधूजनों के लिए प्रिय के समान तैयार कर रहा है बकुल (मोलसिरी) की माला जिसमें मालतीपुष्प भी गुँथे हुए हैं सिर पर धारण करने के लिए यूथिका की कलियों और खिले पुष्पों की माला भी उसी प्रकार। खिले हुए नव कदम्बों से कर्णपूर भी बना रहा है यह काल। (२५) नारियाँ इन वर्षा के दिनों में कुचयुग के अग्रभाग पर पहन रही हैं (मोती के) हार, चौड़े नितम्बों पर मलमली सफेद दुकूल और नवजलकण के सङ्ग से उठीं रोमराजि को ललित वलिविभङ्गों से युक्त मध्यभागों में।

---

२६. शीततामित्यनुपपन्नम्।

नवजलकणसङ्गाच्छीतततामादधानः
कुसुमभरनतानां लासकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभि–
रपहरति नभस्वान् प्रोषितानां मनांसि ।। २६।।

जलभरनमितानामाश्रयोऽस्माकमुच्चै–
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ।। २७।।

बहुगुणरमणीयः कामिनां चित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ।। २८।।

इति श्रीकालिदासकृतावृतुसंहारनाम्नि विशेषकाव्ये
प्रावृड्वर्णना ।। २।।

(२६) प्रोषित लोगों के मन यह वर्षाकालीन पवन भी चुरा रहा है। इसमें शीतलता भी है नवीन जलकणों के सङ्ग से, कुसुमों से लदे पादपों को दे रहा है लास्य की शिक्षा और केवड़े के पराग से इसने गन्ध भी अर्जित कर ली है। (२७) ग्रीष्म की अग्नि की अत्यन्त परुष लपटों से यह तप गया था तो यह सोचकर, कि जब हम पानी के बोझ से झुक जाते हैं तब हमें यही आश्रय देता है पानी बरसा बरसा कर मेघ विन्ध्यगिरि को मानो आह्लादित कर रहे हैं। (२८) बहुत सी विशेषताओं से रमणीय, कामियों का चितचोर, तरुशाखा और लताओं का निःस्वार्थ बन्धु, यह जो वर्षाकाल है यह प्राणियों का प्राण बना हुआ है। यह तुम्हें अभीष्ट लाभ देवे।

इस प्रकार कवि कालिदास की कृति ऋतुसंहार नामक काव्य में प्रावृड्वर्णना
पूरी हुई ।। २।।

।। अथ ।।

(३) शरद्वर्णना

शरदृतुर्नाम भाद्रपदमासानन्तरीयो मासद्वयात्मकोऽवधिः। तस्यास्याभोगः प्रावृडत्यये श्रवणकृत्तिकापूर्णमास्योरन्तरालम्। अस्य विशेषाः पद्मविकासश्चन्द्रिकादि च।

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरुत/रवनूपुरनादरम्या ।
आपक्वशालिरुचिराऽऽनतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या/चारुरूपा ।। १ ।।
काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः ।। २ ।।
चञ्चन्मनोज्ञशफरीरसनाकलापाः पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्बबिम्बा मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ।। ३ ।।

(१) अब शरद् ऋतु आ गई है, लग रही है जैसे नववधू हो सजी–धजी और सुन्दर शरीर वाली। इसने काशपुष्पों की धवल सिल्की साड़ी धारण कर रखी है, खिले कमल इसका मनोज्ञ मुखमण्डल है, उन्मत्त हंस की बोली है इसका रम्य नूपुरनाद और इसकी झुकी गात्रयष्टि है पकी धान। (२) वन, उपवन सभी इस समय सफेद ही सफेद दिखाई दे रहे हैं। पृथिवी सफेद दिख रही है पुष्पित काशों से, रात्रियाँ चन्द्र से, नदीजल हंसों से और तालाबों के जल कुमुदों से। इधर उपवनों में खिली हुई है मालती। (३) अब (देखो) नदियाँ (जो कल तक उद्धत गति से दौड़ रही थीं) धीमे धीमे चल रही हैं जैसे आसवपान के बाद की प्रमदा। उछलती मछलियाँ हैं इनकी आकर्षक करधनियाँ, तट पर बैठे हंसों की पाँत है इनके मुक्ताहार, विशाल बालू का पाट है विशाल नितम्बबिम्ब।

---

२. पद्यान्तर –

निरभ्र–माकाश–मकर्दमा मही पयांसि पुण्यानि दिशः स्फुटाशयाः ।
मराल–मालोन्मद–नाद–मेदुरै–र्जगत् परिष्कारमधत्त सादरम् ।।

अब आकाश से मेघ हट गए हैं, भूमि की कीचड़ सूख गई है, जल साफ हो गए हैं, दिशाएँ खुल गई हं, हंसों की पाँतें केंकार करती चहुँओर घूम रही हैं। इस प्रकार अब सारा संसार आदरपूर्वक परिष्कृत हो गया है।

व्योम क्वचिद् रजतशङ्खमृणालगौरैर्वीताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरवरैरभिवीज्यमानः ।।४।।
भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं बन्धूकपुष्परजसारुणिता च भूमिः ।
वप्राश्च पक्वकलमाऽऽवृतभूमिभागाः प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ।।५।।
मन्दानिलाकुलितचारुतराग्रशाखः पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः ।।६।।
तारागणप्रचुरभूषणमुद्वहन्ती मेघोपरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी वसाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ।।७।।
कारण्डवाननविघट्टितवीचिमालाः कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोऽरुणितास्तटिन्यः ।।८।।
नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शिशिरसीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां चन्द्रो रुजत्यनुदिनं तनुमङ्गनानाम् ।।९।।

(४) व्योम ऐसा लग रहा है जैसे कोई राजा लगता है जब उसके ऊपर चामर डुलाए जा रहे हों, क्योंकि इसमें बरस कर सफेद पड़े और चाँदी, शङ्ख, मृणाल जैसे लग रहे, हल्के हो जाने से तेजी के साथ दौड़ रहे से सैंकड़ो मेघ दिखाई दे रहे हैं। (५) यह छवि तो देखो किस युवक के मन में हूक नहीं जगा देती 'आकाश तो ऐसा नीला जैसे चिकना काजल होता है, भूमि बन्धूकपुष्परज से अरुणित, पठार पकी धान से आवृत भूमिभाग वाले।' (६) कोविदार इस समय किसका चित्त विदीर्ण नहीं कर देता। इसकी फुनगियाँ मन्द पवन से आकुलित हैं, पुष्पों के गुच्छे लिए हुए हैं कोमल पल्लवों के अग्रभाग और मत्त भ्रमरों के द्वारा पी लिया गया है इसका एकत्रित मधु। (७) रात प्रतिदिन बढ़ती जा रही है जैसे बाला प्रमदा बनती जाए। तारागणरूपी प्रचुर भूषण धारण किए हुए है यह शशाङ्क, है इसका मेघ की रुकावट से परिमुक्त मुख, चाँदनी का धवल और निर्मल वस्त्र कर रखा है इसने धारण। (८) नदियाँ जनों को सब प्रकार से तृप्त कर रही हैं। इनकी तरंगे बतख (कारण्डव) के मुखों से विघट्टित हैं, इनके तट भरे हुए हैं कादम्ब (काले हंस) और सारसों से तथा चारों ओर हंस भी कूज रहे हैं। (९) चन्द्र नेत्रों का उत्सव है, इसकी मरीचियाँ हृदयहारी हैं, चित्त में आह्लाद उड़ेल रहा है, शिशिर फुहार का जल बरसा रहा है यह, तथापि जो पति के वियोगरूपी विष से दिग्ध हैं उन वनिताओं को प्रतिदिन क्षीण कर रहा है।

आकम्पयन् फलभराऽऽनतशालिजालान्यानर्त्तयन् कुरबकान् कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन् यूनां मनश्चलयति प्रसभं नभस्वान् ।।१०।।
सोन्मादहंसमिथुनैरुपशोभितानि स्वच्छानि फुल्लकमलोत्पलभूषितानि ।
मन्दप्रचारपवनोद्गतवीचिमालान्युत्कम्पयन्ति सहसा हृदयं सरांसि ।।११।।
नष्टं धनुर् बलभिदो जलदोदरेषु सौदामनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः पश्यन्ति नोन्नतमुखाः गगनं मयूराः ।।१२।।
नृत्तप्रयोगरहिताञ्छिखिनो विहाय हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान् सप्तच्छदानुपगता कुसुमोद्गमश्रीः ।।१३।।
शेफालिकाकुसुमगन्धमनोहराणि स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ।।१४।।
कह्लारपद्मकुसुमानि मुहुर्विधुन्वँस्तत्सङ्गमादधिकशीतलतामुपेतः ।
पत्रानुलग्नतुहिनाम्बु हरँस्तरूणां सोत्काः करोति वनिताः पवनः प्रभाते ।।१५।।

(१०) इन दिनों वायु युवकों का मन चञ्चल सा बना रहा है, क्योंकि यह फलों से झुकी धान की पौध को कँपा रहा है, कुसुमभार से झुके कुरबक वृक्षों को नचा रहा है, खिले पुष्पों वाली कमलिनी को हिला–डुला रहा है। (११) सरोवर हृदय को सहसा झकझोर रहे हैं। ये हंसों के उन्मत्त जोड़ों से उपशोभित हैं, स्वच्छ हैं, पुष्पित कमल और उत्पल से भूषित हैं तथा मन्दगति पवन से तरंगे उठ रही हैं। (१२) मेघों के पेट से इन्द्रधनुष हट गया है, आकाश की पताका बिजली अब चमक नहीं रही है और बकमालाएँ पक्षपवनों से आकाश पर पंखा नहीं झल रही हैं और मयूर गरदन उठाकर आकाश को नहीं देख रहे हैं। (१३) यह उतार चढ़ाव तो देखो। मदन अब नृत्तप्रयोगरहित मयूरों को छोड़ मधुर कण्ठ वाले हंसों के पास पहुँच रहा है, इसी प्रकार कुसुमोद्गमश्री कदम्ब, कुटज, अर्जुन, सर्ज और नीपों को छोड़कर सप्तच्छदों के पास पहुँच रही है। (१४) उपवन जनों के चित्त को अत्यन्त उत्कण्ठित कर रहे हैं। इस समय शेफालिका के पुष्पों की गन्ध से मनोहर हैं सभी उपवन, पक्षी स्वस्थ चित्त से बैठे बैठे कूज रहे हैं, पर्यन्त भाग में बैठी मृगी के नयनोत्पल भी दीख रहे हैं इनमें। (१५) प्रभात पवन वनिताओं को उत्कण्ठित बना रहा है, क्योंकि वह लाल कमल (कह्लार) पद्म और कुमुदों को बारम्बार कँपा रहा है, उनके संगम से अधिक शीतलता अर्जित कर रहा है और वृक्ष के पत्तों पर इकट्ठे जल को गिराता आ रहा है (वह सुगन्धित भी है शीतल भी और मन्द भी)।

सम्पन्नशालिनिचयाऽऽवृतभूतलानि सुस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैः ससारसकुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति जनप्रमोदम् ।।१६।।
हंसैर्जिता सुललिता गतिरङ्गनानामम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदचलानि विलोचनानि भ्रूविभ्रमाश्च सरितां तनुभिस्तरङ्गैः ।।१७।।
श्यामा लताः कुसुमभारनतप्रवालाः स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
दन्ताऽवभासविशदस्मितवक्त्रकान्तिं बन्धूकपुष्परुचिरा नवमालती च ।।१८।।

केशान्नितान्तघननीलविकुञ्चिताग्रा–
नापूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रचलकाञ्चनकुण्डलेषु
नीलोत्पलानि विकचानि निवेशयन्ति ।।१९।।
हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि वरनूपुरशेखरैश्च
नार्य्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ।। २०।।

(१६) सीमाप्रान्त जन जन में खुशी बिखेर रहे हैं। भूमि के खेत धान की तैयार फसल से ढके हैं, गोकुल सुस्थ भी है और जहाँ तहाँ बैठा/रुका हुआ है, सारसकुलों और हंस की बोलियाँ सुनाई दे रही हैं। (१७) अङ्गनाओं की सुललित गति तो जीत ली हंसों ने, विकच कमलों ने मुखचन्द्र की कान्ति, मद से घूर्णित नेत्रों को नीलोत्पलों ने और भ्रूविभ्रम नदियों की पतली पतली तरंगों ने। (मेघ. १०२, विक्रमो. ४.२८)। (१८) कुसुमभार से झुके पत्तों से मण्डित श्यामा लताएँ, स्त्रियों के आभूषणधारी अंगों का काम कर रही हैं, इसी प्रकार बन्धूकपुष्पललिता नवमालती, इसी प्रकार दन्तद्युति सफेदी लिए अरुण अधरों की शोभा बना रही हैं। (१९) वनिताएँ नितान्त, घन जैसे नील और आकुञ्चित अग्रभाग वाले केशों में नवमालती लगा/बिठा रही हैं। इसी प्रकार सुवर्ण के चलित कुण्डलों से युक्त कर्णों में खिले नीलोत्पल लगा रही हैं। (२०) नारियाँ इन दिनों मण्डलाकार स्तनों पर चन्दन लेप कर मोती की मालाओं का अलंकरण कर रही हैं और कमल जैसे पैरों में पहन रही हैं नए नए नूपुर।

स्फुटकुमुदचितानां राजहंसाऽऽश्रितानां
मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रताराऽवकीर्णम् ।। २१ ।।
शरदि कुमुदसङ्गा वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः श्यानपङ्का धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ।। २२ ।।
दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं म्लायते चन्द्रबिम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ।। २३ ।।

(२१) आकाश इन दिनों जलाशयों की नितान्त समृद्ध शोभा को धारण किए हुए हैं। आकाश से मेघ हट गए हैं और चन्द्र तारों से वह भर गया है। जलाशयों में भी कुमुद खिले हुए हैं, राजहंस तैर रहे हैं और मरकतमणि सा हरा जल भरा हुआ है। **(२२)** यह जो शरद् ऋतु है इसमें कुमुद से सुगन्धित शीतल पवन चल रहे हैं, मेघों के हट जाने से दिशाएँ अच्छी लगने लगी हैं, पानी का मटमैलापन मिट गया है, धरती पर कीचड़ भी कुछ सूख गयी है और चन्द्र तथा तारों से भरे आकाश में भी चन्द्र की किरणें विमल हो गई हैं। **(२३)** प्रभातकाल में, सुन्दर युवती के मुख जैसी आभा वाले कमल को सूर्य की किरणें जगा रही हैं तब वह जँभाई ले रहा है। कुमुदपुष्प मुकुलित हो रहे हैं, क्योंकि चन्द्र डूब गया वैसे

३.२२ करकमलमनोज्ञाः कान्तसंसक्तहस्ता वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः।
रचितकुसुमगन्धि प्रायशो यान्ति वेश्म प्रबलमदनहेतोस्त्यक्तसंगीतरागाः।।
३.२२ सुरतसविलासाः सत्सखीभिः समेता असमशरविनोदं सूचयन्ति प्रकाशम्।
अनुपममुखरागा रात्रिमध्ये विनोदं शरदि तरुणकान्ताः सूचयन्ति प्रमोदान्।।

(३.२२) अपने कमलों जैसे मनोज्ञ हाथों से सुन्दर, प्रिय के हाथ में हाथ डाले हुए, मुख से चन्द्र को जीत रहीं कुछ अन्य तरुणियाँ कुसुमसुगन्धी भवनों में प्रवेश करती दिखाई दे रही हैं, वे जमकर लेना चाह रही हैं कामरस। अब उनमें संगीत का शौक शान्त है। (३.२२) सुरत रस के विलास में डूबी, सखियों को साथ लिए तरुण कान्ताएँ भाँति भाँति के कामविनोदों की सूचना दे रही हैं। इनके चेहरों पर अतुलनीय सुख की ललोई छाई हुई है जिनसे सूचित होती है कि रात में इन्होंने इस शरद् ऋतु में क्या क्या मजा नहीं लिया है।

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ।। २४।।

स्त्रीणां निधाय वदनेषु शशाङ्कलक्ष्मीं
काम्यं च हंसवचनं मणिनूपुरेषु ।
बन्धूकपुष्पमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ।। २५।।

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशं श्वेतवासो वसाना ।
कुमुदरुचिरहासा कामिनीवोन्मदेय–
मुपदिशतु शरद् वश्चेतसः प्रीतिमग्र्याम् ।। २६।।

इति श्रीकालिदासकृतावृतुसंहारनाम्नि विशेषकाव्ये शरद्वर्णना ।। ३।।

ही जैसे प्रियजनों के प्रवास पर चले जाने पर स्त्रियों का हँसना छूट जाता है। **(२४)** प्रिया के असित (कजरारे) नेत्रों की शोभा नीलकमलों में निहार कर, मदमत्त हंसों की कूज में बजती कनककाञ्ची सुनकर, बन्धुजीव में अधर की रुचिर कान्ति निहार कर पथिकजन इन दिनों भ्रान्तचित्त होकर आँसू बहा रहे हैं। (२५) अब लो यह सुभगा शरदागमश्री कहीं जाने लगी। इसने चन्द्रमा की शोभा तो रख दी स्त्रियों के मुखों में, प्रिय हंसरव रख दिए मणिनूपुरों में, बन्धूकपुष्प इसी प्रकार मनोहर अधरों में। (२६) विकच (खिला हुआ) कमल जिसका वक्त्र है, फूले नील उत्पल जिसके नेत्र हैं, खिले नवीन काशपुष्प जिसकी सफेद साड़ी है, कुमुदपुष्प जिसका रुचिर हास है ऐसी उन्मद कामिनी सी शरद् ऋतु आपके चित्त में उच्चतम प्रीति, संतृप्ति का उपदेश दे।

इस प्रकार कविवर कालिदास की कृति ऋतुसंहार काव्य में
शरद्वर्णना पूर्ण हुई ।। ३।।

।। अथ ।।

(४) हेमन्तवर्णना

हेमन्तो नाम कार्तिकात्ययक्षणमारभ्य पुष्ययुक्तापौषपूर्णिमान्तोऽवधिः षष्टि दिवसानभिव्याप्तोः। अस्य विशेषा लोध्रपुष्पशालिपरिपाकेक्षुस्तम्बादयः।

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतः प्रिये! ।।१।।
न चन्दनैः कुङ्कुमरागपिङ्गैस्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनामलङ्क्रियन्ते स्तनमण्डलानि ।। २।।
न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ।। ३।।
काञ्चीगुणैः काञ्चनरत्नचित्रैर्न भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्यम्बुजकान्तिभाञ्जि ।। ४।।
गात्राणि कालीयकचर्चितानि सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्य्यः सुरतोत्सवार्थम् ।। ५।।

(१) प्रिये! अब देखो यह हेमन्त। यही वह ऋतु है जिसमें पूरी की पूरी भूमिमाता फसल के निकले अंकुरों से सजी हुई है, लोध्र फूल उठा है, धान परिपक्व हो चुकी है, कमल लुप्त हो चुके और तुषार अधिक बरसने लगा है। (२) स्तनशालिनी विलासवती नवयौवनाओं के स्तनमण्डलों पर अब कुङ्कुम (केसर) के रंग से पीले चन्दन का लेप दिखाई नहीं दे रहा है और न दिखाई दे रहे हैं तुषार जैसे, कुन्द जैसे या चन्द्रतुल्य (मुक्ता) हार। (३) इसी प्रकार विलासिनी वनिताओं की बाहुओं में वलय और बाजूबन्द दिखाई नहीं दे रहे हैं। ऐसे ही देखो इनके ये चक्राकार नितम्बबिम्ब इन पर अब नया मलमली दुकूल नहीं है और न पीन पयोधरों पर ही दिखाई दे रहे हैं पतले अंशुक। (४) अब प्रमदाएँ नितम्बों को सोने की रत्नजडित रंग बिरंगी करधनी से विभूषित नहीं कर रही हैं और न कमल की कान्ति लिए अपने पादों को हंसरवधारी नूपुरों से। (५) अब तो अंग अंग में कालीयक (जायफल) का विलेपन हो रहा है, पत्रलेखाएँ अम्बुज सदृश मुखों पर बनाई जाने लगी हैं, क्योंकि अब पसीने का संकट नहीं है। सिर के केशों को अब कालागुरु की सुगन्धित धूप से सुवासित करना शुरू हो गया है, सुरत

रतिश्रमक्षामविपाण्डुवक्त्राः प्राप्तेऽपि हर्षाभ्युदये तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान् प्रभिन्नरागानधरानवेक्ष्य ।। ६ ।।
पीनस्तनोरःस्थलभागशोभामापाद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः ।। ७ ।।
प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ।। ८ ।।
प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सशैवलानि सरांसि चेतांसि हरन्ति पुंसाम् ।। ९ ।।
पाकं व्रजन्ती हिमशीतपातैराधूयमाना सततं मरुद्भिः ।
प्रिये! प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव ।। १० ।।

के उत्सव के लिए। (६) रातभर रति की। अब थकावट से चूर हैं। मुख पीला पड़ा हुआ है। अतः खुशी का अवसर प्राप्त हो जाने पर भी तरुणियाँ जोर से हँस नहीं रही हैं। उन्हें उनके अधरों पर दन्ताग्र के घाव जो दिखाई दे रहे हैं और दिखाई दे रहा है उन अधरों पर लगा राग मिटा, पुछा। (७) शीतकाल पीनस्तन वाले उरःस्थल की शोभा बनकर उसी में जा छिपा था। उनका हुआ पीडन तो ढीला पड़ गया और अब तृणों के अग्रभाग पर लगे तुषारकणों के आँसू टपका टपका कर रो सा रहा है। (८) धान की बढ़ियाँ फसल से भरे हुए हैं सीमान्तर। उनमें हिरनियों के यूथ बैठे हुए हैं और वे क्रौञ्चपक्षियों के मनोहारी निनाद से मुखरित भी हैं। (९) सरोवर पुरुषों के मन हर रहे हैं, क्योंकि ये प्रफुल्ल नीलोत्पल से शोभित हैं, इनमें उन्मत्त कादम्ब (काले हंस) की शोभा छाई है, जल साफ भी है और उसमें सेंवार भी जम गई है। (१०) प्रिये! यह जो प्रियङ्गु (हरफारेबड़ी) है, ओस की ठंडक पड़ने लगी है, इसलिए पकने जा रही है। इसे हवा निरन्तर कँपा रही है। इस कारण यह प्रियविप्रयुक्त विलासिनी जैसी पीली पड़ी हुई है।

४.९ मार्ग समीक्ष्यातिनिरस्तनीरं प्रवासखिन्नं पतिमुद्वहन्त्यः।
अवेक्ष्यमाणा हरिणायताक्ष्यः प्रबोधयन्तीव मनोरथानि।।

लौटा पति प्रवास के कारण थका हुआ है, किन्तु मार्ग को पानी से मुक्त देख–देखकर नारियाँ हूक जगा रही हैं।

रसासवामोदसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिषङ्गशायी शेते जनः कामशरानुविद्धः ।।११।।
दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां रतोपभोगो नवयौवनानाम् ।।१२।।
काचिद् विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं दन्ताग्रभिन्नमवकृष्य निरीक्षते च ।।१३।।
अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा ।
शय्यान्तदेशलुलिताऽऽकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्य्यकराभितप्ता ।।१४।।
निर्माल्यदाम परिभुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्तात् ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ।।१५।।

(११) इन दिनों कामीजन कामशर से आहत हो एक दूसरे से लिपट कर सोया करते हैं और लिपटे ही रहते हैं। इनके मुखों में गन्ध भरी रहती है रसीले आसव की और निश्वास की सुगन्ध से भी अंग अंग सुगन्धित रहते हैं इनके। **(१२)** अधर दन्तचिह्नों से घायल और स्तन नाखूनों से खुदे हुए। इनसे यह सूचना मिल रही है कि इन नवयौवनाओं ने निर्दय रति की है। **(१३)** बाल आतप में ही कोई अङ्गना हाथ में दर्पण लिए अपना मुखकमल विभूषित कर रही है। वह अपने ओंठ को फुलाकर उस पर प्रियतम ने चुम्बन के समय जो दन्ताग्र से घाव किए हैं उन्हें प्रेम से देख रही है। **(१४)** दूसरी एक ऐसी भी विलासिनी है जो सूर्य की किरणों का स्पर्श पाकर जागने की बजाय सोना चाह रही है, क्योंकि रातभर उसने जमकर किया सुरत तो अब हो गया उसका शरीर खिन्न, कमलतुल्य आँखे भी रातभर के जागरण से लाल, उसके केशपाश ऊबड़ खाबड़ और बिस्तर के एक भाग से लटके हुए। **(१५)** दूसरी कुछ तरुणियाँ रात की माला बादलों जैसे और घने नीलकेशों वाले सिर से हटा रही हैं, क्योंकि उनकी उत्तम सुगन्ध ली जा चुकी है। अब दूसरी केशरचना में लगी है। इनका शरीर है तो छरहरा, यष्टि के समान, किन्तु इसमें स्तनों का उभार इतना अधिक है जिससे ये झुकी हुई हैं।

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षाञ्चिता विरचिताधररागशोभा ।
कूर्पासकं परिदधाति नवं नताङ्गी
व्यालम्बिनीललुलिताऽलककुञ्चिताक्षी ।।१६।।

अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संदृश्यमान/संहृष्यमाणविपुलोरुपयोधरान्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ।।१७।।

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमः ।
विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तो वः सुखं काल एषः ।।१८।।

इति श्रीकालिदासकृतावृतुसंहारनाम्नि विशेषकाव्ये
हेमन्तवर्णना ।।४।।

(१६) दूसरी तरुणियों ने देखा कि उनका शरीर प्रिय ने भोग रखा है तो खुश होकर अपने अधर पर नया राग लगाया और चोली भी नई पहनने लगी। तब उसकी आँखों के सामने आ गई नील अलकें जिनसे उसकी आँखे आकुञ्चित हो गई। (१७) दूसरी विलासिनी ने रातभर सुरतकेलि की। उसके परिश्रम से ढीले पड़ गए अङ्ग। उसके विपुल ऊरु और वैसे ही पयोधरों के अन्त भाग खुश दिखाई दे रहे हैं। सुन्दरशोभा लिए ये प्रमदाएँ आँखों में अञ्जन आँज रही हैं। (१८) अनेक लाभ देने के कारण रमणीय यह हेमन्तकाल स्त्रियों के चित्त का हरण करने में अत्यधिक समर्थ है, इसमें ग्राम की सीमाएँ पकी धान की विपुल मात्रा से भरी हुई हैं, तुषार गिरने लगा है और क्रौञ्च पक्षी क्रेङ्कार करने लगे हैं। ऐसा यह हेमन्त काल आपके लिए सुखकारी हो।

इस प्रकार कविवर कालिदास की कृति ऋतुसंहार काव्य में पूर्ण हुआ
हेमन्त वर्णन ।।४।।

।।अथ।।

(५) शिशिरवर्णना

शिशिरो नाम पौषात्ययारब्धः फाल्गुनपूर्णिमां यावदभिव्याप्त–
भोगकाल ऋतुः। प्रौढाः शालीक्षुका अस्य विशेषाः।

प्ररूढशालीक्षुचयावृतं क्वचित् क्वचित् स्थितक्रौञ्चनिनादशोभितम् ।
प्रकामकामं प्रमदाजनप्रियं वरोरु! कालं शिशिराह्वयं शृणु ।।१।।
निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति कालेऽद्य जनस्य सेव्यताम् ।। २।।
न चन्दनं चन्द्रमरीचिशीतलं, न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम् ।। ३।।
तुषारसंघातनिपातशीतलाः शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डु तारागणचारुभूषणा जनस्य सेव्या न भवन्ति रात्रयः ।।४।।
गृहीतताम्बूलविलेपनस्रजः सुरासवाऽऽमोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुका स्त्रियः ।।५।।

(१) हे वरोरु! शिशिर नामक ऋतुकाल को सुनो। इसमें धान और ईख के खेत तैयार हो चुके हैं। यत्र तत्र बैठे क्रौञ्चपक्षियों की ध्वनि सुनाई दे रही है। काम की मात्रा पर्याप्त बढ़ी हुई है। प्रमदाजनों को यह प्रिय है और इसमें प्रमदाजन अधिक प्रिय होते हैं। (२) मकानों की खिड़कियाँ बन्द रह रही हैं, अग्नि, घाम, मोटे वस्त्र और यौवनवती वनिताएँ इन दिनों जनों में सेव्य बने हुए हैं। (३) इन दिनों न अच्छा लग रहा है चन्दन, न चन्द्रकिरणों के शीतल हर्म्यपृष्ठ (चाँदनी) और न घना कुहरा लेकर बहता वायु ही लोगों के चित्त को प्रिय लग रहे हैं। (४) इस समय रात्रियाँ लोगों को प्रिय नहीं लग रही हैं, क्योंकि ये घने कुहरे के कारण ठंडी होती जा रही हैं, और अधिक शीतल हो रही हैं ये चन्द्र की किरणों से। इन रात्रियों के आभूषण बने हुए हैं पीले तारागण। (५) उत्सुक स्त्रियाँ शय्यागृह में प्रवेश कर रही हैं। वे ताम्बूल, विलेपन द्रव्य और मालाएँ लिए रहती हैं। पिए रहती हैं आसव, जिससे उनका मुख सुगन्धित रहता है। शय्यागृह में पर्याप्त सुगन्ध भरी हुई है कालागुरु की धूप से।

कृताऽपराधान् बहुशोऽभितर्जितान् सवेपथून् साध्वसमन्दचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः स्त्रियोऽपराधान् समदा विसस्मरुः ।। ६ ।।
प्रकामकामैर्युवभिः सुनिर्दयं निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरवः क्षपाऽवसाने नवयौवनाः स्त्रियः ।। ७ ।।
मनोज्ञकूर्पासकपीडितस्तनाः सरागकौषेयविभूषितोरव/सः ।
निवेशितान्तः–कुसुमैः शिरोरुहैर्विभूषयन्तीव हिमागमं स्त्रियः ।। ८ ।।
पयोधरैः कुङ्कुमरागपिञ्जरैः सुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीभिः परिपीडितोरसः स्वपन्ति शीतं परिभूय कामिनः ।। ९ ।।

(६) प्रमदाओं ने पहले तो किसी अपराध पर मजे में डाँटा फटकारा तो देखा कि प्रिय काँपने लगे और घबराहट से उनका मन मन्द हो गया, परन्तु देखा कि वे सुरत चाह रहे हैं तो बाद में उनके सभी अपराध भुला दिए, उन्हें नशा भी आ गया था। (७) रात बीत गई तो देखा ये नवयौवनाएँ किस प्रकार मुश्किल से डग भर रही हैं। क्यों न हो ऐसा? इन्हें कामान्ध (प्रकामकाम) युवकों के द्वारा बड़ी ही निर्दयता के साथ लम्बी लम्बी रातों में देर तक भोगा जो गया है। (८) स्त्रियाँ इस हिमागम (शिशिर ऋतु) को अपने केशों के शृङ्गार से विभूषित कर रही हैं। इन्होनें सुन्दर चोलियाँ भी कसकर बाँध रखी हैं, जिससे इनके स्तनपीडा में पड़े हैं। उधर रंगीन कौषेय से इनके ऊरु विभूषित हैं। (९) कामिजनों को शिशिर की ठंड पीड़ा नहीं पहुँचा पाती, वे सुख से सोते हैं। उनके वक्षःस्थल को विलासवती नारियाँ अपने कुङ्कुमराग से पिञ्जर पयोधरों से और अपने नवयौवन की सुखसेव्य ऊष्मा से करती रहती हैं पीड़ित।

५.६ वियोगसन्तापविदूषिता भृशं निशासु दीर्घाश्वसतापिताश्चिरम्।
भ्रमन्ति मन्दं श्रममन्दिताक्षाः क्षपावसाने नवयौवना स्त्रियः।।

वियोग के सन्ताप से अत्यधिक दुःखी, रात भर लम्बी साँसें छोड़ छोड़कर तपी तपाई वनिताएँ अलसाई आँखे लिए धीरे धीरे घूम रही हैं अब रात बीत जाने पर सबेरे।

५.१० निशावसाने परिरूक्षवक्षसः परिश्रमव्याकुलचित्तवृत्तयः
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्।।

रात तो बीत गई, तब रात अन्यत्र बिताकर आए प्रियों के अपराध भुलाकर कुछ कामिनियाँ अपने रूक्ष स्तनों से विस्तरों पर अपने प्रियों का गाढ आलिङ्गन करने में लगी हैं।

सुगन्धिनिःश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधनम् ।
निशासु कृत्स्नासु च कामिनो जनाः पिबन्ति मद्यं मदनीयमुत्तमम् ॥१०॥

अपगतमदरागा योषिदेका प्रभाते
कृतनिबिडकुचाग्रा पीडितालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद् वासमन्यं हसन्ती ॥११॥

अगुरुसुरभिधूपाऽऽमोदितं केशपाशं
गलितकुसुममालं धुन्वती कुञ्चिताग्रम् ।
त्यजति गुरुनितम्बा निम्नमध्याऽवशा
नाऽप्युषसि शयनमन्या कामिनी कामशोभम् ॥१२॥

कनक–कमल–कान्तैश्चारु–ताम्राऽधरोष्ठैः
श्रवण–तट–निविष्टाऽऽपाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैरंससंसक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥१३॥

(१०) कामीलोग पूरी रात मदनीय उत्तम मद्य पीते रहते हैं, उस (मद्य) में पड़ा हुआ उत्पल सुगन्धित निश्वास से हिलता रहता है। सुस्वादु और काम तथा रति को जगा देता है यह। (११) एक स्त्री की दशा यह कि वह शयनागार से दूसरे आगार में जा रही है, हँसती हुई। हँसने में कारण है अपने शरीर पर प्रियतम के द्वारा किया गया परिभोग देखना। जब उसका नशा उतर गया तो उसने देखा कि गाढतर आलिङ्गन से उसके स्तन फूलकर अधिक सट गए हैं। (१२) दूसरी कोई गुरुनितम्बा निम्नमध्या और अवशा कामिनी उषकाल में भी कामक्रीडा के चिह्नों से अंकित शयन छोड़ती नहीं है। वह वहीं बैठी अगुरु की सुगन्धी धूप से सुगन्धित और कुञ्चिताग्र केशों को झटक रही है फलतः जिनमें लगे फूल झड़ गए हैं। (१३) इन दिनों स्त्रियाँ घर के भीतर श्री जैसी दीख रही हैं उनके मुख सुवर्णकमल से कान्तिमान् हैं, उनके ओंठ ताम्रवर्ण के हैं और नेत्र हैं कानों तक फैले तथा उपान्तभाग में कुछ पाटल वर्ण के।

---

१२. अत्र जुगुप्सितं पाठान्तरम् 'निम्नमध्यावसाने'–ति। ननु कोऽत्रार्थः? मध्यस्यावसानं किं वान्यत् संभवति, स्मरमन्दिर विहाय। 'ऽवशा ना' इत्यत्र 'श'श्रुतिरस्माभिरुपकल्पिता। सोऽयं सारस्वतः प्रसादः सुबहूनि वर्षाणि विचारणानिमग्नेषु।

पृथुजघनभरार्त्ताः किञ्चिदानम्रमध्याः
स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।
सुरतसमयवेशं नैशमाशु प्रहाय
दधति दिवसयोग्यं वेशमन्यास्तरुण्यः ।।१४।।

नखपदचितभागान् वीक्षमाणाः स्तनान्ता–
नधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरसमेता दीपयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ।।१५।।

प्रचुरगुडविकारः स्वादु–शालीक्षु–रम्यः
प्रबल–सुरत–केलि–र्जात–कन्दर्प–दर्पः ।
प्रियतमरहितानां चित्त–सन्ताप–हेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ।।१६।।

इति श्रीकालिदासकृतावृतुसंहारनाम्नि विशेषकाव्ये
शिशिरवर्णना ।।५।।

(१४) दूसरी तरुणियाँ आर्त्त हैं। अपने पृथु और विस्तृत जघन से, बीच में कुछ झुकी हुई हैं और स्तनों के विस्तार से धीरे धीरे डग भर रही हैं। इन्हें जल्दी है रात्रि का सुरत समय का वेश छोड़कर दिवसयोग्य दूसरा वेश पहनने की। (१५) नखक्षतों से निचित स्तनान्तों को देख रहीं, दन्तक्षत से युक्त अधरकिसलयाग्र को छू रहीं और अभिमत रस को बढ़ाती हुई कुछ तरुणियाँ सबेरे के समय अपने चेहरे सजाने में लगी हैं। (१६) भाँति भाँति से तैयार किए गुड़, स्वादु शालि, स्वादु इक्षु से रम्य, सुरतकेलि में प्रबलता डाले, कन्दर्प में दर्प पैदा किए हुए और वियुक्त वनिताओं में चित्त के संताप का हेतु यह शिशिर समय आपके लिए सदा ही श्रेयस्कारी रहे।

इस प्रकार कविवर कालिदास के ऋतुसंहार नामक काव्य में पूर्ण हुई
शिशिरवर्णना ।।५।।

।। अथ ।।

(६) वसन्तवर्णना

वसन्तो नाम चित्रापूर्णायोगमारभ्य विशाखापूर्णायोगान्तं यावत् प्रसृतः कालावधिः।
अत्र लक्षणान्यशोकबकुलपुष्पादीनि।

प्रफुल्लचूताङ्कुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः ।
मनांसि विध्यन् सुरतप्रसङ्गिनां वसन्तयोधः समुपागतः प्रिये! ।।१।।
द्रुमाः सपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः सर्व्वं प्रिये! चारुतरं वसन्ते ।।२।।
वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां तनोति सौभाग्यमयं वसन्तः ।।३।।

(१) हे प्रिये! आम की खिली मञ्जरी को तीक्ष्ण बाण बनाए हुए, भ्रमरमाला की प्रत्यञ्चा चढ़ाए हुए सुरत–प्रसङ्गि के प्रेमीजनों के चित्त को वेधने के लिए यह उपस्थित है वसन्तयोद्धा। (२) इस समय वृक्षों में पुष्प फूलने लगे हैं, पानी में कमल निकल आए हैं, स्त्रियों में काम उमड़ने लगा है, पवन सुगन्धित हैं, रात्रियाँ सुखद लगने लगी हैं, और दिन भी रम्य हैं। प्रिये! वसन्त में सब चारु से चारुतर दिखाई दे रहे हैं। (३) यह जो वसन्तकाल है यह सभी में स्पृहणीयता का आधान कर रहा है, चाहे वापीजल हो,चाहे मणिमेखला हो,चाहे चन्द्र की किरणें हों, चाहे प्रमदाजन हों, चाहे कुसुमों से अन्वित आम्रवृक्ष हों।

६.१ न तद् वनं यन्न फलानतद्रुमं न तत् फलं यन्न सुहृष्टकोकिलम् ।
न कोकिलोऽसौ न चुकूज यः कलं न कूजितं तन्न जहार यन्मनः ।।

ऐसा कोई वन नहीं है जिसके वृक्ष फलों से झुके न हों। ऐसा कोई फल नहीं जिससे कोयल प्रसन्न वन हुई हो। ऐसी कोई कोयल नहीं जिसमें काकली न अलापी हो। और ऐसी कोई काकली नहीं जिसने चित्त न चुरा लिया हो।

६.२ ईषत्तुषारैः कृत(श)शीतहर्म्यः सुवासितं चारु शिरश्च चम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः ।।

ओस पढ़ने में अब आ गई कमी, इसीलिए छज्जे अब कम ठेड़े लग रहे। शिरों पर अब चम्पा के फूल की सुगन्ध भरने लगी है। नारियाँ अब आकर्षक पुष्पों को स्तनों पर लगाने लगी हैं।

कुसुम्भरागाऽरुणितैर् दुकूलैर्नितम्बबिम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरैरलङ्क्रियन्ते स्तनमण्डलानि ।। ४।।
कर्णेषु योग्यं नवकर्णिकारं स्तनेषु हारा अलकेष्वशोकम् ।
शिखासु फुल्ला नवमालिकाश्च प्रयान्ति कान्तिं प्रमदाजनस्य ।। ५।।
स्तनेषु हाराः सितचन्दनार्द्रा भुजेषु कम्बूवलयाङ्गदानि ।
प्रयान्ति सङ्गं मदनातुराणां नितम्बिनीनां जघनेषु काञ्च्यः ।। ६।।
सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु ।
रत्नान्तरे मौक्तिकसङ्गरम्यः स्वेदोद्गमो विस्तरतामुपैति ।। ७।।
उच्छ्वासयन्त्यः श्लथबन्धनानि गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्त्तिष्वपि कामुकेषु समुत्सुका एव भवन्ति नार्यः ।। ८।।
तनूनि पाण्डूनि मदाऽलसानि मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यरसोत्सुकानि ।। ९।।

(४) विलासिनी नारियों के नितम्बबिम्ब कुसुम्भराग से अरुण दुकूलों से और उन्हीं के स्तनमण्डल केसरिया रंग में रंगे गौरवर्ण के पतले अंशुकों से अलंकृत किए जाने लगे हैं। (५) प्रमदाजनों के कान में योग्य कर्णिकार पुष्प और अच्छा लग रहा है, स्तनों पर (मोती के) हार, अलकों में अशोकपुष्प तथा शिखाओं में फूली नवमल्लिका। (६) मदनातुर नितम्बिनी महिलाओं के स्तनों पर सफेद चन्दन से भीगे (मौक्तिक) हार स्थान पा रहे हैं, भुजाओं में शङ्ख की चूड़ियाँ और बाजूबन्द, इसी प्रकार जघनों पर काञ्ची। (७) विलासिनी वनिताओं के सुवर्णकमल जैसे पत्रलेख सहित चेहरों पर एक प्रकार के रत्नों में दूसरे प्रकार के रत्न जैसा स्वेदोद्गम फैलता जा रहा है। (८) कामुक जन पास में ही हैं तो भी नारियाँ समुत्सुक दिखाई दे रही हैं। इनके कन्दर्प से समाकुल अंग उच्छ्वासित हो रहे हैं, फलतः उनके बन्धन ढीले पड़ रहे हैं। (९) काम प्रमदाजनों के अंगों को लावण्य का रस लेने के लिए उत्सुक कर रहा है। वे (अंग) दुबले हैं, गौर वर्ण के हैं (पाण्डु), मदालस हैं और बारम्बार जँभाई ले रहे हैं।

६.५ कर्णेषु योग्यं नवकर्णिकारं स्तनेषु हारीकृतसिन्दुवारम् ।
शिखासु पुष्पं विवधप्रकारं स्वेदोद्गमो विस्तरतामुपैति ।।

सुन्दरियाँ अब कान में अनुरूपा और नए कर्णिकार पुष्प, स्तनों पर सिन्दुवार के हार, शिखाओं पर अनेक प्रकार के पुष्पों की लड़ियाँ धारण करने लगी हैं। किन्तु अब पसीना आने भी लगा है और फैलने भी लगा है।

नेत्रेष्वलोलो मदिराऽलसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ।।१०।।
अङ्गानि निद्रालुसविभ्रमाणि वाक्यानि किञ्चिन्मदिराऽलसानि ।
भ्रूक्षेपजह्मानि चवीक्षितानि चकार कामः प्रमदाजनस्य ।।११।।
प्रियङ्गुकालीयककुङ्कुमानि स्तनाङ्गरागेषु विसर्जितानि ।
आलिप्यते चन्दनमङ्गनाभिर् मदालसाभिर्मृगनाभियु–/मुक्तम् ।।१२।।
गुरूणि वासांसि वहाय तूर्णं तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि धत्ते जनः काममदालसाङ्गः ।।१३।।

(१०) स्त्रियों में काम इन दिनों मदिरालस नेत्रों में अचंचल, कपोलों पर भूरा, स्तनों पर कठोर, मध्यभाग में गहरा, जघनभाग मे उछला दिखाई दे रहा है। (११) काम ने प्रमदाजनों के अङ्गों को कर रखा है निद्रालु, और विभ्रमों से युक्त, वाक्यों को बना रखा है कुछ कुछ मदिरालस, दृष्टियों को कर रखा है भ्रूक्षेप से कुटिल। (१२) स्तनाङ्गराग में अब प्रियङ्गु, कालीयक और केसर का उपयोग नहीं हो रहा है (क्योंकि ये सब गरम हैं।) अब तो मदालस अङ्गनाएँ कस्तूरी से युक्त चन्दन लगा रही हैं स्तनों पर। (१३) अब मोटे और भारी वस्त्र छोड़ दिए गए हैं और पतले तथा लाक्षारस से रंगे, सुगन्धित तथा कालागुरु से सुवासित वस्त्र धारण कर रहे हैं, काम और मद से अलस अंग वाले लोग।

६.१२ शिशिरोचितानां कालीयकप्रियङ्ग्वादीनां शिशिरात्यये विसर्ग एवोचितः। मृगनाभिः कस्तूरिका। सा चातीवोष्णा। तर्हि त्याग एव तस्या अपि साम्प्रतमृतुपरिवर्त्ते समुचितः। ततश्च विपरीतार्थकानि पाठान्तराण्यत्राप्राप्तावसराण्येव निम्नलिखितेषु पाठेषु दृश्यमानप्रसराणि–

प्रियङ्गुकालीयककुङ्कुमानि स्तनाङ्गरागेषु विचर्च्चितानि ।
मधौ विभान्ति प्रमदाजनानामनङ्गकल्पद्रुमदेवभूमौ ।।
अङ्गेष्वनङ्ग–द्रुममञ्जरीभिः शशाङ्ककान्तिप्रतिमं समन्तात् ।
आलिख्य/प्यते चन्दनमङ्गनाभिर् मदालसाभिः मृगनाभियुक्तम् ।।

प्रियंगु, कालीयक और कुङ्कुम अब स्तनाङ्गराग बन रहे हैं। यह वसन्त प्रमदा के स्तनों के लिए कामरूपी कल्पवृक्ष के लिए स्वर्ग के समान है। (ठंड हटने पर यह विपरीत)।।
मदालस अंगनाएँ अब अपने स्तनों पर कस्तूरीमिश्रित चन्दन लेपने लगी हैं। यह चन्दन चाँदनी जैसा शुभ्र होता। इन पर अनङ्गद्रुम की मञ्जरी का पराग भी सफेदी उभार रहा है।।

पुंस्कोकिलश्चूतरसाऽऽसवेन मत्तः प्रियां चुम्बति रागहृष्टः ।
कूजन् द्विरेफोऽप्ययमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटुम् ।।१४।।
ताम्रप्रवालस्तबकावनम्राश् चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनाऽवधूताः पर्युत्सुकं मानसमङ्गनानाम् ।।१५।।
आ मूलतो विद्रुमरागताम्रं सपल्लवं पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ।।१६।।

मत्त–द्विरेफ–परिचुम्बित–चारु–पुष्पा
मन्दाऽनिलाऽऽकुलित–नम्र–मृदु–प्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ।।१७।।
कान्तामुखद्युतिजुषामचिरोद्गतानां
शोभां परां कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये! सहृदयस्य भवेन्न कस्य
कन्दर्पबाण–पतन–व्यथितं हि चेतः ।।१८।।

(१४) पुंस्कोकिल आम के बौर का रस रूपी आसव पीकर मतवाला हो गया है और राग से पुलकित होकर अपनी प्रिया का चुम्बन कर रहा है। कमल पर बैठा हुआ यह भ्रमर भी प्रिया का प्रिय चाटु कर रहा है। (१५) ताम्रवर्ण के नए नए पत्तों और गुच्छों से झुकी आम की टहनियाँ पुष्पित होकर सुन्दर लग रही हैं। जब ये पवन से कम्पित होती हैं तो अङ्गनाओं का मन अत्यधिक उत्सुक कर देती हैं। (१६) अशोक वृक्षों में ऐसे पुष्प और पल्लव निकले हैं, जो जड़ से ही विद्रुम के समान ताम्रवर्ण के हैं। इन्हें धारण किए ये वृक्ष दिखाई देते हैं तो नवयौवनाओं के हृदय को सशोक बना देते हैं, अशोक होते हुए भी। (१७) अतिमुक्तलता की नई नई टहनियाँ दिखाई पड़ी नहीं कि कामिजनों के मन सहसा उत्सुक हुए नहीं। इनके सुन्दर पुष्प मत्त भ्रमर से परिचुम्बित हैं और चारु, मृदु प्रवाल हैं मन्द पवन से आकुल तथा नम्र। (१८) हे प्रिये! कुरबक द्रुम में जो नई नई मञ्जरियाँ निकली हैं, उनकी कान्ति कान्तामुख की कान्ति जैसी ही है। इनकी इस उत्कृष्टतम शोभा को देखकर किस सहृदय का मन कन्दर्प बाण के पतन से व्यथित नहीं हो जाता।

आदीप्त—वह्नि—सदृशैरपयात—पत्रैः
सर्वत्र किंशुकवनैः कुसुमावकीर्णैः ।
सद्यो वसन्तसमयेन समागतेयं
रक्तांशुका नववधूरिव भाति भूमिः ।।१९।।
किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं च दग्धम् ।
यत् कोकिलः पुनरयं मधुरैर्वचोभिर्
यूनां मनः सुवदनानिहितं निहन्ति ।।२०।।
पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ।।२१।।
आकम्पयन् कुसुमिताः सहकारशाखाः
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन् नराणाम्
नीहारपातविगमात् सुभगो वनेषु ।।२२।।

(१९) किंशुकवृक्षों के वन पत्तों के झड़ जाने और फूल से लद जाने पर प्रज्वलित वह्नि जैसे दिखाई दे रहे हैं। ऐसा लगता है कि वसन्त (रूपी प्रिय) से हुए ताजे ताजे मिलन में भूमि ने नववधू के समान लाल साड़ी ओढ़ रखी है। **(२०)** तोते की चोंच जैसे किंशुकों ने किसे विदीर्ण नहीं किया और कर्णिकार के पुष्पों ने किसे नहीं जलाया कि यह कोकिल मधुर कूक के द्वारा युवकों के सुन्दर मुखवाली गोरियों में अटके चित्तों पर प्रहार कर रही है। **(२१)** कुलवधुओं का मन लजीला होता है, उसमें विनय भी रहता है, किन्तु मीठी बोली में फुदक फुदक कर इन पुंस्कोकिलों ने जो खुशी मनाई और भौंरों ने भी जो उन्मद और मधुर गुञ्जार किया उससे उन कुलाङ्गनाओं का मन कुलगृह मे भी पर्याकुल हो उठा है। **(२२)** ओस का गिरना बन्द हो जाने से प्रिय लगते वायु ने मनुष्यों का चित्त हरण करते हुए चलना शुरू कर दिया है वनों में। यह सहकार (अतिसुगन्धी आम) की फूली शाखाओं को कँपाता हुआ और कोयलों की कूक को दिगन्त तक फैलाता हुआ चल रहा है।

कुन्दैः सविभ्रमवधूहसितावदातै–
रुद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि पुंसाम् ।। २३ ।।

आलम्बिहेमरसनाः स्तनसक्तहाराः
कन्दर्पदर्प–शिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादैर्
नार्यो हरन्ति हृदयं प्रसभं नराणाम् ।। २४ ।।

मलयपवनविद्धः कोकिलालापरम्यः
सुरभि–मधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर् वेष्ट्यमानः समन्ताद्
भवतु तव वसन्तः श्रेष्ठकालः सुखाय ।। २५ ।।

इति श्रीकालिदासकृतावृतुसंहारनाम्नि विशेषकाव्ये
वसन्तवर्णना ।। ६ ।।

(२३) सविभ्रम वधू की हँसी जैसे सफेद कुन्द पुष्पों ने उपवनों को उद्योतित और मनोहर बना दिया है। अब ये मुनिजनों के वैराग्यपूर्ण मन को भी आकृष्ट करने लगे हैं जिनके चित्त रागमलिन हैं, उनका तो कहना ही क्या! (२४) मधुमास में नारियाँ सोने की करधनी लटकाए हुए, स्तनों पर (मौक्तिक) हार धारण किए और कन्दर्प दर्प से शिथिल अंग लिए मनुष्यों का मन बलात् खींच लेती हैं। (२५) वसन्त का यह सर्वोत्तम समय आपके लिए सुखकारी हो। इसमें मलयपवन सुलभ है, कोकिलालाप से सुन्दर है यह और सुरभित मदिरा के निषेक से गन्ध के उद्गार इसमें सुलभ हैं। इसी कारण भाँति भाँति के भौंरो से चहुँ ओर से यह घिरा पड़ा है।

इस प्रकार कविवर कालिदास की कृति ऋतुसंहार नामक
काव्य में वसन्तवर्णना पूर्ण हुई ।। ६ ।।

२५. वेष्ट्य = धूय

॥ अथ ॥

वसन्तवर्णनायां प्रक्षेपः

पञ्चपद्यानि वसन्तवर्णनायां दत्तानि

नानामनोज्ञकुसुमद्रुमभूषिताग्रान्
हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलाँश्च
दृष्ट्वा जनः क्षितिभृतो मदमेति सर्व्वः ॥१॥
नेत्रे निमीलयति रोदिति याति मोहं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्तिर्
दृष्ट्वाऽध्वगः कुसुमितान् सहकारवृक्षान् ॥ २॥
समदमधुकाराणां कोकिलानाञ्च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मालिनीनां
तुदति कुसुममासो मन्मथोद्दीपनाय ॥ ३॥

(१) पर्वतों को देखकर प्रत्येक जन मद को प्राप्त हो जाता है। पर्वत के अग्रभाग भूषित हैं द्रुमों से, जिन पर फूले हैं नाना प्रकार के पुष्प। इनके शिलातल हैं शिलाजीत से युक्त। (२) प्रत्येक रास्तागीर जब फूले सहकार वृक्षों को देखता है तो आँखे बन्द कर लेता है, रोता है, मूर्च्छित होता है, नाक पर हाथ रखता और चिल्लाता है जोर जोर से। उसके मन में जाग उठता है कान्ता के वियोग का परिखेद। (३) मदमत्त भौंरों और कोयलों की धुन, पुष्पित सहकार, सुन्दर कर्णिकार है मानो काम के सुतीक्ष्ण बाण। इनसे कामदेव मानिनी नायिकाओं के मानस को हिला रहा, कामोद्दीपन हेतु।

रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान् पुष्पिताँश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ।।४।।
परभृतकलनादैर् लादिभिः सद्वचांसि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः ।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभै—
रुपहसति वसन्तः कामिनीनामिदानीम् ।।५।।
कनककमलकान्तैराननैः पाण्डुगण्डै—
रुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।
मदजनितविलासैर् दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ।।६।।
मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरबकपूर्णः केशपाशो मनोज्ञः ।
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ।।७।।

(४) प्रवासी पहले से दुबला है और उसे मार्ग में सामने मिल गए रुचिर कनक जैसे पुष्पराशि बिखेरते, मृदुपवन से कम्पित और पुष्पित आम्रवृक्ष, तो काम ने जो बाण बरसाए उससे वह मूर्च्छित हो गया। (५) वसन्त इस समय कामिनीजनों के वचनों का उपहास सा कर रहा है कोयलों के मधुर आलाप से, स्मित में दिखे दन्तों की किरणों का कुन्दपुष्प की प्रभाओं से और करकिसलय को कान्ति का मूँगे जैसे सुन्दर पल्लवों से। (६) नारियाँ इस समय प्रशान्त मुनीन्द्रों को भी काम बना देती हैं। (कामयन्ति) अपने कनककमल जैसे कान्तियुक्त और सफेद कपोलों वाले मुखों से, चन्दन से आर्द्र और ऊपर हार पहने स्तनान्तों से और नशे से विकृत कटाक्षों से। (इच्छार्थक 'कमु' धातु का रूप बनता कामयन्ते।) (७) मुखकमल है मदिरा से सुरभित, आँखे हैं लोध्र सी लाल, केशपाश में लगा है सुन्दर नव कुरबक, जैसा गुरुतर कुचयुग्म वैसा ही श्रोणिबिम्ब, इनमें से महिलाओं का कौन नहीं है सक्षम मन्मथ के उद्दीपन में।

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
उत्कूजितैः परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ।।८।।

रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं
सर्व्वं रसायनमिदं कुसुमायुधस्य ।।९।।

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
कान्तां च गाढमुपगूहति शीतलत्वात् ।।१०।।

बहुकुसुमसुरम्यः कामिनीकामभूतः
पथिकजनवधूनां चित्तसन्तापहेतुः ।
मधुकरपिकनादैर् जातवादप्रपञ्चः
प्रदिशतु सुखमाशु प्रायशो वो वसन्तः ।।११।।

(८) मनस्विनी महिलाओं के हृदय कँपा दिए हैं फूले सहकार से अधिवासित वातों ने, मदमत्त कोयलों की कूक ने और भौंरों के कर्णप्रिय गीतनाद ने। (९) कुसुमायुध के लिए रसायन हैं ये सब – 'रम्य प्रदोषकाल, खिली चाँदनी, पुंस्कोकिल की कूक, सुगन्धित पवन, मत्त भौंरों की गुंजार, रात्रि में आसवपान।' (१०) शीतल होने के कारण इन दिनों हर प्राणी दिन में तो चाहता है वृक्षों की छाया और रात में चन्द्र की किरणें। सोने के लिए जाता है सुखप्रद शीतल छत पर और करता है कान्ता का गाढ़ आश्लेष। (११) वसन्त आपको पर्याप्त (प्रायशः) सुख प्रदान करे। यह पुष्पों की बहुत बड़ी मात्रा से सुरम्य है, कामिनीजनों के लिए यह साक्षात् काम ही है, प्रवासीजनों की प्रियाओं के चित्त में संताप पैदा करता है, क्योंकि भौरों और कोयलों के कलरव से भरा रहता है यह।

मृदुपवन–विधूतैश् चूत–शाखि–प्रसूनैः
सुरभितसकलाऽऽशो रम्यचन्द्रप्रकाशः ।
जनितमदनवेगः कामिनीसङ्गयोग्यः
सुखयतु मधुमासं/सः कान्तहर्म्याधिवासः ।।१२।।
रक्ताशोकविकल्पिताऽधरमधुर्मत्तद्विरेफस्वनः
कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्मानन: ।
चूताऽऽमोदसुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः
कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम् ।।१३।।
आम्रीमञ्जुलमञ्जरी वरशरः सत् किंशुकं यद्धनुर्
ज्या यस्यालिकुलं कलङ्करहितश्छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृतो यद्वन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ।।१४।।

।। ॐ तत् सत्।।

सतृणाऽभ्यवहारिणोऽपि तत्त्वाऽभिनिवेशोत्सुकचेतसो यथा स्युः ।
अयि हंसरथे! सरोजवासिन्यनुकम्पस्व तथाऽम्ब! भावकेषु ।।

(१२) यह जो मधुमास है यह आपको सुख दे। इसमें सभी दिशाएँ फूले हुए और मृदु पवन से झूमते आम के बौरों की सुगन्ध से भरी हुई हैं। चाँदनी प्रिय लग रही है, इसने कामवेग उत्पन्न कर दिया है और यह है भी कामिनीसंग के योग्य। इसमें अब छज्जा सुहावना लगने लगा है। (१३) पुष्पागमं कल्पान्त तक आपका मंगल करे जिसका अधरमधु है रक्ताशोक, मत्त भ्रमरस्वन है शब्द, कुन्द की कलियाँ हैं उज्ज्वल दन्तपंक्ति और खिले कमल हैं चेहरा। इसमें पवन है आम्रमञ्जरी की सुगन्ध से सुगन्धित और इसीलिए यह है शृङ्गारदीक्षा का गुरु। (१४) आम की सुन्दर मञ्जरी जिसका तीक्ष्ण बाण है, उत्तम टेसू है जिसका धनुष, प्रत्यञ्चा है भ्रमरपंक्ति, निष्कलङ्क चन्द्र है श्वेतच्छत्र, मत्तगज है मलयानिल, कोयल है स्तुतिगानकर्त्ता चारण। ऐसा सारे संसार को जीत लेने वाला वसन्त से युक्त कामदेव आपका मंगल करे।

****

परिशिष्टम्–१

रघुवंशे सूर्यवंशः

	नाम	सन्दर्भः	रानी
१.	सूर्यः	१.७	—
२.	मनुः (वैवस्वत)	१.११	—
३.	दिलीपः	१.१२	सुदक्षिणा
४.	रघुः	३.१३–२१	प्रभावती
५.	अजः	५.३६	इन्दुमती
६.	दशरथः	८.२९	कौशल्या
७.	रामः	१०.६७	सीता
८.	कुशः	१५.३२	कुमुद्वती
९.	अतिथिः	१७.१	—
१०.	निषधः	१८.१	—
११.	कुशेशयाक्षः	१८.४	—
१२.	न/दलः	१८.५	—
१३.	नभस्	१८.६	—
१४.	पुण्डरीकः	१८.८	—
१५.	क्षेमधन्वा	१८.९	—
१६.	देवानीकः	१८.१०	—
१७.	अहीनगुः	१८.१४	—
१८.	पारियात्रः	१८.१६	—
१९.	शीलः/शिलः	१८.१७	—
२०.	उन्नाभः	१८.२०	—
२१.	वज्रणाभः	१८.२१	—
२२.	शङ्खणः	१८.२२	—
२३.	ध्यु/व्युशिताश्वः	१८.२३	—
२४.	विश्वसहः	१८.२४	—
२५.	हिरण्याक्षः	१८.२५	—
२६.	कौशल्यः	१८.२७	—
२७.	ब्रह्मिष्ठः	१८.२८	—
२८.	पुष्यः	१८.३०	—
२९.	पुत्रः (?)	१८.३१	—
३०.	ध्रुवसन्धिः	१८.३४	—
३१.	सुदर्शनः	१८.३५	—
३२.	अग्निवर्णः	१९.१	—

अनेनैव सह कुश–शाखा समाप्ता। लवादीनामन्येषां सप्तानां दाशरथेयानामन्वयस्त्वव्युच्छिन्नसन्ततिरेव।

****

परिशिष्टम् – २

पाठभेदाः

सन्दर्भः	एतत्संस्करणपाठाः	संस्करणान्तरपाठाः
रघुवंशे पाठभेदाः		
१.१–९	१.१	१.१
	१.२–४	१.७–९
	१.५–९	१.२–६
१.१९	शास्त्रे च व्यापृता अ.ना.	शस्त्रेष्वकुण्ठिता म.
१.५२	आतपापाय	आतपात्यय म.
२.५	अव्याहतः स्वैरगतेः	अव्याहतैः स्वैरगतैः म.
२.१३	गन्धी म.	गन्धिः
२.२४	रुदन्वतिष्ठत् (शृ.प्र. १८.१५८)	नूदतिष्ठत्
२.४२	सङ्गे	भङ्गे म.
२.४५	विमुच्यताम्	विसृज्यताम् म.
२.६९	शुद्धं	शुभ्रं म.
३.१	मुखम् म.	महम्
३.१०	श्रुतेश्च	धृतेश्च म.
३.५५	पत्रलताक्रियो	पत्रविशेषकाङ्कित म.
३.६३	अभङ्ग	असङ्ग म.
४.६७	वङ्क्षु	वंकू, सिन्धु म.
४.६८	पाटना	पाटला म.
४.७०	तुङ्गद्रवि०	तुङ्गा द्रवि० म.
५.४	चैतन्यमुग्रादिव दीक्षितेन व.	लोकेन चैतन्यमिवोष्णरश्मेः म.
५.२५	महितो	महिते म.
५.३०	शृङ्गं	पादम् म.
५.३४	ईड्यो	ईड्यं म.
५.४१	वन्ध्येतरा हे(पा.)	वन्येतरा म.

५.५६	संमोचितः	स मोचितः हे.
५.६५	ललितबन्धमनोहराभिः	सवयसः प्रथितप्रबोधं म.
५.६९	वृन्तश्लथं	वृन्ताच्छ्लथं
६.१२	प्रवालचेष्टा	प्रवालशोभा म.
६.१९	सन्निवेशव्यति	सन्निवेशाद् व्यति म.
६.४१	प्रदीप	प्रतीप म.
६.४८	मधुरां	मथुरां म.
६.४९	कृष्णम् म.	विष्णुम्
६.७५	वाणिनी	पाणिनी हे(पा.)
७.३६	ज्योतीरथीं(थां)	भागीरथीम् म.
७.३९	रनुक्रमे हे.	नैत्रक्रमे म.
७.५६	दृप्तं म.	दृप्तः म.हे.
८.६७	सखा हे.	सखी म.
८.७०	दुर्दिनान्	दूषितान् म.
८.९३	गमनत्वरया	गमने त्वरया म.हे.
८.९४	वेशनमतिर्नृ म.	वेशनपरो नृ
९.३१	सुरभिसङ्गमजं उपहितं पा.	उपहितं म.; सुरभि अज्ञातं मल्लिनाथादेः
९.५१	तनुपला०	तरुपला म.
११.४७	दृष्टसार मूले म.	दृष्टसार मूले
	मैथिलः सप.(टिप्पण्याम्)	मैथिलः मूले ११.४८ म.
१२.७०	यो बभौ हामा.	प्लवगै म.
	न्मग्नः शेषः स्वस्यैव	न्मग्नं शेषं स्वप्नाय म.
१२.७६	गरुडापातविश्लेषि०बन्धनम्	गरुडापातविश्लिष्टमे०बन्धनः म.
	क्षणक्लेशि	क्षणक्लेशः(कर्तृ) म.
	स्वप्नवृत्तमिव	स्वप्नवृत्त इव म.
१२.८७	वैरम्	युद्धम् म.
१२.८८	भुजोत्तमाङ्गबाहु०	०भुजमूर्धोरुबाहु० म.
१२.१०४	संक्रमय्य	संगमय्य म.
१३.१०	विवृताननत्वम्	विवृताननत्वात् म.

१३.११	कर्णेक्षण	कर्णक्षण म.
१३.१९	मरुतां	पततां म.
१३.३८	माण्डकर्णे:	शातकर्णे: म.
१३.७२	दु:खैक	दुर्जात म.
१३.७८	प्रणय	प्रणति म.
१४.११	हरिमिश्रसैन्य	हरिभि: ससैन्य: म.
१४.२८	हंसै:	हिंस्रै: म.
१४.३४	उपेक्षै	उपेक्षे म.
	त्यजानि	त्यजामि म.
१४.७४	भयच्छेद	भवोच्छेद म.
१४.८७	दुर्वारव्यथ	दुर्वारं कथ म.
१५.१०	वर:	वरै: म.
१५.३०	स वेणी	प्रवेणी म.
१५.३६	मधुरा	मथुरा
१५.६७	वीक्षापन्ना म.	व्यक्षिकम्पं शापा.
१५.७६	वह्निं	सूर्यं म.
१६.३२	प्रपात	प्रयाण म.
१६.६६	हर्षात्	दर्पात् म.
१६.७५	अम्लान	आम्लान म.
१७.२३	गुणाऽऽनद्धं	गुणोन्नद्धं म.
१७.४६	प्रमादविमुखे	प्रसादसुमुखे म.
१७.४७	शौर्यञ्चापद	शौर्यं श्वापद म.
१७.७१	प्रवृद्धो	प्रवृद्धौ म.
१७.७२	अत्यर्थ महत:	अत्यर्थमहत: म.
१७.७९	शेषां	देवा: म./लेखा:
१८.१	निषधाख्ययैव	निषधाख्यमेव म., स.क. २.२१७
१८.३१	पुत्र:	पुष्य:
१८.५३	दूतसन्द०	दूतिसन्द० म.
१९.५६	पयसा	विधिना म.

कुमारसंभवे पाठभेदा:

१.१	वारिनिधी	तोयनिधी म.
१.८	तान/स्थान	स्थान/तान
१.९	प्रसूत:	समीर: व.
	गन्ध:	गन्धै: व.
१.१२	०सां सतीव	सामतीव
१.३९	नवयौवनेन कामस्य	नवयौवनस्य कामेन अ.ना
१.४१	कण्ठपाशो	कण्ठपाशौ म.
१.५२	देवदेवमद्रि: सुतां ग्रा०	देवमद्रि: सुतां प्रतिग्रा०
१.५४	गङ्गाप्रपातो	गङ्गाप्रवाहो
२.३०	द्विनेत्रो	द्विनेत्रं म.
२.५१	विभो	विभो:
	सृष्टम्	स्रष्टुम् म.
	धर्म	योगम् व.
२.५६	वरेणाऽश	वरेण श म.
३.४६	करावसक्त	कर्णा/कण्ठावसक्त
	मृगत्वचं	कृष्णत्वचं म.
३.५०	क्षेत्रविदो	वेदविदो
३.५४	सुजातपु०	पर्याप्तपु० म.
३.५५	द्वितीयमौर्वी०	मौर्वी द्वितीया० म.
३.७५	समर्थ्य	समीक्ष्य अ.ना.
३.७६	कृतात्मा	कृताङ्ग: व.
४.४५	सुचरितार्थपदै	समभिवृद्धरसै: अ.ना.
४.४६	प्रतिपाल०	.परिपाल०
	प्रदोषम्	दिनान्तम् अ.ना.
५.७१	कपालिन:	पिनाकिन: म.अ.ना.
५.८५	निक्षेपणाय	निक्षेप एव व.अ.ना.
६.२	वाभाष्ये	वाभ्याशे

७.१–९५	क्रमैक्यम्	क्रमैक्यम्
८.२४	वारणध्व	रावणध्व० व.म.
८.६०	बहुविधा अत्र पाठभेदा:	

मेघदूते पाठभेदा:

१.	कार–प्रमत्त:	कारात् प्रमत्त:
५.	प्रणयकृपणा	प्रकृतिकृपणा म.
९.	त्वां	त्वं
	क्षम	क्षण म.
	परिचयं नून	परिचयान्नून
१०.	सद्य:पातप्रणयि	सद्य:पाति प्रणयि म.
२१.	दग्धार	जग्ध्वार म.
२६.	तीरजानां	तीरजातानि म.
२९.	तामतीतस्य सिन्धु: व.द.म.सा.	सलिलासावतीतस्य सिन्धु:;
	सलिलं तामतीतस्य सिन्धुं व.,	
		सलिला सा त्वतीतस्य सिन्धु: द.
		सलिला ताम्यती तस्य सिन्धु: शापा.
		पाण्डुच्छायां व., व्यञ्जयन्तीम् व.
३०.	वन्तीन्, वृद्धान् व.द.म.	वन्तीं, वृद्धां, व.द.म.काग्र.–२
	अनुसर	उपसर
३१.	सिप्रा व.द.म.(निर्णयसागर)	शिप्रा म.(नन्दर्गीकर)
३३.	चण्डीश्वरस्य	चण्डेश्वरस्य व.द.पूस.
३४.	अत्येति(सूर्यास्त)	अभ्येति व(सूर्योदय:)
	फलमविकलं	फलमिव कलं शार्पेपा.
३५.	क्लान्त व.द.म.	कान्त काग्र.–२
	मोक्ष्यन्ते काग्र.–२	मोक्ष्यन्ति व.द.पूस.
३७.	सौदामन्या	सौदामिन्या व.
	'मा स्म' म.	'मा च' व.द.काग्र.–२
३८.	तां कस्याञ्चित्	तस्या: किञ्चिद् भव शर्पेपा.

३९.	वदनात्	नयनात् स्थि.
४०.	चटुल व.द.म.	चपल
४१.	नीत्वा	हृत्वा
	विवृत म.	पुलिन व.
४२.	वातः	वायुः
४३.	चमूनां	वसूनां सापा.
४४.	प्रेम्णा	प्रीत्या
	दलक्षेपि	पदप्रापि, दलप्रापि, दलत्रापि
४५.	शरवणभवं द.म.	शरवणभुवं व., प्रथमकथितं स्थि.
४६.	भावात्	देशात्
४७.	पादटिप्पण्यां नवीनं पद्यम्	
४८.	धारापातैः	धारासारैः
४९.	बन्धुप्रीत्या	बन्धुस्नेहात्
५०.	गौरीं वक्र	गौरीवक्त्र/वक्रभ्रुकुटिरचनां गौरीवक्र व., गौरीवक्त्र म., गौरीवक्त्रे द.
५१.	पश्चार्ध द.म.	पूर्वार्ध सरस्वतीकण्ठाभरणम् स्थि.
	सङ्गमेवा	सङ्गमेना, सङ्गमा च
५४.	ये संर०० र्भवन्तम्	ये त्वां मुक्तध्वनिमसहनाः स्वाङ्ग/ कायभङ्गाय तस्मिन्, दर्पोत्सेकादुपरि शरभा लंघयिष्यन्त्यलङ्घ्यम् व. सा.द्र.काग्र.—२ पाटि.
५५.	चित म.	हृत व.द.सा.
	संकल्पन्ते	कल्पन्तेऽस्य व.सा., कल्पिष्यन्ते द.
५६.	संसक्ता	संरक्ता व.सा.
५७.	अनुसरेः द.म.	अभिसरेः व.
	श्यामः पादो व.द.म.	पादन्यासः
	नियमना व.म.	नियमने जिनविजयः, विमथना द.
५८.	दर्पण	दर्शन
	शृङ्गो०	तुङ्गो

	कुमुद	कुसुम
	स्थित: व.द.म.	स्थिर: पूस.
	दिनम् द.म.	दिशम्, निशम् व.
५९.	दशन व.म.	नदन द.पूस.
	शोभा द.म.	लीला व.सा.
६०.	तस्मिन् द.म.	नीलं व.
	विहरेत्	विचरेत्
	भङ्गीभक्त्या द.म.	भङ्गी भक्त्या द.
	सोपानत्वं कुरु	सोपानं त्वं व्रज द.
	मणितटारोहणायाग्रयायी द.म.	सुखपदस्पर्शमारोहणेषु व., पदसुखस्पर्शमारोहणेषु काग्र.—२पा., सुखपदारोहणयाग्रयायी काग्र.—२पा.
६१.	वलयकुलिशोद्घट्टनो	जनितसलिलोद्गारमन्त: प्रवेशात् व.द्र. काग्र.—२ पाटि.
६२.	ज्ञास्यसे काम	ज्ञास्यसि व्योम व.

सूच्यम् अत्र पूर्वसन्देशसमाप्तिरिति द., अत्र पूर्वमेघसमाप्तिरिति च.म.,वल्लभादिषु तु न लभ्यत एष परिच्छेद:।

६३.	सङ्गीताय प्र व.म.	सङ्गीतार्थ—प्र
	मुरजा: व.म.	मुरवा: द.पूस.
	गम्भीर व.म.	पर्जन्य द.पूस.
६४.	अलके द.म.	अलकं व.म.
	वेध:	बन्ध:,विद्धं व.म.
	लोध्र म.	रोध्र व.स्थि.
	आनने श्री: द.म.	आननश्री: व.
	च	ऽपि
६५.	आनन्दो०	प्रक्षिप्तमिदमिति व.द.शा.सा.

६६.	रतिफलं	रतिरसं मन्दाकिन्याः प्रक्षिप्तमिति व.द.शा.सा.
६७.	सित म.	सन व.
	बिम्बाधराणां क्षौमं रागा द.म.	यक्षाङ्गनानां वासः कामा व.सा.
	अर्चिस्तुङ्गान् व.म.	विद्युद्दीप्रान् द.
६८.	नवजलकणैः व.म.	सलिलकणिका द.
	जालमार्गैः म.	यत्र जालै व.सा., यन्त्रजालैः द.
	धूमो०	धूपो शापा.
६९.	भुजा००तानाम्	भुजोच्छ्वासितालिङ्गिताभ्याम्
७०.	पद्यमिदं द.पू. न पठतः	अत्र ५४भेदः प्रस्तारः द्र.काग्र.—२

****

परिशिष्टम्—३

रघुवंशपद्यक्रमभेदः

अमेरिकास्थ—हार्वर्डविश्वविद्यालय—हस्तलेखेषु रघुवंशचतुर्थसर्गश्लोकेषु क्रमभेदः

पाटि. — पादटिप्पणी; पा. — पाठान्तरम्; काग्र.— कालिदासग्रन्थावली, द्वितीयसंस्करण, काहिविवि

		काग्र.	२४१	४१५	७७२	९१५	९१६
१.	स राज्यं	१	१	१	१	१	१
	न्यस्तशस्त्रं	१पा.	२	२	६	२	२
२.	दिलीपान	२	३पत्रपार्श्वे	३	७	७	३
३.	पुरूहूतध्व	३	४	४	२	३	४
४.	सममेव स	४	८	५पत्रपार्श्वे	८	८	५
५.	छायामण्ड	५	५	५	३	४	६
६.	परिकल्पित	६	६	६	४	५	७
७.	मनुप्रभृति	७	७	७	५	६	८
८.	स हि सर्व	८	११	१०	११	११	९
९.	मन्दोत्कण्ठा	९	१०	९	१०	१०	१३
१०.	नयविद्धि	१०	९	८	९	९	१२
११.	पञ्चानाम	११	९—१२	११	१२	१३	१४
१२.	यथा प्रह्वा	१२	१०—१३	१२	१३	१३	११
१३.	कामं कर्णा	१३	११—१४	१३	१४	१४	१०पाठान्तर
				१४परित्यक्त			
	कामं कमल	१३पाटि.	—	—	—	—	—
१४.	लब्धप्रशम	१४	१२—१५	१५	१५	१५	१५
१५.	निर्वृष्टलघु	१५	१३—१६	१६	१६	१६	१६
	अधिज्यमा	१५पाटि.	१७	१७	१७	१७	१७
१६.	वार्षिकं सं	१६	१८	१८	१८	१८	१९
१७.	पुण्डरीका	१७	१९	१९	१९	१९	१८
१८.	प्रसादसु	१८	२०	२०	२०	२०	२०
१९.	हंसश्रेणी	१९	२१	२१	२१	२१	२१
२०.	इक्षुच्छायनि	२०	—	२२	—	२२	—
	इक्षुच्छायानि	२०पाटि.	२२	—	२२	—	२२
	तस्य गोप्तु	२०पाटि.	२३	२३	—	—	२३पाटि.

		काग्र.	२४१	४१५	७७२	९१५	९१६
२१.	प्रससादो	२१	२४	२४	२३	२३	२४
२२.	मदोदग्रा	२२	२५	२५	२४	२४	२५
२३.	प्रसवैः स	२३	२६	२६	२५	२५	२६
२४.	सरितः कुर्व	२४	२७	२७	२६	२६	२७
२५.	तस्मै सम्य	२५	२८	—	२७	२७	२८
	सम्यक् तस्मै	२५पाटि.	—	२८	—	—	—
२६.	स गुप्तमू	२६	२९	२९	२८	२८	२९
२७.	अवाकिरन्	२७	३०	३०	२९	२९	३०
२८.	स ययौ प्र	२८	३१	३१	३०	३०	३१
२९.	रजोभिः स्य	२९	३२	३२	३१	३१	३२
	पुरोगैः कलु	२९पाटि.	३६	३५	३४	३४	३४
३०.	प्रतापोग्रे	३०	३४	३४	३३	३३	३५
३१.	मरुपृष्ठ	३१	३३	३३	३२	३२	३५
३२.	स सेनां म	३२	३५	३६	३५	३५	३६
३३.	त्याजितैः फ	३३	३७	३७	३६	३६	३७
३४.	पौरस्त्याने	३४	३८	३८	३७	३७	३८
३५.	अनम्राणां स	३५	३९	३९	३८	३८	३९
३६.	बङ्गानुत्खाय	३६	४०	४०	३९	३९	४०
३७.	आपाद००प्रणता	३७	४१	—	—	—	४१
	आपाद००प्रवणा	३७पाटि.	—	४१	४०	४०	—
३८.	स तीर्त्वा कपि	३८	४२	४२	४१	४१	४२
३९.	स प्रतापं म	३९	४३	४३	४२	४२	४३
४०.	प्रतिजग्राह	४०	४४	४४	४३	४३	४४
४१.	द्विषां विष	४१	४५	४५	४४	४४	४५
	वायव्यास्त्र	४१पाटि.	४६	४६	४५	४५	४६
४२.	ताम्बूलीनां	४२	४७	४७	४६	४६	४७
४३.	गृहीतप्रति	४३	४८	४८	४७	४७	४८
४४.	ततो वेला	४४	४९	४९	४८	४८	४९
४५.	स सैन्यप	४५	५०	५०	४९	४९	५०

		काग्र.	२४१	४१५	७७२	९१५	९१६
४६.	बलैरध्यु	४६	५१	५२	५०	५१	५२
४७.	ससञ्जुर	४७	५२	५३	५२	५२	५३
	आजानेयखु	४७पाटि.	५३	५४	५१	५०	५४
४८.	भोगिवेष्टन	४८	५४	५५	५३	५३	५५
४९.	दिशि मन्दा	४९	५५	५६	५४	५४	५६
५०.	ताम्रपर्णी	५०	५६	५७	५५	५५	५७
५१.	स निर्विश्य	५१	५७	५८	५६	५६	५८
५२.	असह्यवि	५२	५८	५९	५७	५७	५९
५३.	तस्यानीकै	५३	५९	६०	५८	५८	६०
५४.	भयो००केरल	५४	६०	५१	५९	५९	५१
	भयो००चोलक	५४पाटि.	—	—	—	—	—
५५.	मुरलामा	५५	६०	—	—	६०	—
	मरूला	५५पाटि.	६०—६१	६१	६०	—	६१
५६.	अभ्यभूयत	५६	६१—६२	६२	६१	६१	६२
५७.	खर्जूरीस्क	५७	६२—६३	६३	६२	६२	६३
५८.	अवकाशं	५८	६३—६४	६४	६३	६३	६४
५९.	मत्तेभरद	५९	६४—६५	६५	६४	६४	६५
६०.	पारसीकांस्त	६०	६७—६६	६६	६५	६५	६६
६१.	यवनीमुख	६१	६८—६७	६७	६६	६६	६७
६२.	सङ्ग्रामस्त	६२	६९—६८	६८	६७	६७	६८
६३.	भल्लापव	६३	७०—७९	६९	६८	६८	६९
६४.	अपनीतशि	६४	७०	७०	६९	६९	७०
६५.	विनयन्ते स्म	६५	७१	७१	७०	७०	७१
६६.	ततः प्रतस्थे	६६	७२	७२	७१	७१	७२
	जितानज	६६पाटि.	७३	७३	७२	७२	७३
६७.	विनीता००वंक्षु	६७	—	—	—	—	—
	विनीता००वंकू	६७पाटि.	७४	७४	७३	७३	७४
	विनीता००सिन्धु	६७पाटि.	—	—	—	—	—
६८.	तत्र हू००पाटना	६८	७५	७५	७४	७४	७५

		काग्र.	२४१	४१५	७७२	११५	११६
	तत्र हू००पाटला	६८पाटि.	—	—	—	—	—
६९.	काम्बोजाः	६९	७६	७६	७५	७५	७६
७०.	तेषां सद	७०	७७	७७	७६	७६	७७
७१.	ततो गौरी	७१	७८	७८	७७	७७	७८
७२.	शशंस तु	७२	७९	७९	७८	७८	७९
७३.	भूर्जेषु म	७३	८०	८०	७९	७९	८०
७४.	विशश्रमुर्न	७४	८१	८१	८०	८०	८१
७५.	सरलासक्त	७५	८२	८२	८१	८१	८२
				पूर्वार्धमात्रम्			
७६.	तस्योत्सृष्ट	७६	८३	८३	८२	८२	८३
७७.	तत्र जन्यं	७७	—	—	८३	८३	—
	तत्र युद्धं	७७पाटि.	८४	८४	—	—	८४
७८.	शरैरुत्सव	७८	८५	८५	८४	८४	८५
७९.	परस्परेण	७९	—	—	—	—	—
	परस्परस्य	७९पाटि.	८६	८६	८५	८५	८६
८०.	तत्राक्षोभ्यं	८०	८७	८७	८६	८६	८७
८१.	चकम्पे ती	८१	८८	८८	८७पत्रपा.	८७	८८
८२.	न प्रसेहे	८२	८९	८९	८७	८८	८९
८३.	तमीशः का	८३	८९सं९०	९०	८८	८९	९०
८४.	कामरूपे	८४	९१	९१	८९	९०	९१
८५.	इति जित्वा	८५	९२	९२	९०	९१	९२
८६.	स विश्वजि	८६	९३	९३	९१	९१—९२	९३
८७.	सत्रान्ते स	८७	९४	९४	९२	९२—९१	९४
८८.	ते रेखाध्व	८८	९५	९५	९३	९३—९४	९६—९५
	यज्ञान्ते स	८८पाटि.	९६	—	—	९५	९६

****

रघुवंशनवमसर्गपद्यक्रमः

		काग्र.	२४१	४१५	७७२	९१५	९१६
१–२	पितु–रौजसः	१–२	१–२	१–२	१–२	१–२	१–२
३.	उभयमेव	३	३	३	३	४	३
४.	जनपदे	४	४	४	४	३	४
५–९.	दशदिगन्त–गर्ज्जताम्	५–९	५–९	५–९	५–९	५–९	५–९
१०.	अजयदेक	१०	११	१०	११	१०	११
११.	अवनिमेक	११	१०	११	१०	११	१०
	जघननिर्विषयी	११पाटि.	१२	१४	१३	१३	१५
१२.	शमितपक्ष	१२	१३	१२	१२	१४	१२
	स्फुरित–कोटि	१२पाटि.	–	१३पा.	–	१२	–
१३.	चरणयोर्न	१३	१४	१५	१४	१५	१३
१४.	निववृते स	१४	१५	१६	१५	१६	१४
१५.	उपगतोऽपि	१५	१६	१७	१६	१७	१६
१६.	तमपहाय	१६	२०	२०	२०	२१	२०
१७.	तमलभन्त	१७	२३	२३	२३	२४	२४
१८.	प्रियतमाभिरसा	१८	२४	२४	२४	२५	२३
१९.	स किल संयुग	१९	२१	२२	२१	२२	२१
२०.	क्रतुषु तेन	२०	१७	१८	१७	१८	१७
२१.	अजिनदण्डभृतं	२१	१८	१९	१९	१९	१८
२२.	अवभृथप्रयतो	२२	१९	२१	१८	२०	१९
२३.	असकृदेव	२३	२२	२५	२२	२३	२२
२४.	अथ समाववृते	२४	२५	२६	२५	२६	२५
	अथ महेन्द्रसमं	२४ पाटि	–	–	–	–	–
२५.	जिगमिषुर्धन	२५	२६	२७	२६	२७	२६
			२५तः परम्				
	हिमविवर्णित	२५पाटि.	२७	२८	३०	२८	२७
			२६तः परम्	२९त्यक्तम्			

		काग्र.	२४१	४१५	७७२	९१५	९१६
२६.	कुसुमजन्म	२६	२८	३०	२७	२९	२८
			२७तः परम्				
२७.	नयनगुणो	२७	३१	३४	३२	३३	३२
२८.	कुसुममेव	२८	३२	३५	३३	३४	३३
२९.	विरचिता	२९	३४	३७	३४	३५	३४
	दशनचन्द्रि	२९पाटि.	३५	३८	३५	४९	३५
	अनलसान्य	२९पाटि.	—	५७	—	४४	५५
३०.	सुवदना	३०	४०	४०	३६	३७	३७
३१.	सुरभिसंग	३१	३६	४१	३७	—	३६
	उपहितं	३१पाटि.	४१	४२	३८	३६	—
	उपगतं	३१पाटि.	—	—	—	—	३९
३२.	व्रणगुरु	३२	२९	३१	२८	३०	२९
	परभृता	३२पाटि.	३०	३२	३१	३१	३०
३३.	अभिनयान्	३३	३०	३३	२९	३२	३१
३४.	प्रथममन्य	३४	४२	४३	३९	३९	४०
	तिलकमस्त	३४पाटि.	३८	३६	४१	४०	५२
३५.	श्रुतिसुख	३५	४३	४४	४०	४६	४१
	लघयति	३५पाटि.	३३	३९	४९	४५	५७
३६	ललितविभ्रम	३६	४४	४५	४२	५१	४२
३७.	शुशुभिरे	३७	४५	४६	४४	५२	४३
	रसयति स्म	३७पाटि.	—	—	—	—	—
	विहरति स्म	३७पाटि.	—	—	—	—	—
	विशदचंन्द्रि	३७पाटि.	३७	—	—	५४	५६
३८.	उपययौ तनु	३८	४६	४७	४५	५६	५४
	गमयितुं प्र	३८पाटि.	३९—५६	५६	४३	४१	५१
	शमयितुं प्र	३८पाटि.	—	—	—	—	—
३९.	अपतुषार	३९	४७	४८	४६	४७	४५
४०.	हुतहुताश	४०	४८	४९	?	४८	४६
४१.	अलिभिर	४१	४९	५०	४७	५०	४७

		काग्र.	२४१	४१५	७७२	९१५	९१६
४२.	अमदयत्	४२	५०	५१	४८	५७	४८
४३.	अरुणरागनिषेधि	४३	५१	५२	४८	५३	४९
	षेवि					५४त्यक्त	
४४.	उपचिता	४४	५२	५३	५१	५५	५०
४५.	ध्वजपटं	४५	५३	५४	५२	३८	३८
४६.	अनुभवन्न	४६	५४	५५	५३	४२	५३
४७.	त्यजसमा	४७	५५	५८	५४	४३	५४
४८.	अथ यथा	४८	५६	५९	५५	५८	५८
४९.	परिचयाञ्च	४९	५७	६०	५६	५९	५९
५०.	मृगवनो	५०	५८	६१	५७	६०	६०
५१.	ग्रथितमौ	५१	५९	६२	५८	६१	६१
५२.	तनुलता	५२	६०	६३	—	—	—
	तरुलता	५२पाटि.	६०सं	—	५९	६२	६२
५३.	श्वगणिवा	५३	६१	६४	६०	६४	६३
५४.	अथ नभ	५४	६२	६५	६१	६३	६४
५५.	तस्य स्तन	५५	६३	६६	६२	६५	६५
५६.	तत् प्रार्थि	५६	६४	६७	६३	६६	६६
५७.	लक्ष्यीकृत	५७	६५	६८	६४	६७	६७
५८.	तस्यापरेस्व	५८	६६	६९	६५	६८	६८
५९.	उत्तस्थुषः	५९	६७	७०	६६	६९	६९
६०.	तं वाहना	६०	६८	७१	६७	७०	७०
६१.	तेनाभिघा	६१	६९	७२	६८	७१	७१
६२.	प्रायोविषा	६२	७०	७३	६९	७२	७२
६३.	व्याघ्रानभी	६३	७१	७४	७०	७३	७३
६४.	निर्घातोग्रै	६४	७२	७५	७१	७४	७४
६५.	तान् हत्वा ग	६५	७३	७६	७२	७५	७५
६६.	चमरान् प	६६	७४	७८—७७	७३	७६	७६
	द्रुतमन्वय	६६पाटि.	—	—	—	—	—
६७.	अपि तुरग	६७	७५	७९—७८	७४	७७	७७

		काग्र.	२४१	४१५	७७२	९१५	९१६
६८.	तस्य कर्कश	६८	७६	८०–७९	७५	७८	७८
६९.	इति विस्मृता	६९	७७	८१–८०	७६	७९	७९
७०.	स ललित	७०	—	८२–८१	७७	—	८०
	सु ललित	—	७८	—	—	८०	—
७१.	उषसि स	७१	७९	८३–८२	७८	८१	८१
७२.	अथ जातु	७२	८१सं८०	८४–८३	७९	८२	८२
७३.	कुम्भपूरण	७३	८२सं८१	८५–८४	८०	८३	८३
७४.	नृपतेः प्रति	७४	८३सं८२	८६–८५	८१	८४	८४
७५.	हा तातेति	७५	८४सं८३	८७–८६	८२	८५	८५
७६.	तेनावतीर्य	७६	८५सं.८४	८८–८७	८३	८६	८६
७७.	तच्चोदितः	७७	८६सं.८५	—	८४	—	—
	तन्नोदितः	—	—	८९–८८	—	८७	८७
७८.	तौ दम्पती	७८	८७सं.८६	९०–८९	८५	८८	८८
७९.	दिष्टान्तमा	७९	८८सं.८७	—	—	—	—
	दिष्ट्यान्त	—	—	९१–९०	८६	८९	८९
८०.	शापोऽप्यदृ	८०	८९सं.८८	९२–९१	८७	९०	९०
८१.	इत्थंगते	८१	९०सं.८९	९३–९२	८८	९१	९१
८२.	प्राप्तानुग	८२	९१सं.९०	९४–९३	८९	९२	९२
	सर्ग समाप्ता						
	तदर्थमर्थ	८२पाटि.	—	९५–९४	—	—	—
	समेयिवान्	८२पाटि.	—	९६–९५	—	—	—

०००००

रघुवंशाष्टादशसर्गपद्यक्रम:

		काग्र.	२४१	४१५	७७२	९१५	९१६
श्लोका:							
१–१५	क्रमभेदरहिता:						
१६.	तस्मिन् नल	१६	१६	१६	१७	१७	—
	तस्मिन् दल	१६पाटि.	१७	१७	१६	१७	—
१७.	तस्या० शील	१७	—	—	१८	१८	—
	तस्या० शिल	१७पाटि.	१८	१८	—	—	—
१८.	तमात्मसं	१८	१९	१९	१९	१९	—
१९.	तं रागब	१९	२०	२०	२१	२०	—
	हित्वाथ भो	१९पाटि.	२१	२१	२०	२१	—
२०.	उन्नाभ इ	२०	२२	२२	२२	२२	—
२१.	ततः पर	२१	२३	२३	२३	२३	—
२२.	तस्मिन् गते	२२	२४	२४	२४	२४	—
२३.	तस्याव ध्यु	२३	२५	—	—	२५	—
	तस्याव व्यु	—	—	२५	२५	—	—
२४.	आराध्य वि	२४+२	२६	२६	२६	२६	—

अन्यत्र पाठभेदाऽभाव: ५५ पद्यात्मके सर्गे।

***

परिशिष्टम्—४

कालिदासकाव्यपद्यानुक्रमः

संक्षेपाः— ऋ.=ऋतुसंहारम्, कु.=कुमारसम्भवम् (१—८), मे.=मेघदूतम्, र.=रघुवंशम्,
पा.=पाठान्तरम्, उ.पा.=उत्तरार्द्धपाठान्तरम् ।

अंशे हरि	र. १८.२५	अजयदे	र. ९.१०	अथ तैः प	कु. ४.२५
अंसलम्बि	र. १९.३७	अजस्य गृ	र. १०.२४	अथ दुहि	र. १९.५७पा.
अकरोत् स	र. ८.२६	अजिताधि	र. ८.१७	अथ धूमा	र. १५.४९
अकरोद	र. ८.२०	अजिनद	र. ९.२१	अथ नभ	र. ९.५४
अकार्यचि	र. ६.३९	अणिमादि	कु. ६.७५	अथ नय	र. २.७५
अकाले बो	र. १२.८१	अतः परं	कु. ७.९३पा.	अथ पथि	र. ११.९२
अकिञ्चनः	कु. ५.७७	अत आह	कु. ६.२८	अथ प्रजा	र. २.१
अक्षबीज	र. ११.६५	अतन्द्रिता	कु. ५.१४	अथ प्रदो	र. १.९३
अक्षय्यन्ता	मे. ६९पा.	अतिथिं ना	र. १७.१	अथ प्रभा	र. ५.५२
अखण्डितं	कु. ७.२८	अतिप्रब	र. ३.५८	अथ प्रभुः	र. १४.८३पा.
अगस्त्यचि	र. १६.४४	अतिष्ठत् प्र	र. १०.३	अथ प्राचे	र. १५.६३
अगुरुसु	ऋ. ५.१२	अत्रोऽत्र	कु. ५.४०	अथ मद	कु. ४.४६,
अगूढस	कु. ५.६२	अतोऽयम	र. ३.५०		र. १२.१०२
अग्निवर्ण	र. १९.१	अत्रानुगोदं	र. १३.३५	अथ मधु	र. १८.५२
अग्रजेन	र. १५.८	अत्राभिषे	र. १३.५१	अथ महे	र. ९.२५
अङ्कमङ्क	र. १९.१३	अत्रावियु	र. १३.३१	अथ००माये	र. १२.७४पा.
अङ्काद् यया	कु. ७.५	अथ कश्चि	र. १५.४२	अथ मोह	कु. ४.१
अङ्गदं च	र. १५.९०	अथ काश्चि	र. ८.२४	अथ मौलि	कु. ६.२५
अङ्गसत्त्व	र. १९.३६	अथ कोपा	र. १५.८४	अथ यथा	र. ९.४८
अङ्गानि नि	ऋ. ६.११	अथ जातु	र. ९.७२	अथ यन्ता	र. १.५४
अङ्गुलीकि	र. १९.१७	अथ तं स	र. ८.७५	अथ राम	र. १२.७४
अङ्गुलीभि	कु. ८.६३	अथ तस्य क	र. ८.७१	अथ रोध	र. ८.३३
अङ्गेनाङ्गं	मे. १००	अथ तस्य वि	र. ८.१	अथवा कृ	र. १.९
अङ्गेष्वन	ऋ. ६.१२पा.	अथ तस्य विशा	र. १०.५०	अथवा म	र. ८.४७
अचिराद् य	र. १०.४५	अथ तेन	र. ८.७३	अथवा मृ	र. ८.४५
अच्छिन्नाम	कु. ६.६९	अथ ते मु	कु. ६.१५,४७	अथ वाल्मी	र. १५.८०

अथवा सु कु. ६.२४
अथ विधि र. ५.७६
अथ विबु कु. ७.९४
अथ विश्वा कु. ६.१
अथ वीक्ष्य गु र. ८.१०
अथ वीक्ष्य र र. ८.१०पा.
अथ वेला र. १०.३५
अथ व्यव र. १४.५३
अथ संसव र. ८.७५पा.
अथ समा र. ९.२४
अथ सर्व कु. २.३
अथ स ल कु. २.६४
अथ स वि र. ३.७०
अथ सा पु कु. ४.४
अथ साव र. १५.७०
अथ स्तुते र. ६.८
अथाऽग्रह कु. ५.६३
अथाग्र्यम र. १०.६६
अथाङ्गदा र. ६.५३
अथाङ्गरा र. ६.३०
अथाङ्गिर कु. ६.६५
अथाङ्गुलि कु. ७.२३
अथाजिना कु. ५.३०
अथात्मन: र. १३.१
अथाथर्व र. १.५९
अथादिक र. १४.२६
अथाभिग र. ६.५९पा.
अथादिशि र. ५.२८
अथाऽनपो र. १६.६
अथानाथा: र. १२.१२
अथानुकू र. १४.४७
अथानुरू कु. ५.७
अथान्धका र. २.४६
अथाभिषे र. १४.७
अथाभ्यर्च्य र. १.३५
अथार्धरा र. १६.४
अथाऽवमा कु. १.२१
अथाऽस्य गो र. ३.३३
अथाऽस्य र र. १६.४३
अथाह व कु. ५.६५
अथेतरे र. १६.१
अथेन्द्रिय कु. ३.६९
अथेप्सितं र. ३.१
अथेश्वरे र. ५.३९
अथैकधे र. २.४९
अथोपनि कु. ३.६५
अथोपनी र. ३.२९
अथोपय र. ७.१
अथोपरि र. ५.४३
अथोपश र. १६.३७
अथोरगा र. ६.५९
अथोरुदे कु. ३.११
अथोर्मिलो र. १६.५४
अथो शिव कु. ८.९१पा.
अथोष्ट्रवा र. ५.३२
अथौषधी कु. ७.१
अद: शर र. १३.४५
अदूरव र. १.८७
अद्धा श्रियं र. १३.६५पा.
अद्यप्रभृ कु.५.८६,६.५६
अद्य श्रियं र. १३.६५
अद्रे: शृङ्गं मे. १४
अध: प्रव कु. ६.७
अधिकं शु र. ८.६
अधिगतं र. ९.२
अधिज्यं र. ४.१५पा.
अध्यापित कु. ३.६पा.
अध्यास्य चा र. ६.५१
अध्वक्लान्तं मे. १७पा.
अप्यन्यस्मिन् मे. ३४
अम्भोबिन्दु मे. २०पा.
अनन्तर कु. १.३
अनन्यभा कु. ३.६३
अनम्राणां र. ४.३५
अनयत् प्र र. ८.१९
अनर्घ्यम कु. १.५८
अनलसा र. ९.२९पा.
अनवाप्त र. १०.३१
अनश्नुवा र. १८.४८
अनसूया र. १२.२७
अनाकृष्ट र. १.२३
अनिग्रह र. १३.५०
अनित्या: श र. १७.४५
अनीकिनी र. १८.१०
अनुग्रह र. १४.७९
अनुभव र. ९.४६
अनुभूय र. ८.३
अनेन क र. १०.५३
अनेन चे र. ६.२४
अनेन ध कु. ५.३८

अनेन प	र. ६.२८
अनेन पा	र. ६.६३
अनेन यूना	र. ६.३५
अनेन सं	कु. ७.६८
अनेन सा	र. ६.५७
अन्यदा ज	र. ११.७२
अन्या प्रका	ऋ. ४.१४
अन्या प्रिये	ऋ. ४.१६
अन्याश्चिरं	ऋ. ४.१७
अन्येद्युर	र. १५.७५
अन्येद्युरा	र. २.२६
अन्योन्यद	र. १२.८७
अन्योन्यमु	कु. १.४०
अन्योन्यसू	र. ७.५२
अन्वियेष	र. ११.४९
अपगत	ऋ. ५.११
अपतुषा	र. ९.३९
अपथेन	र. १७.५३
अपनीत	र. ४.६४
अपमेघो	कु. ६.५४
अपशूलं	र. १५.१७
अपशोक	र. ८.८६
अपि क्रिया	कु. ५.३३
अपि तुर	र. ९.६७
अपि त्वदा	कु. ५.३४
अपि प्रभुः	र. १४.८३
अपि प्रस	कु. ५.३५ र. ५.१०
अप्यग्रणी	र. ५.४
अप्यर्धमा	र. ७.४५
अप्यवस्तु	कु. ८.६
अब्रवीच्च	र. ११.३९
अभङ्गम	र. ३.६३
अभिनयान्	र. ९.३३
अभिभूय	र. ८.३६
अभिलाष	कु. ४.४१
अभीक्ष्णमु	ऋ. २.१०
अभ्यभूय	र. ४.५६
अभ्यासनि	र. १०.२३
अभ्युद्धृता	र. १.५३
अभ्युन्नता	कु. १.३३
अमंस्त चा	र. ३.२७
अमदयन्	र. ९.४२
अमी च क	कु. २.२४
अमी जन	र. १३.२२
अमी शिरी	र. १६.६१
अमी हि वी	कु. ३.१५
अमुं सहा	र. १३.४२
अमुना ख	कु. ४.२९
अमुनैव	कु. ४.३४
अमुं पुरः	र. २.३६
अमूर्वि	र. १३.३३
अमेयो मि	र. १०.१८
अमोघं सं	र. १२.९७
अमोच्यम	र. ३.६५
अयं सुजा	र. १३.४९
अयःशङ्कु	र. १२.९५
अयाचिता	कु. १.५२
अयाचितो	कु. ५.२२
अयि जीवि	कु. ४.३
अयि सम्प्र	कु. ४.२८
अयुक्तरू	कु. ५.६९
अयोध्यादे	र. १७.३६
अरण्यबी	कु. ५.१५
अरिष्टश	र. ३.१५
अरुणरा	र. ९.४३
अर्घ्यमर्घ्य	र. ११.६८
अर्चिता त	र. १०.५५
अर्धाचिता	कु. ७.६१ र. ७.१०
अर्पितस्ति	र. १९.४२
अलं ह्रिया	र. ५.५८
अलकाम	कु. ६.३७
अलभ्यशो	कु. ५.४३
अलं मही	र. २.३४
अलंविवा	कु. ५.८२
अलिपङ्क्ति	कु. ४.१५
अलिभिर	र. ९.४१
अवकाशं	र. ४.५८
अवगच्छ	र. ८.८८
अवगम्य	कु. ४.१३
अवचित	कु. १.६०
अवजाना	र. १.७७
अवधान	कु. ४.२
अवनिमे	र. ९.११
अवन्तिना	र. ६.३२
अवभृथ	र. ९.२२
अवस्तुनि	कु. ५.६६
अवाकिरन्	र. ४.२७
अवृष्टिसं	कु. ३.४८

अवेक्ष्य रा र. १५.३
अवैमि का र. १६.८२
अवैमि चै र. १४.४०
अवैमि ते कु. ३.१३
अवैमि पू कु. ६.५७
अवैमि सौ कु. ५.४९
अशून्यती र. १४.७६
अशोकनि कु. ३.५३
असकृदे र. ९.२३
असङ्गम र. ३.६३पा.
असज्जने र. १२.४६
असमांप्त र. ८.७६
असम्पद कु. ५.८०
असम्भृतं कु. १.३१
असम्मत: कु. ३.५
असह्यापी र. १.७१
असह्यवा ऋ. १.१०
असह्यवि र. ४.५२
असह्यहु कु. ५.५४
असितन ऋ. ३.२४
असूत स कु. ३.२६
असूत सा कु. १.२०
असौ कुमा र. ६.७८
असौ पुर र. १३.६६
असौमहा र. ६.३४
असौ महे र. ६.५४
असौ महे र. १३.२०
असौ शर र. ६.२१
अस्तोतुः स्तू कु. ६.८३
अस्त्युत्तर कु. १.१
अस्त्रं हरा र. ६.६२
अस्मिन्नव र. १०.५पा.
अस्मिन् सुरा कु. ३.१९
अस्य प्रया र. ६.३३
अस्याङ्कल र. ६.४३
अहमेत्य कु. ४.२०
अहमेव र. ८.८
अहीनगु र. १८.१४
अहो स्थिर: कु. ५.४७
आकम्पयन् ऋ. ३.१०,
६.२२
आकारस र. १.१५
आकीर्णमृ र. १.५०
आकीर्यमा र. १.५०पा.
आकुञ्चिता र. ६.१५
आजानेय र. ४.४७पा.
आज्ञापय कु. ३.३
आततज्य र. ११.४५
आतपात्य र. १.५२पा.
आतपापा र. १.५२
आतिथेय र. १.५८पा.
आत्तशस्त्र र. १५.४६
आत्मानमा कु. २.१०,७.२२
आदिदेशा र. १५.६
आदिष्टव र. १५.१०
आदीप्तव ऋ. ६.१९
आद्ये बद्धा मे. ९०
आधारब र. ५.६
आधिक्षामां मे. ८७
आधूय शा र. १६.३६
आधूय शा र. १६.३६पा.
आधोरणा र. ७.४६
आनन्दज: र. १४.३
आनन्दोत्थं मे. ६५
आपादप र. ४.३७
आपिञ्जरा र. १६.५१
आपीनभा र. २.१८
आपृच्छस्व मे. १२
आप्लुतास्ती कु. ६.५
आमुक्ताभ र. १७.२५
आ मूलतो ऋ. ६.१६
आमेखलं कु. १.५
आयोधने र. ६.४२
आराध्य वि र. १८.२४
आराध्यैनं मे. ४५
आरूढम र. ६.७७
आर्द्रकेस कु. ८.७६
आर्याप्यरु कु. ६.३२
आलम्बिहे ऋ. ६.२४
आलोकमा कु. ७.५७
र. ७.६
आलोके ते मे. ८३
आलोचना कु. ७.८४
आवर्जित कु. २.२६
आवर्जिता कु. ३.५४
आवर्ज्य शा र. १६.१९
आवर्त्तशो र. १६.६३
आविशद्भि कु. ८.३८
आवृण्वतो र. ७.४२
आशंसता कु. ३.१४

आशास्यम	र. ५.३४
आश्वास्य रा	र. १४.५८
आश्वास्यैवं	मे. १११
आसक्तबा	कु. ६.८
आससाद	र. ११.२३,५१
आसां जला	र. १६.६२
आसारसि	र. १३.२९
आसीद् वरः	र. ७.२२
आसीनानां	मे. ५२
आस्फालितं	र. १६.१३
आस्वादव	र. २.५
इक्षुच्छाय	र. ४.२०
इक्ष्वाकुवंश	र. ५.५५, ६.७१, १३.७०, १४.५५
इच्छाविभू	कु. ७.२९
इतः परा	र. ७.६७
इतः स दै	कु. २.५५
इतराण्य	र. १२.८२
इतरेऽपि	र. १५.३५
इतस्ततो	र. १२.५९
इतिक्रमात्	र. १७.६८
इति क्षिती	र. ३.६९
इति चापि	कु. ४.३७
इति चाह	कु. ४.४३
इति चैन	कु. ४.२७
इति जित्वा	र. ४.८५
इति तेभ्यः	कु. २.१६
इति देह	कु. ४.३९
इति द्विजा	कु. ५.७४
इति ध्रुवे	कु. ५.५
इति प्रग	र. २.४१,३.४७
इति प्रति	र. १५.७४
इति प्रवि	कु. ५.५१
इति प्रसा	र. १०.३३
इति वादि	र. १.८२
इति विज्ञा	र. १.७३
इति विर	र. ५.७५
इति विस्मृ	र. ९.६९
इति व्याहृ	कु. २.६२
इति शत्रु	र. ८.२३
इति शिर	र. ७.७०
इति सन्त	र. १५.१९
इति स वि	र. ५.७५पा.
इति स्वसुः	र. ७.२९
इतो गमि	कु. ५.८४
इत्थं रतेः	कु. ४.४५
इत्थं क्षिती	र. २.६७
इत्थं गते	र. ९.८१
इत्थं जनि	र. १७.४४
इत्थं द्विजे	र. ५.२३
इत्थं नाग	र. १६.८८
इत्थमारा	कु. २.४०
इत्थं प्रयु	र. ५.३५
इत्थं विधि	कु. ७.८६
इत्थं व्रतं	र. २.२५
इत्यद्भुतै	कु. ७.३६
इत्यध्वनः	र. १६.३५
इत्यपास्त	र. ११.३०
इत्यभौम	कु ८.२८
इत्यर्घ्यपा	र. ५.१२
इत्याख्याते	मे. ९८
इत्याप्तव	र. १५.४८
इत्याप्रसा	र. १.९१
इत्यारोपि	र. १५.९१
इत्युक्तव	र. १४.४३
इत्युक्त्वा मै	र. १२.३८
इत्युद्गताः	र. ७.१६
इत्यूचिवा	कु. ६.६४ र. १६.८६
इत्योषधि	कु. ७.६९
इदमत्रो	कु. ६.८७
इदमुच्छ्व	र. ८.५५
इन्दीवर	र. ६.६५
इन्दोरग	र. १७.७५
इन्द्राद् वृष्टि	र. १७.८१
इन्द्रियार्थ	र. १९.६
इमां स्वसा	र. १६.८५
इमां तटा	र. १३.३२
इमां देवी	र. १.७६
इयं च ते	कु. ५.७०
इयमप्र	र. ८.५८
इयं महे	कु. ५.५३
इयेष सा	कु. ५.२
ईप्सितं त	र. १.७९
ईप्सितार्थ	कु. ६.९०
ईश्वरोऽपि	कु. ८.५०
ईषत्तुषा	ऋ. ६.२पा.
उच्चैरुच्चै	कु. २.४७

उच्छ्वासय ऋ. ६.८
उत्खातलो र. १४.७३
उत्तरन्ति कु. ८.३५
उत्तस्थुष: र. ९.५९
उत्तिष्ठ व र. २.६१,१४.६
उत्थापित: र. ७.३९
उत्पश्यामि मे. २२,५९
उत्पाट्य मे कु. २.४३
उत्सङ्गे वा मे. ८४
उत्सुकश्च र. ११.४९पा.
उदक् प्रत र. १५.९८
उदधेरि र. १०.३०
उदयम र. ९.९
उदये य र. ८.८४
उदायुधा र. १२.४४
उद्गीथ: प्र कु. २.१२पा.
उद्घात: प्र कु. २.१२
उद्बन्धके र. १६.६७
उद्यच्छमा र. १६.२९
उद्यतैक र. ११.१७
उद्वेजय कु. १.११
उन्नताव कु. ८.६९
उन्नतेन कु. ६.३०
उन्नतेषु कु. ८.६६
उन्नाभ इ र. १८.२०
उन्मीलितं कु. १.३२
उन्मुख: स र. ११.२६
उपकूल र. १५.२८
उपगतो र. ९.१५
उपचिता र. ९.४४
उपपन्न कु. ६.६६
उपपन्नं र. १.६०
उपपन्नसु र. ४.८४पा.
उपमान कु. ४.५
उपययौ र. ९.३८
उपशल्य र. १५.६०
उपस्थित र. १५.१००
उपस्थितां र. १४.६३
उपहितं र. ९.३१पा.
उपात्तव कु. ५.५६
उपात्तवि र. ५.३८
उपाददे कु ७.४१
उपान्तयो र. ७.५०
उपान्तवा र. १३.३०
उपेत्य मु र. १५.९२
उपेत्य सा र. ३.६
उभयमे र. ९.३
उभयो: प र. ८.३९
उभयोर्न र. १५.६८
उभावुभा र. १४.२
उभे एव कु. २.६०
उमापि नी कु. ३.६२
उमारूपे कु. २.५९
उमा वधू कु. ६.८२
उमावृषा र. ३.२३
उमास्तनो कु. ७.२४
उरस्यप र. १८.४७
उवाच चै कु. ५.७५
उवाच धा र. ३.२५
उषसि स र. ९.७१
ऊरुमूल कु. ८.८७
ऋजुतां न कु. ४.२३
ऋत्विज: स र. १७.८०
ऋद्धापणं र. १४.३०
ऋषिदेव र. ८.३०
ऋषिन् वि र. १५.८६
ऋष्यशृङ्गा र. १०.४
एक:कार र. १०.१५पा.
एकातप र. २.४७
एकैव सत्या कु. ७.४
एकैव मूर्त्ति: कु. ७.४४
एको दाश र. १२.४५
एतत् कृत्वा मे. १११पा.
एतदाक र १५.६९पा.
एतदुच्छ्व कु. ८.७०
एतद्गिरे र. १३.२६
एतन्मुने र. १३.३८
एतस्मान्मां मे ११०
एता: करो र. १६.६६
एता गुरु र. १६.६०
एतावता कु. १.३७
एतावदुक्त्वा कु. ६.८९, र. २.५१,५.१८,१३.६८
एते वयं र. १३.१७
एते वय कु. ६.६३
एभि: साधो ! मे. ७८
एवं यदा कु. २.३१
एवं तयो र. ५.६०,६..२५
एवमात्त र. ११.५६
एवमाप्त र. ११.४२

एवमालि कु. ८.५
एवमिन्द्रि कु. ८.२०
र. १९.४७
एवमुक्त र. ११.७८
एवमुक्ते र. १५.८२
एवमुद्यन् र. १७.७७
एवं वाच्यः कु. ६.३१
एवं वादि कु. ६.८४
एष चारु कु. ८.७३
एष वृक्ष कु. ८.३६
एषा त्वया र. १३.३४
एषा प्रस र. १३.४८
एषोऽक्षमा र. १३.४३
एहि विश्वा कु. ६.८८
ऐन्द्रमस्त्र र. १५.२२
ऐन्द्रिः किल र. १२.२२
ऐरावता र. ६.७३
कच्चित् सौम्य मे. १११पा.
कथं नु श र. २.५४
कदम्बस ऋ. २.१७
कदाचिदा कु. ५.६
कनकक ऋ. ५.१३
कण्ठसक्त र. १९.२९
कण्ठस्य त कु. १.४२
कण्डूयमा र. २.३७
कपालने कु. ३.४९
कपोलक कु. १.९
कमलव ऋ. १.२८
कम्पेन मू कु. ७.४६
कयासि का कु. ३.८

कराभिघा र. १६.८३
करेण वा र. १३.२१
कर्णद्वय कु. १.४५पा.
कर्णार्पितो कु. ७.१७
कर्णेषु यो ऋ. ६.५,६.५पा.
कर्त्तव्यं वो कु. ६.६१
कर्त्तुं यच्च मे. ११
कलत्रनि र. १४.३३
कलत्रव र. १.३२
कलत्रवा र. १२.३४
कलमन्य र. ८.५९
कल्पवृक्ष कु. ८.६८
कल्पितान्यो कु. ६.७६
कल्याणबु र. १४.६२
कश्चित् करा र. ६.१३
कश्चित् का मे. १
कश्चिद् द्विष र. ७.५१
कश्चिद् यथा र. ६.१९
कह्लारप ऋ. ३.१५
काचिद् विभू ऋ. ४.१३
काञ्चीगुणैः ऋ. ४.४
काठिन्यं स्था कु. ६.७३
कातरोऽसि र. ११.७७
कातर्य के र. १७.४७
का त्वं शुभे र. १६.८
कान्तामुख ऋ. ६.१८
काप्यभिख्या र. १.४६
कामं कर्णा र. ४.१३
कामं जीव र. १२.७५
कामं नृपाः र. ६.२२

कामं प्रकृ र. १७.५५
कामं न सो र. १८.४०
कामरूपे र. ४.८४
कामस्तु बा कु. ३.६४
कामिनीस र. १९.५
कामेकप कु. ३.७
काम्बोजाः स र. ४.६९
कायेन वा र. ५.५
कारण्डवा ऋ. ३.८
कारण्डवो र. ५.४५पा.
कार्त्तिकीषु र. १९.३९
कार्येषु चै र. १०.४०,
१०.४०पा.
कार्ष्णेन प र. १५.२४
कालक्रमे कु. १.१९
कालागुरु ऋ. २.२१
कालान्तर र. १६.१८
काशांशुका ऋ. ३.१
काशैर्मही ऋ. ३.२
काषायप र. १५.७७
किं येन सृ कु. ६.२३
किङ्किंशुकै ऋ. ६.२०
किञ्चायम कु. २.२१
किञ्चित्प्रका कु. ३.४७
किन्तु वध्वां र. १.६५
किमत्र चि र. ५.३३
किमप्यहिं र. २.५७
किमात्मनि र. १४.३४
किमिति द्यु कु. २.१९
किमित्यपा कु. ५.४४

किंवा तवा र. १४.६५
कियच्चिरं कु. ५.५०
कुन्दैः सवि ऋ. ६.२३
कुमारभृ र. ३.१२
कुमाराः कृ र. १०.७८
कुम्भकर्णः र. १२.८०
कुम्भयोनि र. १५.५५
कुरुष्व ता र. १३.१८
कुलावतीं र. १६.२५पा.
कुलेन का र. ६.७९
कुले प्रसू कु. ५.४१
कुवलय ऋ. २.२२
कुबेरगु कु. ३.२५
कुबेरस्य कु. २.२२
कुम्भपूर र. ९.७३
कुशावतीं र. १६.२५
कुशेशया र. ६.१८
कुसुमं कृ र. ८.६२
कुसुमज र. ९.२६
कुसुममे र. ९.२८
कुसुमान्य र. ८.४४
कुसुमायु कु. ४.४०
कुसुमास्त कु. ४.३५
कुसुमैर्ग्र र. ८.३४
कुसुमोत्ख र. ८.५४
कुसुम्भ ऋ. ६.४
कूटयुद्ध र. १७.६९
कृच्छ्रलब्ध र. ११.२
कृतदण्डः र. १५.५३
कृतः प्रय र. १६.७६
कृतप्रति र. १२.९४
कृतवत्य र. ८.४८
कृतवान कु. ४.७
कृतसीता र. १५.१
कृताञ्जलि र. १४.१६
कृताऽपरा ऋ. ५.६
कृताभिषे कु. ५.१६
र. १०.६३
कृशानुर र. १०.७४
क्लृप्तपुष्प र. १९.२३
क्लृप्तोपचा कु. ७.८८
केनाऽभ्यसू कु. ३.४
केयं वने र. १४.७०पा.
केवलं स्म र. १०.२९
केवलम्प्रिय कु. ८.८४
केशान्निता ऋ. ३.१९
कैकेय्यास्त र. १०.७०
कैतवेन कु. ८.३
कैतवेषु कु. ८.३पा.
कैलासगौरं र. २.३५
कैलासशद्धुं र. २.३५पा.
कोशादाश्र र. १७.६०
कौशिकेन र. ११.१
कौसल्य इ र. १८.२७
क्रतुषु ते र. ९.२०
क्रथकैशि र. ८.८२
क्रमेण नि र. ३.७
क्रियतां क कु. ४.२२
क्रियानिमि र. ५.७
क्रियाप्रब र. ६.२३
क्रीडापत र. १७.२०
क्रोधं प्रभो ! कु. ३.७२
क्रोशार्धं प्र र. १३.७९
क्लमं ययौ कु. ५.१९
क्लिष्टकेश कु. ८. ८३
क्लेशावहा र. १४.५
क्लेशेन म र. १२.७८पा.
क्वचिच्च र. १३.५७
क्वचित् खगा र. १३.५५
क्वचित् पथा र. १३.१९
क्वचित् प्रभा चा र. १३.५६
क्वचित् प्रभा र. १३.५४
क्व नु ते हृ कु. ४.२४
क्व नु मां त्व कु. ४.६
क्व सूर्यप्र र. १.७
क्षणमात्र र. ८.३७
क्षतात् किल र. २.५३
क्षत्रजात र. ११.७०
क्षत्रियान्त र. ११.७४
क्षितिरिन्दु र. ८.२८
क्षीणान्यनु र. १७.५८पा.
क्षीरोदवे कु. ७.२६
खनिभिः सु र. १७.६६
खम्प्रसुप्त कु. ८.४३
खर्जूरीस्क र. ४.५७
खे खेलगा कु. ७.४९
गगनाद कु. ६.४९
गङ्गाम्भसी र. १.३४पा.
गङ्गास्रोतः कु. ६.३८
गच्छन्तीनां मे. ३७

गजगव ऋ. १.२७
गणा नमे कु. १.५५
गत एव कु. ४.३०
गत्युत्कम्पा मे. ७०
गत्वा चोर्ध्वं मे. ५८
गत्वा सद्यः मे. ७९
गन्धश्च धा र. १३.२७
गभीरना कु. १.३८पा.
गमयितुं र. ९.३४पा.
गम्भीराया मे. ४०
गरुडापा र. १२.७६
गर्भं दध र. १३.४
गात्राणि का ऋ. ४.५
गान्धर्वमा र. ५.५७पा.
गामधास्यत् कु. ६.६८
गीतान्तरे कु. ३.३८
गुणवत्सु र. ८.११
गुणैरारा र. १०.८५
गुप्तं ददृ र. १०.६०
गुरुः प्रग कु. १.५१
गुरूणि वा ऋ. ६.१३
गुरोः स चा र. १८.१५
गुरोः सदार र. २.२३
गुरोर्नियो कु. ३.१७, र. १४.५१
गुरोर्यिय र. १३.३
गुर्वर्थम र. ५.२४
गूढमेषु र. १९.५२
गृहिणी स र. ८.६७
गृहीतता ऋ. ५.५
गृहीतप्र र. ४.४३
गेये को नु र. १५.६९
गोप्तारं सु कु. २.५२
गौरवाद् य र. १९.७
ग्रथितमौ र. ९.५१
ग्रहैस्ततः र. ३.१३
ग्रामेष्वात्म र. १.४४
घनचारु र. ८.५८पा.
घ्राणकान्त र. १९.११
घ्राणकाम र. १९.११पा.
घूर्णमान कु. ८.८०
चकम्पे ती र. ४.८१
चञ्चन्मनो ऋ. ३.३
चतुर्भुजा र. १६.३
चतुर्वर्ग र. १०.२२
चतुष्कपु कु. ५.६८
चन्दनेना र. १७.२४
चन्द्रं गता कु. १.४३
चन्द्रपाद कु. ८.६७
चमरान् प र. ९.६६
चरणयो र. ९.१३
चरतः कि र. ८.७९
चारुनृत्य र. १९.१५
चित्रकूट र. १२.१५
चित्रद्विपाः र. १६.१६
चिरं व्यव र. १४.५३पा.
चुम्बनाद कु. ८.१९
चुम्बने वि र. १९.२७
चुम्बनेष्व कु. ८.८
चूताङ्कुरा कु. ३.३२
चूर्णबभ्रु र. १९.२५
चेतोभव कु. ७.९३पा.
छन्नोपान्तः मे. १८
छायामण्ड र. ४.५
छायाविनी र. १३.४६
जगद्योनि कु. २.९
जगाद चै र. ६.२७
जगृहुस्त र. १५.९९
जघननि र. ९.११पा.
जघान स र. १२.७८पा.
जङ्गमं प्रे कु. ६.५८
जनपदे र. ९.४
जनस्य त र. १६.५३
जनस्य सा र. ५.३१
जनाय शु र. ३.१६
जनास्तदा र. १५.७८
जन्यस्तेन र. १७.४पा.
जयश्रियः र. १६.७४
जयाशा य कु. २.४९
जलभर ऋ. २.२७
जलानि या र. १३.६१
जहार चा र. ३.५६
जातं वंशे मे. ६
जातः कुले र. ६.७४
जात्यस्तेना र. १७.४
जाने विसृ र. १४.७२
जाने वो र र. १०.३८
जाने सख्या मे. ९२
जालान्तर कु. ७.६०, र. ७.९

जालोद्गीर्णै मे. ३२
जिगमिषु र. ९.२५
जितसिंह कु. ६.३९
जुगूह त र. १४.४९
जुगोप त र. १४.४९पा.
जुगोपात्मा र. १.२१
जेतारं लो र. १२.८९
ज्ञाने मौनं र. १.२२
ज्याघातरे र. ६.५५
ज्यानिनाद र. ११.१५
ज्याबन्ध र. ६.४०
ज्येष्ठाभिग र. १२.३५
ज्योतिर्लेखा मे. ४४
ज्वलन्मणि कु. २.३८
तं ययात्म कु. ८.१६
तं रागब र. १८.१९
तं राजवी र. १९.३९
तं लोकपा कु. ७.४५
तं शरैः प्र र. १२.४७
तं श्लाघ्यसं र. ५.४०
तं सन्तः श्रो र. १.१०
तं सन्तान र. १९.५७पा.
तं स्वसा ना र. १७.६
तं कर्णभू र. ५.६५,१२.२
तं कृतप्र र. १९.८
तं कृपामृ र. ११.८२
तं गृहोप र. १९.५४
तच्चात्मचि र. १४.२०
तच्चोदित र. ९.७७
तञ्चेद् वायौ मे. ५३
तडिल्लता ऋ. २.१९
ततः कक्ष्या र. १७.२१
ततः परं व र. १८.२१
ततः परं त र. १८.३४
ततः परं ते र. ३.३९
ततः स कृ र. १६.७७
ततः परं दु र. ६.३१
ततः परम र. १७.४०
ततः परममो कु. ६.३५
ततः प्रको र. ३.५९
ततः प्रजा र. ३.३५
ततः प्रत र. ४.६६
ततः प्रह र. ३.५१
ततः प्रियो र. ७.६३
ततः सपर्या र. १६.३९
ततः समा र. २.६४,१६.७५
ततः सुन र. ६.८०
ततस्तदा र. ७.५
ततो गणैः कु. ७.४०
ततो गौरी र. ४.७१
ततो धनु र. ७.६२
ततो निष र. ३.६४
ततो नृपा र. ६.२०
ततो नृपे र. १६.६९
ततो बिभे र. १२.७७
ततोऽभिष र. १४.५४
ततो भुज कु. ३.५९
ततो मन्दा कु. २.२९
ततो मृगे र. २.३०
ततो यथा र. ५.१९
ततोऽवती र. ७.१७
ततो विंशा र. ३.१पा.
ततो वेलात र. ४.४४
तत्कृतानु कु. २.३९
तत्क्षणं वि कु. ८.७९
तत् तद् भूमि र. १.४७
तत् प्रतीप र. ११.६१
तत् प्रयातौ कु. ६.३३
तत् प्रसुप्त र. ११.४४
तत् प्रार्थितं र. ९.५६
तत्र काञ्च कु. ८.२९
तत्र जन्यं र. ४.७७
तत्र तीर्थ र. १९.२
तत्र दीक्षि र. ११.२४
तत्र नाग र. १५.८३
तत्र निश्चि कु. २.६३
तत्र याव र. ११.२७
तत्र वेत्रा कु. ६.५३
तत्र व्यक्तं मे. ५५
तत्र सेक र. १९.१०
तत्र सौध र. १५.३०
तत्र स्कन्दं मे. ४३
तत्र स्वयं र. ५.६४
तत्र हंस कु. ८.८२
तत्र हूणा र. ४.६८
तत्राऽक्षोभ्यं र. ४.८०
तत्राऽऽगारं मे. ७३
तत्राग्निमा कु. १.५७
तत्राधिकार र. ५.६३
तत्राधिकारि र. ५.६३पा.

तत्राभिषे	र. १४.८२
तत्रार्चितो	र. ७.२०
तत्रावती	कु. ७.७०
तत्रावश्यं	मे. ६१
तत्रेश्वरो	कु. ७.७२
तत्रेश्वरे	र. १३.७७
तत्रैनं हे	र. १७.१०
तथागता	र. ६.८२
तथातित	कु. ५.२१
तथापि ता	कु. ६.६२
तथापि श	र. ३.६२
तथा समक्षं	कु. ५.१
तथा समर्थं	र. २.५२पा.
तथा स सु	र. १४.१७
तथेति का	र. ३.६७
तथेति गां	र. २.५९
तथेति त	र. ५.२६, १४. ६८, १६.२३
तथेति प्र	र. १.९२, १५.९३
तथेति शे	कु. ३.२२
तथेत्युप	र. ५.५९
तदङ्गनि	र. ३.४१
तदङ्गम	र. ३.४६
तदङ्गसं	कु. ५.७९
तदञ्जन	र. ७.२७
तदद्भुतं	र. १६.२४
तदनु ज्व	कु. ४.३६
तदन्यत	र. ५.१७
तदन्वये	र. १.१२
तदपोहि	र. ८.५०
तदर्हसी	र. १६.२२
तदलं त	र. ८.८३
तदर्थम	र. ९.८१पा.
तदागम	कु. ६.७४
तदात्मसं	र. १७.८
तदाननं	र. ३.३
तदा प्रभृ	कु. ५.५५, र. २.३८
तदिच्छामो	कु. २.५१
तदिदं क्रि	कु. ४.३२
तदिदं प	कु. ४.४४
तदीयमा	र. २.२८
तदीयास्तो	कु. २.५०
तदीषदा	कु. ७.८२
तदेतदा	र. १६.८४
तदेष स	र. १४.४२
तद्गच्छ	कु. ३.१८
तद् गतिं म	र. ११.८६
तद्गीतश्र	र. १५.६६
तद्गौरवा	कु. ७.३१
तद्दर्शना	कु. ६.१३
तद् ब्रूत व	कु. २.२८
तद् रक्ष क	र. २.५०
तद् वल्गुना	र. ५.६८
तद् व्योम्नि	र. १२.९८
तनुत्यजां	र. ७.४८
तनुलता	र. ९.५२
तनूनि पा	ऋ. ६.९
तं तस्थिवां	र. ५.६१
तं दधन् मै	र. १५.५६
तं देशमा	कु. ३.३५
तं धूपाश्या	र. १७.२२
तन्यमन्त्र	र. ११.३२
तन्मध्ये च	मे. ७७
तन्मदीय	र. ११.७६
तन्मातरं	कु. ६.९२
तन्मुहूर्त्त	कु. ८.४८
तन्वी श्यामा	मे. ८०
तपः परा	कु. ३.७१
तपसा प्र	र. ८.८०
तपस्यन	र. १५.५१
तपस्विनः	कु. ३.३४
तपस्विवे	र. १४.९
तपस्विसं	र. १४.७५
तपो रक्षन्	र. १७.६५
तपोवने	कु. १.१६पा.
तमङ्कमा	र. ३.२६
तमध्वरा	र. १५.५८
तमध्वरे	र. ५.१
तमन्वग	कु. ७.४३
तमन्वगि	कु. ७.७१
तमपहा	र. ९.१६
तमब्रवीत्	र. १६.९
तमभ्यन	र. ३.६८,१५.४०
तमरण्य	र. ८.१२
तमर्चयि	र. ५.३
तमर्थमि	कु. ६.७९

तमलभ र. ९.१७
तमवेक्ष्य कु. ४.२६
तमशक्य र. १२.१७
तमश्रु ने र. १४.७१
तमातिथेयी कु. ५.३१
तमातिथ्य र. १.५८
तमात्मसं र. १८.१८
तमादौ कु र. १७.३
तमाधूत र. १२.८५
तमापत र. ५.५०
तमार्यगृ र. २.३३
तमाशु वि कु. ३.७४
तमाहितौ र. २.७३
तमिस्रया र. १३.५७पा.
तमीशः का र. ४.८३
तमुद्वह र. ७.३५
तमुपाद्र र. १५.२३
तमृद्धिम कु. ७.५२
तमृषिः पू र. १५.१२
तमेकदृ कु. ७.६४
तं पयोध र. १९.४५
तं पितुर्व र. ११.६६
तं प्रमत्त र. १९.४८
तं प्राप्य स र. ६.६९
तं प्रीतिवि र. १७.३५
तं प्रेक्ष्य च कु. ७.९३पा.
तं भावार्थं र. १९.५७पा.
तं भूत्यर्थं र. १९.५७
तं भूपति र. ५.३०
तं मातरो कु. ७.३८
तं वाहना र. ९.६०
तं विनिष्पि र. १२.३०
तं विस्मितं र. २.६२
तं वीक्ष्य वे कु. ५.८५
तं वेधा वि र. १.२९
तया दुहि कु. १.२४
तया प्रवृ कु. ७.७४
तया व्याहृ कु. ६.२
तया स्रजा र. ६.८४
तया हीनं र. १.७०
तयोः समा कु. ७.७५
तयोरुपा र. ३.५७,७.२३
तयोर्जगृ र. १.५७
तयोर्दिव र. १७.७
तयोर्यथा र. १४.२५
तयोश्चतु र. १२.६
तयोस्तस्मिन् र. १२.५६
तव निःश्व र. ८.६४
तव प्रसा कु. ३.१०
तव मन्त्र र. १.६१
तवाधर र. १३.१३
तवार्हतो र. ५.११
तवोरुकी र. १४.७४
तस्मात् पुर र. १३.६९
तस्मात् प्रदे कु. ७.१२
तस्मात् समु र. १६.७९
तस्मादधः र. १८.४१
तस्माद् गच्छे मे. ५०
तस्माद् बभू र. १८.१६पा.
तस्मान्मुच्ये र. १.७२
तस्मिन् काले मे. ३९,९५
तस्मिन् कुला र. १८.२९
तस्मिन् क्षणे र. २.६०
तस्मिन गते र.११.९१,१८.२२
तस्मिन्नद्रौ मे. २
तस्मिन्नभि र. ६.३६
तस्मिन्नव र. १०.५
तस्मिन्नात्म र. १५.९६
तस्मिन्नास्थ र. १२.२३
तस्मिन्नियु र. १८.७
तस्मिन्नुपा कु. २.४८
तस्मिन् प्रया र. १८.१६
तस्मिन् मघो कु. ३.१
तस्मिन् मुहू कु. ७.५६
तस्मिन् राम र. १२.४९
तस्मिन् वने कु. ३.२४
तस्मिन् विधा र. ६.११
तस्मिन् विप्र कु. २.१
तस्मिन् संय कु. ६.३४
तस्मिन् समा र. ६.७०
तस्मिन् ह्रदः र. १६.७८
तस्मै कुश र. १०.३४
तस्मै जया कु. ७.४७
तस्मै निशा र. १२.६९
तस्मै शशं कु. ३.६०
तस्मै सभ्याः र. १.५५
तस्मै सम्य र. ४.२५
तस्मै हिमा कु. ३.१६
तस्य कर्क र. ९.६८
तस्य कल्पि र. ११.५०

तस्य गोप्तु र. ४.२०पा.
तस्य जातु र. ११.५७
कु. ८.२५
तस्य दाक्षि र. १.३१
तस्य द्विपा र. १६.३०
तस्य निर्द र. १९.३२
तस्य पाण्डु र. १९.५०
तस्य पूर्वो र. १५.५७
तस्य प्रभा र. १८.३०
तस्य प्रया र. १६.२८
तस्य प्रस र. ८.९३
तस्य मार्ग र. १५.११
तस्य वीक्ष्य र. ११.३८
तस्य श्रिया र. ६.५पा.
तस्य संस्तू र. १५.२७
तस्य सन्म र. १७.१६
तस्य संवृ र. १.२०
तस्य साव र. १९.१६
तस्य स्तन र. ९.५५
तस्य स्थित्वा मे. ३
तस्य स्फुर र. १२.९०
तस्यां रघोः र. ६.६८
तस्याः करं कु. ७.७६
तस्याः कि मे. ४१
तस्याः खुर र. २.२
तस्याः पातुं मे. ५१
तस्याः प्रका र. ६.४४
तस्याः प्रति र. ७.६८
तस्याः प्रवि कु. १.३८
तस्याः प्रस र. २.६८
तस्याः शला कु. १.४७
तस्याः सखी कु. ३.६१
तस्याः स र र. ७.३६
तस्याः स रा र. १६.४०
तस्याः सुजा कु. ७.२०
तस्याः स्पृष्टे र. १६.८७
तस्याऽपरे र. ९.५८
तस्याऽऽत्मा कु. २.६१
तस्याऽधिका र. ५.६३.
तस्याऽनलौ र. १८.५
तस्यानीकै र. ४.५३
तस्याऽनुमे कु. ७.९३
तस्यान्वये र. ६.४१
तस्याऽपनो र. १४.३९
तस्याऽभवत् र. १८.१७
तस्याभिषे र. १२.४
तस्यामात्मा र. १.३३
तस्यामेवा र. १५.१३
तस्यायम र. १३.४०
तस्यालमे र. २.३९
तस्याऽवसा र. १८.२३
तस्यास्तथा र. १९.५६
तस्यास्तिक्तै मे २०
तस्यास्तीरे मे. ७५
तस्यैकना र. ५.४७
तस्यैकभा र. १४.८६
तस्यैकस्यो र. १७.३३
तस्यै प्रति र. १४.२९
तस्यै भर्त्तु र. १२.६२
तस्योत्सङ्गे मे. ६२
तस्योत्सृष्ट र. ४.७६
तस्योदये र. १०.७३
तस्योपक कु. ७.५१
तस्योपका र. ५.४१
तस्योपाय कु. २.३७
तस्यौघम र. १७.१४
तां शिल्पि र. १६.३८
तां सैव वे र. ६.२६
तां हंसमा कु. १.३०
ताः स्वचारि र. १५.७३
ताः स्वमङ्क र. १९.४४
ता इङ्गुदी र. १४.८१
तां कस्यांचिद् मे. ३८
ताञ्चावश्यं मे. १०
ताञ्जानीथाः मे. ८१
ताटङ्कयु कु. १.४५पा.
तात ! शुद्धा र. १५.७२
ता नराधि र. ११.५५
तानर्घ्यान कु. ६.५०
तान्तामव र. १३.५
तान्दृष्टिवि र. १५.७९
तान्देवता र. २.१६
तान्नारदः कु. १.५०
तान् हत्वा ग र. ९.६५
ताभिर्गर्भः र. १०.५८
ताभ्यस्तथा र. १०.६४
तामङ्कमा र. १४.२७
तामगौर कु. ६.१२
तामग्रत र. ६.३७
तामन्तिक र. २.२४

तामभ्यग र. १४.७०
तामर्चिता कु. ७.२७
तामर्पया र. १४.८०
तामस्मद कु. ६.२९
तामायुष्मन् मे. ९९
तामिमां ति कु. ८.५३
तामुत्तीर्य मे ४७
तामुत्थाप्य मे. ९६
तां पार्वती कु. १.२६
तां पुण्यद र. १.८६
तां पुलोम कु. ८.२७
तां प्रणामा कु. ६.९१
तां प्रत्यभि र. ६.१२
तां प्राङ्मुखी कु. ७.१३
ताम्बूलव र. ६.६४
तामबूलीनां र. ४.४२
ताम्रपर्णी र. ४.५०
ताम्रप्रवा ऋ. ६.१५
ताम्रोदरे र. ५.७०
ताम्विलम्बि कु. ८.८१
तामवीक्ष्य स कु. ३.५७
तारागण ऋ. ३.७
ता राघवं र. ७.१२
तां लोध्रक कु. ७.९
तावत् पता कु. ७.६३
तावत् प्रकी र. ७.४
तावद् वर कु. ७.३०
तावुभाव र. ११.८१
तासाञ्च प कु. ७.३९
तासाम्मुखै कु. ७.६२,
र. ७.११
तासु श्रिया र. ६.५
तिर्यगूर्ध्व कु. ६.७१
तिलकजा र. ९.३४पा.
तिसृभिस्त्व कु. २.६
तिस्रस्त्रिलो र. ७.३३
तीरस्थली र. १६.६४
तीर्थे तदीये र. १६.३३
तीर्थे तोय र. ८.९५
तीव्रवेग र. ११.१६
तीव्राभिष कु. ३.७३
तुषारसं ऋ. ५.४,
कु. १.५६,
र. १३.५७पा.
तृणोत्करै ऋ. २.८
तृषाऽऽकुलै ऋ. २.३
तृषा महत्या ऋ. १.१५
ते कृपामृ र. ११.८२पा.
ते चतुर्थ र. ११.५४
ते च प्रापु र. १०.६
ते चाकाश कु. ६.३६
तेजसः स र. ११.६२
ते तं समु कु. ७.९३.पा.
ते तस्य क र. १७.९
तेन कार्मु र. ११.६९
तेन दूति र. १९.१८
तेन द्विपा र. १८.८
तेन भङ्गि कु. ८.८९
तेन भूमि र. ११.८०
तेन मन्त्र र. १२.९९
तेनातप र. १६.२७
तेनाभिघा र. ९.६१
तेनामर कु. २.४१
तेनार्थवाँ र. १४.२३
तेनावती र. ९.७६
तेनाऽवरो र. १६.७१
तेनाष्टौ प र. ८.९२
तेनोत्तीर्य र. १२.७१
तेनोरुवी र. १८.२
तेऽपि तूर्ण र. ११.४३पा.
ते पुत्रयो र. १४.४
ते प्रजानां र. १०.८३
ते प्रभाम कु. ६.४
ते प्रीतम र. १७.१८
ते बहुज्ञ र. १०.५६
ते रामाय र. १५.५
ते रेखाध्व र. ४.८८
तेषां सद र. ४.७०
तेषान्दिक्षु मे. २४
तेषां द्वयो र. १०.८२
तेषामावि कु. २.२
तेषां मध्य कु. ६.११
तेषाम्महा र. ६.६
ते सद्मनि कु. ६.४८
ते सेतुवा र. १६.२
तेऽस्य मुक्ता र. १७.२३
ते हिमाच कु. ६.९४
तैः कृतप्र र. १९.५५
तैः शिवेषु र. ११.३३
तैस्त्रयाणां र. १२.४८

तौ क्षणं प्र कु. ८.८६पा.
तौ क्षणं शि कु. ८.८६
तौ दम्पती कु. ७.८०, र. ९.७८
तौ निदेश र. ११.४
तौ पितु र. ११.५
तौ प्रणाम र. ११.३१
तौ बलाति र. ११.९
तौ विदेह र. ११.३६
तौ सन्धिषु कु. ७.९१
तौ समेत्य र. ११.५२
तौ सरांसि र. ११.११
तौ सीतान्वे र. १२.५४
तौ सुकेतु र. ११.१४
तौ स्नातकै र. ७.२८
त्यजत मा र. ९.४७
त्यागाय सं र. १.४
त्याजितैः क र. ४.३३
त्रस्तेन ता र. ६.४९पा.
त्रातेन ता र. ६.४९
त्रिदिवोत्सु र. ८.६०
त्रिभागशे कु. ५.५७
त्रिलोकना र. ३.४५
त्रेताग्निधू र. १३.३७
त्रैलोक्यना र. १६.८१
त्वं रक्षसा र. १३.२४
त्वचं स मे र. ३.३१
त्वत्संभावि कु. ६.२०
त्वदावेशि र. १०.२७
त्वन्निष्यन्दो मे. ४२
त्वमेव ता कु. ५.६७
त्वमेव ह कु. २.१५
त्वं पितॄणा कु. २.१४
त्वया पुर र. १३.५३
त्वयैवं चि र. १.६४
त्वय्यादातुं मे. ४६
त्वय्यायत्तं मे. १६
त्वय्यावेशि र. १०.२७पा.
त्वामामन कु. २.१३
त्वामारूढं मे. ८
त्वामालिख्य मे. १०३
त्वामासार मे. १७
दक्षिणेन र. १९.४३
ददौ रसात् कु. ३.३७
ददौ सरः कु. ३.३७पा.
दधतिकु ऋ. २.२५
दधतो म र. १२.८
दन्तच्छदैः ऋ. ४.१२
दयितां य र. ८.५१
दर्पणे च कु. ८.११
दर्पणेषु र. १९.२८
दशदिग र. ९.५
दशनच र. ९.२९पा.
दशरश्मि र. ८.२९
दशानन र. १०.७५
दष्टताम कु. ८.३२
दष्टमुक्त कु. ८.१८
दिग्भ्यो नि र. १५.५९
दिने दिने शै र. १६.४६
दिने दिने सा कु. १.२५
दिनेषु ग र. ३.८
दिनेषु र. ३.८पा.
दिलीपसू र. ३.५४
दिलीपान र. ४.२
दिवं यदि कु. ५.४५
दिवं मरु र. ३.४
दिवसक ऋ. ३.२३
दिवाकराद् कु. १.१२
दिवापि नि कु. ७.३५
दिशः प्रसे र. ३.१४
दिशि मन्दा र. ४.४९
दिष्टान्तमा र. ९.७९
दीनान्यनु र. १७.५८पा.
दीर्घीकुर्वन् मे. ३१
दीर्घेष्वमी र. ५.७३
दुःखैकब र. १३.७२
दुकूलवा कु. ७.७३, र. ७.१९
दुदोह गां र. १.२६
दुरितं द र. १७.७४
दुरितैर र. ८.२
दुर्गाणि दु र. १७.५४
दुर्जातब र. १३.७२पा.
दूरमग्र कु. ८.४०
दूरादय र. १३.१५
दूरापव र. १७.७९
दूराय व र. १७.७९पा.
दूर्व्वायवा र. १७.१२
दृढभक्ति र. १२.१९
दृश्यार्धया र. १३.५७पा.

दृष्टदोष र. १९.४९
दृष्टसार र. ११.४७
दृष्टा विचि र. १२.६१
दृष्टिप्रपा कु. ३.४३
दृष्ट्वा लोकान् मे. ४७पा.
देवास्तद कु. ७.९२
देवेश स कु. ७.९३पा.
दैत्यस्त्रीग र. १०.१२
द्रवः संघा कु. २.११
द्रुतमन्व र. ९.६६पा.
द्रुमाः सपु ऋ. ६.२
द्रुमेषु स कु. ५.६०
द्वयं गतं कु. ५.७१
द्विधाप्रयु कु. ७.९०
द्विषां विष र. ४.४१
द्वेष्योऽपि सं र. १.२८
धनुर्भृतो र. २.११
धरायां त र. १५.८५
धर्मलोप र. १.७६पा.
धर्मेणापि कु. ६.१४
धातारं त र. १०.४३
धातुताम्रा कु. ६.५१
धारासिक्त मे. १०३पा.
धारास्वनो र. १३.४७
धियः सम र. ३.३०
धूमोष्मणा कु. ७.१४
धूमज्योतिः मे. ५
धूमधूम्रो र. १५.१६
धूमादग्नेः र. १७.३४
धृतिरस्मिता र. ८.६६
ध्रुवमस्मि र. ८.४९
ध्रुवेण भ कु. ७.८५
ध्वजपटं र. ९.४५
ध्वनति प ऋ. १.२५
न किलानु र. १.२७
न कृपणा र. ९.८
न केवलं कु. ६.६०
न केवलं र. १८.४९
नखपद ऋ. ५.१५
न खरो न र. ८.९
न चन्दनं ऋ. ५.३
न चन्दनै ऋ. ४.२
न चाऽवदद् र. १४.५७
न चोपले र. १०.२
न तद् वनं ऋ. ६.१पा.
न तस्य म र. १७.४८
न दक्षिणं र. ७.५७
नदत्सु तू र. ७.३८
नदद्भिः स्नि र. १७.११
न धर्म्मम र. १७.५७
न नवः प्र र. ८.२२
न नूनमा कु. ७.६७
नन्वात्मानं मे. १०७
न पृथग्ज र. ८.९०
न प्रसेहे र. ४.८२
न प्रहर्त्तु र. ११.८३
न बाहुयु ऋ. ४.३
नभश्चरै र. १८.६
नमास्त्रिमू कु. २.४
न मृगया र. ९.७
न मे ह्रिया र. ३.५
नमो विश्व र. १०.१६
नमोऽस्त्वमू कु. २.४पा.
नयगुणो र. ९.२७
नयचक्षु र. ८.१९पा.
नयनान्य कु. ४.१२
नयविद्भिः र. ४.१०
नरेन्द्रमू र. ३.३६
नवजल ऋ. २.२६
नवपरि कु. ७.९५
नवपल्ल र. ८.५७
नवप्रवा ऋ. ४.१
न वेद्मि स कु. ५.६१
नवेन्दुना र. १८.३७
नवेषु सा र. १६.४७
नष्टं धनु ऋ. ३.१२
न संयत र. ३.२०
नागेन्द्रह कु. १.३६
नातिपर्या र. १५.१८
नाभिदेश कु. ८.४
नाभिप्ररू र. १३.६
नाम राम र. ११.६७
नाम वल्ल र. १९.२४
नाम्भसां क र. ११.१२
नाम्भसां वि र. ११.१२पा.
निःश्वासेना मे. ८९
निकामत कु. ५.२३
निगृह्य शो र. १४.८५
निग्रहात् स्व र. १२.५२
नितम्बगु र. ७.२५

नितम्बबि ऋ. १.४
नितान्तनी ऋ. २.२
नितान्तला ऋ. १.५
नितान्तशु र. १३.५७पा.
निद्रावशं र. ५.६८पा.
निद्रावशे र. ५.६७
निधानग र. ३.९
निनाय सा कु. ५.२६
निपातय ऋ. २.७
निम्नमुन्नत कु. ८.५७
नियुज्य तं र. ३.३८
निरत्याय र.३.१२(उ.पा.)
निरभ्रमा ऋ. ३.२पा.
निरुद्धवा ऋ. ५.२
निर्घातोग्रैः र. ९.६४
निर्दिष्टां कु र. १.९५
निर्दोषम र. १०.७२
निर्बन्धपृ र. ५.२१, १४.३२
निर्बन्धसं र. ५.२१
निर्भर्त्सिता कु. १.४०पा.
निर्माल्यदा ऋ. ४.१५
निर्मितेषु कु. ८.५२
निर्ययाव र. १२.८३
निर्वर्त्यते र. ५.८
निर्वर्त्यैवं र. १५.१०३
निर्वाणभू कु. ३.५२
निर्वाप्य प्रि र. १२.६३
निर्विभुज्य कु. ८.४९
निर्विष्टवि र. १२.१
निर्वृत्तजा र. १८.४४
निर्वृष्टल र. ४.१५
निर्वृष्टिल र. ४.१५पा.
निवर्त्तया कु. ५.७३
निवर्त्य रा र. २.३
निववृते र. ९.१४
निवातप र. ३.१७
निवार्यता कु. ५.८३
निविष्टमु र. १२.६८
निवेदितं कु. ५.४६
निवेश्य वा र. ६.१६
निशम्य चै कु. ५.३
निशम्य दे र. २.५२
निशाः शशा ऋ. १.२
निशाकरो कु. २.२६पा.
निशाचरो र. १४.६४
निशानं स्व र. १५.२१
निशाशशा ऋ. १.२पा.
निशासु भा र. १६.१२
निश्चित्य चा र. १४.३५
निश्शेषवि र. ५.४४
निष्कम्पवृ कु. ३.४२
निसर्गभि र. ६.२९
नीचैराख्यं मे. २५
नीपं दृष्ट्वा मे. २१
नीपान्वयः र. ६.४६
नीलकण्ठ कु. ८.१२
नीवारपा र. ५.९
नीवीबन्धो मे. ६७
नूनं तस्याः मे. ८२
नूनमुन्न कु. ८.५८
नूनं मत्तः र. १.६६
नृत्तप्रयो ऋ. ३.१३
नृत्तं मयू र. १४.६९
नृपतिः प्र र. ८.१८
नृपतेः प्र र. ९.७४
नृपतेर्व्य र. ८.४०
नृपं तमा र. ६.५२
नृपस्य व र. १४.६७
नेत्रव्रजाः र. ६.७
नेत्रानीताः मे. ६८
नेत्रेष्वलो ऋ. ६.१०
नेत्रोत्सवो ऋ. ३.९
नेपथ्यद र. १७.२६
नैर्ऋतघ्न र. ११.२१
नोर्ध्वमी कु. ८.५६
न्यस्तशस्त्रं र. ४.१पा.
न्यस्ताक्षरा कु. १.७, र. १८.४६
पक्षच्छिदा र. १३.७
पञ्चमं लो र. १७.७८
पञ्चवट्या र. १२.३१
पञ्चानाम र. ४.११
पटुतर ऋ. १.२२
पणबन्ध र. ८.२१
पतिरङ्क र. ८.४२
पत्तिः पदा र. ७.३७
पत्युः शिर कु. ७.१९
पत्रश्यामा मे. ३३पा.

पत्रान्तल कु. ७.८९
पदं तुषार कु. १.६
पद्मकान्ति कु. ८.३०
पद्मनाभ कु. ८.२३
पयोघटै र. १४.७८
पयोधराः ऋ. १.६
पयोधरैः ऋ. ५.९
पयोधरै ऋ. २.११
परकर्म्मा र. १७.६१
परभृता र. ९.३२पा.
परलोक कु. ४.१०,३८
परस्परा र. १०.८०, १६.५७
परस्पराक्षि र. १.४०
परस्परे कु. ७.६६, र. ४.७९, ७.१४,१३
परातिस र. १७.७६पा.
परात्मनोः र. १७.५९
पराभिस र. १७.७६
परार्ध्यव र. ६.४
परिकल्पि र. ४.६
परिचयं र. ९.४९
परिणेष्य कु. ४.४२
परेण भ र. ७.५५
परेषु स्वे र. १७.५१
पर्णशाला र. १२.४०
पर्यङ्कब कु. ३.४५
पर्यन्तस र. १८.४३
पर्य्याकुल कु. २.२५
पर्याप्तपु कु. ३.३९
पर्य्यायसे कु. २.३६
पवनस्या र. १.४२
पशुपति कु. ६.९५
पश्चादुच्चै मे. ३६
पश्य कल्प कु. ८.७१
पश्य पक्व कु. ८.६१
पश्य पश्चि कु. ८.३४
पश्य पार्व कु. ८.६४
पश्यावरो र. १६.५८
पाकभिन्न कु. ८.७४
पाकं व्रज ऋ. ४.१०
पाणिपीड कु. ८.१
पाण्डुच्छायो मे. २३
पाण्ड्योऽयमं र. ६.६०
पात्रीकृता र. १८.३१
पादन्यासैः मे. ३५
पादपावि र. १२.७३
पादानिन्दो मे. ८८
पारसीकाँ र. ४.६०
पार्थिवीमु र. ११.५३
पार्वती त कु. ८.७८
पार्ष्णिमुक्त कु. ८.४७
पिता पितॄ र. १८.२६
पिता समा र. १८.११
पितुः प्रय र. ३.२२
पितुरन र. ९.१
पितुर्निदे र. १४.२१
पित्रा दत्तां र. १२.७
पित्रा विसृ र. १३.६७
पित्रा संव र. १७.६२
पित्र्यमंश र. ११.६३
पीनस्तनो ऋ. ४.७
पुंस्कोकिल ऋ. ६.१४
पुंस्कोकिलैः ऋ. ६.२१
पुण्डरीका र. ४.१७
पुत्रजन्म र. १०.७६
पुत्रो रघु र. ६.७६
पुनर्ग्रही कु. ५.१३
पुरन्दर र. २.७४
पुरं निषा र. १३.५९
पुरस्कृता र. २.२०
पुराणस्य कु. २.१७, र. १०.३६
पुरा शक्र र. १.७५
पुरा स द र. १३.३९
पुरुषस्य र. ८.७८
पुरुषायु र. १.६३
पुरूहूत र. ४.३, १०.४९
पुरे ताव कु. २.३३
पुरोगैः क र. ४.३१पा.
पुरोपक र. ६.९
पुरोहित र. १७.१३
पुष्पं प्रवा कु. १.४४
पुष्पं फलं र. १४.७७
पुष्पेषुमे कु. ७.९३पा.
पूर्वजन्म र. ११.७९
पूर्वप्रह र. ७.४७
पूर्वभाग कु. ८.३७

पूर्वं प्रह र. ७.४७पा.
पूर्ववृत्त र. ११.१०
पूर्वस्तयो र. १८.१२
पूर्वानुभू र. १३.२८
पृक्तस्तुषा र. २.१३
पृथिवीं शा र. १०.१
पृथुजघ ऋ. ५.१४
पृष्टनामा र. १५.५०
पौत्रः कुश र. १८.४
पौरस्त्याने र. ४.३४
पौरेषु सो र. १४.३८
प्रकामका ऋ. ५.७
प्रचण्डसू ऋ. १.१
प्रचुरगु ऋ. ५.१६
प्रजानामे र. १.१८
प्रजानां वि र. १.२४
प्रजावती र. १४.४५
प्रजास्तद्गु र. १७.४१
प्रणम्य शि कु. ६.८१
प्रणिपत्य र. १०.१५
प्रणिपेतुः र. १०.१५पा.
प्रतापोग्रे र. ४.३०
प्रतिकृति र. १८.५३
प्रतिक्षणं कु. ५.१०
प्रतिग्रही कु. ३.६६
प्रतिजग्रा र. ४.४०
प्रतिपद्य कु. ४.१६
प्रतिप्रया र. १४.१९
प्रतियोज र. ८.४१
प्रतिशुश्रा र. १५.४
प्रत्यक्षोऽप्य र. १०२८
प्रत्यपद्य र. ११.३४,८७
प्रत्यब्रवी र. २.४२
प्रत्यभिज्ञा र. १२.६४
प्रत्यर्थिभू कु. १.५९
प्रत्यागतौ र. १४.१पा.
प्रत्यासन्ने मे. ४
प्रत्याह चै र. २.४२पा.
प्रत्युवाच र. ११.४१,८४
प्रथमप र. ७.७१
प्रथमम र. ९.३४
प्रदक्षिण कु. ७.७९,
र. ७.२४
प्रदक्षिणीकृत्य र. २.२१,७१
प्रद्योतस्य मे. ३०पा.
प्रफुल्लचू ऋ. ६.१
प्रफुल्लनी ऋ. ४.९
प्रबुद्धपु र. १०.९
प्रभानुलि र. १०.१०
प्रभामह कु. १.२८
प्रभावस्त र. १२.२१
प्रभिन्नवै ऋ. २.५
प्रभूतशा ऋ. ४.८
प्रमदाक्षा र. १७.४६पा.
प्रमदाम र. ८.७२
प्रमन्यवः र. ७.३४
प्रमादवि र. १७.४६
प्रमुदित र. ६.८६
प्रमोदमा र. १४.१२पा.
प्रययावा र. १२.२५
प्रयुक्तपा कु. ७.७८
प्रयुक्तस कु. ५.३९
प्ररूढशा ऋ. ५.१
प्रलोभिता र. ६.५८
प्रवातनी कु. १.४६
प्रवृत्तमा र. १३.१४
प्रवृत्तावु र. १२.६०
प्रवृद्धता र. १६.४५
प्रवृद्धो ही र. १७.७१
प्रवृद्धौ ही र. १७.७१पा.
प्रवेश्य चै र. ५.६२
प्रशमस्थि र. ८.१५
प्रशमाद कु. २.२०
प्रसन्नदि कु. १.२३
प्रसन्नमु र. १७.३१
प्रसवैः स र. ४.२३
प्रससादो र. ४.२१
प्रसादस र. १७.४६पा.
प्रसादंसु र. ४.१८
प्रसादाभि र. १७.४६पा.
प्रसाधिका कु. ७.५८,
र. ७.७
प्रसीद वि कु. ३.९
प्रस्थितायां र. १.८९
प्रहारमू र. ७.४४
प्राक्तनानां कु. ६.१०
प्रजापत्यो र. १०.५२
प्रातः प्रया र. ५.२९
प्रातरेत्य र. १९.२१
प्रातर्यथो र. २.७०

प्राप्तानुगः र. ९.८२
प्राप्य चाशु र. १२.४२
प्राप्यावन्ती मे. ३०
प्रायः प्रता र. १७.७०
प्रायो विषा र. ९.६२
प्रालेयाद्रे मे. ५७
प्रासादका र. १४.१२
प्राहिणोच्च र. ११.४८
प्रियं सुरू र. १३.४८पा.
प्रियङ्गुका ऋ. ६.१२
प्रियतमा र. ९.१८
प्रियम्वदात् र. ७.६१
प्रियानुरा र. ३.१०
प्रेक्ष्य दर्प र. १९.३०
प्रेमगर्वि र. १९.२०
फलमस्यो र. १२.३७
बद्धकोष कु. ८.३९
बन्धच्छेदं र. १७.१९
बबन्ध चा कु. ७.२५
बभूव भ कु. ७.३२
बभूव भा र. १०.३६पा.
बभूव रा र. १४.८४
बभौ च सं कु. ७.८
बभौ तम र. १२.२६
बभौ पूर्ण र. १७.३०पा.
बभौ भूयः र. १७.३०
बभौ सद र. १०.३७
बलमार्त्त र. ८.३१
बलाहका ऋ. २.४
बलिक्रिया र. १६.२१
बलैरध्यु र. ४.४६
बहुगुण ऋ. २.२८,४.१८
बहुतर ऋ. १.२६
बहुधाप्या र. १०.२६
बाणभिन्न र. ११.१९
बालार्कप्र र. १२.१००
बालेन्दुव कु. ३.२९
बाहुप्रति र. २.३२
बाहुभिर्वि र. १०.११
बिभ्रतोऽस्त्र र. ११.७३
बिभ्रत्या कौ र. १०.६२
ब्रह्मावर्त्तं मे. ४८
ब्राह्म्ये मुहू र. ५.३६
भक्तिः प्रती र. ५.१४
भक्त्या गु र. २.६३
भगवन् प र. ८.८१
भज्यमान र. ११.४६
भयोत्सृष्ट र. ४.५४
भरतस्त र. १५.८८
भर्त्तापि ता र. ७.३२
भर्त्तुः कण्ठ मे. ३३
भर्त्तुः प्रणा र. १४.१
भर्त्तुर्मित्रं मे. ९७
भल्लापव र. ४.६३
भवति वि र. ५.७४
भवत्यनि कु. ५.४२
भवत्संभा कु. ६.५९
भवल्लब्ध कु. २.३२
भवानपी र. २.५६
भविष्यतः कु. ३.५८
भव्यमुख्याः र. १७.५२
भस्मसात् कृर. ११.८५
भागीरथी कु. १.१५
भावसूचि कु. ८.१५
भास्करश्च र. ११.६०
भित्वा सद्यः मे. १०५
भिन्नाञ्जन ऋ. ३.५
भीमकान्तै र. १.१६
भुजङ्गमो कु. ३.४६
भुजमूर्धो र. १२.८८पा.
भुजोत्तमा र. १२.८८
भुवं कोष्णे र. १.८४
भुवनालो कु. २.४५
भूतानुक र. २.४८
भूयश्चाह मे. १०९
भूयस्ततो र. १३.७६
भूयस्तपो र. १५.३७
भूर्जेषु म र. ४.७३
भोगिभोगा र. १०.७
भोगिवेष्ट र. ४.४८
भ्रमरैः कु र. ८.३५
भ्रातुर्नियो र. १४.५१पा.
भ्रूभङ्गिमा र. १३.३६
भ्रूभेदिभिः कु. ६.४५
मखांशभा र. ३.४४
मणौ महा र. १८.४२
मतङ्गशा र. ५.५३
मत्तद्विरे ऋ. ६.१७
मत्तेभर र. ४.४९
मत्परं दु र. १.६७

मत्वा देवं	मे. ७१
मत्स्यध्वजा	र. ७.४०
मदनेन	कु. ४.२१
मदिराक्षि!	र. ८.६८
मदोदग्राः	र. ४.२२
मधु द्विरे	कु. ३.३६
मधुश्च ते	कु. ३.२१
मध्येन सा	कु. १.३९
मनसापि	र. ८.५३
मनीषिताः	कु. ५.४
मनु प्रभृ	र. ४.७
मनुष्यवा	र. ६.१०
मनोज्ञकू	ऋ. ५.८
मनोज्ञग	र. १६.५२
मनो नव	कु. ३.५०
मनोऽभिरा	र. १.३९
मनोर्वंश	र. १०.२पा.
मन्त्रः प्रति	र. १७.५०
मन्दं मन्दं	मे. ९
मन्दं विवा	र. ५.६९पा.
मन्दः कवि	र. १.८
मन्दरान्त	कु. ८.५९
मन्दाकिनी	कु. १.२९
मन्दाकिन्याः	कु. २.४४,
मन्दाकिन्याः	मे. ६६पा.
मन्दानिला	ऋ. ३.६
मन्दोत्कण्ठाः	र. ४.९
मयि तस्य	र. ८.७७
मरणं प्र	र. ८.८७
मरुतां प	र. १२.१०१
मरुत्प्रयु	र. २.१०
मरुपृष्ठा	र. ४.३१
मरुलामा	र. ४.५५पा.
मर्मरैर	र. १९.४१
मलयप	ऋ. ६.२५
महते सु	र. १.३४पा.
महार्हशं	कु. ५.१२
महार्हसिं	र. ७.१८
महिमानं	र. १०.३२
महीभृतः	कु. १.२७
महीं महे	र. १८.३३
महेन्द्रमा	र. ६.७२
महोक्षतां	र. ३.३२
मातङ्गनक्रैः	र. १३.११
मातलिस्त	र. १२.८६
मातृवर्ग	र. ११.७
मान्यः स मे	र. २.४४
मान्यभक्ति	कु. ८.७७
मा भूदाश्र	र. १.३७
मा माकाश	मे. १०४
मार्गं तावत्	मे. १३
मार्गैषिणी	र. १६.३१
मालाः कद	ऋ. २.२०
मित्रकृत्य	र. १९.३१
मिथुनं प	र. ८.६१
मुक्तशेष	र. १०.१३
मुक्तायज्ञो	कु. ६.६
मुखार्पणे	र. १३.९
मुखावय	र. १२.४३
मुखेन सा	कु. ५.२७
मुखेन सा	र. ३.१पा.
मुञ्च कोप	कु. ८.५१
मुदित इ	ऋ. २.२३
मुतिव्रतै	कु. ५.४८
मुरचीमा	र. ४.५५पा.
मुरलामा	र. ४.५५
मुरवीमा	र. ४.५५पा.
मुरुचीमा	र. ४.५५पा.
मुरुलामा	र. ४.५५पा.
मूढं बुद्ध	कु. ६.५५
मूर्ते च ग	कु. ७.४२
मृगमांसं	र. १२.२२पा.
मृगवनो	र. ९.५०
मृगाः प्रच	ऋ. १.११
मृगाः प्रिया	कु. ३.३१
मृग्यश्च द	र. १३.२५
मृणालिका	कु. ५.२९
मेने मेने	कु. ६.८६
मेरुमेत्य	कु. ८.२२
मैत्रे मुहू	कु. ७.६
मैथिलः स	र. ११.४७पा.
मैथिलस्य	र. ११.७१
मोक्ष्यध्वे सु	र. १०.४७
यं सर्वशै	कु. १.२
यः कश्चन	र. १५.७
यः पूरयन्	कु. १.८
यः सुबाहु	र. ११.२९
यच्चकार	र. ११.१८
यज्ञभाग	कु. ६.७२
यज्ञाङ्गयो	कु. १.१७

यज्ञान्ते त र. ४.८७पा.
यज्वभि: सं कु. २.४६
यतिपार्थि र. ८.१६
यत् कुम्भ र. १६.७२
यत्र कल्प कु. ६.४१
यत्र स्त्रीणां मे. ६९
यत्र स्फटि कु. ६.४२
यत्रांशुका कु. १.१४
यत्रौषधि कु. ६.४३
यत् स लग्न र. १९.४६
यथा च वृ र. ३.६६
यथाप्रदे कु. ७.३४
यथा प्रसि कु. ५.९
यथा प्रह्वा र. ४.१२
यथाविधि र. १.३
यथा श्रुतं कु. ५.६४
यथैव श्ला कु. ६.७०
यदध्यक्ष्ये कु. ६.१७
यदमोघ कु. २.५
यदा च त कु. ५.५९
यदात्थ रा र. ३.४८
यदा फलं कु. ५.१८
यदा बुधै: कु. ५.५८
यदा यदा र. ६.६७पा.
यदुच्यते कु. ५.३६
यदुवाच र. १७.४२
यदैव पू कु. १.५३
यद् गोप्रता र. १५.१०१
यद् ब्रह्म स कु. ६.१६
यन्ता हरे: र. १२.१०३
यन्त्रप्रवा र. १६.४९
यन्मुखग्र कु. ८.९
यमात्मन: र. ६.५६
यमोऽपि वि कु. २.२३
यवनीमुख र. ४.६१
यशोभिरा र. १८.२८
यश्चाप्सरो कु. १.४
यस्मिन् महीं र. ६.७५
यस्य चेत कु. ६.१८
यस्यां यक्षा: मे. ६६
यस्यात्मगे र. ६.४७
यस्यावरोध र. ६.४८
यां सैकतो र. १३.६२
या न: प्रीति कु. ६.२१
यामिनीदि कु. ८.५५
यावत् प्रता र. ५.७१
यावदादि र. ११.३
यावदेता कु. ६.८०
यावन्नाश्या र. १७.३७
या सौराज्य र. १५.२९
युधाजित र. १५.८७
युवा युग र. ३.३४
यूपवत्य र. ११.३७
येन रोष र. ११.६४
ये संरम्भो मे. ५४
योगनिद्रा र. १०.१४
योगिनो यं कु. ६.७७
योषितामु र. १९.३४
यौवनान्तं कु. ६.४४
यौवनोन्न र. १९.९
रक्तपीत कु. ८.४५
रक्तभाव कु. ८.६५
रक्ताशोक मे. ७६
रक्षसा मृ र. १२.५३
रक्षोवधा र. १४.४१
रघुनाथो र. १५.५४
रघुपति र. १२.१०४
रघुमेव र. ८.५
रघुरश्रु र. ८.१३
रघुर्भृशं र. ३.६१
रघुवंश र. १०.६८
रघूणाम र. १.६
रघोरव र. ३.५३
रचितं र कु. ४.१८
रज:कणै: र. १.८५
रजनीति कु. ४.११
रजोभि: स्य र. ४.२९
रण: प्रव र. १२.७२
रणेऽभ्यमि र. ६.५२पा.
रतिश्रम ऋ. ४.६
रतिस्मरौ र. ७.१५
रतेर्गृही र. ६.२
रत्नच्छाया मे. १५
रथाङ्गना र. ३.२४
रथात् स य र. १४.५२
रथी निष र. ७.५६
रथो रथा र. ७.४१
रविप्रभो ऋ. १.२०
रवेर् मयू ऋ. १.१३
रसयति र. ९.३७पा.

रसातला	र. १३.८	रुद्धापाङ्ग	मे. ९३	लोहितार्क	कु. ८.७५
रसान्तरा	र. १०.१७	रुधिरोत्क्षि	र. १२.४०पा.	लौल्यमेत्य	र. १९.१९
रसायां त	र. १५.८५पा.	रूपं तदो	र. ५.३७	वंशस्थितिं	र. १८.३२
रसासवा	ऋ. ४.११	रूपे गीते	र. १५.६५	वक्रः पन्था	मे. २७
राघवान्वि	र. ११.३५	रेखामात्र	र. १.१७	वङ्गानुत्खा	र. ४.३६
राघवास्त्र	र. १२.५१	रेखाविभ	कु. ७.१८	वचसैव	र. १२.९२
राघवोऽथ	र. ११.८८	रेजतुश्च	र. ११.७पा.	वचस्यव	कु. २.५३
राघवो	र .१२.९६	रोमोद्गमः	कु. ७.७७	वत्सस्य हो	र. २.६६
राजन् प्रजा	र. १५.४७	लक्ष्मणः प्र	र. १२.३९	वत्सोत्सुका	र. २.२२
राजर्षिवं	र. १४.३७	लक्ष्मणानु	र. ११.६	वधनिर्धू	र. १२.५७
राजसत्व	र. ११.८९	लक्ष्यते स्म	र. ११.५८	वधूं द्विजः	कु. ७.८३
राजापि त	र. १२.१०	लक्ष्यीकृत	र. ९.५७	वधूर्भक्ति	र. १.९०
रात्रावना	र. १६.२०	लग्नद्विरे	कु. ३.३०,७.१६	वधूर्विधा	कु. ७.८७
रात्रिन्दिव	र. १७.४९	लघयति	र. ९.३५पा.	वनद्विपा	ऋ. २.१५
रात्रिर्गता	र. ५.६६	लङ्केश्वर	र. १३.७८	वनान्तरा	र. १.४९
रात्रिवृत्त	कु. ८.१०	लज्जा तिर	कु. १.४८	वनेचरा	कु. १.१०
राम इत्य	र. १०.६७	लतागृह	कु. ३.४१	वनेषु सा	र. १६.४७पा.
राममन्म	र. ११.२०	लताप्रता	र. २.८	वन्यवृत्ति	र. १.८८
रामं पदा	र. १२.८४	लब्धपाल	र. १९.३	वपुर्विरू	कु. ५.७२
रामस्त्वास	र. १२.२४	लब्धप्रति	कु. २.२७	वपुषा क	र. ८.३८
रामस्य म	र. १५.३४	लब्धप्रश	र. ४.१४	वयसां प्र	र. १५.२५
रामाज्ञया	र. १३.७४	लब्धान्तरा	र. १६.७	वयोरूप	र. १७.४३
रामादेशा	र. १५.९	ललाटब	र. ७.३८पा.	वयोवेष	र. १५.६७
रामोऽपि स	र. १२.२०	ललाटोद	र. १.८३	वर्गावुभौ	कु. ७.५३
रावणस्या	र. १२.९१	ललितवि	र. ९.३६	वर्णप्रक	कु. ३.२८
रावणस्व	कु. ८.२४पा.	लवणेन	र. १५.२	वर्णोदकैः	र. १६.७०
रावणाव	र. १०.४८,१२.३२	लाङ्गुलवि	कु. १.१३	वशी विवे	र. १५.३८
रुदता	कु. र. ८.८५	लिङ्गैर्मुदः	र. ७.३०	वशी सुत	र. १८.१३पा.
रुदितेन	र. ८.८५पा.	लोकान्तर	र. १.६९	वशी सुतो	र. १८.१३
रुद्धनिर्ग	कु. ८.६०,८.६०पा.	लोकेन भा	र. १८.३८	वसन् स त	र. १६.४२

वसिष्ठधे र. २.१९
वसिष्ठम र. ५.२७
वसिष्ठस्य र. १७.३८
वस्वौकसा र. १६.१०
वागर्थावि र. १.१
वाङ्मनःक र. १५.८१
वाचंयम र. १३.४४
वाच्यस्त्वया र. १४.६१
वापी चास्मिन् मे. ७४
वापिज ऋ. ६.३
वापीष्विव र. १७.६४.
वामनाश्र र. ११.२२
वामश्चास्या मे. ९४
वामेतर र. २.३१
वायव्यास्त्र र. ४.४१पा.
वारणस्व कु. ८.२६
वार्षिकं सं र. ४.१६
वासराणि कु. ८.१३
वासश्चित्रं मे. ७२
विकचक ऋ. ३.२६
विकचन ऋ. १.२४
विकीर्णस कु. ५.३७
विक्रमव्य र. १२.९३
विग्रहाच्च र. १९.३८
वितानस र. १७.२८
विदधे स र. ८.२६पा.
विदितं त र. १०.३९
विदितं वो कु. ६.२६
विद्धि चात्त र. ११.७५
विद्युत्वन्तं मे. ६३
विद्वानपि र. १५.९४
विधिना कृ कु. ४.३१
विधिप्रयु कु. ६.३२,५२
विधेः सायं र. १.५६
विधेरधि र. १५.६२
विनयन्ते र. ४.६५
विनीताध्व र. ४.६७
विन्ध्यस्य सं र. ६.६१
विन्यस्तवै कु. ७.१०
विन्यस्तशु कु. ७.१५
विपत्प्रती कु. ५.७६
विपन्नपु ऋ. २.१४
विपाण्डुरं ऋ. २.१३
विप्रोषित र. १२.११
विबुधैर कु. ४.१९
विभक्तात्मा र. १०.६५
विभवेऽपि र. ८.६९
विभावसुः र. ३.३७
विभूषण र. १६.८०
विभूषणो कु. ५.७८
विमुच्य सा कु. ५.८
विरक्तस र. १३.६४
विरचिता र. ९.२९
विरोधिस कु. ५.१७
विलपन्नि र. ८.७०
विललाप र. ८.४३
विलासिनी र. ६.१७
विलुप्तम र. १६.५९
विलोचनं कु. ७.५९
विलोचनं र. ७.८
विलोचने ऋ. २.१२
विलोलने ऋ. २.९
विवक्षता कु. ५.८१
विवस्वता ऋ. १.१४
विविशुस्तं र. ४.७०पा.
विवृण्वती कु. ३.६८
विशदच र. ९.३७पा.
विशश्रमु र. ४.७४
विशाम्पति र. ४.७०पा.
विशीर्णत र. १६.११
विशुष्कक ऋ. १.१६
विशेषका ऋ. १.१पा.
विशेषसू ऋ. १.१पा.
विश्रान्तः सन् मे. २६
विश्वावसु कु. ७.४८
विषादलु र. ३.४०
विसृष्टपा र. २.९
विसृष्टरा कु. ५.११
विस्तीर्णत र. १६.११पा.
विस्रस्तमं र. ६.१४
विहरति र. ९.३७पा.
विहिते पि र. १२.१३पा.
वीक्ष्य वेदि र. ११.२५
वीचिक्षोभ मे. २८
वीचिलोल र. ११.८
वीज्यते स कु. २.४२
वीरासनै र. १३.५२
वृक्षेशया र. १६.१४
वृतं तेने कु. २.५६
वृत्तं राम र. १५.६४

वृत्तानुपू कु. १.३५
वृन्तश्लथं र. ५.६९
वेणीभूत मे. २९
वेणुना द र. १९.३५
वेलानिलाय र. १३.१२
वेलानिलः र. १३.१६
वेश्मानि रा र. १४.१५
वैदर्भिनि र. ६.३
वैदेहि! प र. १३.२
वैमानिका र. १०.४६
वैवस्वतो र. १.११
वैवाहिकीं कु. ६.९३
वैवाहिकैः कु. ७.२
व्याघ्रानभी र. ९.६३
व्यादिदेश र. ११.४३
व्यावृत्तग कु. २.३५
व्याहृता प्र कु. ८.२
व्यूढोरस्को र. १.१३
व्यूहावुभौ र. ७.५४
व्यूह्य स्थितः र. १८.५१
व्योम क्वचिद् ऋ. ३.४
व्योम पश्चि र. १९.५१
व्रणगुरु र. ९.३२
व्रताय ते र. २.४
शक्यमङ्गु कु. ८.७२
शक्यमोष कु. ८.६२
शक्येष्वेवा र. १७.५६
शङ्खस्वना र. ७.६४
शङ्खान्तर कु. ७.३३
शतैस्तम र. ३.४३
शत्रुघाति र. १५.३६
शब्दाख्येयं मे. १०१
शब्दादिनि र. १८.३
शब्दादीन् वि र. १०.२५
शब्दायन्ते मे. ५६
शमितप र. ९.१२
शय्यागते र. १०.६९
शय्यां जह र. ५.७२
शरदि कु ऋ. ३.२२
शरीरमा र. ५.१५
शरीरसा र. ३.२
शरैरुत्स र. ४.७८
शशंस तु र. ४.७२
शशाम वृ र. २.१४
शशिनमु र. ६.८५
शशिनं पु र. ८.५६
शशिना स कु. ४.३३
शापान्तो मे मे. १०८
शापोऽप्यदृ र. ९.८०
शिखरास कु. ६.४०
शिरसा प्र कु. ४.१७
शिरसि ब ऋ. २.२४
शिरीषपु कु. १.४१,
र. १८.४५
शिरोरुहै ऋ. २.१८
शिलाशयां कु. ५.२५
शिलीमुखो र. ७.४९
शिष्यतां नि कु. ८.१७
शुचौ चतु कु. ५.२०
शुशुभिरे र. ९.३७
शुशुभे ते र. १७.२९
शूलिनः क कु. ८.७
शेफालिका ऋ. ३.१४
शेषान् मासान् मे. ८५
शैलः संपू कु. ६.८५
शैलात्मजा कु. ३.७५
शैलोपमः र. ५.४६
शैशवेऽभ्य र. १.५
शोचनीया र. १५.४३
श्मश्रुप्रवृ र. १३.७१
श्यामा लताः ऋ. ३.१८
श्यामास्वङ्गं मे. १०२
श्येनपक्ष र. ११.५९
श्रियः पद्म र. १०.८
श्रुतदेह र. ८.२५
श्रुतस्य या र. ३.२१
श्रुताप्सरो कु. ३.४०
श्रुतिसुख र. ९.३५
श्रुत्वा तथा र. १२.१३
श्रुत्वा तस्य र. १५.४४
श्रुत्वा रामः र. १२.६६
श्रेणीबन्धाद् र. १.४१
श्रोत्राभिरा र. २.७२
श्लाघ्यस्त्यागो र. १५.६१
श्वगणिवा र. ९.५३
श्वसिति ऋ. १.२३
श्वश्रूजनं र. १४.१३,६०
संयुगे सां कु. २.५७
संरम्भं मै र. १२.३६
संरुद्धचे र. २.४३

संहारवि र. ५.४५
स एवमु र. ३.५२
स कदाचि र. ८.३२
स किंवद र. १४.३१
स किल सं र. ९.१९
स किलाश्र र. ८.१४
स कीचकै र. २.१२
स कुलोचि र. १७.५
स कृत्तिवा कु. १.५४
स क्षेमध र. १८.९
सखा दश र. १५.३१
सखी तदी कु. ५.५२
स गत्वा स र. १५.९५
स गुणानां र. १७.६७
स गुप्तमू र. ४.२६
स गोपतिं कु. ७.३७
संक्षिप्येत मे. १०६
संगमाय र. १९.३३
संग्रामनि र. ६.३८
संग्रामस्तु र. ४.६२
स चतुर्धा र. १०.८४
सचन्दना ऋ. १.८
स च प्राप र. १५.१५
स चानुनी र. ५.५४
स चापको र. ७.६६
स चापमु र. ३.६०
स च्छिन्नब र. ५.४९
सच्छिन्नमू र. ७.४३
स जहार र. १२.२९
स जातक र. ३.१८
सञ्चारपू र. २.१५
सञ्चारिणी र. ६.६७
स तक्षपु र. १५.८९
स तत्र म र. ६.१,
र. ६.१पा.
स तथेति कु. ६.३,
र. ८.९१
स तद्वक्त्रं र. १५.५२
स तावद र. १७.१७
स तावाख्या र. १५.७१
स तीरभू र. १६.५५
स तीर्त्वा क र. ४.३८
स तेजो वै र. १०.५४
स ते दुहि कु. ६.७८
स तेन पु र. १८.२पा.
सतोयन ऋ. २.१६
स तौ कुश र. १५.३२
सत्यमर्का कु. ६.१९
सत्यामपि र. १.९४
सत्रान्ते स र. ४.८७
स त्वनेक र. १९.५३
स त्वं निव र. २.४०
स त्वमेका र. १.८१
स त्वं प्रश र. ५.२५
स त्वं मदी र. २.४५
स दक्षिणं र. ७.५७पा.
स दक्षिणा कु. ३.७०
स ददर्श र. १५.३९
सदयं बु र. ८.७
सदा मनो ऋ. २.६
स दुष्प्राप र. १.४८
स देवदा कु. ३.४४
सद्यः प्रवा कु. ३.२७
स द्विनेत्रो कु. २.३०
स धर्मस्थ र. १७.३९
स धातुभे र. १६.३२
स नन्दिनी र. २.६९
स नर्मदा र. ५.४२
स नादं मे र. १२.७९
स निनाय र. ८.४१
स निर्विश्य र. ४.५१
स निवेश्य र. १५.९७
स नैषध र. १८.१
स नौविमा र. १६.६८
सन्तप्तानां मे. ७
सन्तस्तस्या र. १७.७२
सन्तानक कु. ६.४६,
र. १०.७७
सन्तानका कु. ७.३,
र. २.६५
सन्तानश्र र. १५.१४
सन्तानाय र. १९.५७पा.
सन्तानार्था र. १.३४
सन्दष्टव र. १६.६५
सन्ध्ययाप्य कु. ८.४४
सन्ध्याभ्रक र. १२.२८
स न्यस्तचि र. २.७
स पत्रले ऋ. ६.७
सपदि मु कु. ३.७६
स परार्ध्य र. ८.२७

स पल्वलो	र. २.१७
स पाटला	र. २.२९
स पितुः पि	र. १७.२
स पुरं पु	र. १७.३२
स पूर्वज	र. १८.५०
स पूर्वजा	र. १६.३४
स पूर्वतः	र. ३.४२
स पृष्टः स	र. १५.४१
स पौरका	र. १४.२४
सप्तच्छद	र. ५.४८
सप्तर्षिह	कु. १.१६
सप्तसामो	र. १०.२१
स प्रजाग	कु. ८.८८
स प्रतस्थे	र. १२.६७
स प्रतापं	र. ४.३९
स प्रापद	कु. ७.५०
स प्राप हृ	र. १२.६५
स प्रियामु	कु. ८.९०
स प्रीतियो	कु. ७.५५
स्फेनला	ऋ. १.२१
स बभूव्	र. ८.४
स भाजना	र. १४.१८
स भोगिभो	र. ५.४५पा.
समतया	र. ९.६
समदिव	कु ८.९१
समदुःख	र. ८.६५
सममाप	र. १०.५९
सममेव	र. ४.४,८.३८पा.
समयुज्य	र. ८.१९पा.
स माधवे	कु. ३.२३
स मानसीं	कु. १.१८
समानेऽपि	र. १०.८१
समाप्तवि	र. ५.२०
स मारुति	र. १२.७८
समीक्ष्य पु	र. ३.१६पा.
समुद्गत	ऋ. १.७
समुद्धृता	ऋ. १.१९
समुद्रप	र. १३.५८
स मुहूर्त्तं	र. १५.४५
स मृन्मये	र. ५.२
समेयिवान्	र. ९.८१पा.
सम्पत्स्यते	कु. २.५४
सम्पन्नशा	ऋ. ३.१६
सम्बन्धमा	र. २.५८
सम्भावित	कु. ३.६
सम्भाव्य	भ र. ६.५०
संभूत्यर्थं	र. १९.५७पा.
संमोचितः	र. ५.५६
संमोहनं	र. ५.५७
समौलर	र. १४. ११,१४.११पा.
सम्यग्विनी	र. ८.९४
स ययौ प्र	र. ४.२८
सरलास	र. ४.७५
सरसीष्व	र. १.४३
स राजक	र. १७.२७
स राजलो	र. ७.३१
स राज्यं गु	र. ४.१
स रावण	र. १२.५५
सरितः	कु र. ४. २४
सरित्समु	र. १४.८
स रोषद	र. ७.५८
सर्गशेष	कु. ६.९
सर्पस्येव	र. १७.६३
सर्वं सखे!	कु. ३.१२
सर्वज्ञस्त्व	र. १०.२०
सर्वत्र नो	र. ५.१३
सर्वातिरि	र. १.१४
सर्वाभिः स	कु. २.३४
सर्वासु मा	र. १४.२२
सर्वैर्बला	र. ७.५९
सर्वोपमा	कु. १.४९
स लक्ष्मणं	र. १४.४४
स ललित	र. ९.७०
स वासवे	कु. ३.२
स विद्रुमा	र. ५.५१
स विभुर्वि	र. १५.१०२
स विभ्रमैः	ऋ. १.१२
स विवेश	र. ८.७४
स विश्वजि	र. ४.८६
स विसृष्ट	र. १२.१८
स वृत्तचू	र. ३.२८
स वेलाव	र. १.३०
स व्यबुध्य	कु. ८.८५
सव्यापारा	मे. ८६
स शापो न	र. १.७८
स शुश्रुवान्	र. १४.४६
स शोणितैः	र. ७.६५

ससञ्जुर र. ४.४७
ससत्त्वमा र. १३.१०
स सन्निपा र. १४.३६
ससीकरा ऋ. २.१
स सीताल र. १२.९
स सेतुं ब र. १२.७०
स सेनां म र. ४.३२
स सैन्य र. ४.४५
ससैन्यश्चा र. १२.१४
सस्वजे प्रि कु. ८.१४
स स्वयं च र. १९.२६
स स्वयं प्र र. १९.१४
स हत्वा ल र. १५.२६
स हत्वा वा र. १२.५८
स हि देव कु. २.५८
स हि प्रथ र. १२.१६
स हि सर्व र. ४.८
सा किलाश्वा र. १२.५
सा केतुमा र. १६.२६
साक्षाद् दृष्टो कु. ६.२२
सा गौरसि कु. ७.७
साङ्गं च वे र. १५.३३
सा चूर्णगौ र. ६.८३
सातिरेक र. १९.१२
सा तीरसो र. १६.५६
सा दष्टनी र. १४.२८
सा दुर्निमि र. १४.५०
सा दुष्प्रध र. २.२७
साधयाम्य र. ११.९०
सा नीयमा र. १४.४८
सानुप्लव र. १३.७५
सान्ध्यम कु. ८.५४
सान्निध्ययो र. ७.३
सा पौरान् पौ र. १२.३
सा बाणव र. १२.५०
सा भूधरा कु. १.२२
सा मङ्गल कु. ७.११
सा मन्दुरा र. १६.४१
सामभिः स कु. ८.४१
सा यूनि त र. ६.८१
सा राजहं कु. १.३४
सा लाजधू कु. ७.८१
सा लुप्तसं र. १४.५६
सा वक्रन र. १२.४१
सा शूरसे र. ६.४५
सा संन्यस्ता मे. ९१
सा संभव कु. ७.२१
सा साधुसा र. १६.५
सा सीताम र. १५.८४
सा सीतास र. १२.३३
साऽहं तपः र. १४.६६
सा हि प्रण र. १०.५७
सिंहकेस कु. ८.४६
सितेषु ह ऋ. १.९
सीकरव्य कु. ८.३१
सीतां हित्वा र. १४.८७
सीता तमु र. १४.५९
सुखश्रवा र. ३.१९
सुगन्धिनि ऋ. ५.१०,
कु. ३.५६
सुते शिशा र. १८.३५
सुतो लक्ष्म र. १०.७१
सुभद्रमु ऋ. १.१८
सुरगज र. १०.८६
सुरतश्र र. ८.५२
सुरभिस र. ९.३१
सुराः सम कु. ३.२०
सुरेन्द्रमा र. ३.११
सुवदना र. ९.३०
सुवासितं ऋ. १.३
सेकान्ते मु र. १.५१
सेनानिवे र. ७.२
सेना परि र. १.१९
सेयं मदी र. १३.६३
सेयं स्वदे र. २.५५
सेव्यमानौ र. १.३८
सैकतं च र. १९.४०
सैषा स्थली र. १३.२३
सोऽधिकार र. १९.४
सोऽनुमान्य कु. ८.२१
सोन्मादहं ऋ. ३.११
सोऽपश्यत् र. १.७४
सोपानमा र. १६.१५
सोऽभिगम्य र. ११.१पा.
सोऽयमान कु. ८.४२
सोऽस्त्रमुग्र र. ११.२८
सोऽस्त्रव्र र. ७.६०
सोऽहं सप र. ५.२२
सोऽहं तृष्णा कु. ६.२७
सोऽहं दाश र. १०.४४

सोऽहमाज र. १.२
सोऽहमिज्या र. १.६८
सौमित्रिणा र. १३.३, १४.१०
सौमित्रेर्नि र. १५.२०
स्तनन्धय कु. ७.५८पा.
स्तनेषु हा ऋ. ६.६
स्तम्भेषु यो र. १६.१७
स्तूयमानः र. १७.१५,७३
स्त्रीणां निधा ऋ. ३.२५
स्त्रीपुंसावा कु. २.७
स्थाणुदग्ध र. ११.१३
स्थानमाह्वि कु. ८.३३
स्थाने तपो कु. ७.६५
स्थाने त्वां कु. ६.६७
स्थाने भवा र. ५.१६
स्थाने वृता र. ७.१३
स्थितः स्थिता र. २.६
स्थिताः क्षणं कु. ५.२४
स्थित्यै दण्ड र. १.२५
स्थित्वा त मे. १९
स्नात्वा यथा र. १६.७३
स्नानार्द्रमु र. १६.५०
स्निग्धगम्भी र. १.३६
स्फुटकुमु ऋ. ३.२१
स्फुरत्प्रभा र. १४.१४
स्फुरितको र. ९.१२पा.
स्मरतेव र. ८.६३
स्मरसि स्म कु. ४.८
स्मरस्तथा कु. ३.५१
स्रागियं य र. ८.४६
स्रष्टुर्वरा र. १०.४२
स्रस्तां नित कु. ३.५५
स्वकालप कु. २.८
स्वं निवेश्य र. ११.९०पा.
स्वप्नकीर्त्ति र. १९.२२
स्वयंविशी कु. ५.२८
स्वरसंस्का र. १५.७६
स्वरेण त कु. १.४५
स्वर्गामिन र. १८.३६
स्वशरीर र. ८.८९
स्वसुर्विद र. ६.६६
स्वागतं स्वा कु. २.१८
स्वाभाविकं र. १०.७९
स्वासिधारा र. १०.४१
स्नेहानुवि र. १६.४८
स्वेदाम्बुना र. ३.४०पा.
हंसश्रेणी र. ४.१९
हंसैर्जिता ऋ. ३.१७
हरस्तु कि कु. ३.६७
हरिताऽरुण कु. ४.१४
हरिर्यथै र. ३.४९
हरेः कुमा र. ३.५५
हविर्भुजा र. १३.४१
हविराव र. १.६२
हविश्शमी र. ७.२६
हविषे दी र. १.८०
हस्तेन ह र. ७.२१
हस्ते लीला मे. ६४
हा तातेति र. ९.७५
हाराँस्ताराँ मे. ३३पा.
हारैः सच ऋ. ३.२०
हित्वा तस्मिन् मे. ६०
हित्वा हाला मे. ४९
हित्वाऽथ भो र. १८.१९पा.
हिमविव र. ९.२५पा.
हिमव्यपा कु. ३.३३
हीनान्यनु र. १७.५८
हुतहुता र. ९.४०
हुताग्निक ऋ. १.१७
हृदयस्थ र. १०.१९
हृदये व कु. ४.९
हृष्टापि सा र. ७.६९
हेमताम कु. ८.२६
हेमपत्र र. १०.६१
हेमंपात्र र. १०.५१
हेमाम्भोज मे. ६१पा.
हैयङ्गवीन र. १.४५
ह्रीमानभूद् कु. ७.५४
ह्रेपिता हि र. ११.४०

***

127150

कालिदासकाव्येषु छन्दोवृत्तानि कालिदासग्रन्थावल्याः नाट्यखण्डान्तर्गततृतीयपरिशिष्टे दृश्यानि।

चित्र परिचय

प्रथमभाग

१ आवरण पृष्ठ-१	महाकवि कालिदास, कालिदास अकादमी, उज्जैन में स्थापित प्रतिमा
२ आवरण पृष्ठ-२ अन्त	कालिदास अकादमी, उज्जैन का भवन
३ ब्राह्मी लिपि में	कालिदास रघुवंश १.१-४ पद्य
४ रघुवंश २.५ पाण्डु ग्रन्थ क्र. ५२०	Wellcome Trust, London
५ रघुवंश २.५ पाण्डु ग्रन्थ क्र. ५२०	अव्याहतस्वैरगतेः
६ रघुवंश २.१२	पुष्पगन्धी Wellcome Trust, London
७ कुमारसम्भव २.५१	विभो सृष्ट HL, हार्वर्ड वि.वि. USA, Ms. No. २११४
८ कुमारसम्भव २.५१	बिभोर्मृष्टं हार्वर्ड वि.वि. Ms.No.८३३
९ रघुवंश ५.४	चैतन्यमुग्रादिव दीक्षितेन. ९१६
१० रघुवंश ५.४	चैतन्यमुग्रादिव दीक्षितेन. २४१
११ रघुवंश ५.४	चैतन्यमुग्रादिव दीक्षितेन. ९१८
१२ ऋतुसंहार १.१	विशेषसूर्य Harvard Univ. USA. ३१३
१३ पृष्ठ ४८	रघुदिग्विजयमार्ग
१४ पृष्ठ १९६	अयोध्याप्रत्यावर्तन-मार्ग
१५ पृष्ठ मेघदूत का आरम्भ	मेघमार्ग

द्वितीय भाग

१ आवरण पृष्ठ-१	महाकवि कालिदास, कालिदास अकादमी, उज्जैन में स्थापित प्रतिमा
२ आवरण पृष्ठ-२ अन्तिम्	कालिदास अकादमी, उज्जैन का भवन
३ ब्राह्मीलिपि में कालिदास	कालिदासंस्थान, वाराणसी
४ मालविकाग्निमित्रम्	हार्वर्ड विश्वविद्यालय अमेरिका में रक्षित क्र. १३२३ प्रथम पृष्ठ
५ विक्रमोर्वशीय	फिलाडेल्फिया, अमेरिका में रक्षित क्र. ५२३ प्रथम पृष्ठ

६	विक्रमोर्वशीय	फिलाडेल्फिया, अमेरिका में रक्षित क्र. ५२३ चतुर्थ अङ्क
७	विक्रमोर्वशीय	भारत कला भवन, काशी हिन्दू विश्वविद्यालय क्र. ३९४७
८	विक्रमोर्वशीय	भारत कला भवन, काशी हिन्दू विश्वविद्यालय क्र. ३९५०
९	अभिज्ञानशाकुन्तल	एशियाटिक सोसायटी, कलकत्ता, क्र.-३४० विक्रमादित्य साहसाङ्क का उल्लेख
१०	अभिज्ञानशाकुन्तल	हार्वर्ड विश्वविद्यालय क्र. १०८६ 'विक्रमादित्य साहसाङ्क' उल्लेख
११	अभिज्ञानशाकुन्तल	द्वितीय: प्रवेशक: ल.द. संस्थान, अहमदाबाद क्र. १९४८

शुद्धिपत्र

सन्दर्भ	मुद्रित	मुद्रणीय
प्रथम भाग पृ. ८	दक्षक	दशक
सर्ग ११.०७	रघुराघवा	मधुमाघवा
द्वितीय भाग पृ. ५ पद्य ११	शाकुन्तमि	शाकुन्तलमि
पृ. ९	ऋभिज्ञान	अभिज्ञान

GURUKUL KANGRI LIBRARY
Date
Ac. V. Kumar 23/10/09
Cl. 6/11/09
E.A.R. 3
Any others
Checked

DONATION

22/10/09

प्रधानसंपादक **डॉ. मिथिलाप्रसाद त्रिपाठी** उज्जयिनी की कालिदाससंस्कृतअकादमी के सक्षम निदेशक हैं। वे संस्कृत के महाकवि और परम्परागत अनुशासन के विज्ञ विद्वान् हैं। सम्पादकद्वय में महामहोपाध्याय **प्रो. रेवाप्रसाद द्विवेदी** सम्प्रति काशीहिन्दूविश्वविद्यालय में संस्कृत के सम्मानित आचार्य (Professor Emeritus) हैं। काव्यशास्त्र और कालिदास साहित्य आप के मुख्य विषय हैं। काव्यशास्त्र के क्षेत्र में आपने ही **नाट्यशास्त्र** (काव्यलक्षणखण्ड) वर्ष २००५ में तथा पहली बार भोजराज का **शृङ्गारप्रकाश** वर्ष२००७ में व्यवस्थित रूप में सम्पादित कर प्रकाशित कराया है। इस शास्त्र पर आपके मौलिक ग्रन्थ **काव्यालङ्कारकारिका** तथा **अलं ब्रह्म** इस शताब्दी की सर्वाधिक महत्त्वपूर्ण मौलिक कृतियाँ हैं। कालिदाससाहित्य का संशोधित मूलपाठ आपकी महत्वपूर्ण देन है जो **कालिदासग्रन्थावली** के रूप में पहले १९७६ में और पुनः १९८६ में प्रकाशित हो चुकी है। आप ही ने हेमाद्रिकृत **रघुवंशदर्पण** पहली बार सम्पादित कर १९७३ में प्रकाशित कराया। सम्पूर्ण कालिदास साहित्य के इस संस्करण का हिन्दी अनुवाद भी आपने किया है। आप संस्कृत के सर्वोच्च 'राष्ट्रपति पुरस्कार', 'श्रीवाणी अलंकरण', 'विश्वभारती' 'वाचस्पति' तथा 'साहित्यअकादमी' पुरस्कारों से पुरस्कृत हैं हीं, कालिदास संस्कृत अकादमी ने वर्ष २००७ में आपको **रत्नसदस्य** घोषित किया है। **डॉ. सदाशिवकुमार द्विवेदी** संस्कृतविभाग, कलासंकाय, काशीहिन्दूविश्वविद्यालय में रीडर पद पर कार्यरत हैं। आपको ही श्रेय है इस संस्करण को कम्प्यूटर में सुरक्षित करने का। इसके अतिरिक्त इन्हीं ने किया है प्रस्तुत संस्करण की प्रत्येक पंक्ति का परीक्षण। आपका संस्कृत,हिन्दी और अंग्रेजी पर समान अधिकार है। आपने कुमारसंभव के पाण्डुग्रन्थों पर रचित ग्रन्थ पर पीएच्.डी. उपाधि वर्ष १९९२ में काशीहिन्दूविश्वविद्यालय से प्राप्त की जो संपूर्णानन्द संस्कृत विश्वविद्यालय से वर्ष२००७ में प्रकाशित भी है। **शृङ्गारप्रकाश** में आप सहायक सम्पादक हैं। आप २००७ में उज्जयिनी के विक्रम विश्वविद्यालय के **विक्रम कालिदास पुरस्कार** से पुरस्कृत हैं।

कालिदासग्रन्थावली

र
0८१
सिधि-क

प्रथमो भागः